॥ श्रीः ॥

श्रीमल्लक्ष्मीवेङ्कटेशाभ्यां नमः

विषमपदवाक्यवृत्तिः ।

श्रीमन्महामहोपाध्याय नागोजीभट्टविरचित
लघुशब्देन्दुशेखरव्याख्या

पदवाक्यप्रमाणपारावारीण राघवेन्द्राचार्यविरचिता

वज्रटङ्कोपाह्वश्रीयुत नारायणशास्त्रिणा संशोधिता ।

श्रीकाश्यां

राजराजेश्वरीनाम्नि मुद्रणालये
मुद्रयित्वा प्राकाश्यं
नीता ।

सं० १९४८ ज्ये० शु० २ सोमे

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

सुरासुरासेवितपादपङ्कजा ।
करे विराजत्कमनीयपुस्तका ।
विधेश्च पत्नी कमलासनप्रिया
सरस्वती नृत्यतु वाचि मे सदा ॥ १ ॥

॥ श्रीः ॥

श्रीगुरुचरणसरोजेभ्योनमः ॥

प्रसिध्यति किल वेदमुखतया परमपवित्रभूतं निखिलभारतवर्षप्रचलितं शेषतो विद्यापीठेषु वाराणस्यादिमान्यस्थलेषु पठनपाठनगोचरीभूतं पाणि व्याकरणं नाम शास्त्रं सर्वत्र । तत्र भवता पाणिनिमुनिना कृताङ्कुर पणे महर्षिकात्यायनेन विरचितपल्लवे पूज्यपादपतञ्जलिना दृढीकृत ऽत्र शाखिनि समारुरुक्षूणां तत्फलास्वादरसिकानां सुखसमारोहणाय व्यर सोपानपरम्परा इव नानाविधाः प्रबन्धाः लोकोत्तरधिषणैर्मान्यैर्मनीषिभिर्येष्व श्रीमन्महामहोपाध्यायनागेशभट्टोपनिबद्धो लघुशब्देन्दुशेखरः समाद्रियते तया सर्वैस्तत्रापि च समासादयाति कारकान्तो भागो मध्यमणिताम् । कुशा धिनिर्ग्राह्यस्यास्य साधारणजनदुरवगाहतां पर्यालोच्य बहुभिर्विद्वद्वरैर्विरचिते षु व्याख्यानेषु विषमस्थले प्रदीपकल्पः श्रीमता विद्वत्कुलमौलिमालायितेन वेन्द्राचार्येण विरचितो विषमीनामकोऽयं ग्रन्थोऽतीव पठनपाठनोपकारीति । शिलाक्षरैः पूर्वं मुद्रितोप्ययमजन्तस्त्रीलिङ्गाजन्तनपुंसककारकप्रकरणैर्विरहित लं साकल्येन संतोषजननाय सुधियामिति साकल्येन कारकान्तं भागं मुद्रयितुं त्साहो ऽन्विष्यान्विष्य दुर्लभानि तानि प्रकरणानि सांप्रतं "सातारा" नाम क्षिणदेशनगरे मान्यवरगजेन्द्रगडकरोपाह्व श्रीमदनन्ताचार्यबुधवरसकाशाद्वा कि चिद्विकलं कारकान्तं भागं वजूटङ्कोपाह्वनारायणशास्त्रिभिः कृतसंशोधं च्छतामभिलष्यतां जनानां संतोषाय सीसकाक्षरैर्मुद्रयित्वा प्रकाशितवानस्मि। च सकलहृदयेशवर्तिनं भगवन्तं श्रीविश्वेश्वरं विदुषामत्र प्ररोचनोत्पादनेन मा परिश्रमं सफलयितुमिति शम् ॥

श्रीकाश्याम् ।

ज्ये० शु० २ सोमे

सं० १९४८

द्राविडवीरेश्वरशा।

श्रीगणेशायनमः ॥

ब्रह्मेशाद्यैः सुरवरगणैः स्तूयमानोऽप्यपारो
व्यक्ताव्यक्ते सृजति भरति प्रापयत्युच्चभावम् ॥
यद्भ्रूभङ्गात्सृजति भुवनं ब्रह्मरुद्रादि सा श्री
र्वक्षःश्लिष्टा जयति स विभुः श्रीनिवासो वृषाद्रौ ॥ १ ॥
आत्रेयवंशविधुना सकलकलापारदृश्वना सुधिया ॥
श्रीराघवेन्द्रगुरुणा क्रियते शब्देन्दुशेखरव्याख्या ॥ २ ॥
नवयुक्तिगुम्फिततया प्रौढां तां चन्द्रिकां तु संक्षिप्य ।
विषमपदवाक्यविवृतिं कुर्वे ऽहं बालबोधाय ॥३॥

पातञ्जलइत्यादि श्लोकत्रयमेकान्वयम् । सतीं दीव्यतीति विग्रहः । कक्षः शुष्क-
ाननम् । कक्षस्तु दोर्मूले शुष्ककानने इत्यभिधानम् । मनोरमोमार्धदेहमिति । तेन
ोरमोक्तार्थाप्रकाशनम् । मनोरमायाः क्वचिद् गुणत्वं सूचितं भवति । समुचितेति ।
ं चैतच्छास्त्रप्रवर्तकसंबन्धित्वात् । तिरस्कृत्येत्यर्थइति । निवृत्तप्रेषणात्धातोर्हेतुम-
ाजिति भावः । वृत्तिपरिच्छेदकत्वेनेति । शक्तिग्राहकत्वेनेत्यर्थः । स्वरसंन्धिस्तु
र्वर्त्तते । वर्णोपदेशकाले ऽजादिसञ्ज्ञानामनिष्पादादिति कैयटोक्तं तु नयु-
म् । तदुपदेशकाले ऽजादिसञ्ज्ञानामनिष्पादेपि सवर्णसञ्ज्ञादिफलस्य दीर्घादेस्तु-
यास्यसूत्रादाविव स्वरसन्धेरत्र प्रवृत्तौ बाधकाभावात् इति दीक्षितोक्तं दूषणमुद्दि-
र्षुणा रत्नकोशकारेणोक्तः कैयटग्रन्थ उपजीव्यविरोधात्सन्धिर्नेत्यर्थकतया व्याख्या-
स्तद् दूषयितुमनुवदति । यत्त्विति । तथाचाविकृताकारश्रवणमुपजीव्य जातशक्ति-
हणउपजीव्याविकृतश्रवणविरोधिसन्धिकार्यं न जनयतीति भावः । शक्त्यग्रहेणेति ।
दमयुक्तम् । नह्यकारादिषु शक्तिग्रहमुपजीव्य प्रवर्तमानं सन्धिकार्यमर्थान्तरे श-
क्तिग्रहजननद्वारा स्वोपजीव्यशक्तिग्रहं न विहन्तीति रत्नकोशग्रन्थार्थः । किं तूक्तरात्याऽ-
विकृताकारादिश्रवणमुपजीव्य जातः शक्तिग्रहः स्वोपजीव्याविकृताकारादिश्रवणं न वि-
न्तीति । तथा च त्वद्दूषणमपरात्विषोर्धानुष्कस्य कण्ठाडम्बरमनुकरोति । अकारादिषु-
क्तिनिश्चयमुपजीव्य प्रवर्तमानं सन्धिकार्यमुक्तनिश्चयविरोधिसन्देहाधायकतया न

सन्धिकार्यं प्रवर्तयतीत्याशङ्कते । नचेति । आम्नायशब्दो दृष्टान्तार्थः । अनुबन्धानां महेश्वरकृतत्वे तत्प्रत्याख्यानासङ्गतिमाशङ्क्य समाधत्ते । न्मङणनमिति । प्रत्याख्यानभाष्यस्य दृष्टार्थकत्वखण्डनपरत्वे वृद्धिसूत्रस्थभाष्यासङ्गतिमाशङ्क्य समाधत्ते । वृद्धिसूत्रस्थेति । अतएवेति । चतुर्दशसूत्र्या वेदत्वादेवेत्यर्थः । शरीरीति । अनेनाशरीरेणेश्वरेण वेदः कृत इति लभ्यते । इदन्तु न युक्तम् । तस्य पौरुषेयत्वात् । अस्य महतो भूतस्य निःश्वसितमिति श्रुतेश्च । अनायासेनोच्चारितार्थकत्वात् । विमर्शे विचारे क्रियमाणे शिवादागतमेवैतत्सूत्रजालं न तु ढक्कानिनाद एव । अन्त्या वर्णाश्चतुर्दश यत्र समुदाये इति विग्रहः । अजिति योगविभागादच् । यद्वा चतुर्दशानां पूरणाश्चतुर्दशाः सर्वेषामप्यविशेषेण तथात्वात् । विग्रहस्तु पूर्ववत् । अन्त्यमित्यस्यासमस्तत्वेन्त्यभूतश्चतुर्दशवर्णसमुदाय इत्यर्थः । तत्करणञ्चेति । अन्ये त्वनुबन्धाः पाणिनिकृता एव । सम्रुपादिष्टमित्यस्यैवमनुबन्धा आसक्तव्या इति महेश्वरेणोपदिष्टमित्यर्थ इत्याहुः । ननूपदेशपदस्यादेच उपदेशे इत्यादौ पाणिनीयापूर्वोच्चारणार्थकत्वमिव महेश्वरीयापूर्वोच्चारणार्थकत्वं तथाच तन्निमित्तत्वं प्राप्तमित्यत आह मन्त्रोपदेशवदिति । नहि मन्त्र उपदेष्टृनिर्मित इति भावः । अतएवेति । महेश्वरकर्तृकत्वाभावादेवेत्यर्थः । इदं चिन्त्यम् । श्रीबादरायणकर्तृकस्यापि भारतादेः सर्ववेदपारायणजपुण्यफलकत्वोक्तेः । ननु हल्प्रत्याहारसिद्धेः प्राक् उपदेशे ऽजित्यस्य वाक्यार्थबोधाभावे ऽप्यण्प्रत्याहारकाले लणित्यकारस्येत्सञ्ज्ञालोपाभ्यामपहारसम्भवेनाक्षरसमाम्नायिकानामेव ग्राहकशास्त्रे ऽण्पदेन ग्रहणेन सानुनासिकाकारस्यानणत्वात्तेन दीर्घसानुनासिकग्रहणं न संभवतीत्याशङ्क्याह । जातिग्रहणस्येति । मामिति । आनिति अशब्दस्य द्वितीयाबहुवचनम् । तस्य नश्छव्यप्रशानिति रुत्वे आँ इति रूपम् । यद्यपि जातिपक्षे निरनुनासिकाकारस्यापि हल्त्वं सुवचं तथापि सानुनासिकोच्चारणबलात्सानुनासिकस्यैवाच्त्वजात्यवच्छिन्नस्य हल्त्वमित्यभिप्रेत्य सानुनासिकाकारे रुत्त्वमापादितं वस्तुत आनुनासिक्यगुणस्येत्सञ्ज्ञार्थतया कृतार्थत्वान्निरनुनासिकस्यापि हल्त्वेन ग्रहणमित्याह ॥ सोस्तीति ॥ केचित्तु हलन्त्यमित्यत्र हल्पदेन सानुनासिकाकारग्रहणसंभवेपि मोनुस्वार इत्यत्र हल्पदेन न तस्य ग्रहणं ततः पूर्वमुपदेशेऽजित्यस्य वाक्यार्थसंभवे इत्संज्ञालोपाभ्यां तदपहारात् ॥ नाज्झलावणुदिदित्यनयोः सूत्रयोरजणपदाभ्यामाक्षरसमाम्नायिकानामेव ग्रहणे ऽप्यन्यत्र दीर्घादीनामपि ग्रहणवदेतेन वलप्रत्याहारे

ऽप्यकारस्य ग्रहणापत्तौ अयत इत्यादौ लोपोव्योरिति लोपापत्तिः परास्तेत्याहुः । अतए-
वेति । लण्सूत्रस्थाकारस्येत्संज्ञालोपयोरनङ्गीकारेण "लोपश्चब लवत्तरइति" तृतीयहे-
त्वविषयत्वादेवेत्यर्थः । अप्रधानत्वादिति । द्वितीयहेतोरव्यापकतामाशङ्कते । नचेति ।
पुनःपुनरिति । न पुनरन्तरेणाचं व्यजञ्नस्योच्चारणमपि भवतीति भाष्योक्तन्यायेन
पुनः पुनरकारोच्चारणसार्थक्यादयुक्तमेतत् । हश्प्रत्याहारे तु न टकारग्रहणम् । यत्तुल्य-
जातीयाँस्तुल्यजातीयेषूपदिशति इति भाष्यस्यान्तःस्थानामन्तःस्थेषु पञ्चमानां पञ्चमेषु
चतुर्थानां चतुर्थेषु तृतीयानां तृतीयेषु द्वितीयानां द्वितीयेषु प्रथमानां प्रथमेषूष्मणा-
मूष्मसूपदेशस्य ग्रहणार्थत्वं नेतरेषामितरेष्वित्यर्थकत्वात् । अचो ऽक्षु हलोहल्ष्विति
भाष्यस्योपलक्षणार्थत्वान्न कश्चिद्दोषः । अनभिधानाच्चेति । कोयष्टिकष्टीकत इति
मालत्यां प्रयोगदर्शनेनायुक्तमेतदिति केचित् । अन्येतु हशिचेति शास्त्रदृष्ट्या
त्रैपादिकभावकार्यमात्रस्याऽप्लुतग्रहणसामर्थ्येन सिद्धत्वकल्पनात्परत्वाद्विसर्ग इत्याहुः ।
आहुरिति । अत्र पाठकृतरप्रत्याहारमण्डनखण्डनमस्मत्कृतशब्देन्दुशेखरव्याख्यायां
चन्द्रिकायां बोध्यम् । आवृत्त्येति । हलित्यनेनोद्देश्यविधेयभावेन हल्सञ्ज्ञाविधाना-
र्थमेकम् । आदिरन्त्येनेत्यनेनैकवाक्यतया यरादिप्रत्याहारार्थमपरामिति भावः ।
रुप्रभृताविति । रुशब्दइत्यादौ । इण्गताविति । इदं चिन्त्यम् । तस्मिन्नेत्येधत्यूठ्-
स्वितिवृद्धौ सहेतेति रूपानिष्पत्तेः । व्यर्थत्वंचेति । चेन ञमङणेति णादिभिर-
णादिप्रत्याहारापत्तिर्बोध्या । संबन्धसामान्येति । अवयवावयविभावस्यैकत्वे ऽप्येकत्र
तस्य मुख्यत्वमपरत्र तस्यारोपितत्वमित्येतावता भेदमाश्रित्येदमुक्तमिति ध्येयम् ।
नचास्यामवस्थायां सहविवक्षाया असंभवादेकशेषस्याप्यसम्भव इति वाच्यम् ।
एकशेषनिर्देशाद्वा सिद्धं हल्च हल्च हलिति भाष्यप्रामाण्येनाऽसहाविवक्षायामप्ये-
कशेषकल्पनादित्यूह्यमिति कैयटोक्तव्याख्यैव युक्ता । मुख्यारोपितयोरेकषष्ठ्यर्थ-
त्वाभावात् । भाष्याक्षराण्यपि कथञ्चिदेतदानुगुण्येनैव योज्यानीति बोध्यम् ।
कैयटइति । तन्मते चापवाद्विषयं प्रकल्प्य संज्ञेत्यर्थः । तथा च यथापवादविषयसंप-
त्तिस्तथैवोत्सर्गेण प्रवर्तितव्यमित्यर्थः । प्रतिषेधइति । तन्निमित्तत्वमित्यर्थः । एव-
मुक्तिमिति । एतदेव ज्ञापयतीत्याद्युक्तिः । नन्वेवं संग्राहकवाक्यार्थबोधे हलन्त्यं
नाविभक्ताविन्यनयोरन्योन्याश्रयाभावेपि लक्ष्यसंस्कारके उपप्लूयमानवाक्यार्थबोधे
न्योन्याश्रयः सुस्थ एवापवादवाक्यार्थबोधं विना तद्विषयपरिहारेणोत्सर्गवाक्या-

र्थोपप्लवायोगात् । यद्वा नविभक्ताविस्येतद्वाक्यार्थबोधे तद्विषयपरिहारेणैतस्य प्रवृत्तिः । एतत्प्रवृत्तौ सुप्तिङादिप्रत्याहारसिद्धिः । तत्सिद्धौ च नविभक्ताविस्येतद्वाक्यार्थबोध इत्यन्योन्याश्रय इत्यत आह । नविभक्ताविति । पदार्थज्ञानमात्रेणेति । तथा च नविभक्ताविस्येतद्वाक्यार्थबोधाभावेपि तद्घटकप्रतियोगिसमर्पकतुस्मा इति प्रथमान्तपदार्थज्ञानमात्रेण पादीनां तद्भिन्नत्वेन तन्निषेधाविषयत्वग्रहेण तत्रेत्सञ्ज्ञाप्रवृत्तिः सुलभेत्याशयः । अणुदिदित्यत्रोदिदिति क्वादीनां सञ्ज्ञेति बोध्यम् । तद्वल्लभ्यमिति तेन हलविलेखनइति धातौ लस्य नेत्वम् । उपदेशेनन्त्यत्वादिति भावः । इदन्त्यसदृशेनेत्यर्थ इति । प्रत्याहारनिष्पत्तिकाले ऽन्त्यस्यासत्त्वेपि तस्य स्मरणमात्रेण तत्सादृश्यज्ञानमिगादिशब्दघटककादिषु सुलभमित्याशयः । व्यक्तिपक्षार्थइति । प्रत्युच्चारणं वर्णव्यक्तिर्भिन्नेति पक्ष इत्यर्थः । अत्र सादृश्यानुयोगिनः समुदायाघटकत्वेपि तत्प्रतियोगिनस्तथात्वात् । तेनैव समुदायाक्षेपः सुलभः । आहुरित्युत्तरमाचिश्नुधात्वित्यारभ्य स्पष्टमित्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासङ्गतेः । एवं विधेनाग्रिमग्रन्थेन पुनरुक्तेश्च । समासाभावस्येति । निपात एकाजनाङित्यादौ कर्मधारयदर्शनादयुक्तमेतत् । नान्तरीयकतयेति । अन्तरा विना भवो ऽन्तरीयः । गहादित्वाच्छः । ततः स्वार्थेकः नशब्देन समासश्च । प्राधान्यादित्सञ्ज्ञाभवनक्रियायामुपदेश इत्यस्यान्वयभ्रमवारणायाह । तत्र विद्यमानमिति । क्रियामात्रं कालोपाधिरिति मते उपदेशशब्द आद्योच्चारणपरः । मतान्तरे लक्षणया तदधिकरणकालपरः । तेनैधादीनां धादेर्नेत्वं । उपदेशे ऽनन्त्यत्वात् प्रधानक्रियान्वये तु तद् दुर्वारम् । यद्यप्यधिकरणसप्तम्यन्तस्य साक्षात्कर्तृकर्मणोरेवान्वयः तद्द्वारा क्रियान्वयइति वक्ष्यमाणस्वसिद्धान्तरीत्या विद्यमान इत्यध्याहारो नात्रावश्यकः । अत एवाक्षेषु शौण्ड इत्यत्र प्राचां विद्यतिक्रियाध्याहारो नव्यैर्दूषयिष्यते तथाप्येधादेर्धस्येत्त्ववारणायाप्रधानान्त्यविशेषगतया विद्यतिक्रियाध्याहारः कृतः । न चैवं क्रियान्वयो ऽप्यस्य कर्त्राद्यन्वयद्वारेणैवेति कारकप्रकरणस्थशेखरविरोधः साक्षादन्वयस्यैवात्र स्वीकारादिति वाच्यम् । तस्याक्षशौण्डस्तिष्ठतीत्यादिविषयत्वात् । यत्र हि कर्तृकर्मविशेष्यतया क्रिया भासते तत्र तद्द्वारैव सप्तम्यन्तस्य क्रियान्वयसम्भवे क्रियान्तराध्याहारो न युक्तः । साक्षादप्रधानक्रियायामन्वयश्चायुक्तः । अक्षशौण्डपदयोः समासानापत्तेः । यत्र तु कर्तृकर्मक्रिये तद्विशेषणे यथा कटे शेते देवदत्तः, स्थाल्यां पक्व ओदन इत्यादौ ।

तत्र तु साक्षादेव क्रियान्वयः । तत्र विद्यमानमन्त्यमित्यत्रापीत्थमेव । एवमक्षेषु शौण्डस्य वस्त्रमित्यादावप्यध्याहृतविद्यतिक्रियायामेव सप्तम्यन्तार्थस्यान्वय इत्यलं प्रसक्तानुप्रसक्तया । यद्यप्येधादेर्धकारादिरुपदेशे विद्यमानाकारस्येत्सञ्ज्ञोत्तरमन्त्यश्चेत्युक्तव्याख्यायामप्येधादौ धस्येत्सञ्ज्ञा दुर्वारा । तथाप्याद्ये वयसि धनी देवदत्त इत्यादाविव धर्मिपारन्तन्त्र्येणोपदेशकालावच्छिन्नान्त्यत्वेपि भासते इति न कश्चिद्दोषः । तेनेति । उपदेश इत्यस्येत्सञ्ज्ञाभवनक्रियायामन्वयं विहायान्यपदार्थान्वयिविद्यतिक्रियायामन्वयकरणेनेत्यर्थः । अन्यत्रत्विति । ऋहलोर्ण्यदित्यादौ तत्पूर्वमपि हल्प्रत्याहारसिद्धिसम्भवादिति भावः । अन्तरङ्गत्वादिति । तेन न धातुलोप इतिसूत्रस्थं धातुग्रहणं किं लूञ् लवितेति भाष्यं सङ्गच्छते । धातुसञ्ज्ञायाः क्रियावाचकत्वज्ञानाधीनत्वेन बहिरङ्गत्वात् । सिद्धयुत्तरमिति । वर्णोपदेशकाले तदव्यवहितोत्तरकाले च हल्प्रत्याहारस्यासिद्धेरिति भावः । प्रायइति । मनिनादेर्नकाराद्यभिप्रायेण प्रायःपदं । तत्रहि तवर्गान्तर्गतत्वेन निषेधविषयतासम्भावनया न विभक्ताविति वाक्यार्थबोधोत्तरमेव तत्रेत्सञ्ज्ञा । एवं सुपः पकारे ऽपि विभक्तिघटकत्वेन निषेधविषयत्वसंशयात् । तस्यैवार्थवत्त्वादिति । तेनैवेति । इदमयुक्तम् । सानुबन्धकेनानुबन्धविनिर्मुक्तोपस्थितेरसंभवात् । आर्धधातुकस्येडित्यादौ उपदेशोत्तरमेवेत्सञ्ज्ञालोपाभ्यामपहारे जश्त्वानापत्तेश्च । तस्माद्वाक्यार्थबोधोत्तरमेव विधेयत्वप्रतिपत्त्युत्तरमेवेत्सञ्ज्ञालोपौ । उपदेशोत्तरकाले इत्सञ्ज्ञेति भाष्यमप्येवमेव कथं चिन्नेयम् । अन्ये तूच्चारणं परिनिष्ठितस्यैवोच्चारणोत्तरमेव तदपहारेण काकस्येव न शब्दाद्वर्धतेत्याहुः । तदुपस्थाप्यएवेति । क्ङिति चेत्यादौ तद्बोध्य इत्यर्थ इति भावः । तत्त्वाभावादिति । इदं चिन्त्यम् अत्राऽपीत्सञ्ज्ञाप्रवृत्तौ बाधकाभावात् । "चितः सप्रकृतेर्बह्वकजर्थ" इति वार्तिकस्वारस्येन चितिप्रत्यय एव तत्प्रवृत्त्या न दोष इति तु वक्तुं युक्तमिति केचित् । कुण्डिनचि चित्स्वराप्रवृत्तिररुचिबीजम् । भाष्योक्तमिति । इदं च भाष्यं अनुबन्धानां प्रयोगासमवायित्वात् प्रयोगासमवायिनश्चाणत्वाद् ग्रहणकशास्त्रे पुनर्वृत्तिरित्यभिमानेन । नव्यमतेपीशि समुदायस्यैवार्थवत्त्वेन तदैकदेशेकारस्य निरर्थकत्वात् । अणुदित्सूत्राप्राप्तेः । अत्र केचिदित्यारभ्याहुरित्यन्तो ग्रन्थोऽस्मत्कृतत्रिपथगायां विवृतः । विधाविति । इदमयुक्तम् । नविधौ परः शब्दार्थ इति न्यायविरोधात् । अनित्यादिर्नित्यमित्यादेर्नित्यबोध्यार्थकत्वेन सो भवतीत्यर्थे ऽपि स्वरसि-

द्धया नकारेत्सञ्ज्ञक इति विशेषणवैयर्थ्यात् । एवमनुवादेपीत्यग्रिमग्रन्थो ऽप्ययुक्तः । बोधके एव नकारेत्सञ्ज्ञकत्वस्य पूर्वमुक्तेः । तत्रनाच्परइति । आट आकार इति शेषः । अभ्रआँअप इत्येतद्व्यावृत्तिरिति । तन्वस्याप्यादेशत्वात्कथमेतद्व्यावृत्तिरिति । चेन्न । स्वयमेव परिनिष्ठितप्रयोगरूपत्वेन प्रयोगशासनकरणत्वरूपोपदेशनशब्दार्थाभावादित्याशयात् । कैयटे तु शास्त्रे उच्चारितो ऽनुनासिकः स इत्सञ्ज्ञक इत्युक्तं । पूर्वंप्रातिपदिकत्वे इति । अनुबन्धविनिर्मुक्तपदार्थोपस्थितिरित्यनेनापि विरुणाद्धि इति बोध्यम् । यदा मञ्जकादिनिवृत्त्यर्थं प्रातिपदिकानामुपदेशः कर्त्तव्य इति तदा ऽयंप्रतिषेधइति कैयटोक्तं वार्तिकोत्थानबीजं दूषयितुमाह । एतद्भाष्येति । नच प्रातिपदिकानां प्रतिषेधे चित्रङादीनामपीत्सञ्ज्ञानापत्तिरिति वाच्यम् । एतच्चात्रयुक्तं यदित्कार्याभावादित्सञ्ज्ञा न स्याद्यत्रेत्कार्यं भविष्यति तत्रेत्सञ्ज्ञा, तद्यथा ऽऽगस्तिकौण्डिन्ययोरगस्तिकुण्डिनाजित्याग्रिमभाष्येण वार्तिकारम्भे कुण्डिनच्श्चकारस्येत्सञ्ज्ञा न स्यादित्येवं परेणास्यापि दोषस्य दत्तप्रायत्वात् । लक्ष्यासिद्धेश्चेति । भावे घञन्तत्वेपि लक्ष्यसिद्धिप्रकारश्चन्द्रिकायामुपपादितो द्रष्टव्यः । लोपश्चेति । इदमनुबन्धा अनेकान्ताइति पक्षाभिप्रायेण तत्पक्षे शकारस्यादेशबोधकसमीपे शकारोच्चारणमात्रेण शित्वाङ्गीकारादिति बोध्यम् । आनुनासिक्यवन्तइति । न कर्मधारयान्मत्वर्थीय इति नाश्रितं असुव्रत इति भाष्यप्रयोगेण क्वचिल्लाघवानादरात् । यणापत्तिरिति । वस्तुत आङ्गत्वाद्यस्येति लोपापत्तिर्द्रष्टव्या । नचेत्वं तदपवादः । इकारलोपानपवादत्वात् । कारिकादौ चारितार्थ्याच्च । ऊकालोच् । एकद्वित्रिमात्रकत्वेति । एकादिनवान्तानां द्वन्द्वस्यासाधुतायाः स्वेन वक्ष्यमाणतया एकद्विकरणे हेतुरिति वदयमप्यसाधुरेव । तावदत्र कालग्रहणमिति । अन्ये तु शब्दस्य लक्षणयैकमात्रापरत्वेन वर्णपरत्वाभावान्नाणुदित्सूत्रप्रवृत्तिरित्याहुः । तितउच्छत्रमिति । ननु वर्णाद्वर्णान्तरोच्चारणे ऽर्धमात्राकालव्यवायस्य स्वीकारेण अइत्यस्य न द्विमात्रत्वमिति चेन्न । वर्णोच्चारणाधिकरणकालस्य द्विमात्राकालत्वेनादोषात् । तदेतदभिप्रेत्य वक्ष्यते । अज्ग्रहणमिति । अन्तरङ्गत्वेनेति । कार्यिणोपि निमित्तत्वमाश्रित्येदम् । सइति । ऊर्ध्वभागप्रतिहतवायुव्यञ्जितो ऽजित्यर्थः । हल उदात्तादिसञ्ज्ञायां बाधकाभावं चाह । हल्स्वरइति । तथा च हल उदात्तादिसञ्ज्ञायां किं बाधकं, न तावदचः स्थाने उदात्तस्य हल आपत्तिः । आन्तर्यतो ऽच एवोदात्तस्य प्रवृत्तेः । नापि हल्स्थाने तस्यापत्तिर्हल्स्वरप्राप्तौ

व्यञ्जनस्याविद्यमानवत्त्वादित्यर्थः । शक्येति । तान्ताद्यपि बोध्यम् । विवृतस्ये-त्यर्थइति । मातृकायां त्वीषत्स्पृष्ट इव ऌकारो दीर्घ इति भावः । लोकइति । प्लुतावैच इदुतावित्येतद्विषयः । चतुर्मात्रास्तु छांदसा इति भावः । तुल्यास्यप्र । यजुष्येकेषामिति । नन्वत्र प्रयत्नभेदादेव न सावर्ण्यमित्यरुचेराह । तद्वानासामिति । अनेन यावत्स्थानसाम्यएव सवर्णसञ्ज्ञेत्यत्रायं निर्देश एव ज्ञापकमिति सूचितं भवति । ह्रस्वदीर्घयोरिति । इदमुपलक्षणं । उदात्तानुदात्तयोरित्यपि बोध्यम् । ननु मात्राकालिकत्वादिरूपह्रस्वत्वादिकं त्विति वक्ष्यमाणग्रन्थेनास्य विरोधः । तत्र ह्रस्वत्वादिजनकयत्नस्यास्य बाह्यत्वोक्तेरिति चेन्न । तज्जनकयत्नानां बाह्यत्वेपि तत्तत्स्थानस्थितवायुसंयोगानामास्यान्तर्गतत्वाविरोधात् । तथापीति । नन्विकारैकारयोः सावर्ण्यं दुर्वारम् । इकारस्यापि कण्ठतालुत्वादिति चेन्न । विवृततरत्वादिप्रयत्नभेदेन सावर्ण्यस्य वारयितुं शक्यत्वात् । अत एवैदैतो र्नसावर्ण्यम् । किं च वस्तुतः कण्ठस्थानत्वं न सावर्ण्योपयुक्तम् । किं तु शिक्षायां तथोक्तमेव तदेतदभिप्रेत्याह । भिन्नस्थानकथनेति । एषामिति । ञमङणनानामित्यर्थः । ञमङणनानामपि नासिकास्थानत्वे शिक्षायामेषां तत्स्थानानुक्त्या न्यूनता स्यादिति भावः । जिव्हाग्रादाविति । अत्र तद्व्यवहारः प्रातिशाख्ये व्योर्लघुप्रयत्नतर इत्यत्र च बोध्यः । तत्र हि लघुतरः प्रयत्नो जिव्हाग्रादिर्यस्योच्चारण इति विगृह्य जिव्हाग्रादीनां प्रयत्नशब्देन व्यवहारात् । लघुतरत्वं च शिथिलत्वं । कङ्योः सावर्ण्ये आनुनासिक्यमेषामधिको गुण इति भाष्येण नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य प्रयत्नशब्देनाग्रहणबोधनरूपा युक्ति र्वक्ष्यमाणा गुणशब्दस्य सावर्ण्यानुपयुक्तत्वान्तरतम्यपरीक्षोपयोगित्वरूपार्थबोधकत्वे गुणशब्देनापि सूचिता भवति इत्यभिप्रेत्याह । वर्णाभिव्यक्त्यनन्तरइति । ननु गुणशब्दस्योक्तार्थकत्वे वृद्धिरादैजिति सूत्रस्थस्य भेदकत्वाद् गुणस्येत्यस्यापि तथैवार्थःस्यात् । तथा चैकोयमात्मोदकं नाम तस्य गुणभेदादन्यत्त्वं भवति अन्यदिदमुष्णमन्यदिदं शीतमिति दृष्टांतभाष्यमसंगतं स्यात् । तेन तस्य धर्मार्थकत्वलाभादित्याशङ्क्य गुणवदस्यानेकार्थत्वेन समाधानमभिसन्धायाह । अकारादिनिष्ठेति । तर्ह्युदात्तत्वादीनां गुणत्वव्यवहारानुपपत्तिः । स्वाश्रयवर्णजनकस्थानविशेषावच्छिन्नवायुसंयोगातिरिक्तस्य तज्जनने ऽनुपयोगादित्यत आह । उदात्तत्वादीनामिति । नचोदात्तत्वाद्यंशे उक्तदृष्टान्तभाष्य एव स्वारसिकत्वेन नोदात्तत्वाद्यंशेन स्वारसिकमिति वाच्यं । तस्यानुनासिक्यांशे कथं चि-

योजनीयत्वात् । उदात्तत्वादीनां सावर्ण्यानुपयुक्तत्वं तूदात्तादिजनकयत्नस्येत्यादिना वक्ष्यमाणं द्रष्टव्यं । नन्वेवं ङादीनामपि स्वरूपोत्पत्तौ कण्ठाद्यवच्छिन्नवायुसंयोगस्यैव हेतुत्वं । तद्गतानुनासिक्यजननेतु नासावच्छिन्नवायुसंयोगस्य हेतुत्वमिति कङयोरपि तुल्यस्थानत्वं नासिकाया आस्यान्तर्गतत्वेपि सुवचमिति तस्यास्तद्बहिर्भावोपपादनप्रयासो व्यर्थ इत्याशङ्क्याह । ङादीनामिति । नन्वेवं शिक्षायां ङादीनां नासिकास्थानानुक्तया न्यूनतेत्याशङ्क्याह । अनुस्वारेति । एतेन प्रथमदूषणं निराकृतं वेदितव्यम् । द्वितीयं निराचष्टे । कङयोस्त्विति । अतएव बाह्येति । नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनागृहणादेवेत्यर्थः । अन्येतु मुखनासिकावचन इति सूत्रे मुखनासिकमावचनमस्य मुखनासिकावचनः । किमिदमावचनं । ईषद्वचनमावचनं । किंचिन्मुखवचनं किंचिन्नासिकावचनमिति भाष्येण भागस्य मुखेनोच्चारणाद्भागस्य नासिकयेति कैयटग्रंथेन च ङादीनां भागतो नासिकास्थानत्वं भागतो मुखस्थानत्वमिति पक्षेऽवतिष्ठते । मुखोपसंहिता वा नासिका वचनमस्य सोयं मुखनासिकावचनमिति भाष्येण मुखस्य नासिकायाश्चयदंतरालं स्थानान्तरमेवानुनासिकस्येति दर्शयतीति कैयटेनच मुखनासिकयो रंतरालं स्थानान्तरमेवेत्यपरः पक्षः । मुखद्वितीयावा नासिका वचनमस्येति भाष्येण यदातु सर्व एव वर्णो मुखेन नासिकया चोच्चार्यते इति कैयटेन च सर्वभागावच्छेदेन मुखेन नासिकयाचोत्पत्तिरिति तृतीयः पक्षः । त्रिष्वपि पक्षेषु नासिकानास्यान्तर्गतेति स्पष्टमेव । किञ्च मुखगृहणं किमर्थं नासिकावचनो ऽनुनासिक इत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत । अथ नासिकागृहणं किमर्थं मुखवचनो नुनासिक इत्युच्यमाने कचटतपानामेव प्रसज्येतेति भाष्येण नासिका नास्यान्तर्गतेति स्पष्टमेवोक्तं भवति । नासिकायास्तदन्तर्भूतत्वे नासिकास्थानानां यमानुस्वाराणामपि मुखवचनत्वेन कचटतपानामेवेत्यवधारणासङ्गतेः । प्रासादवासिन्यायेन मुखग्रहणखण्डनपरभाष्येण च नासिका नास्यान्तर्गता । मुखनासिकावचनमिति सूत्रमपि नासिकाया आस्यबहिर्भावे समञ्जसम् । तथाच । सानुनासिकाकारादीनां चोभयावच्छिन्नवायुसंयोगेनैव स्वरूपोत्पत्तिः । आनुनासिक्यं तूभयेषां धर्मः । इयाँस्तु विशेषः । अकारादीनामनुनासिक्यादयो न नियताः ङकारादीनान्तु नियता इत्यनुस्वारयमानां चेति शिक्षायास्त्वेषां नासिकैवस्थानमित्यर्थः । गुणशब्दस्तु धर्मपर एव तथैव लोकप्रसिद्धेः । सावर्ण्यानुपयुक्तत्वं तु नगुणशब्दार्थः

मानाभावात् एकोयमात्मोदकं नाम तस्य गुणभेदादन्यत्वं भवत्यन्यदिदमुष्णमिति भाष्यस्वारस्येन च गुणशब्दो धर्मपर इति लभ्यते । आन्तरतम्यपरीक्षोपयुक्तश्चेति विशेषणवैयर्थ्यं च । नच पृथक्पृथक् द्वयप्रवृत्तिनिमित्तत्वेपि तद्विवक्षितुं शक्यम् । त्वन्मते आभ्यन्तरप्रयत्नानामपि गुणत्वापत्तेः । स्थानार्थगुणप्रमाणकृतमित्यभियुक्तोक्तौ प्रमाणस्य पृथक्करणं ब्राह्मणवसिष्ठन्यायेन । यद्वा पाणिनीयशिक्षायां यस्य यस्य वर्णस्य यद्यत्स्थानमुक्तं तत्तदेवास्यशब्देन गृह्यते । पञ्चमानां च नासिकास्थानानुक्त्या न तस्यास्यशब्देन ग्रहणम् । अनुस्वारयमानां चेति । चशब्दो ऽवधारणे स च भिन्नक्रमः । नासिकैव स्थानमित्यर्थः । तथाच यस्य वर्णस्य पाणिनीयशिक्षायामुक्तं स्थानं वर्णान्तरस्यापि तत्रोक्तं तद्द्वयं परस्परं सवर्णसञ्ज्ञा भवतीति तुल्यास्यसूत्रार्थः । वलयोस्तु न सावर्ण्यम् । शिक्षोक्तकण्ठादिस्थानपर्याप्तस्थानताया एव सवर्णसञ्ज्ञोपयोगित्वात् । नचैवं कङयोः सावर्ण्यानापत्तिः । शिक्षान्तरे ङकारस्य नासिकास्थानत्वोक्त्या कण्ठपर्याप्तस्थानत्वाभावादिति वाच्यम् । पाणिनीयशिक्षोक्ततत्तत्स्थानकत्वे सति तदुक्ततदितरस्थानराहित्यस्यैव तत्पर्याप्तस्थानकत्वशब्दार्थत्वेन विवक्षितत्वात् । शिक्षान्तरोक्तस्य च प्रायेणैतच्छास्त्रीयकार्यनिर्वाहानुपयुक्तत्वात् । अत एवाइउण्सूत्रे ऽकारस्य विवृतोपदेशः कर्तव्य इति वार्तिकभाष्ये सङ्गच्छेते । अन्यथा शिक्षान्तरे अकारस्य विवृततरोक्त्या तदसङ्गतिः स्पष्टैव । यावत्साम्यं तु न तुल्यशब्दार्थः तेजसा सूर्यतुल्यो ब्राह्मण इत्यादौ यत्किञ्चित्साम्येपि तुल्यशब्दप्रयोगदर्शनात् । लुग्वेतिसूत्रे उदोष्ठ्येतिसूत्रे च पर्याप्तिर्न विवक्षितेति अदुद्रुहि ब्रुऊर्षतीत्यादौ नदोष इत्याहुः । समुदितामिति । तदेव स्थानत्वपर्याप्त्यधिकरणमित्यर्थः । तथा च न वलयोः सावर्ण्यमित्यर्थः । प्रत्येकमिति । अत एवाग्नेयं चतुर्धा करोतीत्यस्याग्नाषोमीये ऽप्रवृत्त्योभौ वा ऽविशेषादिति कात्यायनसूत्रस्याप्रामाण्यं जैमिनिनोक्तम् । वस्तुतो देवतार्थकतद्धितस्यैन्द्राग्नादौ चतुर्धाकरणादिवारणाय तथा स्वभावाङ्गीकारेपि इतरतद्धिते तथा ऽनङ्गीकारात् । अत एव देवदत्तस्य तद्भार्यायाश्चापत्ये दैवदत्तिरित्याद्यप्रयोगप्रतिज्ञाविरोधाच्चेत्युक्तरीत्या ऽदुद्रुहि बुऊर्षतीत्याद्यसिद्धिरिति दूषणं द्रष्टव्यम् । नाज्झलाविति सूत्रेणेति । वस्तुतस्तूष्मणामीषद्विवृतत्वेपीषत्स्पृष्टऌकारलकारयोः सावर्ण्ये होतृ ऌकार इत्यत्र तोर्ल्लीति परसवर्णापत्त्या तयोस्तदभावाय नाज्झलाविति सूत्रस्यावश्यकत्वात् । अधिकं नाज्झलाविति सूत्रे ऽस्म-

न्क्तव्याख्यायां कौस्तुभप्रभायां बोध्यम् । स्पर्शेत्यादेः क्रमेण स्पृष्टेषत्स्पृष्टविवृत-संवृतव्याख्यानरूपत्वम् । ईषद्विवृतत्वं चेति । ईषत्स्पृष्टत्वमित्यर्थः । यणामिति । यणामीषत्स्पृष्टत्वे स्पृष्टत्वस्यापि व्यापकधर्मस्य सत्त्वेन यकारस्य चवर्गेण रेफस्य टवर्गेण सावर्ण्यापत्तिः. तथाच स्थानांश इव प्रयत्नांशे पि यावत्साम्यमेव विवक्षित-मिति भावः । अश्वितइति । ननु यकारगतानुनासिक्यस्य नासिकास्थानत्वेपि य-कारस्य तत्स्थानत्वाभावान्न तस्यानुस्वारेण स्थानत आन्तर्यम् । किन्तु ञकारस्यैवेति स एव प्रवर्तते । अत एव ञुङ्वेत्यत्र ञकारः परसवर्णो नेति विवरणे उक्तमित्य-रुचेराह । आदाविति । तेन यरोनुनासिक इत्यत्र सवर्णग्रहणाकर्षेपि चतुर्मुख इत्यादौ णकारापत्तिर्न । प्रयत्नभेदादिति । ननु अनेनैव विवृतस्य संवृतादेशे तस्यासिद्ध-त्वेनोत्तरोप्यकारो विवृत एवेति दीर्घो दुर्वार इति चेन्न । अअ इति पृथङ्निर्दे-शेनोत्तराकारस्य मूलत एव संवृतत्वकल्पनात् । षत्वजश्त्वानुनासिकेष्विति । ननु षत्वे कृते जश्त्वमपवादत्वात् बाधित्वा ऽनुनासिकं चान्तरङ्गत्वाद्बाधित्वा भष्भावे न कश्चिद्दोष इत्यरुचेराह ॥ वस्तुतइति ॥ परत्वाज्जश्त्वेति ॥ न च झय इति षत्वं जश्त्वानुनासिकत्वयोरपवादः । तान्ते चारितार्थत्वात् । तत्र तसौ मत्वर्थे इत्यनेन भत्वाज्जश्त्वाद्यप्राप्तेः । इदमुपलक्षणमधिकारत्वाभावे गोमानित्यादौ तलो पाद्यापत्तेः । अतएवनमुनेइति । अतएव । वाक्यभेदेनान्वयादेव । तन्निषेधो ऽसिद्धत्वनिषेधः । पदैकवाक्यतया ऽन्वये तु अदसोसेरित्यादिना ऽसिद्धत्वविशिष्टस्य मुत्वस्य विधाने न मुने इत्यनेनापि तथाविधस्य मुत्वस्यैव निषेद्धव्यत्वेनामुनेत्यत्र मुत्वानापत्तिः । असिद्धत्वस्य प्राधान्येनाविहितत्वेन तन्निषेधायोगात् । शास्त्रप्रवृ-त्ताविति । तेनाग्नी३इतीत्यत्र प्लुते प्रवृत्ते ऽपि तस्यासिद्धत्वात् प्रगृह्यसञ्ज्ञाप्रवृत्तिः । अन्तरङ्गत्वादिति । पूर्वत्रासिद्धनिमित्तकत्वादित्यर्थः । वस्तुतो ऽस्यान्तरङ्गशब्दार्थ-त्वाभावात् । उदाहरणाभावाच्चासङ्गतमेतत् । सपादसप्ताध्यायीस्थकार्यसम्भावनायां त्रैपादिकस्याप्रवृत्तेः । अग्नी इतीत्यादावपि यथोद्देशपक्षाश्रयणेन प्लुतात्पूर्वमेव प्रगृह्यसञ्ज्ञा शास्त्रप्रवृत्तौ नियामकमिति । पूर्वोक्तं त्वणोप्रगृह्येति सूत्रस्थवक्ष्यमा-णशेखरादेशोपपन्नम् । सोदीर्णमिति । सोचि लोपे चेदिति सुलोपः । उदीर्णइति । ऋगता-वित्यस्योत्पूर्वस्य रूपम् । आत्मान्तः करणमिति । इदमसङ्गतं । आत्मपदस्य जीव-परत्वे बाधकाभावात् । इच्छयोत्पन्नयत्नेति । इच्छयोत्पन्नो यत्नो यस्मिन्निति

विग्रहः । तथा च विवक्षयेत्येतत् यत्नेनेत्येतस्याप्युपलक्षणमिति भावः । ततो यत्नविशेषेणेति । इदमेक एव यत्नः कार्यजनको वर्णनाशकश्चेति परः सन्निकर्ष इति सूत्रस्थभाष्यविरुद्धम् । तस्मात्तेनैव यत्नेनेति वक्तुमुचितम् । औपाधिकभेदाभिप्रायेण षा कथञ्चिद्योज्यम् । वायुप्रेरणारूपमिति । अल्पवायुमहावायुप्रेरणारूपमित्यर्थः । अविवक्षेति । कार्यानुपयोगित्वमित्यर्थः । अतएवेति । पूर्वत्वाभावादेवेत्यर्थः । तथा च वर्गेष्वाद्याश्चत्वार एव यमा इति प्राचीनविवरणं तत्सदृशार्थकतया योज्यमिति भावः । ननु राज्ञां मज्ज्ञामित्यादौ श्चुत्वं न स्यात् यमेन व्यवधानादिति चेन्न । अशरीरं यमं प्राहुरित्यादि वचनेन यमादीनामशरीरोक्त्या तद्व्यवधानस्याकिञ्चित्करत्वात् । अयोगवाहाइति । द्वितीयचतुर्थयमभिन्ना इत्यर्थः । जिव्हामूलीयइति । उपध्मानीयस्य स्थानकथनं तूपध्मानीयोपधास्योब्जे जश्त्वेन बकारार्थं कथं चिद्भवतीति भावः । यमादीनामिति । आदिपदेनानुस्वारविसर्गौ अत्र यमानुस्वारयोर्नासिकास्थानकथनम् । अथ मुखग्रहणंकिमर्थं नासिकावचनो ऽनुनासिक इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत इति भाष्योक्तादिशा मुखग्रहणव्यावृत्तिबोधनाय । आदन्तइति । स्छः कचेति कप्रत्ययान्तो ऽदन्तस्ततष्टाप् । नित्यस्त्रीलिङ्गो ऽयम् । अन्तस्थाभिश्च संयुतमिति शिक्षावाक्यानुरोधादिति भावः । एतेन विश्वपाशब्दवदादन्तत्वे ईषत्स्पृष्टमन्तस्थानामिति निर्देशासंगतिरित्यपास्तम् । स्पर्शोष्मणोरिति । मातृकापेक्षयेदम् । नाज्झलावित्यादौनिर्देशेनेति । चझयोः सावर्ण्याभावे ह्रस्य स्थाने झः पूर्वसवर्णो न स्यादिति भावः । अशक्यत्वं स्यादिति । इदमयुक्तम् । अयोगवाहानां दीर्घादीनां सानुनासिकयवलानां दुःस्पृष्टसंज्ञकलकारस्येषत्स्पृष्टऋकारऌकारयोश्चासत्त्वापत्तेः । अक्षरसमाम्नाये एषामनुपदिष्टत्वात् एओङ्सूत्रस्थमनुपदिष्टं सत्कथं विज्ञातुं शक्यमिति भाष्यं तु वेदलोकसाधारण्येन सावर्ण्यानित्यत्वज्ञापकत्वायोगात् । न च स्थानेन्तरतमसूत्रेण निर्वाहः । वकारस्य स्थाने ऌकारस्वरूपसंप्रसारणापत्तेः । तस्माद्वकारस्य ऌकाराभावाय वर्णोपदेशे ऌकारपाठ इत्येव तत्त्वम् । पृथगनुबन्धत्वेति । गम्ऌसृप्ऌगतौ, एजृभ्राजृदीप्तावित्यादौ । ओकारस्यौष्ठ्यत्वमिति । एतच्च प्रकृतानुपयुक्तत्वादुपेक्ष्यम् । एकारशकारादीनामिति । अन्येत्वाकारहकारयोरादिपदेन ग्रहणमित्याहुः । अत्रादिशब्दग्राह्यं चिन्त्यमिति केचित् । यजुष्येकेषामिति । निर्देशादिकारैकारयो र्न सावर्ण्यम् । नन्वकारहकारयोः सावर्ण्ये शिवो ऽर्च्य

इत्यादौ हशिचेत्येवसिद्धे ऽतोरोरिति व्यर्थं तस्मात्तयोस्तन्नेत्याशङ्क्याह । हशिचे-त्येवेति । तथा च अकारहकारयोरपि सवर्णसंज्ञासत्त्वादाकारे परतो ऽपि हशि चेत्युत्वे प्राप्ते ह्रस्वाकार एवेति नियमार्थमतो रोरिति सूत्रमिति भावः । अतएवभाष्यइति । आकारप्रश्लेषादेवेत्यर्थः । अणमुद्दिश्येति । तेन संज्ञायाः संज्ञिनः पूर्वमुच्चारणं न दोषाय । तस्या एवोद्देश्यत्वादिति सूचितं भवति । एतत्परिभाषाज्ञापकमिति । स्थाली-पुलाकन्यायेनैकदेशानुमत्येति बोध्यम् । दूषणान्तरं चाह । जातिपक्षेइति । अप्रत्यय इत्यस्याविधीयमानार्थकत्वे तु जातिपक्षप्राप्तस्य निषेधो न स्यात् अनन्तरस्येति न्यायात् तस्य पर्युदासत्वाच्चेति भावः । परास्तमिति । तथा चाणुदित्सूत्रे चाण्ग्रहणमेव कार्यम् हयवरट्सूत्रस्थमथ किमर्थमन्तस्थानामणूपदेशः क्रियत इति भाष्यं त्वेकदे-श्युक्तिरिति भावः । सवर्णस्य चेति । चकारादसवर्णस्यापीत्यर्थःस्यादित्यत आह । चोभिन्नक्रम इति । ग्राहकसूत्र एवेति । एतान्नियमपरे तपरसूत्रेपि बोध्यम् । इति तुनयुक्तमिति । तपरसूत्रे ऽण्पदानुवृत्तौ तु युक्तमेवैतत् । अत्र परेणाण्ग्रहणे उरदिति तपरकरणं भाष्योक्तमपिज्ञापकं बोध्यम् । तदुपपादनप्रकारस्तु कौस्तुभप्रभायां बोध्यः । नप्राप्नोतीति । अत्र हेतुर्व्यक्तिपक्षे तत्रत्यात्रत्यव्यक्त्योर्भेदेनेत्येतावानेव चारितार्थ्येनेत्यन्तस्तु अण्ग्रहणसार्थक्यप्रदर्शनपरः । नन्वाद्यवर्णेष्युरणित्यादौ कथं ग्रहणकशास्त्रप्रवृत्तिः । व्यक्तिपक्षे पाणिन्युच्चारितस्याक्षरसमाम्नायस्याभेदादित्यत आह । णकारादिचिन्हेनेति । नन्वादिरन्त्येनेत्यत्र सहग्रहणात्समुदायस्यैव संज्ञात्वं तथाचाणित्यत्राकारस्य निरर्थकत्वात्कथं तत्राणुदित्सूत्रप्रवृत्तिरित्यत आह । तत्रत्येति । ननूपस्थितस्यानुच्चारितत्वात्कथं प्रत्यायकत्वमत आह । उच्चारिताभेदेनेति । नन्वेवं च णकारादिचिन्हेनेति पूर्वग्रन्थो ऽसंगतः । अण्पदेन वर्णसमाम्नायस्थानामेवोपस्थितेः । आद्यवर्णोपस्थितेरिति तु असङ्गतमनुपयुक्तं च । तस्य निरर्थकत्वेनानुपस्थापक-त्वादिति चेन्न । प्रत्याहाराद्यवर्णे णकारादिचिन्हेनाक्षरसमाम्नायस्थाभेदग्रहणं विनो-च्चारिताद्यवर्णाभेदेनाक्षरसमाम्नायस्थस्य ग्रहणासंभव इत्याशयात् । प्रकृतेइति । अस्य च्वावित्यादौ दूषणान्तरं चाह । प्रत्याहारघटकेति । तत्र हेतुमाह । उच्चारित-स्यैवेति । अण्ग्रहणं चेति । चेन नाज्झलाविति सूत्रसंग्रहः । ननु ऋऌवर्णयोः सावर्ण्येपि ऋकारेण न ऌकारग्रहणं विभिन्नजातित्वात्सावर्ण्यं तु होतृ ऌकार इत्य-शकःसवर्णे दीर्घार्थं स्यादित्याशङ्क्याह । ऋऌवर्णयोरिति । ननु समानजातित्वादेशे

सावर्ण्याभावाद्धोतृ्ल्कार इत्यत्र सवर्णदीर्घो न स्यादित्यत आह । एतद्व्यतिरिक्तेति । तथा च सावर्ण्यमपि समानजातित्वाव्यापकत्वात्समानजातित्वातिदेशेनैवातिदिष्टमिति भावः । ननु ऋल्वर्णयोः सावर्ण्यस्याविधानेन पृथगनुबन्धकरणेन कृस्यानित्यत्वं ज्ञाप्यमित्यत आह । पृथगिति । अत्र पक्षे इति पाठः । व्यक्तिपक्षे इति तु अपपाठः । अनन्वयात् । तस्यसर्वस्येति । संयोगान्तलोपादेः । शब्दबोध्योवर्णइति । इदमयुक्तमुच्चारितस्यैव प्रत्यायकत्वात् । इण्प्रत्याहारे प्लुतैचो ऽघटकत्वापत्तौ ततः परस्य षत्वानापत्तेश्च । भाष्यप्रामाण्यात्तपरकरणाच्च तात्परशब्दः स्वबोध्यसमकालग्राहक इति सूचितम् । संख्याकृतव्यवहारस्येति । इदमयुक्तम् । आकडाराधिकारादन्यत्र संज्ञयोर्बाध्यबाधकभावाभावात् । न च स्वतो विरोधरहितयोस्तदबहिर्भूतयोर्बाध्यबाधकभावेपि स्वतो विरुद्धयोस्तदबहिर्भूतयोरपि सो ऽस्त्येवेति वाच्यम् । सङ्कोचे मानाभावात् । किञ्च तपरः षण्णां सञ्ज्ञा अण् त्वष्टादशानां सञ्ज्ञेत्यनुक्तया सवर्णग्राहकत्वतात्कालिकसवर्णग्राहकत्वयोराविरोधेन च विप्रतिषेधशास्त्राप्रवृत्तिः । एतेन गुणानामभेदकत्वे त्वनवकाशत्वाद्बाध इत्याग्रिमग्रन्थो ऽप्यपास्तः । तस्मादण्ग्रहणानुवृत्त्या नियमार्थ एवायं युक्तः । गोतो णिदित्यादौ तु तकारोच्चारणसामर्थ्याद्गकारो ऽविवक्षितः । सिद्धान्तपक्षेपीति । इदं गुणानामभेदकत्वे त्वनवकाशत्वाद्बाध इति पूर्वग्रन्थेन विरुद्धम् । तत्र विधित्वमङ्गीकृत्यानवकाशत्वाद्बाधोक्तेः । पञ्चमीसमासाभावेति । ऐओङ् ऐऔजिति सूत्रे किं दकारे प्रयोजनं अथ किन्तकारे यद्यसन्देहार्थस्तकारो दकारोपीति भाष्यस्य पञ्चमीसमासतदभाववादिपरतया कैयटेन योजितत्वात्तदनुसारेणेदं नतु पञ्चमीसमासस्य पाक्षिकत्वाभिप्रायेण । धकारस्थानिकइति । इदमप्ययुक्तम् । दकारांशे पञ्चमीसमासानाश्रयणेनादोषात् । त्रिमात्रचतुर्मात्रव्यावृत्तय इति युक्तः पाठः । अन्यत्र विस्तर इति । मञ्जुषादौ विस्तर इत्यर्थः । वस्तुतस्तु पदपदार्थयोस्तादात्म्यमयुक्तम् । वन्हिरित्युक्ते मुखे दाहापत्तेः । न च भेदाभेदयोरङ्गीकारेणोक्तदोषनिस्तारः । भेदमात्राङ्गीकारेणोक्तदोषनिरसनोपपत्तौ अभेदाङ्गीकारे मानाभावात् । रामेति द्व्यक्षरं नामेति लक्षणया ऽर्थपरं । आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थ इत्यप्ययुक्तम् तथा सति शक्तिग्राहकत्वानुपपत्तेः । अभेदस्य त्वया संसर्गत्वानङ्गीकाराच्च । तत्पदाभिन्नत्वेन तच्छक्यत्वानुमानात् । परम्परया शक्तिग्राहकत्वमित्यपि न । वृद्धिप-

दाभेदस्तद्वाच्यत्वयोः सहचारग्राहकमानाभावात् । तयोर्व्याप्तिग्रहासंभवात् । वृद्धिसूत्रे भाष्ये साक्षात्सञ्ज्ञासञ्ज्ञिभावस्यैव वाक्यार्थत्वोक्तेश्च । तद्भाष्यं चोपपादयिष्यामः । तस्मादादैचो वृद्धिपदवाच्या इत्येव वाक्यार्थः । आदैचां वृद्धिपदस्य च वाच्यवाचकभावस्य संसर्गमर्यादया भानाङ्गीकारात् । न च समानविभक्तिकनामर्थयोरभेदेनैवान्वय इति व्युत्पत्तिभङ्गः । प्रतीतपदार्थकतदर्थयोरभेदान्वयः । अप्रतीतपदार्थकतदर्थयोस्तु वाच्यवाचकभावेनान्वय इति व्युत्पत्त्यङ्गीकारात् । तदुक्तं भाष्ये । इदं खल्वपि भूयः सामानाधिकरण्यं एकविभक्तिकत्वं च द्वयोश्चैतद्भवति कयोर्विशेषणविशेष्ययो र्वा सञ्ज्ञासञ्ज्ञिनोर्वा तत्रैतत्स्याद्विशेषणविशेष्य इति तच्च न द्वयोर्हि प्रतीतपदार्थकयोर्विशेष्यविशेषणभावो भवति । नचादैच्छब्दः प्रतीतपदार्थकः तस्मात्सञ्ज्ञासञ्ज्ञिनावेवेति । वाच्यवाचकत्वे ऽपीति । सर्वार्थवाचकत्वे पीति । सर्वस्य शब्दस्य सर्वत्रार्थे सङ्केतयितुमशक्यत्वादिति भावः । सामान्यतस्तथा ज्ञानामिति । पटशब्दो जातिमद्वाचकः शब्दार्थस्य वाचक इत्येवं रूपेण शक्तिग्रहेपि घटपदेन घटत्वविशिष्टार्थाबोधात् । प्रकरणादिति । प्रकरणस्य स्वविषयविषयकशाब्दबोधे हेतुत्वादन्यार्थाग्रहणमर्थसिद्धम् । अतएवष्यङिति । संपूर्णसञ्ज्ञाशास्त्रोपस्थितेरेवेत्यर्थः । एतेनेति । उक्तभाष्यविरोधेनेत्यर्थः । भूवादयोधातवः । कालसंबन्धाभावेनेति । तथाच कालपरिच्छिन्नत्वं क्रियात्वं तच्च साक्षात् क्रियायामेवेति कालाः परिमाणिनेति प्राचीनग्रन्थेषु स्फुटम् । एतेन न तावद्धात्वर्थत्वं क्रियात्वं क्रियावाचित्वे ज्ञाते सति धातुत्वज्ञानं धातुवाच्यत्वे च क्रियात्व ज्ञानमित्यन्योन्याश्रयात् । नापि लिङ्गसङ्ख्याकारकानन्वयि तत् । निपातसंज्ञकवाशब्दार्थेपि तत्सत्वेनोक्तदोषानिस्तारात् । नापि साध्यतया प्रतीयमानत्वं तत् । धात्वर्थे तथात्वस्य निपातार्थे तदभावस्य च शपथैकनिर्णेयत्वादित्यपास्तम् । साध्यत्वेन प्रतीयमानत्वस्यापि धात्वर्थमात्रवृत्तित्वसमर्थनसंभवाच्च । अभिव्याप्येति । आङोध्याहार इति भावः । विप्रादिवटकेति । विपूर्वात्प्रापूरण इत्यस्मात्कर्तरि के रूपमिति भावः । इत्यर्थबोधनायेति । अयं भावः । क्रियेति लुप्ततृतीयान्तम् । योग इति । पदान्तरस्याध्याहारः स्तोश्चुनेत्यादिवत् । सूत्रस्थं योगपदं च अर्शआद्यजन्तं प्राद्यन्वयि धात्वर्थपरं विषयसप्तम्यन्तम् । तथा च क्रियया युक्ताः प्रादयः स्वान्वयिक्रियाविषये क्रियावाचकं प्रति उपसर्गसञ्ज्ञका इति । विगताः सेचका इति पाठः । अभेदविवक्षेति । इदं

प्राचामनुरोधेन स्वमते तदभावस्य वक्ष्यमाणत्वात् । सान्तग्रहणइति । निसस्तपता-वित्यादौ । यत्रतुरुत्वमसिद्धमिति । इदमयुक्तम् । इण्निष्ठायामिति सूत्रस्थभाष्य-विरोधात् । तथा हि । इडित्यनुवर्तमाने पुनरिट्ग्रहणं किमर्थं नित्यार्थमारम्भः । नैतदस्ति प्रयोजनम् सिद्धात्र विभाषा निरःकुष इत्यनेन । तत्रारम्भसामर्थ्यान्नित्यो पिविधिर्भविष्यति नात्र पूर्वेण विभाषा प्राप्नोति किं कारणं यस्य विभाषेति प्रतिषे-धात् । तत्रारम्भसामर्थ्याद्विभाषा लभ्येत । पुनःपुनरिड्ग्रहणादिडेवेति । इण्निष्ठायां तत्र यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति भाष्यकृता सिद्धान्तितत्वात् । निरः कुषो निष्ठाया यस्य विभाषेति प्रतिषेधेपि निसः कुषो निष्ठाया इट्संभवेन निष्कुषितं निष्कु-ष्टमिति रूपद्वयस्य सिद्धौ नात्र पूर्वेण विभाषा प्राप्नोतीति भाष्यासङ्गतेः । इट्ग्रहणे क्रि-यमाणे प्युक्तरीत्येड्विकल्पापत्त्या पुनरिड्ग्रहणादिडेवेति भाष्यासङ्गतिश्च । उक्तरीत्या वि-कल्पप्राप्ताविण्निष्ठायामिति सूत्रवैयर्थ्यं च । तस्मादिण्निष्ठायामिति सूत्रारम्भसामर्थ्या-दुक्तभाष्यप्रामाण्याच्च यत्र रुत्वस्यासिद्धत्वं सिद्धत्वं वा तत्र सर्वत्र रान्तग्रहणे सान्तग्रहणं व्यर्थमेवेत्युक्तं तद्वैयर्थ्यं स्पष्टमेवेति । ननु रेफान्तदुर्पूर्वकात्स्थाधातोः कुप्रत्यये षत्वाभावघटितप्रयोगवारणाय सुषामादिषु दुष्ठुशब्दपाठ इति चेन्न । अपसुदुःषु-स्थ इति न्यासे रेफान्तस्य रोः सुपीति नियमेन विसर्गाप्राप्त्या सान्तपूर्वकात्स्थाधा-तोरेव कुप्रत्ययविज्ञानेनादोषात् । श्रुतक्रमानुरोधादिति । यद्यपि शब्दस्य विरम्य-व्यापाराभावस्तथापि शाब्दबोधोत्तरकालिको बोद्धृणां प्रतिपत्तिक्रमो ऽयमित्यदोषः । व्यक्तिपक्षे तु लक्ष्यभेदेन लक्षणभेदात्क्वचित्किञ्चिल्लक्षणं विधिमुखेन प्रवर्त्तते इती-ष्टसिद्ध्या सूत्रं न कर्त्तव्यमिति कैयटोक्तमयुक्तमित्यभिप्रेत्याह । जातिव्यक्तिपक्षयो-रुभयोरपीति । स्वं रूपं शब्दस्य । कल्पितान्वयव्यतिरेकेति । पदस्याखण्डत्वेन तत्र प्रकृतिप्रत्ययान्वयव्यतिरेकौ कल्पिताविति भावः । ई हल्यघोरिति । नात्र श-ब्दस्य रूपग्रहणसम्भवः । तस्याकारासम्भवात् । प्रकारतयाभासमानस्येति । न सो ऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते, इत्यभियुक्तोक्तया ग्रन्थे शाब्दबोधे शब्दस्वरूपस्य प्रकारतया भानाभ्युपगमात् । येन विधिः । सर्वसंमतत्वादिति । उपलक्षणमेतत् । विधिरित्यस्यानन्वयापत्तेः । अचाधातोर्यतंविधत्तइति । अत्र चैत्रसमशीलो धातुः संग्रामसमशीलश्च यत् हस्त्यादिसमशीलो ऽच् सेना-पतिसमशीलश्चाचार्यः हस्त्यश्वादिभिर्विभक्त इत्यत्र सेनापतिः कर्त्ता । तत्र

यथा चैत्रस्य सङ्ग्रामोत्पत्तौ हस्त्यश्वादयः करणमेवं धातो यद्दुत्पत्तावच् करणम् । यत्र धातावन्ते ऽच् तत्रैव यत उत्पत्तेः । भाष्ये उदाहरणान्तरं च देवदत्तस्य समाषः शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्त इति । अन्येन चान्यस्येत्यस्याचा धातो विधिरित्यर्थः । नन्वन्येन चान्यस्येत्यनेन कार्यसंबन्धिभिन्नस्यैव करणत्वसूचनेपि यस्मिन्परतः कार्यं तस्याकरणत्वं कथं दर्शितम् । नचान्यस्येति संबन्धसामान्यषष्ठ्या धातुप्रातिपदिकयोः पञ्चम्यन्तार्थयोरिव सप्तम्यन्तार्थस्यापि संग्रह इति वाच्यम् । अन्यस्येत्यस्योद्देश्यत्वार्थकषष्ठ्यन्तत्वेन प्रत्ययविधौ पञ्चम्यन्तार्थस्योद्देश्यत्वेन तेन तस्य संग्रहेपि सप्तम्यन्तार्थस्या ऽसंग्रहादित्यत आह । अन्यस्मिन्नित्यस्यापीति । ननु सप्तम्यन्तार्थस्याकरणत्वे एतदपवादो यस्मिन्विधिरित्यपि सप्तम्यन्ते न प्रवर्त्तेतेति चेन्न । सप्तम्यन्तं विना तस्याविषयाभावात् । साक्षात्कार्यनिमित्तस्य विशेष्यस्यैवाकरणबोधनाच्च । अन्ये तु विधिरिति कर्मणि किः तदन्तस्येति संबन्धिन उपादानात्तस्येत्यध्याहारः । तथाचायं सूत्रार्थः । यत्संबन्धी योविधिर्यत्कार्यं यत्कारणकं तदन्तस्य तस्य बोध्यमिति । अचो यदिति धातुसंबन्धी यद्विधिरच्करणक इति तदन्तस्य धातोः संबन्धी स बोध्यः । तदन्तस्येति । संबन्धसामान्येषष्ठ्यन्तामिति । प्रत्ययविधौ प्रकृतेरादेशविधौ स्थानिन आगमविधावागमिनःसंग्रहः । तथा च देवदत्तस्य समाषं शरावैरोदनेन च यथा यज्ञदत्तः प्रतिविधत्ते । यथा धातोर्यतमचा शास्त्रं विधत्ते । इकोयणित्यादौ तु न तदन्तविधिः यत्संबन्धी विधिर्यत्करणकः स तदन्तस्य तस्येत्यनेन कार्यसंबन्धि भिन्ने करण एव तदन्तविधिप्रवृत्तेस्तच्छाभात् । इदं च कार्यसंबन्धिनो व्यधिकरणविशेषणे करणे न प्रवर्तते । कार्यसंबन्धिनः करणत्वासंभवात् । एवं यत्र कार्यसंबन्धिनि समानाधिकरणात्तत्वमसंभवि । तत्रापि न तदन्तविधिः । एवं च तदन्तस्येत्युक्तिबलात् समानाधिकरणविशेषणरूपमेव करणं पर्यवस्यति । तयोरकणत्वं दर्शितामिति मूलोक्तं तु न युक्तम् । इक इत्यनेनानिको ऽचीत्यनेन हल्परकेकश्च व्यावृत्तिकरणत्वसंभवात् । तच्चान्तरङ्गत्वात्समानाधिकरणमेवेत्यपि न । शब्दतो विशेषणमित्युक्तौ ह्यन्तरङ्गत्वात्समानाधिकरण एवेति कथञ्चिल्लभ्येत । येनेति शब्देन हि करणमेवात्रोपात्तम् । अन्तरङ्गत्वमपि । अन्तरगङ्गत्वं च यत्र द्वयोर्ग्रहणासंभवः । किन्त्वन्यतरस्यैव तत्र ह्यन्यतरस्य ग्रहणं नियामकं प्रकृते तु द्वयो-

रीपे ग्रहणसम्भवेनान्तरङ्गत्वनियामकसकृदुच्चारितशब्दस्यैकार्थकत्वे ऽपि प्रतिलक्ष्यं तस्य प्रवृत्तेः । समानाधिकरणत्वे प्रायेण तदन्तविध्युत्तरकालिकसम्भावनासमधिगम्यत्वाविशेषणत्वस्याचो यदित्यादेरनेकाक्ष्वपि प्रवृत्तेः । तदन्तत्वसंबन्धित्वं चात्र परम्परयापि बोध्यम् । तेनोतश्च प्रत्ययादित्यत्र हेरेव साक्षात्कार्यसंबन्धित्वे ऽप्यङ्गस्य परम्परया तथात्वान्न दोषः । एवं तथा विशेषणत्वयोग्यतापीत्यसङ्गतम् । समानाधिकरणविशेषणत्वस्य तदन्तविधिप्रयोजकतायाः सूत्राक्षरास्पर्शत्वादिति दिगित्याहुः । तस्य चेति पाठ्यमिति । ननु व्यपदेशिवद्भावेन सिद्धेरिदं व्यर्थमिति चेन्न । वनो र च, रोणीत्यादौ व्यपदेशिवद्भावाप्रवृत्तेः । व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति निषेधात् । गृह्यमाणप्रातिपदिकेति । ननु किमिदं गृह्यमाणत्वम् । न तावदानुपूर्वीविशेषरूपेणापोदीयमानत्वम् । ऋष्यन्धकवृष्णिकुरुभ्यश्च, वृद्धाच्छ, स्तत्र जनपदतदवध्योश्च, द्विगोष्ठंश्चेत्यादौ तदन्तविधिनिषेधानापत्तेः नापि यथाकथञ्चिदुपादीयमानत्वम् । उगिद्वर्णग्रहणेष्वपि निषेधापत्तेः । नाप्युगिद्वर्णग्रहणभिन्नत्वम् । उगिद्वर्णे इति त्वेकदेशानुवाद इत्युत्तरग्रन्थासंगतेरिति चेन्न । प्रातिपदिकत्वव्याप्यधर्मपुरस्कारेणोपादीयमानत्वमित्यर्थेनादोषात् । प्रत्ययग्रहणेति । सोप्येतन्मूल इति भावः । वाचनिकः स इत्यन्ये । विरामो वसानं । वर्णानां नित्यत्वादभावासम्भवादाह । उच्चारणेति । वर्णवदिति । यावद् ब्रह्म विष्ठितं तावती वागिति श्रुत्या वर्णानां सर्वदेशकालवृत्तित्वेन दैशिककालिकक्रियासम्भवादिति भावः । परः सन्निकर्षइति । वर्णाद्वर्णान्तरोच्चारणे ऽर्धमात्राकालव्यवायस्य नित्यत्वेन तदधिककालव्यवायराहित्यमेव परः सन्निकर्ष इत्यभिप्रेत्याह । स्वभावसिद्धेति । संहिताधिकारइति । तयोर्व्वावचि संहितायामित्यधिकार इत्यर्थः । विषयभेदेइति । इदमयुक्तम् । तदुद्देश्यतावच्छेदकव्याप्योद्देश्यतावच्छेदकत्वं बाधकत्वे तन्त्रम् । तदुद्देश्यतावच्छेदकव्यापकोद्देश्यतावच्छेदकत्वं च बाध्यत्वे तन्त्रम् । यथा द्वितीयैकाच् द्विर्वचनमुद्देश्यतावच्छेदकमजादिधातुत्वप्रथमैकाच् द्विर्वचनोद्देश्यतावच्छेदकं धातुत्वमात्रम् । न च तथा प्रकृते ऽवसानसंज्ञोद्देश्यतावच्छेदकं वर्णोच्चारणाभावत्वं संहितासंज्ञोद्देश्यतावच्छेदकत्वं तु वर्णयोरर्धमात्राधिककालकृतव्यवधानराहित्यमिति कथमनयोर्बाध्यबाधकभावः । किञ्चास्तु सञ्ज्ञाभिन्नस्थले यथातथा भूतयोरपि बाध्यबाधकभावः संज्ञयोस्त्वेकसाङ्क्रित्वे एव बाधकत्वम् । अत एव राजपुरुष इत्यादौ समुदायगतभसञ्ज्ञया

राजन्शब्दे परत्वबाधो न । अत एवोत्तरपदत्वे चेति वार्तिकप्रत्याख्यानावसरे ऽजादिस्वादिषु पूर्वं भसञ्ज्ञं भवत्येतद्घटकं यदस्ति तदपि भसञ्ज्ञकमित्याकरे उक्तम् । किञ्चाऽशब्दात्संबुद्धौ वाक्यैकदेशे वाक्यप्रयोग इति न्यायेन प्रयुज्यमाने ऽवसानसञ्ज्ञा चरितार्था । एकवर्णात्मकत्वेन वर्णद्वयासत्त्वेन संहितासञ्ज्ञाया अप्रवृत्तेः । तत्रावसानसञ्ज्ञाफलं त्वणोप्रगृह्यस्येत्यनुनासिकप्रवृत्तिरिति दिक् । स्वशास्त्रसञ्ज्ञामात्रेति । इदमप्ययुक्तम् । एवं सति गुरुलघुसञ्ज्ञयोरपि बाध्यबाधकभावानापत्तेः । तयोरपि तच्छब्दशास्त्रादिप्रसिद्धत्वेन लोकविदितत्वात् । नचेष्टापत्तिः । बन्धुशब्दस्य शब्दान्तरेण द्वन्द्वे लघ्वक्षरं पूर्वमिति पूर्वनिपातस्याचिक्षणादित्यादौ दीर्घो लघोरिति दीर्घस्य चानापत्तेरिति दिक् । सुप्तिङन्तं । सुपः पकारेणेति । न तु टापः कपो वा पकारेणेत्यर्थः । आक्षिप्तस्येति । शब्दादुपस्थितस्यैव शाब्दबोधे ऽन्वयात् । अन्यथा घटमानयेत्युक्ते समवायसंबन्धेन घटशब्दसंबन्धितयोपस्थितस्याकाशस्य शाब्दबोधे ऽन्वयापत्तेः । द्वारमित्यादौ तु पिधेहीति शब्दस्यैवाऽध्याहारः । नन्वेवं ल्यब्लोपेत्यस्य निर्विषयत्वम् । अन्विताभिधानवादाङ्गीकारात् । स्पष्टं चेदं सर्वादीनि सर्वनामानीति सूत्रे भाष्ये, तथाहि नेदं सञ्ज्ञाकरणं पाठविशेषणमिदं सर्वेषां यानि नामानि तानि सर्वादीनि सञ्ज्ञोपसर्जनेति विशेषणे ऽवतिष्ठेते । यद्येवं सञ्ज्ञाश्रयं यत्कार्यं तन्न सिध्यति सर्वनाम्नः स्मै अन्वर्थग्रहणं तत्र विज्ञास्यते सर्वेषां यन्नाम तस्मादुत्तरस्य ङेः स्मै इति । यद्येवं सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति । एतेषां च शब्दानामेकैकस्य स स विषय इति कैयटश्चैतेषां चार्पाति । ततश्च सर्वस्मिन्नोदन इत्यादौ ओदनशब्दस्यापि सर्वनामकार्यं प्राप्नोति सामानाधिकरण्यादनयोरिति । गौरी ब्राह्मणितरेति । नेदं परिनिष्ठितं किन्तु ह्रस्वापादनाय कल्पितमलौकिकमेव परिनिष्ठितत्वे गौरीशब्दे पुंवद्भावापत्तेः । ननु घसञ्ज्ञायां तदन्तविध्यभावेपि प्रदेशेषु तदन्तविधौ पुनरुक्तदोषतादवस्थ्यमित्याशङ्क्याह । एतन्निषेधेति । इदमप्ययुक्तम् । सञ्ज्ञाविधौ तदन्तविध्यभावे घरूपेत्यत्रापि न तदन्तविधिः । हृदयस्य हृल्लेखेत्यत्राण्ग्रहणेन सप्तम्यन्ते प्रत्ययग्रहणे तदन्तविध्यभावज्ञापनात् । सञ्ज्ञाविधौ तदन्तविधौ तु घरूपेत्यत्र पुनस्तदन्तविधिर्दुर्वारः । सप्तम्यन्तप्रत्ययग्रहणाभावेनोक्तनिषेधाप्रवृत्तेः । किञ्च प्रगृह्यत्वस्य प्रत्ययाप्रत्ययसाधारणतया प्रदेशे तदन्तविध्यभावेनेदूदेद्द्विवचनमित्यादौ सञ्ज्ञाविधाविति नि-

मेधश्चरितार्थ इति क्व सामर्थ्यमित्येषा दिक् । इत्याद्यनुवृत्तेरिति । यद्यपि तदन्तांशाप्रवृत्तावपि प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादीत्युपतिष्ठत इति परिभाषाबलेनापि पदसमुदायस्य पदत्वं वारयितुं शक्यम् । तथाप्यनुवृत्त्या ऽपि निर्वाहप्रदर्शनपरमेतत् । सर्वस्य द्वे इति सूत्रे कैयटे ऽप्येवमेवोक्तम् । ननु इयानि यत्रैकदेशविकृतन्यायेन स्थानिवद्भावेन वा प्रातिपदिकत्वं सुलभमत आह । अतएवेति । इदं सर्वमयुक्तम् । प्रकृतिसत्त्वघटितस्य यस्माद्विहितस्तदादित्वस्य व्यपदेशिवद्भावासाध्यत्वात् । अवयवत्वतद्व्याप्यान्तत्वादित्वव्यवहारमात्रस्य तदतिदेशसाध्यत्वात् । अत एवासिद्धवत्सूत्रे भाष्ये प्रस्तनय्य गत इत्यादावल्लोपस्यासिद्धत्वादयादेशाभावमाशङ्क्य व्याश्रयत्वेन समाहितम् । त्वद्रीत्या त्वसिद्धत्वेपि स्वात्मगतलघुपूर्वत्वमादायायादेशसिद्ध्या तदसङ्गतिः । अत एव च हरिशब्देनादन्तत्वम् । नन्वेवं पूर्वादिनिः सपूर्वाच्चेति सिद्धे योगविभागो व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति परिभाषाज्ञापनार्थ इत्याकरासङ्गतिरिति चेन्न । सपूर्वादिति पूर्वशब्दस्य पूर्वावयववाचित्वात् सपूर्वादित्यस्य प्रातिपदिकविशेषणत्वात् । एव मेकगोपूर्वादित्यत्रापि । पूर्वादित्यस्य सामर्थ्यात्पूर्वान्तादित्यर्थः । अन्यथा व्यस्ते ऽप्यापत्तेः । इयन्मात्रमित्यादौ त्वन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति न्यायेन यस्येति लोपं बाधित्वा पूर्वं मात्रच् प्रत्ययस्ततो लोप इति न कश्चिद्दोषः । एवमस्यापत्यमिरेर्युवापत्यमायान इत्यादौ यञिञोश्चेति फक् सिद्धिरपि बोध्या । नन्वस्य मात्रचः फकश्चान्तरङ्गनिमित्तविनाशकलुक्प्रयोजकत्वाभाव इति चेत्सत्यम् । प्रक्रियायामुपसर्गसमानाकार इत्येतद्व्याख्यावसरे यस्माद्विहित इत्यनेनाधिकव्यावृत्तिरेव न तु न्यूनव्यावृत्तिरिति शेखरोक्तस्थादेशोक्तस्थलेषु दोषाभावात् । नन्वेवं हरिष्वित्यादौ सोः पदत्वापत्तिः । हलि सर्वेषामिति निर्देशेन सात्पदाद्योरित्यत्र सातिग्रहणेन चाधिकस्य यस्माद्विहितस्तदादेः संग्रहसम्भवे न्यूनस्यापि व्यावृत्तिकल्पनात् । सुमनायत इत्यादौ तु पृथक्करणेन स्वादेः क्यङ् प्रकृतिघटकत्वासंभवादधिकस्य सङ्ग्राह्यत्वासम्भवेन न्यूनव्यावृत्त्यभावः । एतेन व्यतिस इत्यादौ तिङ्ङतिङः इति निघातो व्याख्यातः असे इत्यस्य स्थाने से इत्यादेशकल्पनाद्वा ऽर्थवत एवादेशत्वादभावस्यानर्थकत्वेनादेशत्वासम्भवात् । हरिष्वित्यादावेकस्मिन्नित्यस्याभावेपि सोः पदत्वमुक्तरीत्या वारयितुं शक्यमित्येकस्मिन्निति व्यर्थमिति चेन् न । सभासन्नयनशब्दस्य वृद्धत्वाभावाय

दरिद्रातेरिवर्णान्तत्वाभावाय च तदावश्यकत्वात् । ससहायेइति । असहायत्वं च मुख्यव्यपदेशभागघटकत्वं । नन्वेवं कुम्भकारेभ्य इत्यादौ कृन्मेजन्त इति सूत्रे भाष्ये ऽव्ययत्वमापाद्य सन्निपातपरिभाषया समाहितम् । तदेतदसङ्गतम् । एकारस्य मुख्यैजन्तत्वव्यपदेशिभाग्घटकत्वमिति चेन्न । कृत्त्वसमानाधिकरणमुख्यैजन्तत्वव्यपदेशभागघटकत्वेनासहायत्वस्य सूपपादत्वात् । अत एव खट्वे इत्यादौ व्यपदेशिवद्भावेन द्विवचनस्यैदन्तत्वात्प्रगृह्यत्वम् । द्विवचनत्वसमानाधिकरणे तदन्तत्वं व्यपदेशभागघटकत्वस्य तत्र सत्त्वात् । एतेन निजौ चत्वार एकाच इति भाष्यमपि योजितं वेदितव्यम् । धात्ववयवत्वविशिष्टैकाच्त्वव्यपदेशस्य निजावप्यमुख्यत्वेन तद्घटकेकारे मुख्यधात्ववयवत्वविशिष्टैकाच्त्वव्यपदेशभागघटकत्वस्य सत्त्वात् । ध्वनितंचेदमिति । ससहाये व्यपदेशिवद्भावाप्रवृत्तिरित्येतत्प्रमेयमित्यर्थः । असहाय एवेति । यद्यपीयायेत्यादावपि प्रत्ययः सहायोस्त्येव तथापि प्रकृतिघटकः स्वसजातीयः सहायो नास्ति । एतावतैवासहायत्वव्यपदेशः । एकाकी हयमारुह्य जगामेत्यादौ विजातीयहयरूपसहायसत्वेपि तथा व्यपदेशदर्शनात् । तथाचार्थवता व्यपदेश इत्यत्रार्थवत्पदमर्थवत्सहचारितासहायत्वे लाक्षणिकमिति भावः । हलोनन्तराः । नन्वानन्तर्यस्योपलक्षणत्वे एकस्यापि हलो हलन्तरानन्तर्योपलक्षितस्य स्यादेव संज्ञा । उपलक्षणत्वं च सञ्ज्ञिकोट्यप्रविष्टे सति सञ्ज्ञिव्यावर्तकत्वमित्याशङ्क्याह । विशेषणतायाएवेति । विशेषणत्वं च सञ्ज्ञिकोटिप्रविष्टत्वम् । यथोक्तं मधुसूदनेन । सर्पज्ञानस्य भयकम्पादिजनकत्वे सर्पस्यापि तज्जनकत्वम् । सर्पादेर्ज्ञानविशेषणत्वसम्भवे उपलक्षणत्वायोगादिति । तत्रोपलक्षणत्वं च भयादिजनकव्यावर्तकत्वेसति भयादिजनककोट्यप्रविष्टकत्वम् । वस्तुतस्त्वेतदनन्तरो ब्राह्मणो भोज्यतामित्युक्ते आनन्तर्यस्य तत्प्रतियोगिनश्च कार्यान्वयादर्शनात् । आनन्तर्यविषयविषयिभावस्वस्वामिभावादिप्रतियोगिनामुपलक्षणत्वमेव । यत्र हि विशेषणत्वोपलक्षणत्वयोर्दर्शनं तत्र विशेषणत्वमेव न्याय्यमिति न्यायविदः । न हि आनन्तर्यादिप्रतियोगिनां विशेषणत्वं कुत्रापि तान्त्रिकानां सम्मतम् । एतेन सर्पादेर्भयजनकत्वोक्तिरप्यपास्ता । व्युत्पन्नत्वेनेति । इदमप्ययुक्तम् । व्रीहयः संयुज्यन्ते यत्र राशावित्यादावुक्तनियमव्यभिचारात् । यद्यपि घटपटौ संयुज्येते यत्रेत्यत्र घटपटातिरिक्तस्यैवान्यपदार्थतया प्रतीतिः । व्रीहयः संयुज्यन्ते यत्रेत्यत्र व्रीहीणामेव तथा प्रतीतिस्तथापि प्रकृते हलां विशेष्यत्वेन

भ्रीइयः संयुज्यन्ते यत्रेतिवदेव व्यवस्था युक्ता । तद्घटितेति । हल्पदस्योक्तव्युत्पत्त्यनुरोधेन हल्पदं तद्घटिते लाक्षणिकं स्यादिति भावः । हलौच हलश्चेति । स्वरितात्संहितायामिति सूत्रस्थभाष्यप्रामाण्येन द्विवचनबहुवचनान्तयोरेकशेषः शिष्यमाणं च द्वित्वविशिष्टहलोर्बहुत्वविशिष्टहलां च बोधकमिति भावः । फलाभावादिति । भूयादित्यत्र तु स्कोरिति सुटो निवृत्तौ पश्चात्तेनैव यासुटस्सस्य निवृत्तिरिति भावः । इदमप्ययुक्तम् । पङ्क्तेत्यादौ संयोगादिलोपानापत्तेः । अन्त्यात्पूर्वो मस्जेर्मिदिति वार्तिकेन जकारात्पूर्वं नुम्प्रवृत्तेः नच जकारे झलि परतो द्वयोः संयोगमाश्रित्य सलोपः सुलभः । सङ्कित्यधिकारेण झलादौ प्रत्यय एव तत्प्रवृत्तेः । भूयास्तामित्यादौ तु द्वयोः सकारयोः श्रवणमिष्टमेव । एवं च सति त्रयादिषु वर्णेषु संयुक्तेष्वित्याद्यभियुक्तव्यवहारा अपि संगच्छन्ते इत्येषा दिक् । इतिसूचितेति । अग्भिरित्युक्तावक्प्रत्याहारसंशयापत्तिरिति भावः । वस्तुतस्त्वल्पाच्तरं, नाज्झला, षजादौ गुणवचनादेवो,कालेज्झस्वो,पदेशे ऽजनुनेत्यादिनिर्देशेनाच्पदेन पदान्ते कुत्वाभावकल्पनेनादोषात् । सुप्प्रत्ययपरतस्तु कुत्वं भवत्येव । अक्ष्विति भाष्यप्रयोगात् । अत एवाच्सन्धिग्रहणेन ग्रहणमच्कार्याणि यथा स्युरित्यादयो भाष्यकाराणामभियुक्तानां च प्रयोगा उपपद्यन्ते । तितउदेवेति । इदं प्रत्येकं सञ्ज्ञापक्षे समुदाये संयोगसञ्ज्ञायां तु वाक्ये संहिताया अविक्षायां तितउ आगच्छेत्युदाहर्तव्यम् । न च संहिताया अविवक्षायां सन्निकर्षाभाव इति वाच्यम् । एवमपि तित ओ इतीत्युदाहरणसंभवात् । अत्र हि संबुद्धौ शाकल्यस्येति प्रगृह्यत्वम् । लोपसञ्ज्ञेति । यद्यपि लोपसञ्ज्ञा एतत्तदो,रोरीत्यादि सन्धिकार्योपयोगिनी लोपसञ्ज्ञा । यदि च सन्धिकार्ये कार्यितया निमित्ततया वा नोपयोगिनी सा सञ्ज्ञेति ब्रूषे तर्हि वृद्धिसञ्ज्ञापि न तथेति वक्तव्या भवति च सोचि लोपे चेत् ढ्लोप इत्यनयोर्लोपसञ्ज्ञापि निमित्ततयोपयोगिनी । किञ्च लघुसञ्ज्ञा न कथञ्चिदपि सन्धिकार्योपयोगिनी । यदि च गुरुसञ्ज्ञाबाध्यतया तदुपन्यासः, तर्हि पदसञ्ज्ञाबाधकतया भसञ्ज्ञा ऽप्युपन्यस्यताम् । किञ्च स्वादिष्विति पदसञ्ज्ञापि माभ्यामित्यादौ सन्धिकार्योपयोगिनीति तदनुपन्यासान्न्यूनता । एवं टिसञ्ज्ञाया अनुपन्यासेनापि न्यूनता एवं निपातसञ्ज्ञापि न सन्धिकार्योपयोगिनीति सापि न वक्तव्या स्यात् । एवं सम्प्रसारणसञ्ज्ञा संप्रसारणाच्चेति सन्धिकार्योपयोगिनीति वक्तव्या तथापि प्रायेण सन्धिकार्योपयोगिनीनां

सञ्ज्ञानां प्रकरणं प्रायेण समाप्तमित्यर्थान्न कश्चिद्दोषः । शेखरोक्तविशेषणेतु व्यर्थं एवातद्धानेप्यननुगमादिति सर्वेष्टसिद्धिः ॥ इति विषमपदविवृतौ शेखरव्याख्यायां सञ्ज्ञाप्रकरणम् ॥

इको गुण ॥ संज्ञाकरणेनेति । वृद्धिरादैजिति सूत्रे ऽदेङ्गुणइति सूत्रे च वृद्धिगुणसञ्ज्ञयोः सञ्ज्ञिविशेषे सङ्केतकरणेनान्यत्रोच्चारिताभ्यां ताभ्यां संज्ञिन एव प्रतीतेरित्यर्थः । पूर्वं सञ्ज्ञाशास्त्राप्रणयनात् । सञ्ज्ञासूत्रे सञ्ज्ञाशब्दस्य शब्दस्वरूपपरत्वेपि ततो ऽन्यत्र संज्ञित्वमेव । संज्ञिविशेषे ततः पूर्वं शक्तिग्रहात् । तदप्यनुवर्त्येति । गुणवृद्धिग्रहणमनुवर्त्येत्यर्थः । अनुवर्तमानं च शब्दस्वरूपपरमर्थाधिकारानुरोधादिति भावः । पूर्वं गृहीतशक्तिकस्य न शब्दस्वरूपपरत्वं किन्तु यत्रार्थसङ्केतस्तत्परत्वमेवेति नियमादिदमप्ययुक्तमित्याशङ्क्य स नियमो ऽप्यसिद्ध इत्याह । स्वादिष्विति । नियमस्तु संज्ञाशास्त्राद्यत्र संज्ञापदमनुवर्तते तद्भिन्नस्थल एवेति भावः । ननु सञ्ज्ञासूत्रादनुवर्त्तमानसञ्ज्ञापदस्यार्थाधिकारानुरोधाच्छब्दस्वरूपपरत्वाङ्गीकारे ष्णान्तेति सूत्रे ऽनुवर्त्तमानसंख्यापदस्यापि तथात्वापत्तिरित्याशङ्क्याह । ष्णान्तेति । इति वा र्थादिति । इति चार्थादिति युक्तः पाठः । आद्यस्योदाहरणं विभाषाप इति अन्त्यस्योदाहरणं विभाषादिक्समासे इति, तत्र हि दिक्शब्देन दिग्वाचकशब्दाननूद्य विहितसमासस्यैव ग्रहणं प्रकृते तु मिदेर्गुण इत्यादावपि गुणशब्देन गुणसञ्ज्ञकाननूद्य न कश्चिद्विहित इति न प्रतिपदोक्तपरिभाषावसर इति भावः । ननु लाक्षणिकत्वं विलम्बोपस्थितिकत्वं प्रतिपदोक्तत्वं च झटित्युपस्थितिकत्वम् । त्यदादीनाम इति च न झटित्युपस्थितिकं गुणशब्देनाकारादेरविधानादित्युक्तपरिभाषयैवोक्तार्थिकाया निर्वाहे तस्या भवदुक्तार्थो नोचित इत्याशङ्क्याह । ध्वनितं चेति । तत्र चेत्थं भाष्यं सञ्ज्ञाविधाने नियमः संज्ञया ये विधीयन्ते तेषु नियमः किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते गुणवृद्धिग्रहणसामर्थ्यात्तथाच द्यौः, पंथाः, स, इममित्यादौ न दोषइति । यदि चोक्तपरिभाषया निर्वाहः स्यात्तदा संज्ञया विधाने इत्युक्तप्रकारो ऽनर्थकः स्यात् तेन मन्यामहे लक्षणप्रतिपदोक्तयोर्मदुक्त एवार्थो भाष्यकृतो ऽभिप्रेत इति । तदाहेति । गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते इत्यस्य गुणवृद्धी भवत इत्यर्थके गुणवृद्धिपदे यत्र श्रूयेते इत्यर्थ इति भावः । एवमचश्चेत्यत्राप्यजूभवतीत्यर्थकानि ह्रस्वदीर्घपदानि यत्र श्रूयन्ते इत्यर्थः । एतेन गुणवृद्ध्योर्लक्ष्ये

विधाने न तत्रेक्पदोपस्थितिः स्यादित्यपास्तम् । अतएवेति । तथा च भवन्ति शालीय इत्यादौ च न दोषः अन्यथा एधे औपगवीय इत्यादावेव तौ स्यातामिति भावः । इत्यपास्तमिति । नन्वतो गुण इत्यत्र गुणइति प्रथमान्तं पदं न श्रूयत इति न दोष इति चेन्न । वृद्ध्यंश एव दोष इत्यभिप्रायात् । प्रत्ययस्थादिति । आपि परे इदं ककारस्य विशेषणमिति भावः । तदन्तस्येति । वृद्धिर्यस्येत्यादौ तु यच्छब्दसमभिव्याहारात्तद्वृद्धमिति विधेयनिर्देशाच्च वृद्धिपदस्य प्रथमान्तत्वे ऽपि यद्विधेयसमर्पकत्वनिर्णय इति । एतेन गुणवृद्ध्योर्विधेयत्वस्य वाक्यार्थबोधोत्तरकालिकत्वेन तदुत्तरमेवास्योपस्थित्या ऽलोन्त्यस्येत्यस्यापि तदुत्तरमेवोपस्थित्या तस्यानेन बाधः स्यादित्यपास्तम् । वाक्यार्थबोधात्पूर्वमपि यच्छब्दासमभिव्याहृतप्रथमान्तत्वेन मिदेर्गुण इत्यादौ गुणपदस्य विधेयसमर्पकनिश्चयसंभवेनास्यालोन्त्यपरिभाषातः पूर्वमेव प्रवृत्तेः । आद्यन्तौ । सूत्रारम्भसामर्थ्यादिति । न च हलो यमामित्यादौ तच्चरितार्थम् । लोके उपस्थितिक्रमेणान्वयस्य क्लृप्ततया तेनैव निर्वाहात् । सञ्ज्ञाया निर्देशेषु लोकन्यायेन सिद्धेर्यथासंख्यसूत्रे भाष्ये उक्तत्वेन सञ्ज्ञया द्वन्द्वेन च निर्देशे एतत्सूत्रारम्भसामर्थ्येनैव क्रमेणान्वयस्य वक्तव्यत्वात् । लोके त्वेवमिति । समूहयोरन्वयबोधोत्तरं पुनः प्रत्येकान्वयविवक्षया प्रयोगो ऽसाधुरिति भावः । तथा च तीर्णदग्धाब्धिलङ्क इति प्रयोगो ऽसाधुरिति केचित् । अन्ये त्वत्राजाविधनौ देवदत्तयज्ञदत्तावित्युक्तेर्न ज्ञायते कस्याजाधनं कस्याऽवय इति भाष्यस्वरसात् । द्वन्द्वगर्भबहुव्रीह्यर्थस्य समूहस्य द्वन्द्वार्थसमूहेनान्वयोत्तरं न प्रत्येकमन्वयः । परस्य द्वन्द्वार्थयोस्तु प्रत्येकमन्वयो भवत्येवेत्याहुः । भाष्ये स्पष्टमिति । तथा च भाष्यं यद्यपि तावल्लोके एष दृष्टान्तो दृष्टान्तस्यापि पुरुषारम्भो निवर्त्तको भवति कः संख्यातानुदेशो नामेति । परत्वादिति । इदमयुक्तम् । प्रत्ययः परश्चेत्यस्य पदैकवाक्यतया ऽन्वयस्य वक्ष्यमाणत्वेन वाक्यार्थबोधात्पूर्वमेव प्रवृत्तेः । अस्य च टकितौ यमुद्दिश्य विहितौ तदाद्यन्तौ भवत इत्यर्थेन वाक्यार्थबोधोत्तरमेव प्रवृत्तेरुभयोर्यौगपद्याभावात् । यथासंख्यं सिद्धमिति । ननु गुणानां च परार्थत्वादसंबन्धः समत्वाच्च स्यादिति न्यायविरोध इति चेन्न । एतत्सूत्रभाष्यप्रामाण्येनोभयनिर्देशे पञ्चमीनिर्देशो बलवानन्तरङ्गत्वादिति, तत्र भाष्योक्त्या ऽऽदेः परस्येति सूत्रे ऽपवादविप्रतिषेधात्सर्वादेशो भविष्यतीति भाष्येण च तन्न्यायस्यैतच्छास्त्रे ऽनाश्रयणबोधनात् । अ-

तएवोरण् रपर, इग्यणः सम्प्रसारणमित्यादौ षष्ठीस्थाने इत्यादेः प्रवृत्तिः। पर्यायेणेति। इदमप्ययुक्तम्। इतावित्यस्याभावे टकावाद्यन्तौ भवत इत्यर्थे ऽनुबन्धविनिर्मुक्तपदार्थोपस्थितेः स्वसिद्धान्तत्वेनाद्यव्यवस्थैवापत्तेः। इडादौ टकारोच्चारणसामर्थ्येनेत्सञ्ज्ञकटकारादिसंबन्धिनष्टकारान्तस्य वा ऽऽदित्वादिबोधनं तु क्लिष्टमितीद्ग्रहणं सार्थकमिति बोध्यम्। मिदचोन्त्यात्। निर्देशादिति। उपलक्षणमेतत्। श्नमो मित्त्वस्य। सौत्रमेकवचनमिति। कारके इत्यत्र निर्धारणसप्तम्यन्तत्वे कारकेष्विति वदेदिति भाष्येण निर्धारणार्थकविभक्तेर्बहुवचनरूपाया एव विभक्तेः साधुत्वबोधनादिति भावः। इतिभाष्यमिति। मिदचोन्त्यादिति सूत्रस्थमिति शेषः। परिभाषाणामिति। इदमप्ययुक्तम्। अलोन्त्यस्यादेः परस्येत्येतयो रनियामकत्वात्। तयोरभावे इत्यस्यानन्त्यस्यादेरनादेश्चाप्राप्तेः सन्देहे ऽनियमः। नचावयवषष्ठ्यादिषु सन्देह इति प्रकृतसूत्रस्थं भाष्यं तु सामान्येनार्थोपदेशस्य संशयस्थल एव प्रवृत्तिरित्यभिप्रायकम्। लौकिकोयं दृष्टान्तः। तद्यथा लोके कश्चित्कञ्चित्पृच्छति ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति स तमाचष्टे ऽमुष्मिन्नवकाशे हस्तदक्षिणो गृहीतव्य इति यस्तत्र तिर्यक्पथो भवति न तत्र सन्देह इति नासावुपतिष्ठते एवमिहापि सन्देहे नियम इति भाष्येण तथैव लाभात्। यद्वा पाक्षिकप्राप्तिकबाधेनोपपत्तौ नियतप्राप्तिकबाधो न न्याय्य इत्यभिप्रायकं भाष्यम्। निपातनात्साधुत्वस्येति। स्थानत्वस्यैव सम्बन्धत्वे तु स्थानं योगो ऽस्या इति वदेदिति भावः। संबन्धस्य प्रतियोगितानुयोगितान्यतरसंबन्धेन द्विष्ठत्वनियमात्स्थानस्य चातथात्वादिति भावः। दर्भाणां स्थाने इति। इष्टिविशेषे इदम्। शराश्च स्थूलास्तृणविशेषाः। प्रस्तरो मुष्टिविशेषः। किंचेति। अस्मिन्पक्षे शब्दानित्यत्वं रेखागवयन्यायेन समाधेयम्। तृज्वत् क्रोष्टुरिति। यद्यपि नात्र स्थानषष्ठी तथापि वतिं विहाय प्रथमायाः षष्ठ्यर्थत्वमङ्गीकृत्य क्रोष्टुशब्दस्थाने तृजन्त आदेश इत्यभिप्रेत्येदम्। इतिशब्द इति। इदमयुक्तम्। इतिशब्दस्य स्वसमभिव्याहृतपदे पदार्थविपर्यासकारित्वं स्वभावो न तु तद्बोध्यस्य शब्दस्यार्थपरत्वव्यवस्थापनं तस्मादितिशब्दः कार्यिकार्योभयस्थापको निपातानामनेकार्थत्वात्। तच्छब्दः सप्तम्यन्तार्थपरामर्शकः। तथाच सप्तम्यन्तार्थोपश्लिष्टस्य कार्यिणो यत्कार्यमिति तस्मिन्नितीत्यस्यार्थः। निर्दिष्ट इत्यादेश्च सप्तम्यन्तार्थे व्यव-

हितोच्चारिते पूर्वस्य तद्बोध्यमित्यर्थः । एवं तस्मादित्यस्याप्यर्थो बोध्यः । यद्वेति-शब्दः प्रकारे एवं प्रकारेण वर्तमानं कार्यमिति । अर्थोलिङ्गमिति । न तु स्वरूप-सती सप्तमी पंचमी च निमित्तम् । यस्मिन्विधिरित्यादेस्तु स्वरूपसती सप्तमी निमि-त्तम् तेन नेड्वशीत्यादौ तदुपस्थितिः । एतदुपस्थितिश्च उपपदविभक्तेरिति कारकविभक्तिसंभवे उपपदविभक्तिर्न न्याय्येत्यपि तन्न्यायार्थ इति भावः । बौद्ध-मिति । वर्णानां सर्वदेशकालवृत्तित्त्वादिति भावः । इयमेवेति । औपश्लेषिके ऽधि-करणे सप्तम्येवेत्यर्थः । ननु प्रत्ययः, परश्च, गाङ्कुटादिभ्य इत्यत्र दाबंशविशेषवि-कल्परिभाषोपस्थितौ परिभाषाणां नियमत्वं न संभवति । प्रत्ययार्थान्वितप्रकृत्यर्था-बोधासंभवेन षष्ठ्यर्थाद्यंशविकल्पनियमशरीरस्योपपादयितुमशक्यत्वादुक्तविषयद्वये प-रिभाषायां नियामकत्वासंभवादित्यत आह । परिभाषाणामिति । यद्वा पतिः समा-स एवेत्यादिनियमाविषये हरिशब्दादौ चारितार्थाया घिसञ्ज्ञायाः पतिशब्दे तेन नियम उपपद्यते । प्रकृते तु तस्मिन्निति परिभाषार्थं विना इकोयणित्यादीनां वाक्या-र्थबोधमात्रेण लक्ष्यसंस्कारकत्वमेव नेति कथं नियामकत्त्वमित्यत आह । परिभाषा-णामिति । अथवा साक्षाल्लक्ष्यसंस्कारकयोः शेषो घ्यसखि पतिः समास इत्येतयो र्भवतु नियम्यनियामकभावः । परिभाषाणां तु विधिवाक्येन सह वाक्यार्थबोधमन्तरा न लक्ष्यसंस्कारकत्वमिति न नियामकत्वसंभव इत्यत आह । परिभाषाणामिति । यद्वा परिभाषाणामङ्गत्वेनाङ्गीभूतप्रधानविधिसंकोचकत्वे लक्षणनियामकत्वासंभव इत्यत आह । परिभाषाणामिति । अलोन्त्य । ऋकारात्पूर्वइति । आद्यन्तौ टकितावलो-न्त्येत्यनयोः समावेशः स्यादिति भावः । नियमद्वयमिति । इदमयुक्तम् । सिद्धे स-त्यारम्भाभावात् । अन्ये त्वनेकाल्शित्सर्वस्येत्यस्यारम्भसामर्थ्यादेकालादेशस्य स्था-नषष्ठीनिर्दिष्टावयवस्थानकत्वं कल्पयित्वा नियामकत्वं वर्णयन्ति । तन्न युक्तम् । इतः पूर्वं नियमेनानेकालित्यस्य वाक्यार्थबोधकल्पने तद्वैयर्थ्यमूलकोक्तार्थकल्पने चातिगौरवेण लघुभूतविधित्वस्यौचित्यात् परिभाषाणामनियमे नियमकारिणीत्वमप-वादस्तु यदि परिभाषात्वसामानाधिकरण्येन तदोमिति ब्रूमः । यदि तदवच्छेदेन तदुक्तिस्तदा निर्युक्तिकः प्रवादो न प्रेमवद्भिरादर्त्तव्य इति ब्रूमः । परस्येत्यावर्तत इति । इदमप्ययुक्तम् । विभाषा दिक्समास इत्यादाविव परशब्देन परत्वबोधक-शब्देन वा परस्य यद्विहितं तत्रैवैतत्प्रवृत्त्या ऽऽवृत्तिवैयर्थ्यात् । तस्मात्परस्येति

लघुन्यासससंभवात् तस्मादित्युत्तरस्येति न्यासाभिप्रायेणेदं कथं चिद्योज्यम् । भूतपूर्वानेकाल्त्वमादायेत्त्युक्तमुपपादयति । विधाविति । ननु किमिदं विधौ निर्दिष्टत्वं न तावदनेकाल्पदबोध्यत्वम् । खरवसानयोर्विसर्जनीय इत्यादिविहित विसर्जनीयलोपानुनासिकोदात्तादीनामपि सर्वादेशत्त्वापत्तेः । नापि इशादिपदजन्यप्राथमिकोपस्थितिविषयत्वं तथा सति सानुबन्धस्यैव विधेयत्वापत्तेः । पदार्थोपस्थितिशाब्दबोधयोः समानविषयकत्वेनैव कार्यकारणभावादिति चेन्न । द्वितीयपक्षाङ्गीकारेणादोषात् । न च तत्पक्षोक्तदोषः गङ्गायां घोष इत्यादावपि गङ्गापदेन प्रथमोपस्थितप्रवाहस्य शाब्दबोधे भानवारणाय शाब्दबोधस्य प्राथमिकपदार्थोपस्थित्या समानविषयकत्वानङ्गीकारात् । यदि च प्रवाहोपस्थितिर्न शाब्दबोधकारणं या च कारणं तीरोपस्थितिः सा शाब्दे शाब्दबोधेन सामानविषयैवेति ब्रूषे तर्हि प्रकृतेपि या सानुबन्धकोपस्थितिर्न सा शाब्दबोधकारणं या च कारणं सा ऽनुबन्धविनिर्मुक्तविषयिणी पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैवेति ग्रन्थो ऽपि शाब्दबोधकारणोपस्थितिपर इति समानम् । तदेतदभिप्रेत्याह । उद्देश्यत्त्वविधेयत्त्वाविषयतयेति । धान्येन धनवानित्यादिवत्प्रकृत्यादिभ्य इत्यभेदे तृतीया । शित्त्वस्य प्रयोजनान्तरमाशङ्क्य निराकरोति । इदंसोरिति । नन्वनुबन्धानामनेकान्तत्वे इशादेरनेकाल्त्वाभावेन सर्वादेशत्वासिद्ध्या शिदिति सार्थकमित्याशङ्क्याह । अनुबन्धानामिति । ज्ञापनेनेति । ननु ज्ञापितेपि शकारोच्चारणसामर्थ्यादनुबन्धकृतमप्यनेकाल्त्वमादाय सर्वादेशत्वं भविष्यतीति पुनः शिद्ग्रहणं व्यर्थमिति चेन्न । अनुबन्धकृताऽनेकाल्त्वस्य सर्वादेशत्वप्रयोजकत्वे सिद्धे शकारोच्चारणसामर्थ्येनाद्यादेशत्वस्यापि कल्पनापत्तेः । इत्सञ्ज्ञकशकारस्याद्यादेशत्वे सर्वादेशत्वे च निमित्तत्वाभावविशेषादिति दिक् । इत्यादीनामिति । आदिपदेनावर्णस्तृ, ससजुषोरुरित्यादेः संग्रहः । एतेनेति । ऐसि आदेःपरस्येत्यस्य प्राप्तत्वेनेत्यर्थः । इतिपरिभाषेति । ननूरण् रपरो, यथासंख्यमित्यादिपरिभाषाणामनुक्तया न्यूनता तासामपि प्रथमाध्यायस्थत्वात् सन्धिकार्योपयोगित्वाच्च । किञ्च ज्ञापकन्यायसिद्धानां वाचनिकीनां च कासाञ्चित्त्यागः कासां चिदुपादानमर्धजरतीयं इकोगुणवृद्धी इत्यादिना सन्धिकार्यानुपयुक्तानां चात्र कथनं व्यर्थमिति चेन्न । प्रथमाध्यायस्थानां प्रायेण सन्धिकार्योपयोगिनीनां संज्ञानां प्रायेण कथनस्य प्रक्रान्तत्वे तथाभूतानां परिभाषाणामपि प्रायेण कथनं कर्तव्यमित्यभिप्रायेण तासां

कथनस्य कृतत्वात् । परान्नित्यान्तरङ्गानामिति तु परत्वादनेन बाध्यत इत्येतदुपादानायेत्यादि क्रमेण सूत्रभिन्नपरिभाषाकथनस्योपपत्तिः कथं चिच्चिन्त्या । ननु किमिदं परिभाषात्वं न तावत्स्वोत्तरत्वनैरपेक्ष्येण विध्युपकारकत्वं संज्ञाशास्त्रेष्वतिव्याप्तेः । नापि शक्तिग्राहकभिन्नत्वे सति तत्त्वम् । षष्ठीस्थाने योगा, यस्मिन्विधिः, प्रत्ययग्रहणे यस्मात्स इत्यादिष्वव्याप्तेः । किं च स्थानिवदादेश इत्याद्यतिदेशेष्वतिव्याप्तेः । यदि चातिदेशभिन्नत्वे सति तत्त्वं तत् । तदा ऽसिद्धं बहिरङ्गमन्तरङ्गे इत्यादिष्वव्याप्तेः इति चेन्न । संज्ञातिदेशयोरपि परिभाषात्त्वस्याङ्गीकारात् उक्तपरिष्कारस्य निर्दुष्टत्वात् । तथाचाहुः । "परितो व्यापृतां भाषां परिभाषां प्रचक्षत इति" संज्ञाच परिभाषा च विधिर्नियम एव च । अतिदेशो ऽधिकारश्चेत्याभियुक्तोक्तौ संज्ञातिदेशयोः पृथगुक्तिर्ब्राह्मणवसिष्ठन्यायेनेत्येषा दिक् । इति प्रथमाध्यायस्थानां परिभाषाणां प्रायेण प्रकरणं समाप्तिमियात् ।

इकोयणचि । ननु यथासङ्ख्यशास्त्रेण न निर्वाहः स्वौजसित्यत्रानुनासिकस्य स्थाने तादृशयण्प्रवृत्तये स्थानत आन्तर्यस्यावश्याश्रयणीयत्वात् इत्याशङ्क्याह । अनुनासिकस्थानेपीति । ननु तिबादिसूत्रेण लस्योच्चारणप्रसङ्गे तिब्घटितस्साधुरिति बोधयितुमशक्यं तत्स्थानिककार्यान्तराणामपि सत्त्वादित्यत आह । यदिहपरिनिष्ठितमिति । इह लक्ष्ये प्रवृत्तियोग्यसकलशास्त्रविषये । एतेन । यथासंख्यशास्त्रेण स्थानेन्तरतमसूत्रापेक्षया परेण व्यवस्थाङ्गीकारेण । सर्वतइति । यत्र प्रमाणकृतमादेशान्तरं यथा चेतेत्यादौ भकार एकारश्च तत्र स्थानत आन्तर्यं बलवत् । यत्रापि स्थानप्रमाणोभयकृतमेकं केवलस्थानकृतं चापरं स्थान्यादेशान्यतरत् तत्राऽपि स्थानकृतान्तर्यमेव व्यवस्थापकमिति स्थानेन्तरतमसूत्रस्यार्थ इत्यभिमानः । सूत्रकृतेति । वस्तुतो यरो ऽनुनासिके इत्यतो वाग्रहणानुवृत्तिर्बोध्या । प्रत्यासत्तीति । ननु स्थान्यपेक्षया ऽऽदेश एव प्रत्यासन्न इति चेन्न । सूत्रे आदेशस्य प्रत्यासन्नत्वेपि शाब्दबोधाय कल्प्यमाने आदेशः स्थानिवदिति वाक्ये स्थानिनः प्रत्यासन्नत्वमित्याशयात् । अतएवेति । तन्मात्रवृत्तीत्यनिवेश्य तद्वृत्तीत्येवं निवेशादेवेत्यर्थः । पुनरिति । संज्ञासु लक्ष्ये लक्षणस्येति न्यायानाश्रयणादिति भावः । तस्यापीति । इदं चिन्त्यम् । द्विरुक्तोत्तरभागात्पूर्ववृत्तित्वस्य देवदत्तयज्ञदत्तौ देभतुरित्यादौ सर्वत्वाद्देवदत्तादेरप्यभ्याससंज्ञापत्तिः । अभ्यासकार्ये

ऽङ्गाधिकारेण तद्दोषवारणे तु ऊर्णुनावेत्यत्र ह्रस्वो हलादिः शेष इत्यनयोरनापत्तिः। एवमेधामासेत्यादावेधामित्यस्य तत्त्वापत्तिः। अस्यापीति। धिन्वन्तीत्यस्यापि। एतेन धिन्वन्तीति प्रयोजनमपि शिथिलमिति सूचितम्। नव्यानां त्वयं भावः काचित्कपञ्चमीसमासं विनैव धिन्वन्तीत्यस्य सिद्धौ गुरुभूततन्मात्रवृत्तिधर्माश्रय इत्यर्थो नेचित इति। स्थानिसंबन्धी च योऽलित्यस्य फलमाह। प्रदीव्येति। उपदेशाप्रवृत्तौ। शास्त्राप्रवृत्तौ। यच्च तादृशवल्त्वघटितमिति समस्तपाठः। तादृशेति च वल्त्व विशेषणम्। कार्य एवेति। न तु कार्याभाव इत्यर्थः। व्यवहार एवेति। अतिदिश्यत इति शेषः। इदं तुल्यमिति। तन्निमित्तातिरिक्तेत्युक्तमित्यर्थः। शास्त्रीयमेवेति। अत एव स्थानिभूतादचः पूर्वत्वेन दृष्टत्वं तासौ नित्यानिट्त्वं च नातिदिश्यते। वस्तुतस्त्वशास्त्रीयमप्यतिदिश्यत एव। कथमन्यथा प्रदीव्येत्यादौ वलादित्वस्यातिदेशप्रसक्तिः। नचैवं उवयिथेत्यादौ तासौ नित्यानिट्त्वमादायेड्विकल्पापत्तिरिति वाच्यम्। वस्तुतस्तासि सत इत्यर्थाश्रयणेनादोषात्। अन्यथा तास्वदित्यनेनैव सिद्धौ तासीत्यस्यानुवृत्तिवैयर्थ्यम्। नचैवं कण्डूतिरित्यत्र ऊडनापत्तिरिति वाच्यम्। स्थानिभूतादचः पूर्वत्वस्य वलादित्वस्यैव विशेषणतया ऽल्घटितत्वेनादोषात्। दकशब्दस्येति। तत्र भाष्ये पूर्वोत्तरपदनिमित्तकार्यात् प्रागन्तरङ्गोप्येकादेशो नेत्यपि समाधानान्तरमुक्तम्। परिच्छिन्नपरिमाणेति। गुडोदकमित्युक्तं भाष्यं तु अभ्युपेत्योक्तिरिति भावः। लौकिकन्यायानाश्रयणे पूर्वपक्षस्योत्थानमेव न स्यादिति पूर्वग्रन्थाशयः। एवं च न कश्चिद्दोष इति। न चाप्रत्यय इत्यस्येत्युक्तदोषो नेत्यर्थः। क्वचित्तदनाश्रयणं। लौकिकन्यायानाश्रयणं। उवङियणिवेति। कण्डूयेत्यस्य यगन्तत्वे उवङ्। क्यजन्तत्वे यणिति विवेकः। द्विधा हि कण्ड्वादयो धातवः प्रातिपदिकानि चेत्यभियुक्तोक्तेः। अतएवार्थवत्सूत्रेति। अतिदिश्यमानधर्मविरुद्धेत्युक्तशास्त्रार्थाङ्गीकारादेवेत्यर्थः। अत्र च। इट ईटीत्यत्र। नन्वग्रहीदित्यत्र दीर्घे इट्त्वं दुर्लभम्। प्रदीव्येत्यादाविव शब्दतः स्थानितयोपात्तसमुदाय इडिति तदवयवोकाररूपाल्वृत्तीट्त्वरूपधर्माश्रये दीर्घविधौ स्थानिवत्त्वस्य दुर्लभत्वादिति चेन्न। स्थान्यवयवाल्वृत्तित्वमित्यत्र मात्रपदनिवेशेनादोषात्। यद्वा समुदायसत्तादशायां तदवयवाल्वृत्तित्वं विवक्षितमिति न कश्चिद्दोषः। लिङ्गाच्चेति। कित्त्वस्य त्काविशेषधर्मत्वात्। अस्माल्लिङ्गात् अशास्त्रीयधर्मातिदेशोऽपि। कित्त्वस्याशास्त्रीय-

त्वात् । अल्त्वव्यवहाराभावेति । इदं चिन्त्यम् । नदटष्टकारमादाय नद इत्यत्र हल्ङ्यादिलोपप्रसङ्गात् । अचःपरस्मिन् । परनिमित्तइति । परस्मिन्नित्यस्यौपश्लेषिकसप्तम्यन्तस्याज्विशेषणत्वे तु न पदान्तेति सूत्रे चर्ग्रहणवैयर्थ्यम् । जक्षतुरित्यत्र स्थानिवत्त्वाप्राप्तेः । स्थानिवत्त्वं सिद्धयतीत्युत्तरम् । अत एव चङ्परनिर्ह्रासे इति पाठः । अग्रिमदेशे ऽस्य पाठस्त्वसंगतः । यलोपो न स्यादिति । यलोपे न स्थानिवदिति निषेधस्तु न । स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदित्युक्तेः । निगाल्यतइति । इदं वव्रश्चेत्यादेरुपलक्षणम् । पूर्वविधावित्यत्र षष्ठीस्थाने योगेति न प्रवर्तते षष्ठ्या अश्रवणात् । अत एव अचः किमागत्येति भाष्यं संगच्छते । सवर्णदीर्घइति । इदं प्रयोजनमन्यथासिद्धम् । अभ्यासकार्यप्रतिबन्धकस्तदुत्तरखण्डस्थाजादेशः स्थानिवद्भावो नेत्यनेन सिद्धेः । उक्तार्थफलं तु श्लेष्मा३ घ्नेत्यत्र संयोगसञ्ज्ञायां स्थानिवत्त्वाभावः । नकारास्थितिरिति । वस्तुतस्तु धर्मिग्राहकमानात्सन्नियोगशिष्टन्यायो लुग्विषय इति नात्र दोष इति तत्र वैयर्थ्यम् । विधेयस्याभावादिति । इदं चिन्त्यम् । यस्येति लोपस्य विधेयस्य सत्त्वात् । भावसाधनइति । इदं भाष्यमेकदेशयुक्तिः फलाभावात् । नपदान्त । वतिघटितान्येति । असिद्धं बहिरङ्गमित्यस्य व्यावृत्तये वतिघटितेति । अचःपरेत्यस्य व्यावृत्तये ऽन्येति । वतिघटिता ये ऽचः परेत्यतो ऽन्ये ऽतिदेशास्तेषामित्यर्थः । इदं फलितार्थकथनं न ज्ञाप्यांशकथनं स्वस्मिन् चारितार्थ्याभावप्रसङ्गात् । ज्ञाप्यांशस्तु वतिघटितातिदेशानां त्रिपाद्यां प्रवृत्तिरिति तेन स्थानिवदादेशः, अन्तादिवच्चेत्यनयोस्त्रिपाद्यां प्रवृत्तिः अचः परेत्यस्य तु न प्रवृत्तिः द्विर्वचनादिग्रहणस्य त्रैपादिकोपलक्षणत्वात् । भावसाधनइति । विधिष्विति बहुवचनं तु विधेयभेदेन विधिभेदात् । वस्तुतः कर्मणि किः । कर्मधारयः समासः । तत्र सुलोपस्स्थानिवत्त्वादित्यस्य सुलोपो नेत्यनेनान्वयः । उत्वेचेति । इदं चिन्त्यम् । रोः स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावात् । तस्योत्वे स्थानिवत्त्वाप्रसक्तेः । परे तु पदान्तस्य स्थाने इत्यर्थः शङ्कितुमशक्यः । पदान्तस्य स्थाने विधौ द्विर्वचनादेश्च विधौ इत्यर्थाश्रयणे वैरूप्यापत्तेः । एषो यन्नित्यसाधुः परत्वान्नित्यत्वाच्च सुलोपस्य न्याय्यत्वात् । न च तत्र स्थानिवद्भावः । पादस्य लोप इति लोपस्यैव सुलोपस्यापि पदचरमावयवत्वात् । लक्ष्यानुरोधेन पदसंस्कारपक्षस्यैवात्राश्रयणाच्च । अत एव य एवास्मि समन्यजेति श्रौतप्रयोग एष यन्निति छान्दोग्यप्रयोगश्च संगच्छते ।

लोकेऽपि ससन्नित्येव प्रयुज्यते नतु सः सन्नितीत्याहुः । नदोषइति। नतु पदे ऽन्त-
इति सप्तमीसमासे ड्मतुपः पदत्वाभावेनैव वेतस्वानित्यत्र दोषवारणे परपदस्थाजादेश
इत्यस्य नोपयोग इति चेन्न । वेतस्वानित्यादावित्यादिपदेनापीपचन् देवदत्तयज्ञदत्त-
विष्णुमित्रा इत्यस्य ग्रहणेन तत्रोक्तार्थस्योपयोगसत्त्वात्। तत्र हि पदे परतोऽन्ते जुस्,
अजादेशस्तु न परपदस्थः । पदचरमावयवविधायकातिरिक्तस्येति । नचैवं पिपठीरि-
त्यत्र रुत्वं न स्यादिति वाच्यम् । पूर्वत्रासिद्ध इत्यस्याप्रवृत्तावपि क्कौ लुप्तमि-
त्यस्य प्रवृत्त्या दोषाभावात् । एतेन पिपठीर्भ्यामित्यादिप्रयोगा उपपादिता विज्ञेयाः ।
नचैवमपि गर्दभमाचष्टे गर्दभयति ततः क्विपि गर्धब् इत्यत्र जश्त्वाद्यनापत्तिः ।
न हि तत्र क्कौ लुप्तमित्यनेन निर्वाहःअल्लोपस्य क्किनिमित्तत्वाभावादिति वाच्यम् ।
नपदान्तसूत्रस्थभाष्यप्रामाण्येन ड्मतुपि त्रैपादिके कर्त्तव्ये पूर्वत्रासिद्धेनेत्यस्या
प्रवृत्तिरित्यर्थाश्रयणेन सर्वसामञ्जस्यात् । वेतस्वान् महिष्मानित्यनयोः पूर्व-
त्रासिद्धेत्यस्याप्रवृत्तावपि जशि न स्थानिवदित्यस्य प्रवृत्त्या जश्त्वं दुर्वारमि-
त्याशङ्क्याह । सूत्रे जश्पदेनेति । इदं चिन्त्यम् । गर्धब्वानित्यत्र जश्त्वानापत्तेः ।
ननु पदचरमावयवसाधकस्थानिवद्भावस्यैव नपदान्तेति निषेधः । यथा गांचेत्यादौ
तथा च वेतस्वानित्यत्र स्थानिवद्भावो न तत्साधकः किन्तु रुत्वप्रतिबन्धक इति
न तस्य न पदान्तेत्यनेन निषेध इति पदेऽन्त इत्यर्थाश्रयणेन तत्र दोषवारणपर-
भाष्यं न संगच्छत एवेत्याशङ्क्याह । प्रतिबन्धकश्चेति । तिङ्त्यादीति । आदि
पदेन चिण्णमुलोरिति सूत्रस्थं भाष्यम् । इदं च दीर्घग्रहणवर्जमित्यंशे साधकम् ।
ननु द्विर्वचनग्रहणादित्ययुक्तम् । द्विर्वचननिषेधस्यात्र कर्तव्यत्वादित्यरुचेराह । पूर्व-
त्रासिद्धे इति । अनुत्पत्तेरेवेति । प्रक्षालनाद्धिपङ्कस्येति न्यायात् । प्रक्रियादशाया-
मिति । परिनिष्ठिते तु जश्त्वेन दकार इति भावः । सार्थकेति । वस्तुतो ऽभावो
नाकृतिरिति तन्न्यायविषयो नात्राभिन्नार्थत्वसंभावनेति । यथा गवामश्वेषु च स्वा-
मीत्यत्र । परएवेति । तेन लिङ्गविशिष्टपरिभाषया पुत्रयादिनीत्यत्र न द्वित्वनिषेधः ।
येन नाव्यवधानन्यायेनैकवर्णव्यवधान एव तत्प्रवृत्तेः । किञ्च पुत्रशब्दस्य विशेषण-
त्वे उभयत आश्रयणे नान्तादिवदिति निषेधात्पुत्रशब्दस्यादिनीपरत्वमेकदेशविकृ-
तन्यायेनोपपादनीयं स्यात् एकदेशविकृतन्यायश्चात्तपरिमाणे न प्रवर्त्तते यर्विशे-
षणत्वे तु पूर्वान्तवद्भावेन पुत्रशब्दत्वं परादिवद्भावेन चादिनीशब्दत्वे पौर्वापर्याश्र-

यणे एवोभयत आश्रयण इति निषेधः अचःपरस्मिन्निति स्थानिवत्त्वं पूर्वत्रासिद्धमिति निषिद्धम् । न चादिनीशब्दस्य यविशेषणत्वे यणो मय इति रेफस्य प्राप्तं द्वित्वमेव निषिध्येत । तस्यादिनीशब्दपरत्वात् तशब्दस्य तदभावादिति वाच्यम् । अचः परस्य यर इत्यर्थाश्रयणेनादोषात् । नेमौ रहौ कार्यिणाविति भाष्येण रेफस्य द्वित्त्वकार्यित्वाभावाच्च । अतएव । ङ्यन्तानुकरणत्वादेव । आदिनीशब्दो यस्मादिति । अन्यथाऽदिन्शब्दो यस्मादिति वदेत् । पुत्रहतीति । पुत्रो हतो ययेति विग्रहः । बहुव्रीहेश्चान्तोदात्तात्, अस्वाङ्गपूर्वपदाद्वेति ङीष् । अतएवेति । सजातीयानां ग्रहणादेवेत्यर्थः । इदं चिन्त्यम् । विजातीयानां ग्रहणे ऽप्यचः परस्य यर इत्यर्थस्य वक्ष्यमाणत्वेनाचोरहाभ्यामित्यस्य वैयर्थ्याभावात् । शेषार्थेत्यस्य फलमाह । आपत्यस्येति । यमामिति किमिति । हलः परस्य लोप इत्युक्तावव्यवधिमतोः साजात्याद्धल एव लोपो भविष्यतीत्याशयः । इतरांशे इकारोकारांशे । नन्वयाद्याद्देशे संवृतस्य श्रूयमाणस्यापि शास्त्रदृष्ट्या ऽसिद्धत्वाद्विवृतत्वमेवेति चेन्न । एतद्भाष्यप्रामाण्येनासिद्धत्वाभावकल्पनात् । किञ्च सवर्णसञ्ज्ञादृष्ट्या अ अ इति विहितस्य संवृतस्यासिद्धत्वेपि स्थानेन्तरतमसूत्रदृष्ट्या नासिद्धत्वम् । तस्य लोकन्यायसिद्धार्थानुवादकत्वस्य भाष्यसंमतत्वात् । लौकिकन्याये च संचरणीये नासिद्धत्वम् । यस्मिन्विधिरिति परिभाषां विनैव यान्तप्रत्ययासंभवाद्यादाविल्यर्थो भविष्यतीत्याशङ्कयाह । तस्मान्नुडिति । वाचनिक्येति । इदं चिन्त्यम् । नल्पपीति लिङ्गेन तत्सिद्धेरिति केचित् । यस्मिन्विधिरिति । सप्तम्यन्ते विशेषणे ऽल्शब्दे उपादीयमाने यस्मिन्नलि यो विधिः स तदादौ इत्यर्थः । हलि सर्वेषामित्यत्र वग्रहणं नानुवर्त्तते इत्यभिप्रेत्याह । लोपःशाकल्यस्येति । निमित्तत्वानाक्रान्ते इति । यथा प्रकृते पूर्ववकारे । न हि ततः पूर्वं लोपकार्यी तिष्ठति येन तस्य तिमित्तत्वं स्यात् । अचो रहाभ्यामित्यत्र तु रेफे द्वित्त्वनिमित्ते नियमेन द्वित्त्वकार्यित्वं प्राप्नोति । विधेयविषयश्चेति । अचोरहाभ्यामित्यनेन रेफस्य द्वित्वनिमित्तत्वमपूर्वं बोध्यमिति विधेयमेवेति भावः । विशेषासंप्रत्ययादिति । कुटिलं व्रजतीति वाक्यात्कुटिलं पन्थानं गच्छतीत्यस्यैव प्रतीतिर्न तु कौटिल्यविशिष्टव्रजनरूपविशेषस्य संप्रत्ययः । शब्दस्वाभाव्यादित्यर्थः । अनुकृष्यतइति । अनुकृष्यमाणस्य च यङन्तेन क्रियासमभिव्याहाररूपविशेषासंप्रत्ययादित्यर्थः । लौकिको-

दाहरणेति । छन्दसि तु जीवे रदानुकि जीरदानुः स्निवे रास्नेमाणमित्युदाहरणमस्त्ये-वेति भावः । व्यवस्थितत्वादिति । व्यवस्थितविकल्पत्वादित्यर्थः । इत्याहुरिति । परे तु लोपो व्योरिति सूत्रे वकारप्रत्याख्यानमेकदेशयुक्तिः । इको गुणेति सूत्रस्थभाष्य-विरोधात् अत एव न पदान्तसूत्रे वृक्षवित्यत्र पदान्तस्य स्थाने इत्यर्थे लोपोव्यो-रिति लोप आपादितो दीक्षितेन । लणूसूत्रे च वृक्षवित्यत्र क्विपि लोपो व्योरिति लोपप्रसङ्ग इति कैयटेनोक्तम् । लोपः शाकल्यस्येत्यत्र वृक्षव् करोतीत्यत्र लोपो व्योरिति लोपस्याग्रिमशेखरे आशाङ्किष्यमाणत्वाच् च । अत एव "सुवे सुवे वारिद-द्वात्सुराणां सुका रणे लाघवतश्च रामः । विशेषणे द्वे य इहादि कर्तुर्वेदेदधीती स इह कैयटीये" इत्यभियुक्तोक्तिः सङ्गच्छते । तत्र हि सुधे सुकारिति विन्विक्षाण्विभ्यां विचि गुणे रूपम् । न च सुधे इत्यत्र न धातुलोप इति गुणनिषेधः शङ्क्यः । आर्ध-धातुकत्वतद्व्याप्यान्यतररूपेणार्धधातुकनिमित्तके लोप एव तत्प्रवृत्तेः । अन्यथा न धातुलोपेत्यस्य प्रत्याख्यानेन फलभेदापत्तेः । अगुधीदित्यादौ तिप्निमित्तकगुणवार-णाय लघूपधाद्विहिते प्रत्यये गुण इत्यर्थे तु अत्र गुणो दुर्लभः । अत एव च च्छ्वोःशूडिति सूत्रे भाष्ये ऊठ्धित्वे ऊडादिः कस्मान्न भवत्यस्त्वादिर्लोपोव्योरिति वकारस्य लोपो भविष्यती त्युक्तं भाष्ये । तत्रैव कैयटे क्विग्रहणानुवृत्तिपक्षे दिवेर्यङ्लुकि देदेतीत्युक्तम् । छन्दसि सर्वविधीनां वैकल्पिकत्वमाश्रित्य गव्यूतिरि-त्यत्र वलोपवारणं त्वगतिकगतिः । लोके ऽध्वपरिमाणे सवकारेणैवाध्वपरिमाणप्रतीत्या वलोपो नेत्यपि शिथिलम् । न हि पूर्वपदादित्यत्रेव सवकारेणाध्वपरिमाणेगम्ये वान्ता-देश इत्यर्थो ऽस्ति । वस्तुतः पूर्वपदादित्यत्रापि सणत्वेन सञ्ज्ञायां गम्यमाना-यामित्यर्थो न युक्तः । अग इत्यस्य वैयर्थ्यापत्तेः । रघुनाथादौ क्षुभ्नादित्वाणत्वं नेत्याहुः । तदा । तत्स्थेन तच्छब्देन । तत्र धान्यंक्रय्यमिति तत्पुरुषविषये तद्धान्यं क्रय्यमित्यर्थः । तत्पुरुषं प्रति तद्धान्यं क्रय्यमिति फलितम् । तत्र धान्यं क्रेयमिति । तत्पुरुषंप्रति धान्यं क्रेयमिति फलितम् । द्रव्येति । मूल्यभूतस्वर्णरूप्यादिद्रव्ये इत्यर्थः । लोपःशाकल्यस्य । बाधकमिति गार्ग्यग्रहणस्य पूजार्थत्वेन नित्यं तदिति भावः । शाकल्यमते इति । अत एव कौ बाहू का ऊरू इति शाकलानां वकाररहि-तःपाठः । तैत्तिरायाणां सवकारःपाठः । एतेनेति । वलोपे स्थानिवत्त्वेनेत्यर्थः । अन्योन्याश्रय इति । यथा ऽस्य न पदान्तसूत्रस्थशब्दरत्नेनाविरोधस्तथा तट्टीका-

यामस्माभिर्निरूपितम् । पदत्वादिद्वारकेति । आदिपदेन पदत्वाभावः । परम्परया वेत्येतत्प्रापकस्य प्रतिबन्धकस्य वेत्युभयत्रान्वयि । अत्र च स्थानिवद्भावः पदत्वाभावसम्पादनद्वारा पूर्वत्रासिद्धीयप्रतिबन्धक इति बोध्यम् । वस्तुतस्तु पूर्वत्रासिद्धीय इत्यस्यैवमर्थकरणे फलस्य प्रमाणस्य चाभावः । ननु पाचयतेः पाक्, याजयतेर्याट्, पिपठिषतेः पिपठीरित्यादौ कुत्वादिप्रवृत्तिः फलम् । अन्यथा तत्र पदसञ्ज्ञायां चकारादेः पदान्तत्वाभावेन कुत्वाद्यनापत्ते रिति चेन्न । कार्यकालपक्षे पदसञ्ज्ञाया अपि पूर्वत्रासिद्धीयत्वेनादोषात् । हलोणः सन्तीति भाष्ये क्वचित्परे ऽणःसन्तीति पाठः । इत्याहुरिति । परेतु भोभगो इति सूत्रे भाष्ये वृक्षव् करोतीति प्रयोगस्य कण्ठत एव पठितत्वेनानभिधानोक्तिः साहसादेव । न पदान्ता हलो ऽणः सन्तीत्यत्र च कार्यभाज इति शेष इति कैयटेनैव लण्सूत्रे विस्पष्टमुक्तत्वेन वृक्षवादेरनभिधाने प्रमाणाभावाच्च वृक्षव् करोतीत्यत्र चाशीत्यनुवृत्त्या हलिसर्वेषामित्यस्याप्रवृत्तौ वकारस्य न कार्यभाक्त्वम् । यद्वा न पदान्ता हलोण इत्यस्य दोषसम्पादका इति शेषः । तेन हर एहि विष्णविहेत्यादौ पदान्तहल्रूपाणां सत्वे ऽपि न क्षतिः । वृक्षव् करोतीत्यत्राशीत्यनुवृत्त्या न दोष इति स्पष्टमेव भाष्ये उक्तम् । वकारनिवृत्त्यैवात्र तद्वारणसंभवादिति तु न युक्तम् । द्वन्द्वनिर्दिष्टयोरेकदेशनिवृत्त्यसंभवात् । अत एव द्वन्द्वनिर्दिष्टैकारस्य निवृत्त्यर्थमदसो मादिति सूत्रे माद्ग्रहणं कृतम् । भोभगो इति सूत्रस्थश्चिन्त्यमेतदिति कैयटग्रन्थस्तु लण्सूत्रस्थस्वोक्तदिशोपपत्तिचिन्तनं कार्यमित्येवं पर इत्याहुः । इतिवदिति । अनूद्यमानविशेषणे ऽपि सा परिभाषा प्रवर्ततइति भावः । वव्रेइति । स्थानिवत्सूत्रे आरेत्यादौ स्वोक्तदिशा द्विरुक्तपूर्वभागस्य पुनरभ्यासत्वे ऽनादेस्तेन निवृत्तेश्चिन्त्यमेतदिति केचित् । अत्रपक्ष इति । अणमनूद्य रपरत्वं विधीयत इति पक्षे इत्यर्थः । रलपरानिति । वृद्धिरादैजदेङ्गुण इति सूत्रयोराराल्लौ अरलौ च विशिष्य निर्देष्टव्यौ । ऋत इद्धातोरित्यादौ तु रपरः पाठ्यः । भृत्रामिति । इदं न युक्तम् । अभ्यासे हलादिः शेषेणानादेर्हलो निवृत्तेर्विशेषाभावात् । अतएवास्येति । इदं चिन्त्यम् । विनिगमनाविरहेणार्थद्वयपरत्वे ऽपि विकल्पालाभात् । अर्थद्वयपरत्वं तु तन्त्रावृत्त्यादिना बोध्यम् । पृथक्पदमिति । पूरणगुणेति षष्ठीसमासनिषेधादिति भावः । इणेत्रेति । न तु वीगतीत्यत्र प्रश्लिष्ट इत्यर्थः । वृक्षे शाखेति न्यायनये । ऽवयवस्या-

षयविन्याधारत्वप्रसिद्धावपि लोके ऽवयविनो ष्यवयवाधारत्वं प्रसिद्धमिति भावः । ण्यन्तस्य शब्दान्तरत्वमभ्युपेत्य तुष्यतु दुर्जन इति न्यायेनाह । किं चेति । एधत्यं-वयवत्वे इति । तत्त्वेन दृष्टे इत्यर्थः । भेदेनापेक्षायामिति । इदं बाध्यमित्यपेक्षाया-मित्यर्थः । सर्वं बाध्यमिति विवक्षायां तु नायं न्यायः । यथा ऽचिरादेशे । पूर्वं धातुरिति । अत्रचेदमपि लिङ्गमिति भावः । अन्तादिवच्च । पूर्वपरशब्दौचेति । तथा च पूर्वपरयोरित्यन्ताद्योर्विशेषणम् । यद्वा पूर्वपरयोरित्यध्याहृतव्यवहारान्वयी तथा चान्तादिवर्णवत्स्वघटितसमुदाये प्रातिपदिकत्वादिव्यवहारानादेशः संपादयति । समुदायस्यान्तादिभ्यामित्यग्रिमशेखरस्वारस्येन तु पूर्वपरयोरस्यान्तादिपदार्थे ऽन्वय इति लभ्यते । अन्त्यपक्षेतु समुदायेत्यस्य ये व्यवहारा इत्यनेनान्वयः । षष्ठ्यर्थो-निष्ठत्वम् । अत्र च वतिस्तेनतुल्यमित्यनेन । एकादेशइति प्रथमान्तश्रवणात् कृतैकादेशस्येति तु फलितार्थकथनम् । औइत्यस्येति । तस्यैकादेशघटितत्वं व्यपदे-शिवद्भावेन । तद्वैयर्थ्यमिति । अधिपूर्वाद्दैवादिकाद्‌ङ्तावितिं धातोः क्त्वो ल्यपि तुगभावार्थमसिद्धवचनस्य चारितार्थ्याच्चिन्त्यमेतदिति केचित् । इष्यत एवेति । इदं चिन्त्यम् । स्थानिवत्सूत्रप्राप्तस्थानिवत्वस्यैवोभयत आश्रयण इत्यनेन निषेधाङ्गी-कारादिति । इतिदिगिति । अन्ये त्विदं देवदत्तस्येदं यज्ञदत्तस्येत्यादावग्रिमेदमि-त्यस्योत्तरान्वयित्वेन देवदत्तस्येदमिति स्थानिसमुदायस्य निरर्थकत्वेन देवदत्तस्येद-मित्यादेशकल्पना न तत्र संभवति । अर्थवत्त्वेवानुमानिकस्थान्यादेशभावविश्रान्तेः । तथा च तत्रेष्टानुरोधेन देवदत्तस्येति वेदमिति वा ऽऽदेशः कल्पनीयः । एवं स्वाश्वशब्देपि । तत्र हि स्वाइत्यादेशकल्पना ऽऽश्व इत्यादेशकल्पना वा स्यात् । तथा चानुमानिकस्थान्यादेशभावे एकादेशविषये प्रत्येकं स्थानित्वेपि एकादेशान्ते पूर्ववृत्तिधर्मस्य तदादौ परवृत्तिधर्मस्य स्थानिवद्भावेन लाभो न तु वैपरीत्येन अत्रैवान्तादिवच्चेति तात्पर्यग्राहकम् । एवं च आश्वशब्दे ऽश्वशब्दत्वं स्थानिवद्भा-वेन स्यान्न स्वशब्दत्वमिति न दोषः । भिय इत्यादौ तु भीशब्दत्वं स्थानिवत्वेन स्यादेव । आनुमानिकस्थान्यादेशभावे एकादेशघटिते धातुत्वानयनसंभवात् । क्षीरपेणेत्यत्र तु पे शब्दे आनुमानिकस्थान्यादेशभावमाश्रित्योत्तपरदत्वमात्रमानीयत इति णत्वसिद्धिरिति भावः । एवं च सत्यन्तादिवद्भावस्य स्थानिवत्सूत्रमूलकतया न वा ताद्रूप्यानतिदेशादिति प्रतिषेधखण्डनं सूपपद्यते । अत एव ङ्याप्ग्रहणे ऽदीर्घ

इति स्थानिवत्त्वनिषेधे ऽपरदीर्घग्रहणं चरितार्थम् । एकाजुत्तरपदत्वस्यान्तवद्भावेनातिदेशे खट्वाभिरित्यादावदन्तत्वस्याप्यतिदेशापत्तिः । पूर्वपरघटितसमुदायस्येत्यर्थेन तु न वा ऽताद्रूप्यातिदेशादिति वार्तिकार्थस्य तु न क्रोडीकारः रामावित्यादौ भवदुक्तदिशा व्यपदेशिवद्भावो नाभिरित्यत्र पूर्वान्तवद्भावेनात्वातिदेशे ऐसादेशापत्तिरित्याहुः । ज्ञापकानुसरणं वेति । तस्मादित्युत्तरस्येति निर्देशात् ज्ञापकात्त्रिपादीस्थेन्तरङ्गे प्यन्तरङ्गपरिभाषा क्वचित्प्रवर्तते इति दध्यत्रेत्यत्र न संयोगान्तलोपः । बहिरङ्गयणो ऽसिद्धत्वात् । परे तु पूर्वत्र कर्त्तव्ये परस्यासिद्धत्वे ऽपि तत्र कृते परस्यासिद्धत्वे मानाभावः । एवमेव हल्संध्यन्ते शब्दरत्ने स्पष्टमेवोक्तम् । तथा च नार्कुटादौ पूर्वस्याः कृतत्वेन तां प्रति परस्य विसर्गस्यान्तरङ्गस्य पूर्वत्रेत्यनेन सिद्धत्वबोधनमशक्यम् । तथा च बाधकभावात् । अन्तरङ्गपरिभाषाकार्यकालपक्षे परिभाषान्तरवत् त्रिपाद्यां प्रवर्तत एव । विसर्जनीयसूत्रे शेखरोक्तयुक्तिमुपजीव्य प्रवृत्तं अयुक्तोयं परिहारो न वा बहिरङ्गलक्षणत्वादिति भाष्यं-शिथिलमेव युक्तेः शैथिल्यात् । अत एव शिथिलयुक्तिमूलकस्योभौ वा विशेषादिति कात्यायनसूत्रस्याननुष्ठापकत्वलक्षणशैथिल्यं जैमिनिनोक्तम् । उभावाग्नेयाग्नीषोमीयपुरोडाशौ चतुर्धा कर्तव्यावविशेषात् आग्नेयं चतुर्धा करोतीति श्रुतौ अग्निदेवताकपुरोडाशे चतुर्धा करणस्योक्तत्वेनोभयोरपि पुरोडाशयोरग्निदेवताकत्वाविशेषादिति तत्सूत्रार्थः । तत्र चाविशेषादिति युक्तिः शिथिला ऐन्द्राग्ने चतुर्धाकरणवारणाय श्रुतावाग्नेयपदेनाग्निपर्याप्तदेवताकत्वस्यैव विवक्षितत्वात् । तस्य दोष इति तु बहिरङ्गासिद्धित्वेन सिद्धौ व्यर्थमेव । एवं च तत्र तत्र वचनानि न कार्याणीति महल्लाघवम् । तस्मादित्युत्तरस्येत्यादिज्ञापकं वा क्वचित् त्रिपाद्यां कार्यकालपक्षे बहिरङ्गपरिभाषा प्रवर्त्तत इत्यर्थे ऽनुसर्तव्यमिति न कश्चिद्दोष इत्याहुः । सुबन्तप्रकृतिके इति । नतुसुबन्ते धाताविस्यर्थः । तथा सति ऋतधातोः क्विपि सुप्येव प्रवृत्तिः स्यात् । उपर्षभीयतीति । नन्वन्तरङ्गत्वादेवात्र पूर्वं गुणस्य प्रवृत्त्या न वृद्धिरिति चेन्न । उपसर्गसमानाकारं पूर्वपदं धातुसञ्ज्ञाप्रयोजकेप्रत्यये चिकीर्षिते पृथक् क्रियत इत्यङ्गीकारेणादोषात् । एवं चेत्यत्र वक्तव्यपदाभावेन सूत्रत्वभ्रमं निराकर्त्तुमाह । वार्तिकमिति । गमकत्वादिति । वृत्त्यघटकपदार्थान्वितस्वार्थावगमकत्वेन शिष्टप्रयुक्तत्वादित्यर्थः । शब्दज्ञानानुपातीति । शब्दज्ञानोत्तरमेव जायमान इत्यर्थः । पतन्तजलिना वृत्तः

पञ्च तस्य इत्युपक्रम्यारोपात्पृथग्विकल्पात्मिकां वृत्तिमुक्त्वा तल्लक्षणमिदं सूत्रं प्रणीतम् । तदुदाहरणं तु चैतन्यस्य स्वरूपं घटस्य स्वरूपमित्युक्तं तद्भाष्यकृता । तत्र हि चैतन्यस्वरूपपदार्थयोरभेदेन तत्संबन्धरूपं यद्वस्तु तच्छून्यमविद्यमानं यस्य विषयः स विकल्प इत्यर्थः । अत्र मार्तण्ड इत्युदाहरणविषये ऽचोन्त्यादिटीति शास्त्रं विकल्पात्मकज्ञानजनकमिति तात्पर्यम् । परे तु संग्राहकशास्त्रस्यान्यत्र चारितार्थ्यादेतद्विषये वचनाभावे उपप्लव एव न स्यात् । विकल्पात्मकज्ञानजननं तु दूरेतराम् । किं च संबन्धांशे एव विकल्पात्मकं ज्ञानं न तु आदित्वांशे विकल्पात्मकज्ञानस्य शास्त्रप्रवृत्त्युपयोगित्वं च निर्मूलम् । अत एवाद्यन्तवत्सूत्रे भाष्ये ऽपूर्वानुत्तरत्वलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्नर्थे आद्यन्तवद्भावेनेति वार्तिकमतमुपन्यस्य गोनर्दीयस्त्वाह सत्यमेतत्सति त्वन्यस्मिन्निति स्वमतेन सूत्रारम्भ एव कार्य इत्युक्तमित्याहुः । इतिशब्दलोपेइति । इति जश्त्वाभावेचेत्यपि पूरणीयम् । सन्ध्याकरणसमय इति । सर्परूपेणेति शेषः । ओत्वोष्ठयोः । ननु अत्र समर्थपरिभाषोपस्थितावस्य वासुदेवस्यौष्ठ इति समासे एवेदं स्यान्न बिम्बोष्ठइत्यादौ तत्राकारस्यानर्थकत्वेनोष्ठेनासामर्थ्यादित्याशङ्क्याह । अत्र समर्थेति । पदत्वेनेति । एतस्योदाहरणं मृग्यम् । प्रत्युत युष्मदस्मदोः षष्ठीत्यादिसूत्रेषु पदस्य पदादित्यधिकारेणैतत्परिभाषाप्रवृत्तौ असामर्थ्ये आदेशानापत्तिः । परमव इत्यादावेव स्यात्प्रवृत्त्यापत्तिश्चेत्यपि बोध्यम् । सुबन्तत्वेनेति । तिङन्तत्वेन चेत्यपि बोध्यम् । तेनाख्यातमाख्यातेनेत्यादावप्येतत्परिभाषोपस्थितिः सिद्धा । तद्धितविधौ प्रातिपदिकत्वेनोद्देश्यत्वे ऽपि घकालतनेष्वित्यादिज्ञापकेन स्वार्थे परिपूर्णमिति न्यायेन न चार्थिकं सुबन्तत्वेनोद्देश्यत्वं नहि शब्दस्तेन रूपेणोद्देश्यत्वे एव तत्प्रवृत्तिरित्यत्र किञ्चिन्मानं । तत्रैवेति । तेनान्यादितरेत्यादौ न तत्प्रवृत्तिः । ओत्वोष्ठादिमात्रस्येति । ओत्वोष्ठयोरादिरोकारस्तन्मात्रस्य पदत्वाभावादित्यर्थः । एतदुत्तरं तदुत्तरपदके समासे इत्यर्थासंभवादिति शेषः । तद्घटितेति । अवर्णौत्वोष्ठसंबन्ध्यच् एतदुभयघटितेत्यर्थः । अन्यथेति । अजाद्योरोत्वोष्ठयोरित्यर्थे इत्यर्थः । अयं भावः । ओत्वोष्ठयोः परत्वेनाश्रयणे हि प्रत्यासत्त्या तदुत्तरपदके समासे एवास्य प्रवृत्तिः स्यात् । अत्र त्वोत्वोष्ठयोरजेव परत्वेनाश्रितः तेनौष्ठस्य व्रणः ओष्ठव्रणः वृषलस्यौष्ठव्रणः वृषलोष्ठव्रण इत्यत्रापि पररूपं भवति । न ह्यत्रोष्ठशब्द उत्तरपदं किं त्वोष्ठव्रणशब्दः समर्थ-

परिभाषानुपस्थितेर्न्दर्त्योष्ठ्यो वृषलोष्ठव्रण इत्यपि प्रयोजनं योज्यम् । नह्यत्र दन्तस्य ओष्ठेन सामर्थ्यमस्ति । तयोः परस्परमनन्वयात् । एवं सङ्गस्य कार्यं संगकार्यमङ्गुलेः संगकार्यमंगुलिसंगकार्यमित्यत्रापि षत्वं भवत्येव । अङ्गुलिशब्दघटकेणः परस्य संगसकारस्य षत्वमित्यर्थाश्रयणेन प्रकृतसाम्यात् । ईषदर्थेति । तेन निपात इति न प्रकृतिभावः । ऋत्यक इति पाक्षिकप्रकृतिभावस्तु स्यादेव । नन्त्र आ ऋषभ इत्यत्र ऋत्यक इति प्रकृतिभावे पश्चादद्यशब्देन संबन्धे तेन सवर्णदीर्घे च पश्चादृत्यकइत्यस्य पाक्षिकत्वादप्रवृत्तौ गुणेन अद्यर्षभीयसिद्धिरिति चेन्न । तस्मिन्नेव लक्ष्ये प्रथमं भावोपक्रमे पश्चात्प्रकृतिभावस्याभावायोगात् । अन्यथा शुशुवतुरित्यादौ वैकल्पिकत्वाद्विभाषा श्वेरित्यस्य पूर्वमप्रवृत्तौ द्वित्वे श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेध इति अभ्यासलक्षणसंप्रसारणाप्रवृत्तौ पश्चाद्विभाषा श्वेरित्यस्योत्तरखण्डे प्रवृत्तौ शिश्वतुरिति रूपापत्तेः । अव्यक्तशब्दस्य ध्वनौ योगं दर्शयति । अविद्यमानेति । अविद्यमानं व्यक्तं कत्वादिधर्मो यत्र सो ऽव्यक्त इति विग्रह इति भावः । अनुकरणएवेति । तथा च सूत्रे ऽनुकरणशब्दः स्पष्टार्थ इति भावः । अत इति किं वटगित्यपपाठः । शङ्कासमाधानयोर्निर्दलत्वात् । फलकल्पनेति । पटदितीति शब्दान्तस्यानुकरणे द्वित्वे पटदिति पटदितीत्यत्राम्रेडितघटिततकारस्य द्वित्वाभावः । अन्त्यस्येत्यस्य फलमिति । फलकल्पनाभिनिवेश इत्यर्थः । अइउण्सूत्रानन्तरमिति । इदं चिन्त्यम् । तयोरिक्प्रत्याहारे प्रवेशापत्तेः । ऋऌक्सूत्रानन्तरं तयोः पाठस्तूचितः । ऌकारेइति । ऋकारात्परत इति शेषः । तादृशस्येति । विवृतत्वादिमत इत्यर्थः । प्रत्याख्यातमिति । ऌऋवर्णयोः सावर्ण्यमाश्रित्येति शेषः । ननु ऋकारस्य ऌकारे परे विवृतऋकार एव स्यान्नत्वीषत्स्पृष्टऌकारः ततोपि विवृतधर्मद्वयकृतान्तर्येणान्ततमत्वात् । एवं गमॄनित्यत्र ऌकारवत्तान्तर्येणेषत्स्पृष्टो दुर्वार इति चेन्न । ऋऌक्सूत्रानन्तरं पाठस्य होत्ऌकार इत्यत्राच्त्वसिद्धिद्वारा प्लुतार्थत्वेन पाठसामर्थ्येन यत्किञ्चिदान्तर्येपीषत्स्पृष्टऌकारस्य लक्ष्ये प्रवृत्त्यङ्गीकारात् । गमॄनित्यत्र त्वीषत्स्पृष्टस्य शङ्कैव नास्ति पूर्वसवर्णत्वाभावात् । एवं धातॄणामित्यत्रेषत्स्पृष्टदीर्घस्य न शङ्का रेफद्वयाघटितत्वविवृतत्वरूपधर्मद्वयकृतान्तर्यस्य विवृते एव सत्त्वात् । ननु "त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा । स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च

यमाः स्मृताः । अनुस्वारो विसर्गश्च ᳵकᳶपौ चापि पराश्रितौ । दुस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव चेति'' शिक्षाविरोधः । ईषत्स्पृष्टयोरनयोराधिक्यात् । तत्र दुःस्पृष्टो ऌकारो मातृकान्यासेपि नैतौ परिगणितौ। तथा हि तत्र षोडश स्वराः, पञ्चविंशति स्पर्शा, यादयोष्टौ लक्षेति द्वयं संकलनयैकपञ्चाशद्वर्णा भवन्तीति चेन्न । तुल्यास्यसूत्रस्थभाष्यवार्तिकप्रामाण्येनैतयोरपि तत्र पूरणात् । यथा ऽक्षरसमाम्नाये मातृकापाठे चाविद्यमाना अपि यमा उक्तशिक्षाबलाद्वर्णराशिषु पूर्यन्ते । शिक्षायामपरिगणितो ऽपि दीर्घऌकारो मातृकापाठे पठ्यते । परे तु त्रिषष्टिश्चतुःषष्टिर्वेति संख्या धर्मकृता न तु व्यक्तिकृता । वर्णानां प्रत्युच्चारणे भेदपक्षे ऽसंभवात् । तथा चाभितोज्भक्तिसहितरेफघटितत्वताद्दशकालघटितत्वरूपधर्माभ्यां द्वाभ्यां विवृतयोरीषत्स्पृष्टयोश्च ऌऋवर्णयोर्द्वित्वम् । एवमेव त्रिमात्रचतुर्मात्रयोः प्लुतावैच इदुताविति सूत्रे भाष्ये विस्पष्टमुक्तयोरेओङ्सूत्रभाष्येण त्रिमात्रचतुर्मात्रा आदेशा माभूवन्नित्यनेन सूचितयोर्द्विमात्राधिकत्वेनानुगमेन प्लुतमध्येऽन्तर्भावान्नाधिक्यम् । सत्यभिधाने गमॄणामित्यत्र विवृतत्वसाम्येन विवृतो दीर्घऋकारो ऌकारवत्ता न्तर्येणेषत्स्पृष्टऋकारश्च पर्यायेण भवत एवं मातृकापाठे पठितो ऽपि दीर्घऌकारो विवृतो न भवति । तस्योच्चारयितुं शक्यत्वेपि तुल्यास्यसूत्रस्थभाष्यकैयटप्रामाण्येन तस्य शास्त्राविधेयत्वात् । मात्रिक एकारस्तु उच्चारयितुमशक्यत्वान्नास्त्येवेत्याहुः । रेफात्परं भक्तेरिति । रेफाद्भक्तेः परं न तत्कचिदपि व्यपदृक्तमितितदर्थः एतद्भाष्येण तु रेफात्परतोप्यज्भक्तिरस्तीत्यागतम् । हयवरट्सूत्रस्थेति । एओङ्सूत्रस्थेत्युचितम् । तत्रैव तथा भाष्यदर्शनात् । न ऋकार ईषत्स्पृष्ट इति शेषः । नाप्यृतीति । ऌकारादितिशेषः । ऌकार ईषत्स्पृष्टः । विषयविशेष एव पूर्वस्य साधुत्वं विषयविशेष एवोत्तरस्य साधुत्वमिति व्यवस्थाङ्गीकारादेव । वस्तुत ऌकारत्परत ऋकारस्य प्रयोगे न मानम् । उक्तव्यवस्थाङ्गीकारे प्रमाणमाह । अतएव । वार्तिके इत्यादिना संगच्छत इत्यन्तेन । अतएव । ह्रस्वऋकारद्वयेत्यादि व्यवस्थाङ्गीकारादेव अयनं यस्येति । स्फोटस्यायन आश्रय इति षष्ठीतत्पुरुष इति केचित् । अन्यस्तदभावस्येति । अन्यो ऽवर्णो न स्मर्त्तेत्युक्तौ तदभावस्य स्मर्त्तेत्यर्थाल्लभ्यते इति भावः । देवत्रात इति । अत्र पक्षे नत्वं न । गलः, अत्र पक्षे लत्वाभावो न । ग्राहः, अत्रपक्षे ऽच् न । इति योगे सद्विधिः, शतृशानचोर्विधिः । मिथ एकैकस्मि-

न्नर्थे ते नत्वादिविधयो न विभाष्यन्ते न विकल्प्यन्ते किन्त्वर्थभेदेनैव भावाभावयोर्व्यवस्थेत्यर्थः । अप्रामाणिकत्वज्ञापनार्थइति । वस्तुतो ऽव्यवस्थितविभाषाया अगतिकगतिकत्वज्ञापनार्थम् । इदं चेति । एवमेव विकल्पे प्राप्ते नित्यार्थविधयः संगच्छन्ते । सामञ्जस्यमिति । नेति पाठे तु प्लुतप्रगृह्याणामिति षष्ठीनिर्देशः स्यादिति भावः । प्लुतप्रगृह्या । जानूअस्येति । नन्वत्र स्थानिवत्त्वेन प्रगृह्यत्वं वाच्यम् । तच्च दुर्घटं नव्यमते तस्याल्धर्मवृत्तित्वादिति चेत्सत्यम् । परादिवद्भावेनैव प्रगृह्यत्वाङ्गीकारात् । अपदान्तादाविति । आदिपदेन समासादौ । वार्तिकमिति । वक्तव्यपदाभावात्सूत्रत्वभ्रमवारणायेदम् । एतेनेति । पदान्तग्रहणानुवृत्त्यैवार्च्छदित्यादेर्व्यावर्त्तनेनेत्यर्थः । अपास्तमिति । नचान्यार्थमवश्यमाश्रयणीयेन चकारेणैव प्रकृतिभाववारणे पदान्तग्रहणानुवृत्तौ गौरवमिति वाच्यम् । दिव उदित्युत्तरार्थं तदनुवृत्तेरावश्यकत्वात् । अनन्तरस्येति न्यायेन पुनर्वृद्धिविधानस्य पररूपमात्रबाधनत्वाच्च । ईषदसमाप्तऋच्छको बहृच्छक इत्यर्थं तु पदान्तग्रहणस्यावश्यकत्वाच्च । उपलक्षणमिति । आयुष्मान्भव सौम्येति वाच्यो विप्रो भिवादने, इतिमनूक्तेः । तर्ह्यधीति प्रयोगे किं मूलमिति चेत् आयुष्मानेधीति भाष्योदाहरणमेवेत्यवेहि । स्मृतिष्विति । असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्, इत्यादि मनुस्मृतिषु । अत्र नामपदं गोत्रस्याप्युपलक्षणम् । दण्डिन्नित्यादाविति । दशम्युत्तरकालं जातस्य पुत्रस्य नाम विदध्याद् घोषवदाद्यन्तरस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति कल्पसूत्रे तद्धितान्तस्य नामत्वप्रतिषेधादिति भावः । दूराद्धूतेच । दूरान्तिकार्थेभ्य इति प्रातिपदिकार्थमात्रे पञ्चमी ल्यब्लोपनिमित्ता वा । हैहेप्रयोगे । हैहेन्तइत्येवेति । न च वाक्यस्य टेरित्यविकारादन्तग्रहणवैयर्थ्यम् । तदभावे हैहेग्रहणस्यानन्यार्थतापात इत्याशयात् । एतत्त्रयविषयमेवेति । प्रत्यभिवादे शूद्रे, भोराजन्यविशां वेति वाच्यं, दूराद्धूतेचेत्येतत्त्रयविषयमित्यर्थः । वृत्तौ स्पष्टमिति । प्रकृतसूत्रे चैवं वृत्तिग्रन्थःप्रत्यभिवादे दूराद्धूतेचेत्यादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यत इति । आदिना भो राजन्येत्यस्य संग्रहः । अनुदात्तं प्रश्नान्त इति सूत्रे नानेन प्लुतो विधीयते । किन्तु दूराद्धूतादिषु विहितस्य प्लुतस्यानुदात्तगुणमात्रं विधीयत

इति । एतद्विहितानामेवेति । एतदभ्यनुज्ञातानामेवेत्यर्थः । पूर्ववृत्तिग्रन्थेनास्य स्थानिविशेषमात्रलाभादिति बोध्यम् । त्रिपाद्यांनप्रवर्ततइति । तव्यतास्तित्वक-रणात् । अप्लुतवदुपस्थिते । इतिवदेदिति । यत्तु प्लुतनिषेधस्य त्रिपादीस्थ-त्वेनासिद्धत्वात्प्लुतप्रगृह्या इति प्रकृतिभावे संहिताकार्यं न स्यात् । प्लुतनिषेधस्तु श्रवणार्थं स्यादिति तन्न । प्रकृतिभावदृष्ट्या प्लुतस्याश्रयात्सिद्धत्वेन तस्य च लक्ष्ये ऽदर्शनेन प्रकृतिभावाप्रवृत्तेः । न हि निषेधो न दृश्यत इत्येतावता तेन लक्ष्ये ऽप्रवृत्तिः प्लुतो लक्ष्ये स्तीति बुद्धिः प्रकृतिभावशास्त्रस्य संभवतीति । न च पर्युदासे ऽप्येतद्दूषणतौल्यम् । किं च प्लुतप्रकरणोत्तरं नोपस्थित इत्युक्ते संहिता-यामित्यस्य संबन्धो न स्यात्तेन च तयोर्व्वाचीत्यतः संहितायामित्यस्य संबन्धइति वाच्यम् । एवमपि पर्युदासे प्लुतस्योदात्तस्य स्थाने आन्तर्यादप्लुतादेश उदात्तो भवति नोपस्थित इत्युक्तौ उदात्तस्य श्रवणं न स्यादिति विशेषः । मन्मते संहि-ताया इत्यस्य संबन्धासंबन्धाभ्यां विशेषः । वत्करणे ऽप्युक्तन्यायेन पर्युदासमेव स्थिरीकृत्य शङ्कते । नचेति । परत्वादिति । प्लुतत्वप्रयुक्तप्रकृतिभावापवादत्वे ऽपि प्रगृह्यत्वप्रयुक्तप्रकृतिभावानपवादत्वाद्विप्रतिषेधोपपत्तिः । इदमयुक्तम् । शास्त्रातिदेशे दीर्घस्य परत्वभावात्कार्यातिदेशे ऽपि स्थानिवत्सूत्रे परिवीरित्यत्रोक्ता-तिदेशात्तस्य तत्त्वाभावात् । अन्तरङ्गत्वादिति । इदमत्ययुक्तम् । न धातुलोप इति सूत्रे ऽन्तरङ्गनिषेधदृष्ट्या गुणस्यासिद्धत्वेनोपेद्ध इत्यादौ गुणः प्रवर्त्तत इति भाष्यो-क्तरीत्या प्रकृतिभावेन दीर्घबाधनापत्तेः किं च वत्करणाभावे ऽप्यप्लुतशब्देन प्लुतस्य स्थाने विहितस्य दीर्घस्योक्तदिशा वारणे वत्करणवैयर्थ्यं तदवस्थम् । वस्तुतस्तु प्रकृतिभावेन तु स्वापेक्षबहिरङ्गस्यापि निवृत्तिः । उपसर्गादृतीति सूत्रे धाताविति योगविभागेन पुनर्वृद्धिविधानात् ज्ञापकात् । तेन सुखार्त इत्यत्र पक्षे वृद्धिनिवृत्तिसिद्धेरिति एका दिक् । नशब्दमर्यादयालाभइति । इदमप्ययुक्तम् । अचः परस्मिन्निति वत्तृतीयादिषु भाषितपुंस्कमिति वच्चाप्लुतो यथाप्लुतकार्यं न प्रवर्त्तयति तथा प्लुतोपीत्यभावातिदेशाङ्गीकारेणोक्तार्थलाभसंभवात् । तदेतदभिप्रेत्य भगवद्भ्यां भाष्यकारवार्तिककाराभ्यामुक्तम् । वद्वचनं प्लुतकार्यप्रतिषेधार्थं, वद्वचनं क्रियते प्लुतकार्यप्रतिषेधार्थमिति । इदूदेत् । एकारस्य गङ्गे इत्येकमेवोदाहरणमुप-न्यस्य पुनरुदाहरणान्तरोपन्यासस्य फलं वक्तुमवतारयति । एदन्तमिति । अर्थव-

स्वादिति । अनाङिति पर्युदासेनार्थवत एव ग्रहणादिति भावः । एतेनेदमदसोर-कोरिति प्रतिषेधेन वर्णग्रहणे ऽर्थवत्परिभाषाया अप्रवृत्तिज्ञापनादिदमप्ययुक्तमित्य-पास्तम् पर्युदासपक्षे दोषमाशङ्क्य निराकरोति । वासुदेवेति । अमिति । अत्र प्रगृह्यत्वे ऽपि पदान्तत्वाभावेन प्रकृतिभावाप्रवृत्तेरयुक्तमेतत् । नचाम् इत एत इत्यत्र प्रकृतिभावापत्तिरित्याशयः । अव्ययीभावस्य समासान्तरघटकत्वे विवादादि ति केचित् । ए आ ई एतीत्यत्र प्रकृतिभावापत्तेरित्यन्ये । नानुपपन्नमिति । अन्ये त्वनाङिति प्रसज्य प्रतिषेध एव यदयमनाङिति प्रतिषेधं शास्तीति प्रकृतसूत्रस्थभा-ष्यात्प्रतिषेधार्थोयमारम्भ इत्योत्सूत्रस्थभाष्याच्च प्रसज्य प्रतिषेध एवायं तेन आ ई ए इ अत्रेत्यत्र परादिवद्भावेन प्राप्तमपि प्रगृह्यत्वं न गम्यमानप्रतिषेधाभिप्राय-कत्वं तु न युक्तं ओषु यातं मरुत इत्यादौ परादिवद्भावेन प्राप्तप्रगृह्यत्वस्य निषेधकाभावेन प्रवृत्तिसौलभ्येन प्रतिषेधार्थोयमारम्भ ओषु यातं मरुत इत्यादि भाष्यग्रन्थसंदर्भासंगतेः । न च प्रतिषेधार्थत्वे ओतश्च्विप्रतिषेध इति वार्त्तिकानुत्थ-निमिति वाच्यम् । प्रतिषिद्धार्थाया अपि ओदन्तस्य प्रगृह्यसंज्ञायाः प्रतिबन्धका-भावेनादो भवतीत्यत्रापि प्राप्तेः । ओत् । च्व्यन्तेनास्यप्रवृत्तिरिति । यद्यपि निपातपदेन चादीनामर्थवतामेवोपस्थितिरिति चाद्यंशे गौणमुख्यन्यायकार्यं प्रवर्त्त-ताम् । च्व्यन्तांशे तु न विशिष्टरूपोपादानमित्यर्थवद्ग्रहणपरिभाषागौणमुख्यन्याययोर्न प्रवृत्तिः । च्व्यन्ते मुख्यार्थासंभवश्च । तथापि चाद्यंशे विशिष्टरूपोपादानमात्रेण प्रवर्तमानगौणमुख्यन्यायो ऽमुख्यार्थके च्व्यन्ते प्रगृह्यसञ्ज्ञां व्यावर्त्तयति भाष्य-प्रामाण्यादित्याशयः । अन्ये तु गोभवदित्याद्यर्थं ओतश्च्विप्रत्ययप्रतिषेध इति वा-र्तिकमारब्धव्यमेव । तत्प्रत्याख्यानपरं भाष्यं त्वेकदेशिनः । ऋषिशापादिना ऽगौरेव गौः समभवत्तत्र च्व्यन्ते मुख्यार्थस्यैव सत्त्वे निपातसंज्ञाया गौणमुख्यन्या-येन वारणासंभवात् । न च तत्रार्थे च्विरेव नेष्यत इति वाच्यम् । तथा सति सञ्ज्ञोपसर्जनीभूता स्तु न सर्वादय इत्यादिवार्तिकभाष्यविरोधापत्तेः । च्व्यन्तांशे विशिष्टरूपोपादानाभावेन मुख्यार्थासंभवेन च गौणमुख्यन्यायप्रवृत्त्यसंभवाच्चे-त्याहुः । निपातइतिकिमिति । मिथो इतीत्यत्र प्रगृह्यत्वं माभूत् । यत्तु देवो-सीति प्रत्युदाहरणं बृहच्छेखरे दत्तं तन्न । अदो भवदित्यादाविव लक्षणप्रतिप-दोक्तपरिभाषया वारणसंभवात् । ब्रह्मबन्धविति । वेदे आपाद्यमानप्रयोगाभावेन

प्रगृह्यत्वस्य वैकल्पिकत्वेन चानार्षे इति व्यर्थमिति केचित् । तदधिकार्द्धमात्राकाल इति । ततो ऽप्यधिककालव्यवधानेनोच्चारणं तु अर्थबोधानुपयोगित्वाच्छिष्टसंप्रदायविरोधाच्च हेयमेवेति भावः । उञः । निपातएवेति । न तु प्रत्याहारः । उदित्येव वक्तव्ये ञकारोच्चारणसामर्थ्येन क्विबन्तस्य कृतसंप्रसारणस्य वेञइति शब्दपरत्वे ऽपि न प्रगृह्यत्वस्योपयोगः तुक्प्रवृत्तेः । नाप्युञादेशः । तुगन्तस्यानिर्दिश्यमानत्वात् । मानाभावादिति । इदमयुक्तम् । उञ इत्यस्यावृत्त्या स्थानषष्ठ्यन्तत्वस्य वाच्यवाचकभावसबन्धार्थकत्वकल्पने गौरवेण प्रथमान्तार्थे ऽस्याभेदेनान्वयस्य क्लृप्तत्वेन च विधेयविशेषणत्वस्यैवोचितत्वात् । स्पष्टमेव लभ्यत इति । अन्ये तु योगविभागाभावे प्रगृह्यत्वस्योमादेशस्य च शाकल्पमतेन युगपत्प्रवृत्तौ तन्मते उँ इतीति रूपं तदन्यमते उ इति प्रगृह्यत्वस्य निपात एकाजनाङिति सामान्यशास्त्रप्रणयनेन तदन्यमते ऽपि सत्त्वनिश्चयेन स्मृत्यन्तरानुसन्धानद्वारा प्रगृह्यत्वांशे विकल्पासंभवेनादेशांशे एव स्मृत्यन्तरानुसन्धानद्वारा विकल्पपर्यवसानापत्तेः । यथा ऋतो भारद्वाजस्येत्यस्याचस्तास्वदिति सामान्यशास्त्रप्रणयनेन ऋदन्ते स्मृत्यन्तरानुसन्धानद्वारा नेड्विकल्पबोधकत्वम् । न च प्रगृह्यपदानुवृत्तिवैयर्थ्यं तस्योत्तरत्रानुवृत्त्यर्थत्वेनोपपत्तेः । तथा चैकयोगत्वे शाकल्पमते उँ इत्येकमेव स्यात् । तदेतदुक्तं भाष्ये । शाकल्पस्य चाचार्यस्य मतेन उँ इति विभाषा यथा स्यात् उँइति उइतीति । तदन्यमतेन निपातएकाजिति नित्यं प्रगृह्यत्वात् उइतीति स्यात् । तदेतदुक्तं भाष्ये । अन्येषामाचार्याणां मतेन वितीति । योगविभागेन उञ इत्यनेन प्रगृह्यत्वस्य शाकल्पमते विधानेन योगविभागेन सिद्धप्रगृह्यसंज्ञाविज्ञानसामर्थ्यात्स्मृत्यन्तरानुसन्धानद्वारा सामान्यशास्त्रसत्वे ऽपि प्रगृह्यत्वांशे विकल्पः सिध्यति । द्वितीययोगेन तु सति प्रगृह्यत्वे एवादेशविकल्पः । तत्रापि शाकल्पग्रहणानुवृत्तिसामर्थ्यात् । ननु शाकल्पग्रहणानुवृत्तिः सति प्रगृह्यत्वे एवादेशो यथास्यान्न त्वप्रगृह्यत्वे इत्येवमर्थः स्यात् न स्यादीर्घोच्चारणसामर्थ्येन प्रगृह्यपदानुवृत्तिसामर्थ्येन च सत्येव प्रगृह्यत्वे आदेशकल्पनासंभवात् । तस्माद् द्वितीययोगे शाकल्पानुवृत्तिः सति प्रगृह्यत्वे आदेशविकल्पार्थेत्येव तत्त्वमित्याहुः । दीर्घोच्चारणवैयर्थ्यापत्तिश्चेति । असंहितायां तस्य चारितार्थ्याच्चिन्त्यमेतदिति केचित् । विकल्पमात्रसबन्धेपीति ।

शाकल्यपदसंबन्धे प्रगृह्यपदस्यासंबन्धे इत्यर्थः । अर्थाधिकारादिति । इदमयुक्तम् । उञिति पदस्याप्रगृह्यत्वे शक्त्यभावात् । तस्मात्प्रगृह्यस्यादेशे योगविभागवैयर्थ्यापत्तेः । अप्रगृह्यस्यैवादेश इति वक्तुं युक्तम् । विचारयन्त्विवति । इदमयुक्तमित्युक्तम् । मय्प्रत्याहारइति । न तु धातुः । वैजात्येति । तच्च तदन्तविधिसद्भावकृतम् । न चेत्यारभ्येतीत्यन्त इत्येको ग्रन्थः । अनभिधानमिति । नचारतीदूतौ सप्तमीति प्रकृतसूत्रस्थभाष्यादिति भावः । आधेयार्थे वृत्तिरिति । एकार्थीभाववत्तेन समासे वागीपदस्य वाप्यधिकरणकाश्वरूपार्थोपस्थितिजनकत्वादितिभावः । समासे जहत्स्वार्थायामिति । जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनीति, भावः । मानाभाव इति । न च नामार्थयोरभेदान्वय इति व्युत्पत्तिभङ्गः गौरीपदार्थाधिकरणत्वस्य भेदसंबन्धेनाधिश्रयणे ऽन्वयाङ्गीकारात् । तथा च लक्षणा ऽवश्यकीति चेन्न । दधि पश्येत्यादिवदुपपत्तेः । न च तत्रैवात्रापि विभक्तिस्मरणेन शाब्दबोधे सप्तम्यर्थे पर्यवसन्नत्वं दुरुपपादम् । न चाधिश्रयणक्रियायामेव गौरीपदबोध्याधिकरणत्वान्वय इति बृहच्छेखरोक्तं युक्तम् । नामार्थधात्वर्थयोरपि साक्षाद्भेदेनान्वयस्याव्युत्पन्नत्वादितिवाच्यम् । आधेयार्थानुपस्थापकत्वे सति सप्तम्यर्थोपस्थितिजनकत्वस्य सप्तम्यर्थे पर्यवसन्नशब्दार्थत्वात् । प्रकृते च लुप्तविभक्तिस्मृतिहेतुत्वेन गौरीपदस्यैव सप्तम्यर्थोपस्थितिजनकत्वात् । पञ्चकं प्रातिपदिकार्थ इति पक्षे गौरीपदस्यैवाधिकरणशक्त्युपस्थापकत्वाद्वा । पुनः प्रवृत्ताविति । कार्यकालपक्षाश्रयणेन तु न निर्वाहः । अणो ऽप्रगृह्यस्येत्येतदेशस्थप्रगृह्यसंज्ञादृष्ट्या प्लुतस्यासिद्धत्वेन प्रगृह्यसंज्ञानापत्तेः । इत्याचार्यवैरायवेन्द्रकृतविषमपद्व्याख्यायां स्वरसंधिः समाप्तिमगात् ॥

स्तोश्चुनाश्चुः । पदस्येत्यविकृत्येति । इदमयुक्तम् । अपदान्तस्य मूर्धन्य इतः प्रागेतदधिकारसमाप्तेः । संबन्धेपि वा डः सी त्यादाविव वैय्यधिकरण्येनान्वये ऽदोषाच्च । शादितिज्ञापकादिति । विश्नमाचष्टे विश्न इतीत्यदौ संबुध्यन्ते पदान्ते शात्परतवर्गसंभवेनेदमप्ययुक्तमिति केचित् । वैचित्र्यार्थइति । जश्त्वचर्त्वयोः प्रवृत्तिमन्तरेण सच्चिदित्यादिसिद्धिरिह वैचित्र्यम् । निर्देशादिति । न च तत एव श्चुत्वाभावसिद्धौ शादिति व्यर्थम् । विश्नाद्यर्थत्वात् । यत्तु नासिकास्थानाधिक्येन तोरित्यादिना पञ्चमाग्रहणमाशङ्क्य शादिति निषेधाच्छङ्गात्तुल्यास्यसूत्रे नासिकास्थानभिन्नं ताल्वादिस्थानं गृह्यत इति कश्चिदुक्तवान् तन्न । जश्त्वं शितपाशपे-

स्यादौ श्त्वनिषेधाय शादित्यस्यावश्यकत्वात् । दिक्संख्ये सञ्ज्ञायामिति नियमादाह । स्पष्टार्थमिति । षडधिकेति । समर्थसूत्रस्थकैयटरीत्या पदान्तविधित्वमेव न पदविधित्वमिति बोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थमिति केचित् । यरोनुना । सवर्णानसन्तीति । एतदुत्तरमाहुरिति शेषः । अन्ये तु तुल्यास्यप्रयत्नमिति सूत्रं यस्मात्प्रत्ययविधिरिति यत् तत्रानुनासिको विधीयते तत्र तुल्यास्यमित्युपतिष्ठत इत्यर्थकतया परिभाषारूपामपि अनुनासिकपदानुवृत्तेः । अनुस्वारस्य यय्यत्र च मण्डूकप्लुत्या ऽनुनासिकपदमनुवर्तते तेन चतुर्मुखः कुण्डं रथेनेत्यादौ न दोषः । न च मद्दिष्मानित्यत्र षकारस्य ऋकारापत्तिः । तस्य षकारेण सूत्रमते स्थानप्रयत्नोभयसाम्यादिति वाच्यम् । भाष्यमते प्रयत्नभेदेनादोषात् । जश्त्ववारणाय स्थानिवत्त्वप्रवृत्तेरावश्यकतया नैवानुनासिकवारणसंभवाच्च । न च रेफे सानुनासिके षत्स्पष्टस्य प्रसंग इति वाक्यम् । तस्य सानुनासिकत्वे मानाभावात् । यद्वा कैयटोक्तरीत्या स्थानेन्तरतमपरिभषोपस्थानाद् दोषाभावः । न च रेफे स्थानप्रयत्नाभ्यामन्तरतमस्य ताभ्यामनन्तरतमस्य चाप्राप्त्या ऽन्तरतमपरिभाषाया अनुपस्थितिरिति वाच्यम् । व्यक्तिपक्षे प्रतिलक्ष्यमन्तरतमानन्तरतमयोः प्राप्ताविव तदुपस्थितावपि जातिपक्षे कतिपयलक्ष्येषु तयोः प्राप्तिमात्रेणान्तरतमपरिभाषोपस्थानस्य दुर्वारत्वात् । णकारस्य स्थानेन रेफान्तर्येपि आभ्यन्तरप्रयत्नेन तदभावान्नान्तरतमत्वं स्थानप्रयत्नाभ्यामान्तर्यं हि अन्तरतमत्वम् । एवं कुण्डं रथेनेत्यत्रापि अनुस्वारस्य स्थाने न रेफः । रेफस्यानुस्वारेण स्थानसाम्याभावेनान्तर्याभावात् । तथा चायं निष्कर्षः । यत्र स्थानप्रयत्नाद्यनेकधर्मकृतान्तर्यसंभवस्तत्र शास्त्रे तमप्प्रत्ययघटितमन्तरतम इत्युपतिष्ठते । यत्र त्वेकैकधर्ममात्रकृतान्तर्यसंभवस्तत्र तमप्रहितमन्तर इत्युपतिष्ठते । यत्र तस्याप्यसंभवस्तत्र नोपतिष्ठत एव परिभाषा । नचैवं नेतेत्यादावेव गुणः स्यान्न चेतेस्यादाविति वाच्यम् । एकारस्य प्रमाणत ईकारान्तर्याभावेपि स्थानप्रयत्नाभ्यामिकारान्तर्येणान्तरतमत्वात्तत्या ऽदोषात् । न हि सर्वैरान्तर्यं तमबर्थः किं तु स्थानप्रयत्नाभ्यामपि । नचैवं ह्रस्वेकार एव यण्स्यान्न दीर्घे तस्य स्थानप्रमाणाभ्यामान्तर्येण तमप्प्रत्ययघटितपरिभाषोपस्थितेः । एवं षट् सञ्जंतीत्यादौ षजयोर्जश्त्वापत्तिः । स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे जश्त्वचारितार्थ्यात् । एवं पाद्धनतीत्यादौ झयो ह इति पूर्वसवर्णापत्तिः । स्थानप्रयत्नाभ्यामन्तरतमे वाग्घरिरित्यादौ

तस्य चारितार्थ्यादिति वाच्यम् । ल्वादिभ्य इति निर्देशेन झय्प्रत्याहारपरित्यागेन हल्प्रत्याहाराश्रयणेन व्याख्यानेन च तत्र व्यक्तिपक्षाश्रयणेनादोषात् । तत्र पक्षे दीर्घादिव्यक्तिष्वन्तरतमानन्तरतमयोरसंभवेन सकलाङ्गसहिताया उक्तपरिभाषाया अनुपस्थितेः । सवर्णग्रहणापकर्षस्तु न रेफोष्मणां सवर्णा न सन्तीति भाष्याभिप्रेतः । तत्र तत्र प्रत्ययादित्युभयोः शेष इत्यादिभाष्येणापकर्षस्य भाष्यकारासंमतत्वावगमात् । दूरतरां बहुसूत्रैर्व्यवहिते ऽपकर्षो दंशनमित्यादौ उक्तरीत्या परसवर्णवारणसंभवात् । ययीति न कर्तव्यमित्याशयेन रेफोष्मणामिति भाष्ये ऊष्मग्रहणमित्याहुः । प्राचुर्यस्य स्वसमानाधिकरणस्वसजातीयाल्पत्वसापेक्षत्वनियमादाह । स्वार्थिकइति । वस्तुतस्तु प्रचुरप्रकाशो रविरित्यादौ उक्तनियमव्यभिचारात्प्राचुर्येपि मयट् तूपपादः । समानाधिकरण्यमिति । प्राचुर्ये मयटि त्वन्नमयो यज्ञ इत्यादावन्नयज्ञयोरिव चिद्ब्रह्मणो भेद एव स्यान्नभिदरूपं सामानाधिकरण्यमित्यर्थः । हलो यमां यमीति सूत्रे इति । हलो यमां यमीति सूत्रे ऽस्माभिरुक्ते इत्यर्थः । एतेन हलो यमां यमीति सूत्रस्य भाष्यकृता ऽनुपादानादिदमसङ्गतमित्यपास्तम् । नादिन्याक्रोश इत्युत्तरं क्रमेणोदः स्थास्तम्भोः, शश्छोटि, अभ्यासेचर्च, झरोझरीति सूत्राणां भाष्यकृतोपादानात्तथा पाठो भाष्यकृत्सम्मत इति भावः । ज्ञापनादिति । व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषाभावात्पूर्वत्रासिद्धमद्विर्वचन इति द्वित्वदृष्ट्या पूर्वसवर्णस्य सिद्धत्वात्परत्वात्पूर्वसवर्णप्रवृत्त्या सकृद्गतिन्यायेन पश्चात् द्वित्वाप्राप्तौ द्वितकारस्य रूपस्य लोपपूर्वसवर्णयोरविशेषाद्वेति भावः । अनुस्वारस्य ययि । ननु शकारसवर्ण इकारः प्रसिद्ध इत्याशङ्क्याह । प्रयत्नभेदेनेति । यथासंख्यमनु । संख्या संख्यानं गणनमुच्यते ऽनुदेशशब्दस्य संबन्धिशब्दत्वादुद्देश्य आक्षिप्तस्तेनायमर्थः । समानां समसंख्यानां मध्ये यथागणनं उद्देशिभिः सहानुदेशिनः संबन्ध्यन्ते इति कैयटोक्तं तु न युक्तं समूलाकृतजीवेषु, हलो यमामित्यादौ उद्देश्यानामपि परस्परं यथासंख्यस्येष्टत्वादित्यभिप्रेत्याह । सम्यक् ख्यानमिति । वस्तुतस्तु कैयटोक्तार्थ एव युक्तः । सर्वस्योद्देश्यस्य सर्वानुदेशः प्राप्नोतीति यथासंख्यसूत्रस्थभाष्यस्वरसादनुदेशपदस्याजहत्स्वार्थलक्षणया विधेयतदन्वय्युभयपरत्वान्नोक्तस्थलेषु दोषः । संबन्धो येनेति संबन्ध इत्यपपाठः । पदज्ञानं पदादुपस्थितिर्वेति । आद्यस्योदाहरणं । समूलाकृतेत्यादि । द्वितीयोदाहरणं परस्मै पदानामित्यादि । स्थाना-

स्येति । स्थानमत्र क्रमः । स्थानाच्चेति । तिसंयोगादिति सूत्रे आध्वरमीमांसकै-स्तथैव व्याख्यातत्वात् । एतेन स्थानमधिष्ठानमित्यभिप्रेत्य यत्पाठकेनोक्तं तच्च स्थानेन्तरतमसूत्रे यान्येतानि संयुक्तानि भवन्ति तान्यन्योन्यं पश्यन्ति शब्दं कुर्वन्ति एवं तावत् चेतनावत्सु अचेतनेष्वपि लोष्ठक्षिप्तवायुवेगं गत्वा नैव तिर्यग्गच्छति नचोर्ध्वमारोहति पृथिवीविकारः पृथ्वीमेव गच्छतीत्यादिना सूत्रव्याख्यानाया-नेकधा प्रदर्शितमिति तत्पूर्वमीमांसाऽनध्ययनविजृम्भितमिति स्पष्टमेव । लौकिकेति । शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जयेत्यादौ लोके क्रमेणान्वयदर्शनादिति भावः । परस्मैपदानामित्यादि । परस्मैपदानामित्यत्र क्रमेण नोद्देश्यवाचकपदाना-मुपादानं नापि परस्मैपदपदादुद्देश्यानां क्रमेणोपस्थितः किन्तु युगपदेव सर्वे संज्ञिनः प्रत्याय्यन्ते इति न स्थानाख्यलौकिकप्रामाण्याद्व्यवस्थासंभवः । एवं द्वन्द्वेन क्रमेणा-न्वयः । तथान्वये द्वन्द्वस्यैवासाधुत्वात्सहविवक्षायां तस्य विधानात् । ननूक्तपरि-भाषयापि कथमत्र व्यवस्था येन क्रमेण पदज्ञानं पदादुपस्थितिर्वेत्युक्तपरिभाषार्थस्यो-क्तरीत्या परस्मैपदानामित्यत्रासंभवात् । एवमेचो ऽयवायाव इत्यत्रापि । एतेन पदादुपस्थितिरित्यस्य परस्मैपदानामित्युदाहरणमित्यपास्तम् । किं च परस्मैपद-शब्देन तिबादीनामिव शतृक्वसोरुपस्थित्या न संख्यासाम्यम् । आद्यन्तौ टकिता-वित्यत्रापि ययोरर्थयोराद्यन्ताभ्यां क्रमेणान्वयो न तयोः क्रमेणोपस्थितिः । नापि तत् बोधकपदयोः क्रमेणोपादानं टित्किताविल्यनुक्तेः । तयोः क्रमेणोपादानं टकारककारयोर्न तयोराद्यन्ताभ्यां क्रमेण संबन्ध इति चेत्सत्यं कैयटोक्तार्थाश्रयणे-नादोषात् । तथा हि लादेशानां परस्मैपदसंज्ञाविधानेन तज्ज्ञानार्थं तिबादिसूत्रानु-सन्धाने तत्र परस्मैपदनां तिबादीनां गणना क्रमेणोद्देश्यानुदेशिनोः संबन्धाङ्गी-कारात् । शतृक्वसोः परस्मैपदत्वेऽपि असंनिहितत्वात्संनिहितानां तिबादीनां च नवत्वात्संख्यासाम्योपपत्तेः । आद्यन्तावित्यत्रापि टकारस्य प्रथमोपादानात्तद्घटि-तस्य टितः प्रथमं गणना पश्चात्कित इति गणना क्रमेणैव संबन्धः । असहविवक्षा-यामपि द्वन्द्वस्य साधुत्वं च । नव्यमते ऽपि तिबादिसूत्रस्थक्रममादाय परस्मैपदाना-मित्यत्र टित्किद्घटकटकारककारयोः क्रमेणोपादानमादायाद्यन्तौ टकितावित्यत्र च यथासंख्यशास्त्रप्रवृत्तिः कथं चिदुपपादनीया । यथासंख्येनान्वयइति । संख्यानतिक्रमस्य करणत्वविवक्षया तृतीयेति केचित् । संख्यामनतिक्रम्यान्वयबोध

इत्यर्थस्याविवक्षितत्वेन तृतीयार्थस्यानुपयोगेनान्वयासंभवेन चायुक्तमेतदित्यन्ये । भाष्ये तु संख्यातानुदेशइत्युक्तम् । तस्यार्थः संख्यातं गणितं तत् क्रमेणानुदेशो विधिरित्यर्थः । अपकृष्यतइति । तथा च यत्र स्वरितेन युक्तं शब्दस्वरूपं तत्रैव यथासंख्यशास्त्रं प्रवर्तते इत्यर्थः । नन्वेवमप्यनुदात्तङित आत्मनेपदमित्यादौ संख्यातानुदेशो दुर्वार आत्मनेपदशब्दे उत्तरत्रानुवृत्त्यर्थं स्वरितत्वस्यावश्यकत्वादिति चेन्न । ययोर्यथासंख्यमन्वयस्तयोर्द्वयोरपि स्वरितत्वसत्त्वे एवैतच्छास्त्रप्रवृत्त्या ऽनुदात्तशब्दे तदभावेनादोषात् । ख्यत्यादित्यादाविति । नन्वत्र ययोरन्वये ख्यत्ययोरकारस्य च तयोः संख्यासाम्यं ययोश्च संख्यासाम्यं ख्यत्ययोर्ङसि ङसोश्च न तयोस्साक्षादन्वय इति न संख्यातानुदेशः प्राप्नोति। एवमेवानुदात्तङितः, रादाभ्यां निष्ठातः, श्नसोरल्लोपः, ङसिङसोश्च, विदिभिदिच्छिदेः कुरच्, अवेत्स्त्रो, रोपधेतोः, क्रतुयज्ञेभ्यश्चेत्यादावपि न संख्यातानुदेशः । अनुदात्तङित इत्यस्य लस्येत्यनेन रदाभ्यामित्यस्य त इत्यनेन सार्वधातुक इत्यस्यात इत्यनेन ङसिङसोरित्यस्यातीत्यनेन ताच्छील्यादीनां कुरच् करणाधिकरणयोरित्यस्य घञा पथिदूतयोरित्यस्य उञा व्याख्यानभवयोष्ठञा साक्षादन्वयादिति चेन्न । परंपरासबन्धेप्यस्य प्रवृत्तेः । अन्यथा समूलाकृतजीवेषु स्यतासीलृलुटोरित्यत्रापि एतदप्रवृत्त्यापत्तेः । तत्र हि लृलुटोरित्यस्य धातोरित्यनेन समूलादीनां च णमुला साक्षादन्वय इत्याशयात् । इदं च व्यक्तिभेदे ऽपि धर्मसाम्यमात्रेण प्रवर्त्तते । तेन स्यतासीलृलुटोः नन्दिग्रहिपचादिभ्य इत्यादौ संख्यातानुदेशः सिद्ध्यति । लृलुटोर्नन्द्यादीनां भेदेपि लत्वनन्द्यादित्वरूपधर्मसाम्यात् भाष्ये स्पष्टमिति । तत्र हीत्थं भाष्यम् । किमर्थमिमावनुनासिकावुभावनुबध्येते न ञकार एवानुबध्यते कथं ङमो ह्रस्वादचीति एतदप्यस्तु जकारेण नैवं शक्यं झकारभकारयोरपि पदान्तयोर्झकारभकारौ आगमौ स्याताम् । न झकारभकारौ पदान्तौ स्त एवमपि पञ्चागमास्त्रयआगमिनो वैषम्यात्संख्यातानुदेशो न प्राप्नोति । सन्तु तावदेषामागमानामागमिनः सन्ति झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यत इति । नित्यानुनासिकार्थत्वेति । ननु तद्वानित्यत्र नानुनासिकः कण्ठावच्छिन्नवायुसंयोगेनोत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्येत्यादिस्वग्रन्थपर्यालोचनया वकारस्य नासिकास्थानत्वाभावेन मुखसहितनासिकयोच्चार्यमाणवर्णत्वाभावात्

अनुनासिकसंज्ञाया अभावादनुनासिकादिप्रत्ययपरत्वाभावेन च कथमनुनासिकापत्तिः। आङो ऽनुनासिको आनुनासिक इत्यादौ तु लोकसिद्धानुनासिक्यगुणस्यैव विधानमिति न कश्चिद्दोष इति चेत्सत्यम्। वर्णमात्रस्य नासावछिन्नवायुसंयोगेनानुत्पत्तावप्यानुनासिक्यगुणाविशिष्टस्य तथात्वेनानुनासिकसंज्ञेत्याशयेनास्य कथं चिद्योजनीयत्वात्। एतत्सामर्थ्यादिति। इदयुक्तम्। अप्सरा वत्सा इत्यादावेतस्य चारितार्थ्यात्। तत्र हि अप्पूर्वात्सर्त्ते रसिः वदेः सः ततश्चत्वे एव सस्य सिद्धत्वाश्रयणेनैतस्य प्रवृत्तेः। तयोरव्युत्पन्नत्वेपि खरि चेत्येतदपवादत्वादेशास्मिन्कृते न तस्य प्रवृत्तिः। ऊष्मोदयमूष्मपरम्। ङमोह्रस्वादचि। आदृत्येति। इदमयुक्तम्। ङमंशे पदस्येत्यस्य वैय्यधिकरण्येनान्वये ऽनुपयोगात्। पदाधिकारस्य विशेषत्वादिति भाष्यं तु अधिकारप्राप्तस्य त्यागायोगादुपरञ्जकतया ऽन्वयप्रदर्शनपरम्। वस्तुतस्तु पदस्येति विशेषणस्य प्रयोजनं वक्ष्यामः। उभयोः सप्तम्यन्तत्वे एवेति। इदमप्ययुक्तम्। तीषसहेत्यादौ तदादिविध्यनापत्तेः। ङःसी त्यादौपदाधिकारस्य विशेषणत्वेन छिट्त्स्वित्यादौ धुट्सिद्धावस्यार्थस्यानुपयोगाच्च। वलादेरित्यादिग्रहणं त्वचि श्नु इति वत् वलि परत आर्धधातुकस्येत्यर्थप्रतीतिवारणाय पदस्येधिकृतस्यानुवृत्त्यैव निर्वाहे भाष्यकारीयमण्डूकप्लुत्या उञि च पदे इत्यतः पदे इत्यस्यानुवृत्याश्रयणं तु ङम इत्यस्य षष्ठ्यन्तत्वाश्रयणेनाजादौ पदे ङमो ङमुडित्यर्थाभिप्रायकं ङम इत्यस्य पञ्चम्यन्तत्वे हि अचीत्यस्य षष्ठ्यन्तत्वकल्पना स्यात्। अजादेः पदस्य ङमुडित्यर्थे तु प्रत्यङ्ङर्थ इत्यादौ समासे ङमुडापत्तिः। आद्यन्तौ टकितावित्येतदेकवाक्यतया ऽस्यापि पदादिविधित्वात्। अपदादिविधावित्यत्रोपपदविभक्तेरिति न्यायेन कर्मषष्ठीत्वस्यैवापत्तेः। कार्यित्वमिति। पदत्व इत्यस्य पदत्वप्रयुक्ते कार्ये इत्यर्थ इति भावः। इदमुपलक्षणम्। अपदादिविधाविति पर्युदासेन पदान्तविधावेवैतत्प्रवृत्तेः। ननु पूर्वदाण्डिप्रिय इत्यादौ नलोपार्थमावश्यकेन मध्यमत्वानाक्रान्त इति विशेषणेनैव माषकुम्भवापेनेत्यत्र पदव्यवायेपीति निषेधः सिध्यतीति उत्तरपदस्य यत्र कार्यित्वमित्यर्थाश्रयणं व्यर्थमिति चेदत्राहुः। यणादिपरमिति निर्देशेन मध्यमत्वानाक्रान्तेत्यस्य पूर्वपदाघटकत्वविशिष्टं यन्मध्यमत्वं तदनाक्रान्ते इत्यर्थः। तत्फलं तु प्रत्यङ्ङर्थकृतामित्यादौ न ङमुट्। एवं च माषकुम्भस्य वाप इति विग्रहे पूर्वपदाघटकत्वविशिष्टमध्यमत्वानाक्रान्तत्वस्य कुम्भपदे

सत्त्वेन प्रत्ययलक्षणप्रतिषेधवारणायोत्तरपदस्य यत्र कार्यित्वमित्यर्थे आवश्यक इति। नचैवमुक्तवार्तिकप्रत्याख्यानेन फलभेद इति वाच्यम् । तत्पक्षेऽपि यणादिपरमिति निर्देशेन प्रत्यङर्थकृतमित्यादौ ङमुडभावकल्पनात् । नचैवं कर्मधारयपूर्वपदके परमदण्डिप्रिय इत्यादिबहुव्रीहौ नलोपानापत्तिरिति वाच्यम् । परमदण्डीति समुदायगतपदत्वमादाय तत्सिद्धेः । न च पदव्यवाये पीत्यत्र पदपदं पदत्वयोग्यपरम् । न पदान्तेत्यादौ तथैव स्वेन व्याख्यातत्वात् । तथा च कार्यित्वनिवेशो व्यर्थ इति वाच्यम् । पदत्वयोग्यत्वं यदि प्रातिपदिकसञ्ज्ञकत्वम् । पिब भवेति यस्यां क्रियायां पिबभवा सुन्दरा पिब भवा येषां सुन्दरपिबभवानामित्यादौ पिबेत्यादेः प्रातिपदिकत्वाभावेन पदव्यवायेऽपीति निषेधानापत्तेः । यदि च प्रातिपदिकत्वतिङन्तत्वैतदन्यतराश्रयत्वं तदा गौरवम् । माषकुम्भवापेनेत्यत्र गतिकारकोपपदानामित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासाश्रयणेन पदपदस्य पदत्वयोग्यार्थकत्वाभावेऽपि न दोषः । स्पष्टीभविष्यति चैतत्सर्वं समासप्रकरणे शेखरे । सौत्रो निर्देश इति । यत्तु तयोर्य्वावचि संहितायामिति संहिताधिकारस्य प्रक्रान्तत्वेऽपि वाक्ये च संहिताया वैवक्षिकत्वेन ङमुडभावोपपत्तौ इदमसङ्गतमिति तन्न । वाक्ये संहिताया वैवक्षिकत्वेऽपि संहिताधिकारस्थकार्याघटितनिर्देशस्य प्रायशोऽनुपलम्भेन संहितायां निर्देशप्रयोजनाभावेन च संहिताया अविवक्षाकल्पनायोगात् । नचैवमजादौ पदे ङमो ङमुडित्यर्थे भाष्यसंमते प्रत्यङर्थ इत्यत्र ङमुडापत्तिः । उत्तरपदस्य कार्यित्वाभावेन प्रत्ययलक्षणनिषेधादिति वाच्यम् । उणादयो बहुलमिति निर्देशेन ङमुटि उत्तरपदस्य कार्यित्वेऽपि प्रत्ययलक्षणनिषेधाश्रयणात् । अन्ये तूणादयो बहुलं, यणादिपरं, सनाशंसभिक्ष उरित्यादिनिर्देशेन ङमुटोऽनित्यत्वं ज्ञाप्यते । तेनाणादिसञ्ज्ञार्थानि, अप्लुतकार्यं यणादिकं करोति, यङन्तप्रक्रियेत्यादिप्रयोगाणां सिद्धिः । नपदान्त, सोपदादौ, पदव्यवायेपीत्यादौ पदपदं पदत्वयोग्यपरं यद्वा गतिकारकोपपदानामित्यस्यानित्यत्वेन सुबन्तेनैवासमासाङ्गीकारात् पदपदं यथाश्रुतार्थकमेव । उत्तरपदस्य कार्यित्व एवेति निवेशस्तु प्रकृतसूत्रस्थभाष्यविरुद्ध इति माषकुम्भ इत्यादौ न दोष इत्याहुः । ननु गणेशो वनेश इत्यादौ असमासे ङमुट् दुर्वारः । पूर्वादिवद्भावेनैश इत्यस्याजादिपरत्वात् ङमः परत्वाच्च । न च पञ्चमीसमासाश्रयणे न वा स्थानिवद्भावः ।

पूर्वत्रासिद्धे न स्थानिवदिति तन्निषेधात् । न च त्रिपाद्यां नान्तादिवद्भावः । क्षीरपेणेत्याद्यसिद्धेरिति चेन्न । पदाऽवयवङमो ऽभावेनादोषात् । न च पूर्वान्तवद्भावेनैकारान्तस्य पदत्वम् । उभयत आश्रयणेनान्तादिवदिति निषेधात् । तस्य पौर्वापर्याश्रयणकत्वे ऽपि पदेत्यस्यावृत्त्या ऽजादौ परे यत्पदं तदवयवस्य ङमः पदे परतो ङमुडित्यर्थाश्रयणेनोक्तनिषेधप्रवृत्तेः सुलभत्वात् । पदावयवङमः परस्याजादेः पदे ङमिति व्याख्यानेपि यथाकथंचिदत्र ङम् विशेषणस्य पदस्य विशेष्यपदस्य विशेष्यपदभिन्नस्यैव ग्रहणेनादोषात् । एतेन ङमःपदस्येति विशेषणं व्यर्थमित्यपास्तम् । नचैकदेशविकृतन्यायेन नान्तस्य पदत्वम् । अनच्क इन्द्रः सम्पन्न इत्यादिभाष्यप्रामाण्येन समासान्त इत्यादिनिर्देशेन चैकादेशरहिते एकदेशविकृतन्यायेन पदत्वाद्यप्रवृत्तेः । तेन वनान्तः सान्त इत्यादौ नलोपरुत्वादि न । अत्रानुनासिक । अतएवेति । अत्रेत्यनेन रुप्रकरणस्यैव ग्रहणं न तु रोरेवेति हेतोरेवेत्यर्थः । न च समःसुटीत्यादिना रोर्विधानेत्रेत्यनेन रोर्ग्रहणसंविधानेपि तस्यैवेति रुप्रकरणग्रहणेनेदं तत्साधकमिति वाच्यम् । समःसुटीत्यत्र सकारप्रश्लेषपक्षेपि दीर्घादटीत्यनेन रोरेव विधेयत्वात् । अन्यथा महाँ इ इत्यत्र सत्त्वस्यासिद्धत्वादप्रवृत्तौ रूपासिद्धेः । वस्तुतस्तु सकारप्रश्लेषपक्षे ऽत्रेत्यस्य सप्रकरणेइत्येवार्थो न तु रुप्रकरणे इति । कानाम्रेडित इत्यत्र रुप्रकरणस्य विच्छिन्नत्वेन तद्विषये ऽनुनासिकापत्तेः । अधिकारपक्षे रोः पूर्वस्येत्यर्थो ऽसंभवी पूर्वस्य नित्यं रुत्वं पूर्वस्य तु वा नुनासिक इत्युक्तरीत्या रुणा सहैवानुनासिकविधानकाले रोरभावादत आह । रोःपूर्वस्यत्यस्येति । अनवयवएवेति । आगमत्वं च प्रत्ययादेशभिन्नत्वे सति साक्षाल्लक्ष्यसंस्कारकतया शास्त्रविहितत्वम् । एवमेव नय्वाभ्यामिसूत्रविहितयोरप्यनवयवत्वम् । नय्वाभ्यामिति पञ्चमीनिर्देशेन पूर्वशब्दस्य तत्रावयववाचित्वाभावात् । तेन इश्च अञ् च यञन्तस्यापत्यं ऐयाजि तस्य च्छात्रा इत्यर्थे ऽणेव न तु च्छ इति भावः । विसर्गाक्षिप्तेति । इदमयुक्तम् । आक्षिप्तस्य शाब्दे ऽनन्वयात् । किन्तु भाष्योक्तरीत्या निर्वाहो बोध्यः । केचित्त्ववसाने रेफस्य विसर्जनीयः खरि तस्य सो विधेयः । शर्परे इत्यादि विसर्गस्थानिकं कार्यं रेफस्यैव विधेयमित्याहुः । अप्राप्तिरेवेति । अत्र विसर्गे प्राप्ते इति मूलं पुनः खयीति सूत्रे पक्षभेदेन ≍क≍पयोः षत्वस्य च प्रसक्ताविति मूलं यदि सत्वं न विधीयते किं तु रुत्वमेव तदेत्यर्थकमेवेति बोध्य-

म्। अतएव। रुग्रकरणस्य ग्रहणादेव। दोषत्वेननोक्तेति। इदमुपलक्षणम् समो वा लोपमेक इत्यस्य। संस्कर्त्ता सँस्स्कर्तेत्यनुनासिकानुस्वारघटितरूपस्योदाहरणत्वेन प्रदर्शनादित्यपि बोध्यम्। अपास्तमिति। इदमुपलक्षणम्। नश्छव्यप्रशानित्यादौ पक्षे नकारस्य श्रवणापत्तिरित्यपि बोध्यम्। पूर्वं प्रवृत्येति। इदमयुक्तम्। पूर्वत्रासिद्धीयमद्विर्वचन इति परिभाषया परद्वित्वस्यैव पूर्वं प्रवृत्तेर्युक्तत्वात्। त्रितस्य निर्वाह इति। केचित्त्वेकस्यां व्यक्ताविति न्यायेन न पुनार्द्वित्वम्। लक्षणवद्स्य कार्यार्थकत्वात्। अत एव सोवुप्यतेः सानि सोषुप्सित इति अत्र द्वित्वस्योक्तन्यायेनाप्रवृत्त्या भाष्यकारीयानभ्यासग्रहणप्रत्याख्यानस्य निर्वाह इत्याहुः। सूत्रविधेययोरिति। तयोर्विधायकस्य शास्त्रान्तरस्याभावादिदं व्यर्थम्। ननु घसेः किच्चेतीरानि कित्वादुपधालोपे जातस्य चर्त्वस्यासिद्धत्वात्खय्परत्वमेव नास्तीत्याशङ्क्याह। क्षरधातोरिति। क्षीरं क्षरतेर्वा घसेर्वेति निरुक्तप्रामाण्यादिति भावः। अवश्यं प्राताविति पाठः। लुम्पेदवश्यमः कृत्ये इति कृत्ये एव लोपस्मरणादिति बोध्यम्। भावेक्तइति। नपुंसके भावे क्त इति विहितः गत्यर्थाकर्मकेति विहितो वा सकर्मकेभ्यो ऽपि भवतीति भावः। अत्र यद्वक्तव्यं तत्रिपथगायामुक्तम्। सवर्णकालइति। वर्णसहितकाल इत्यर्थः। तदधिकेति। स्वारसिकार्धमात्राकालात् योधिको ऽर्धमात्राकालस्तदधिकेत्यर्थः। अव्ययमेवेति। न तु धातुरित्यर्थः। ध्वनितमेतदिति। तत्रहि वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे आलूयेत्यत्र ह्रस्वस्येति तुकमाशङ्क्याचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधिर्भवति यदयं दीर्घादिति छे तुकं शास्तीत्युक्तम्। यदि च च्छस्यायं तुक् स्यात्तदा न पूर्वेणतुक्सिद्धिः तेन ह्रस्वस्य तुग्विधानादिति बोध्यम्। स्थानिद्वारेति। इदमुरादिस्येतदभिप्रायम्। इति हल्संधिः। यद्यपि विसर्गस्यापि हल्त्वेन हल्सन्धावेवास्यान्तर्भाव एवं स्वादिसन्धेरपि तथापि ब्राह्मणवसिष्ठन्यायेन श्रोतॄणां प्रतिपत्तिसौकर्याय पृथक् कथनम्। श्रोतारो हि विसर्गस्थानिककार्यसन्देहे विसर्गसन्धिप्रकरणमवेक्ष्य निश्चिन्वन्ति। एवं स्वादिस्थानिककार्यसन्देहे ऽपि। अनुवृत्तिप्रदर्शनायेति। वस्तुतस्तु विसर्गस्थानिकसन्धिकार्याणामुक्तरीत्यैव श्रोतृप्रतिपत्तिसौकर्याय तत्र क्रोडीकारस्यावश्यकतया पुनरुक्तिः। अत एव पूर्वमुक्तमपि झलां जशोन्ते इति सूत्रं हल्सन्धौ पुनरुक्तम्। वक्ष्यति पूर्वमुक्तमपि कस्कादिषु चेति शास्त्रम्। यद्यपि झलां जशोन्ते इति शास्त्रम् संहिताधि-

कारस्थं तथापि वर्णान्तरेण संहितायां वावसान इत्यस्याप्रवृत्त्या जश्त्वश्रवणं निर्बाधमित्येतावता संधिकार्यत्वमस्य । अत एव तादृगेव वागीशश्चिदूमपित्युदाहृतमित्यलं प्रसक्तानुप्रसक्त्या । खरेवेति । नावसानम् । तस्याभावरूपत्वेन वैजात्यादित्यर्थः । अव्ययीभावश्चेत्यत्रभाष्ये इति । तत्र हि अव्ययीभावस्याव्ययत्वे उपपयःकार इत्यादौ सत्वाभावः प्रयोजनमित्युक्त्वा नैतदस्ति प्रयोजनं अनुत्तरपदस्थस्येति प्रतिषेधो भविष्यतीत्युक्तम् । तेनानव्ययस्येति वार्तिकेन सत्वप्रतिषेधे ऽव्ययत्वं नेति लक्ष्यत इति भावः । वस्तुतस्त्वव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचारा इति परिगणनारम्भतत्प्रत्याख्यानयोः फलैक्यायैतस्या ऽनभिधानं । वाःकाम्यतीत्येतस्याप्यनभिधानम् । सोपदादाविति सूत्रे रोःकाम्ये इति वाच्यम् किं प्रयोजनं नियमार्थं पयस्काम्यति क्व माभूत् गीः कम्यतीति भाष्यात् । अन्यथा संग्राह्योदाहरणं सत्वस्य व्यावर्त्यं तु षत्वस्यापीत्यर्धजरतीयापत्तिः । इणःषः । इदुदुपधस्येत्येव सिद्धे इदं व्यर्थमित्याशङ्क्याह । इदुदुपधस्येति । इति च संबध्यत इति । अत एव रोःकाम्ये इत्यस्य गीःकाम्यतीति विसर्गघटितं भाष्ये व्यावर्त्यं प्रदर्शितम् । अन्यथा सत्वस्याप्रवृत्तावपि षत्वस्य प्रवृत्त्यापत्त्या तदसङ्गतिः । अतएवेति । अनव्ययस्येत्यादेरुत्तरसूत्रे संबन्धादेवेत्यर्थः । सस्यानेन षत्वमिति । कुप्वोः परयोरिति शेषः । अपदादिविधाविति चेत्यारभ्य षत्वसिद्धिरित्यन्तो ग्रन्थः पूर्वेण गतार्थः । असङ्गत इति । षत्वप्रकरणान्ते इणः ष इत्यस्य पाठे तु न कश्चिद्दोष इत्याहुः । प्रकरणेति । षत्वसत्वयोर्विधेययोर्भेदे ऽपि कुप्वोरिति निमित्तैक्यात्प्रकरणैक्यं बोध्यम् । नमस्पुरसोर्गत्योः । गतित्वाभाव इति । कृञ्योगाभावे इति शेषः । कृञोयोगे तु ऊर्यादित्वेन निपातत्वात्स्वरादिपाठं विनैवाव्ययत्वसिद्धिः । तथा च नमः करोतीति विसर्गघटितमसाध्विति भावः । नमःशब्दांशगतेरित्यस्य संबन्धफलं तु क्रियायोगाभावे बोध्यम् । द्विस्त्रिश्चतुरिति । इति शब्द एषामित्यर्थे । वक्ष्यमाणरीत्येति । शब्दस्वरूपं विशेष्यमादाय सुजन्तस्येति पुनः पदस्येति विशेष्यमादाय सुजन्तान्तस्येति । तेन परमद्विष्करोतीत्यत्र षत्वसिद्धिः । सुचइति सूत्रयितुमिति । ननु चतुःकरोतीत्यत्रैतस्यासिद्धत्वादिदुदुपधस्येति नित्यं षत्वापत्तिः । यथान्यासे तु विशिष्य चतुर्ग्रहणेन नित्यषत्वस्य बाधः । न च व्युत्पत्तिपक्षे प्रत्ययविसर्जनीयत्वात्तदप्राप्तिः । चतुष्कपालमित्यादिसिद्धये ऽव्युत्पत्तिपक्षस्यै-

वाश्रयणीयत्वात् । न च प्रकरणे प्रकरणमसिद्धं न तु योगे योग इति पक्षाश्रयणेन निर्वाहः । तस्यैतद्ग्रन्थकृदभिमतत्वात् । च च द्विःकरोति त्रिःकरोतीत्यनयोरिसुसोरित्येव सिद्धे चतुःकरोतीत्यत्र नाप्राप्ते ऽस्यापवादत्वं द्विः पाक इत्यादौ समासे सामर्थ्यविरहात् । इसुसोरित्यस्याप्राप्तौ अस्यावश्यकत्वादिति चेन्न । कृत्वोर्थ इत्यस्य स्थाने सुच इति सूत्रयितुमुचितमित्याशयात् । यद्वा सुच इत्युत्तरं चतुर इति न्यासः सुजन्तस्य चतुरः षत्वमिति तदर्थ इति न कश्चिद्दोषः । स्थानिनिमित्तमिति । तथा च सस्योति रेफस्याप्युपलक्षणमिति भावः । नित्यषत्वापत्तेरिति । अन्ये तु छावतात् द्विस्त्रिरित्येव वक्तव्ये कृत्वोर्थप्रत्ययान्तसामान्ये प्रवृत्त्यर्थंकृत्वोर्थग्रहणाच्चतुःकरोतीत्यत्र नित्यषत्वं बाधित्वा विकल्पप्रवृत्तेरिति न कश्चिद्दोषः । स्पष्टं चेदं प्रकृतसूत्रे कैयटे । अथवा सुच इत्येव वक्तव्ये कृत्वोर्थग्रहणाच्चतुःशब्देपि षत्वम् । सुच इत्युक्तौ हि निर्दिश्यमानपरिभाषया सुचो विसर्गस्यैव षत्वं स्यात् न चतुःशब्दविसर्गस्येति कृत्वोर्थग्रहणं कृतम् । एतेन सुच इति सूत्रयितुमुचितमित्यपास्तम् । न च सुचतुष्पंचाशदिति सुजर्थबहुव्रीहौ षत्वानापत्त्या सुच इति सूत्रयितुमशक्यमेवेति कृत्वोर्थ इत्यस्य न सुच इत्यनेन समानफलकत्वमिति वाच्यम् । कृत्वोर्थ इत्युक्तावप्यस्यासिद्धत्वेनेदुदुपधस्येति नित्यषत्वस्यैवोक्तस्थले प्रवृत्त्या फलभेदाभावात् । तदेतदभिप्रेत्य वार्तिककारभाष्यकाराभ्यां द्विस्त्रिश्चतुर्ग्रहणं प्रत्याख्यातमित्याहुः । इसुसोःसाम । तयोरेवसंभवेनेति । अव्युत्पत्तिपक्षाश्रयणनेदम् । इदमयुक्तम् । तदाश्रयणे हि जग्मुः पेचुरिति यस्यां क्रियायामित्याख्यातमाख्यातेनेति समासे नित्यं समास इति षत्वापत्तेः एवं षष्ठ्या आक्रोशे इत्यलुकि सख्युःपुत्र इत्यत्रापि षत्वापत्तिः । सुपीः पचति सुभूः पचतीत्यादौ प्रातिपदिकावयवयोरिसुसोः सामर्थ्य इति षत्वापत्तिः । तस्मादिसुसोः सामर्थ्ये इत्येतद्विषये व्युत्पत्तिपक्ष एवाश्रयणीयः । तथा सति प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहण,मर्थवद्ग्रहणेनानर्थकस्य, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषाभिः सख्युः पाक इत्यादौ न षत्वम् । परस्परसाहचर्येण कृतोरेवेसुसोर्ग्रहणात् पेचुः काष्ठैरित्यादावपि न षत्वमित्येव युक्तम् । व्युत्पत्तिपक्षमाश्रित्य शङ्कते । नचेति । इसुसन्तान्तस्येत्यर्थनेति । अनुत्तरपदस्यस्येत्यनेन । पदस्येत्यस्य वैयधिकरण्येनान्वयकल्पनात्परमसर्पिष्करोतीत्यादौ षत्वमित्यपि बोध्यम् । नकर्तव्यमेवेति । अन्ये तु अयामन्तास्वाय्येत्निष्णुष्विति

तितुत्रनथसि इति सूत्रद्वयप्रणयनान्यथानुपपत्त्या पाणिनेर्व्युत्पत्तिपक्षोऽपि समतः नित्यं समास इति सूत्रे नित्यग्रहणाच्च । अव्युत्पत्तिपक्षे हि नित्यं समास इत्यस्य षत्वप्रषेधमात्रफलकत्वेन नित्यग्रहणवैयर्थ्यं स्पष्टमेव । किं चाव्युत्पत्तिपक्षस्यैवाश्रयणे जग्मुः पेचुरिति यस्यां क्रियायामित्याद्युक्तदोषापत्तेः । तदेतदभिप्रेत्य नित्यं समासे इति सूत्रे भगवता भाष्यकृतोक्तम् । अथ चेत्कृदन्तमेतदिति । अथ चेत्सविज्ञानमित्यादिना पक्षान्तरस्याप्यवलम्बनं तु प्रौढिवादमात्रं तदेतदभिप्रेत्याव्युत्पत्तिपक्षे स्वाश्रीयमाणे सर्पिषेत्यादि न सिध्यतीति व्युत्पत्तिपक्ष एवेसुसन्तस्याश्रयणीय इति नित्यं समासे इति सूत्रे कैयटेनोक्तम् । आदिपदेन भिन्द्युः पेचुरित्यादिपूर्वोक्तदोषसंग्रहः । किं चेसुसोर्विषये ऽव्युत्पत्तिपक्षाश्रयणे सर्पिःकालकमित्यादावसामर्थ्यादनेन षत्वाप्रवृत्ताविदुदुपधस्येति नित्यं षत्वापत्तिः एवं देवदत्तस्येदं सर्पिः फाण्टमिदं यज्ञदत्तस्येत्यत्रेदुदुपधस्येति षत्वापत्तिः । कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठस्तु व्यपेक्षायां तदभावे ऽसमासे च नित्यार्थः । असमासे व्यपेक्षाविरहे चेदुदुपधस्येति षत्वासिद्धेरित्याहुः । व्यपेक्षायां विकल्प एवेति बोध्यमिति । इदमयुक्तम् । विकल्पेन मुक्ते कस्कादित्वान्नित्यषत्वप्रवृत्तेः सुलभत्वात् । किं चाव्युत्पत्तिपक्षस्यैव स्वेनाश्रयणेनाव्यपेक्षायामिदुदुपधस्येत्यनेनैव षत्वसिद्ध्या व्यपेक्षायां पाठसामर्थ्येनैवनित्यषत्वासिद्धिः । ननु परमसर्पिःकुण्डिकेत्यत्र कस्कादित्वात्षत्वं दुर्वारम् । नचानुत्तरपदस्थस्येति प्रसज्यप्रतिषेधाश्रयणेन कस्कादिषु चेति विहितस्यापि षत्वस्य निषेध इति वाच्यम् । निषेधदृष्ट्या तस्यासिद्धत्वेन तन्निषेधासंभवात् इति चेन्न । प्रकरणे प्रकरणमसिद्धमिति तत्पक्षाश्रयणेन प्रसज्यप्रतिषेधाश्रयणसामार्थ्येन वा षत्वमात्रस्य निषेधाङ्गीकारात् । अत्र चानुत्तरपदस्थस्येति किं परमसर्पिःकुण्डिकेति भाष्यं मानम् । न चैवं परमसर्पिष्कल्पमित्यत्रेणः ष इत्यस्यापि निषेधापत्तिः । कवर्गपवर्गघटिते एव समासे ऽनुत्तरपदस्थस्येति निषेधप्रवृत्तेः । न च परमसर्पिष्कल्पपुत्रमित्यत्र निषेधापत्तिः । प्रत्यासत्त्या कवर्गाद्युत्तरपदकसमास एवोक्तनिषेधप्रवृत्तेः । इति विसर्गसन्धिः । कृते त्वस्मिन्निति । सूत्रे इत्यर्थः । सुप्विभक्त्योर्ग्रहणमिति । सप्तसु विभक्तिषु ये प्रथमे विभक्ती इत्यर्थः । गुणवृद्धिहन्तुरिति । यद्यपि वृद्धिग्रहणं न प्रकृताभिप्रायेण प्रकृते गुणस्यैव प्राप्तेः । नापि पूर्वसवर्णदीर्घबाध्यकार्यसामान्यप्रदर्शनाभिप्रायेण । यणूपररूपयोरनुक्तेः । तथापि नादिचीत्येतद्विषये भ्रष्टावसरन्यायाप्रवृत्त्यु-

पपादनाय तद्विषये प्रवर्त्तमानपूर्वसवर्णदीर्घबाध्यकार्यसामान्यप्रदर्शनमिति न कश्चि-द्दोषः । कस्यचित्सञ्ज्ञेति । इदं हूयमानार्थकनाम्न एव प्लुत इति भ्रमेण । वस्तु-तस्तु नाम्न एव ग्रहणे प्रमाणाभावात् । तच्च रूढं लौकिकं वेति दूराद् हूतेचेति सूत्रस्थस्वग्रन्थाद्यौगिकेपि प्लुतः प्रवर्त्तते । आश्रयणसामर्थ्यादिति । ननु त्रिपाद्यां रोः सुपीत्यस्यानन्तरं अत उरति इत्येव पाठ्यमिति चेन्न । उत्वस्यासिद्धत्वेन गुणानापत्तेः । मनोरथ इत्यत्रोत्वस्याद्धत्वेन रोरीति लोपापत्तेश्च । यद्यप्यप्लुता-दिति विशेषणसामर्थ्येन प्लुतस्य सिद्धत्वे ऽप्लुत इवि व्यर्थं तथापि तत्सामर्थ्येन दूराद् हूतेचेत्यस्य सिद्धत्वेपि गुरोरनृत इत्यस्य सिद्धत्वे मानाभाव इत्याशयेनाप्लुत इत्युक्तं सूत्रकृता । प्लुतस्याश्रयणसामर्थेन पूर्वत्रासिद्धमित्यसिद्धत्वं बाध्यते न त्वसिद्धं बहिरङ्गमन्तरङ्ग इतीत्यभिप्रेत्याह । पयसीति । अन्यथा । आश्रयणसामर्थ्येना-स्यासिद्धत्वमात्रबाधने । नन्वन्तरङ्गस्यासिद्धत्व इव परिभाषादृष्ट्या बहिरङ्गस्या-सिद्धत्वेपि परिभाषा न प्रवर्तत इत्यशङ्क्याह । परिभाषादृष्ट्येति । स्वदृष्ट्या ऽसिद्धस्य परम्प्रत्यसिद्धत्वप्रतिपादनसंभवं लोकदृष्टान्तेनोपपादयति । स्वदृष्ट्येति । स्वदृष्ट्या विद्यमानस्य घटादेः परं प्रत्यविद्यमानत्वप्रतिपादनदर्शनादित्यर्थः । प्र-तिपाद्याभावइति । प्रतिपत्तिक्रियायाः सकर्मकत्वेन प्रतिपाद्यरूपकर्मणो ऽभावे यथा निष्पत्तिर्भोज्याभावे भोजनस्येव तथान्तरङ्गं प्रत्यसिद्धत्वप्रतिपादिका परिभाषा ऽन्त-रङ्गादर्शने कम्प्रत्यसिद्धत्वं प्रतिपादयेत् । उत्वं प्रतीव तद्देशस्थपरिभाषां प्रत्यपि प्लुतासिद्धत्वमित्यन्ये । पूर्वत्रासिद्धमित्यसिद्धत्वस्येवाश्रयणसाथ्याद्बहिरङ्गासिद्धत्व-स्यापि कुतो न बाध इत्याशङ्क्याह । आश्रितेत्वति । प्रत्यक्षत्वेनचेति । पाणि-निना साक्षादुच्चारितत्वेनेत्यर्थः । तथा च प्रत्यक्षस्य प्रथमोपस्थितस्य बाधेनोपप-त्तावानुमानिकस्य विलम्बोपस्थितिकस्य बाधकल्पना न युक्तेति भावः । स्पष्टम्भा-ष्येइति । अतो रोरप्लुतादिति सूत्रे इत्यर्थः । ननु प्लुतप्रगृह्या इति सूत्रे प्लुतस्य सिद्धत्वज्ञापनद्वारा एकादेशाप्लुते विप्रतिषेधेन कृते प्रकृतिभावः । देवदत्त ३ अत्र त्वमसीति भाष्यस्य कैयटेन प्लुतस्यैकपदाश्रयत्वादन्तरङ्गत्वेनैकादेशस्य तु पद-द्वयापेक्षत्वेन बहिरङ्गत्वेन चिन्त्यतोक्तौ प्लुतस्यापि वाक्यत्वसम्पादकपदान्तरसापे-क्षत्वादेकादेशस्य समत्वाच्चिन्त्यमेव चिन्त्यमिति विवरणोक्तिर्विरुध्यते । वाक्यस्य टेः प्लुतार्थं देवदत्ता इत्यस्यादावेहीति शेषपूरणस्यावश्यकत्वात् । वाक्यद्वयसा-

पक्षैकादेशस्यैवमपि बहिरङ्गत्वादिति चेत्सत्तम् । भाष्यकारेण तु परत्वेनान्तरङ्गत्वेन वा पूर्वं प्लुतप्रवृत्तौ विशेषाभावादन्तरङ्गत्वं स्थितमप्युपेक्ष्य विप्रतिषेव उपन्यस्तः । नदोषइति । आदेः परस्येत्यादेः स्यादिति भावः । भोभगो इति । दीर्घइति । तत्राचश्चेति परिभाषा नोपतिष्ठते । फलाभावादिति भावः । तथा च स्थानषष्ठ्यन्तपदजन्यप्राथमिकोपस्थितिविषय इडिति समुदाय एवेति न तत्र स्थानिवन्निषेधः । हेरामेति । इदमुपलक्षणम् । राम इत्यत्रापि पदत्वासिद्धेः । सुप्त्वस्य विसर्गस्य स्थान्यलवृत्तित्वात् । आनुमानिकेति । राम इत्यत्रापि रेफान्तस्य स्थाने विसर्गान्त आदेश इति भावः । नन्वेवं स्थानिवद्भावेन सुबन्तत्वलाभ इत्ययुक्तम् । नियमशास्त्राणां विधिमुखेन प्रवृत्तेस्त्वयैवाभ्यर्णमुक्तत्वेन प्रत्ययलक्षणेनैव सुबन्तत्वस्य वक्तुमुचितत्वादिति तटस्थशङ्कां परिहरति । प्रत्ययलक्षणेनापीति । अपिरक्तशब्दार्थे । एवं च राजपुरुष इत्यादावपि स्थानिवत्त्वेनैव राजेत्यस्य पदत्वमित्याशयः । यद्वा वार्तिकमते प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वेन वर्णाश्रय इत्यस्य वर्णमात्रवृत्तिधर्माश्रय एव प्रवृत्त्या तन्मते प्रत्ययलक्षणसूत्रेण सिद्धिमाशङ्क्य निराकरोति । प्रत्ययलक्षणेनापीति । व्याख्या पूर्ववत् । वार्तिकमते लक्षणपदस्य वैयर्थ्यात् । इदमापाततः । तन्निमित्तकार्यस्येति । प्रकृतिसंबन्धिन इति शेषः । अत एव नर्त्वानिर्भिन्न इत्यादावेस् न । तथा च पदसंज्ञायाः प्रकृतिप्रत्ययोभयसंबन्धित्वेन प्रत्ययलक्षणसाध्यत्वमित्यर्थः । प्रत्ययस्य कार्यकोटौ प्रवेशेन पदसंज्ञानिमित्तत्वाभावात् । उक्तरीत्येति । आनुमानिकस्थान्यादेशभावाश्रयणेनेत्यर्थः । तथा च दीर्घाहन् स् इत्यस्यां दशायां यथा सुपीति रुत्वनिषेधस्तथादेशेप्यानुमानिकस्थान्यादेशभावस्य समुदायविश्रान्ततया ऽल् न स्थानीति नानल्विधाविति निषेधः प्रवर्तत इति भावः । यद्यपि राजेत्यादौ सुलोपे दीर्घो न स्यादित्यपि शङ्कितव्यं तथापि परत्वाद्दीर्घस्य लोपात्पूर्वं प्रवृत्तिरिति समाधानसंभवेनानुमानिकस्थान्यादेशभावाश्रयणेन समाधानक्लेशस्य नोपयोगः । दीर्घाहो निदाघ इत्यत्र तु रुत्वस्यासिद्धत्वात्पूर्वंलोप इति आनुमानिकस्थान्यादेशभावाश्रयण क्लेश आवश्यक इति विशेषः । नचैवं चित्रायां जातश्चित्र इत्यादौ ङीप्प्रसंगः । आनुमानिकस्थान्यादेशभावे आश्रीयमाणे ऽलः स्थानिवत्त्वाभावात् । यदि च स्थान्यवयवाल्वृत्तिधर्माश्रयकत्वेनानल्विधाविति निषेध इत्युच्यते तदा स प्रकृतेपि

समान इति वाच्यम् । स्थान्यल्वृत्तीत्येतदंशे मात्रपदानिवेशेपि स्थान्यवयवाल्वृत्तीत्येतदंशे तन्निवेशेनादोषात् । अन्ये तु स्थानिवदादेश इत्यत्र स्थानिपदं निवर्त्यपरमेव लोकत एतत्सिद्धं तद्यथा । लोके यो यस्य प्रसंगे भवति लभते सौ तत्कार्याणीति स्थानिवत्सूत्रस्थभाष्यस्वारस्येन प्रसंगिन एव स्थानिपदार्थत्वलाभात् । स्थानमस्यास्तीति स्थानीति व्युत्पत्तेश्च उत्तरसूत्रानुरोधाच्च । तत्र हि णिलोपस्य स्थानिवद्भावाय स्थानिपदं निवर्त्यपरमेव । अग्रहीत् विशिष्टं ह्येषा ऽनलमाश्रयेत इटं नामेति स्थानिवत्सूत्रस्थभाष्ये एष इत्यनेन लोपः परामृश्यते । भोभगो इति सूत्रस्थ भाष्यं तदनुसारी स्थानिवत्सूत्रस्थः ग्रहो लिटि दीर्घ इत्यत्रेट एवस्थानित्वं नाच इति कैयटग्रन्थश्च प्रौढिवादेनैव प्रावृतम् । उक्तभाष्यादिविरोधात् । बहुलक्ष्यासिद्धेश्च । तथा हि वारिणी इत्यत्र द्विवचनत्वस्य स्थान्यल्वृत्तित्वेनातिदेशेनादेशे तदलाभे प्रगृह्यत्वानापत्तिः । इकारग्रहणं तु हरी इत्यादौ चरितार्थम् । अन्तादिवत्सूत्रस्याल्मात्रवृत्तिधर्माश्रयके विधावप्रवृत्तावप्यल्वृत्तिधर्माश्रयके विधौ प्रवृत्तेः । किं चैवं सति ईंगमित्यत्र दीर्घः । वीगतीत्यत्र प्रश्लिष्टस्य गुणे उपेतीत्यत्रैङि पररूपमिति पररूपम् । आदीध्ये इत्यत्र एरनेकाच इति यण् ऊवे इत्युत्तमपुरुषे उवङादेशश्च न स्यात् । धातुत्वप्रत्ययत्वादीनां स्थान्यल्वृत्तित्वात् । किं च राजेत्यादौ नित्यत्वाद्धल्ङ्यादिलोपे दीर्घानापत्तिः । एवं दीर्घाहो निदाघेत्यत्र हल्ङ्यादिलोपे रुत्वापत्तिः । न चानुमानिकस्थान्यादेशभावाश्रयणेनासुपीति निषेधः अन्होयमान्ह इत्यादौ रुत्ववारणाय पदस्येत्यनुवृत्त्या ऽऽन्शब्दान्तस्य पदस्य रुत्वमित्यर्थावश्यकत्वेन दीर्घाहन् सु इत्यस्यां दशायां रुत्वस्याप्रसक्त्या तन्निषेधस्याप्यप्रवृत्त्या स्थानिवद्भावेन हल्ङ्यादिलोपे जाते निषेधस्यातिदेष्टुमशक्यत्वात् । सावपि पदं भवतीति पक्षेपि रुत्वनिषेधयोः त्रैपादिकत्वेन लोपात्पूर्वमप्रवृत्तेः । किं चानुमानिकस्थान्यादेशभावाङ्गीकारेपि श्रौतस्थान्यादेशभावस्य त्यागाभावेन श्रौतस्थान्यल्वृत्तिसुप्त्वप्रयोज्यसुबन्तत्वरुत्वनिषेधयोराल्विधित्वेन हेराम हेदीर्घाहो-निदाघेत्यादावनापत्तिः । तदेतदभिप्रेत्योच्चारणकाले यः श्रुतः स स्थानित्वेनाश्रीयते न तु प्रतिपत्तिकाले इति मन्यते इति कैयटेनोक्तं भोभगो इति सूत्रे प्रत्ययलक्षणेनापीत्युक्तमप्ययुक्तम् पञ्च सप्त राजपुरुष इत्यादौ प्रत्ययलक्षणेन पदत्वमित्यस्य प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रस्थभाष्ये ग्रन्थसन्दर्भलभ्यस्यानुपपत्तेः ।

उक्तभाष्यप्रामाण्येनास्मन्मते लक्षणपदेन हि प्रत्ययस्थानिकमैसादिकमेव वार्यते न तु पदत्वादिकमपि तथा सति नखनिर्भिन्न इत्यादावैसादेरिव पञ्चेत्यादौ पदत्वस्याप्यनापत्तिः । प्रत्ययलोपे प्रत्ययनिमित्तकमेव कार्यं भवति न तु तदुद्देश्यकमिति भवन्मते नियमपर्यवसानादित्याहुः । ननु वर्तिपदार्थस्य तरबर्थप्रकर्षेणान्यपदार्थेन च युगपदन्वये परत्वात्तरपि ततो बहुव्रीहौ लघुतरप्रयत्न इति स्यादत आह । अन्यपदार्थसंबन्धोत्तरमिति । यथा च वार्तिकम् । पूर्वपदार्थातिशये आतिशायिके कृते बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थ इति पूर्वविप्रतिषेधेनेति तद्भावप्रदर्शनं कैयटेन कृतम् । पूर्वविप्रतिषेधे प्रमाणं तु लघुप्रयत्नतर इति निर्देश एव । एतन्मते तु अन्यपदार्थसंबन्धोत्तरमेव वर्त्तिपदार्थातिशयविवक्षाभिधानस्वाभाव्यात् । तेन सूक्ष्मवस्त्रतरादिसिद्धिः । अत्रापि प्रमाणं लघुप्रयत्न इति निर्देशः । अत्र कैयटोक्तमेव युक्तम् । वृत्तपदार्थे विशेषणान्वयकल्पनाभावात् । वर्त्तिपदार्थप्रकर्षाविवक्षयेति । शक्यतावच्छेदकगतस्येव शक्यतावच्छेदकतावच्छेदकगतस्यापि प्रकर्षस्य तरबर्थत्वादिति भावः । ओतोगा । साहचर्यादिति । यद्यपि स्मृतावच्युनेत्यत्र व्योरिति लघुप्रयत्ने वकारे कर्तव्ये स्थानिवद्भावान्न वकारः पदान्तः । पूर्वत्रासिद्धे न स्थानिवदित्यस्य पदचरमावयवातिरिक्तविषयकत्वस्योक्तत्वात् । तथा च साहचर्याश्रयणस्य स्मृतोवच्युतेत्यत्र नोपयोगः । तथापि जनानवतीतिजनौस्तस्यापत्यं जनावपत्यमित्यादौ धात्ववयववकारस्य ग्रहणवारणाय यकारसाचर्यस्यावश्याश्रयणीयत्वमित्यभिप्रायेणेदम् । वस्तुतो ऽयुक्तमेतत् । स्मृतोवेत्यत्रैव एर्तोर्विचि रोरानयनमवनयनमित्यत्र धात्ववयवयकारस्य संभवात् । एवं नयतोर्विजन्तस्यानयनशब्देन समासे धात्ववयववकारसंभवो बोध्यः । स्मृतोवच्युतेति । स्मृतां वेतीति स्मृतोवीस्तमाचष्ट इत्यर्थे णिजन्ताद्विचि रूपम् । स्थानिवद्भावस्तु न । लोपस्य पदचरमानवयवत्वेन पूर्वत्रासिद्धेनेत्यस्य प्रवृत्तेरिति भावः । वस्तुत ईदृशानामभिधाने दृढं मूलं न पश्यामः । गार्ग्यश्रुतेरिति । शाकटायनमते एव लघुप्रयत्नयोर्विधानात् । गार्ग्यमते तदभावात् । इत्याद्यनुवृत्तेरिति । लोपः शाकल्यस्येत्यत्र न च शाकल्यभिन्नमते लोपो नेति स्मृत्यन्तरानुसन्धाने गार्ग्यमते लोपाभावापत्त्या गार्ग्यः स्वस्मान्मतात्प्रच्युतः स्यादिति वाच्यम् । शाकल्यभिन्नो यो गार्ग्यभिन्नस्तन्मते लोपो नेति स्मृत्यन्तरानुसन्धानकल्पनोपपत्तेरित्याशयात् । तदनुवृत्तिरिति । भोइत्याद्यनुवृत्तिरित्यर्थः ।

हलिसर्वेषाम् । अपूर्वोऽलघुप्रयत्नइति । शाकटायनमते एव लघुप्रयत्नविधानेन शाकल्यमते तदभावादिति भावः । प्रकरणे प्रकरणमसिद्धं न योगे योग इति पक्षे तु नायं दोषः । तद्बाधादिति । वस्तुतस्तु लोपः शाकल्यस्येत्यस्याभावे हलि सर्वेषामित्यस्य प्रवृत्त्या दोषाभावात् । अयं प्रयासो व्यर्थ एव । फलाभावाच्चेति । वृक्षव्करोतीत्यादावशीत्यनुवृत्त्या ऽस्याप्रवृत्तिः । वृक्षव् हसतीत्यादेस्त्वनभिधानम् । द्वयोरपि वा ऽनभिधानमिति भावः । निर्देशैरिति । सुपि चेत्यत्र तदन्तविधौ दीर्घानापत्तेरिति भावः । निष्ठेत्यादाविति । रदाभ्यां परस्य निष्ठान्तस्य यस्तकार इत्यर्थे वृषतीर्णेत्यादौ धातुतकारस्य ततः पूर्वतकारस्य च नत्वापत्तिरिति भावः । वर्त्तिपदार्थस्य वृत्त्यघटकविशेष्यान्वयायोगान्न तदन्तविधिरिति केचित् । सप्तमीस्थ इत्यादाविव तदन्तविधिप्राप्तेरित्यन्ये । नलुमतेतिनिषेधादिति । तत्राङ्गपदम्पूर्वोपलक्षणम् । रेफविधानसामर्थ्यात् । त्रिपाद्यामपि प्रवृत्तिरिति भावः । ननु अहन् सुपि र इतीत्येव न्यासोस्तु लाघवादिति चेन्न । गुरुन्यासेन क्वचिदसुप्यपि रुत्वकल्पनात् । तदेतत्पठ्यते । रूपरात्रिरथन्तरेष्विति । अकारान्ते परत्वादतो लोपस्येकारोकारान्ते च गुणस्य प्रवृत्त्या न दोषः । चचारेत्यादौ चेति । नन्वन्तरङ्गत्वाद्दीर्घे ऽभ्यासह्रस्वत्वेन सिद्धमिति चेन्न । ऊखतुरित्यादावपि सवर्णदीर्घे ह्रस्वापत्तेः । यदि च तत्र वार्णादाङ्गमिति पूर्वं ह्रस्वस्ततो दीर्घस्तर्हि प्रकृतेपि समः समाधिः । विप्रतिषेधेपरङ्कार्यम् । आवश्यकतयेति । अक्लृप्ताभावकस्याभावकल्पनायोगादिति भावः । तद्भिन्नोऽस्यविषयइति । ननु नित्यान्तरङ्गादीनां ज्ञापकन्यायाभ्यां बाधकत्वं परस्य तु विप्रतिषेधे परमिति प्रत्यक्षवचनकृतं तदिति प्रत्यक्षवचनस्य ज्ञापकन्यायादितः प्राबल्यादिदमयुक्तमिति चेत्सत्त्यम् । तुल्यबलविरोधस्य विप्रतिषेधशब्दार्थत्वाङ्गीकारेणादोषात् । तदेतदभिप्रेत्यात्र सूत्रे भगवता भाष्यकृतोक्तम् । द्वौ प्रसङ्गौ यदान्यार्थौ भवत एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेध इति । तत्रान्यार्थावित्यनेनापवादव्यावृत्तिः । युगपत्प्राप्नुत इत्यनेनान्तरङ्गव्यावृत्तिः । तद्धि परस्मात्पूर्वमेव प्राप्नुते न तेन युगपत् । इदं नित्यव्यावर्तकस्योपलक्षणं विशेषणम् । कैयटस्तु अत्र सूत्रे कार्यमित्यर्हार्थे कृत्यः करणार्हं कार्यं तुल्यबलं च करणार्हमिति नित्यानित्योत्सर्गापवादान्तरङ्गबहिरङ्गेषु अस्य सूत्रस्याव्यापार इत्याह । स्वस्वनिमित्तानन्तर्यासंभवइति । निमित्तं विधेयविशेषणमिति

भावः । सकृद्गताविति यद्वाधितमित्यनेनान्वेति । गतौ युगपत्प्राप्तौ पुनः प्रसङ्गविज्ञानबीजमाह । यद्वेत्यादिना । लक्ष्यप्रेष्ययोरिति । वस्तुतस्तु भृत्यसदृशं लक्ष्यं प्रेषणक्रियासदृशी संस्कारक्रिया पर्यायेण कार्यकरणस्थानापन्नं च शास्त्रविहितकार्यस्वीकारः तथा च यथा तुल्यबलयोरेको भृत्यो युगपत्प्रेषितो पूर्वं नानादिगधिकरणकत्वेन युगपदसंभविकार्यद्वयं न करोति । तथा तुल्यबलयोः शास्त्रयोः संस्कार्यं लक्ष्यं युगपत्संभवि तद्विहितं कार्यद्वयं न भजतीत्यर्थः । स तयोः पर्यायेण कार्यं करोति इत्यन्तो भाष्यग्रन्थस्तु विभिन्नकालिकाविरोधि कार्यद्वयं तु लक्ष्यं भजत्येवेति प्रसंगाद्वक्तुं तत्र दृष्टान्तप्रदर्शनपरं युगपदसंभवस्य तत्राभावेन दृष्टान्तासंगतेः । इह भवता द्वौ हेतू व्यपदिष्टौ तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात् । तद्यथा द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति । यदा तमुभौ युगपत्प्रेषयत इत्याग्रिमभाष्यग्रन्थासंगतेश्च । पुनर्धिभवतीति । इदमयुक्तम् । स्थानिवत्सूत्रस्थभाष्यविरोधात् । तत्र हि भिन्तादित्यत्र परत्वात्तातङि धिभावमाशङ्क्य सकृद्गतिन्यायेन समाहितम् । किं चैवं भिन्तादिति रूपस्य विलयापत्तिः । अत्र कश्चिद्विकल्पशास्त्राणामभावेपि तात्पर्यं स्वीकृत्य तातङि पुनर्द्धिभवतीत्यस्य तातङभावे पुनर्द्धिभवतीत्यर्थमुक्त्वा ऽत्र तातङ्धिभावयोरित्याद्यग्रिमग्रन्थस्तु विकल्पघटकतातङ्विधिना धिभावस्य विरोधोपपादनायेत्याह । तत्तुच्छम् । विकल्पशास्त्राणामभावे तात्पर्यं हि यस्येति संघातग्रहणं चेत् कयस्य विभाषायां दोषो भवति यदा लोपस्तदा सर्वस्य लोपः यदा ऽलोपस्तदासर्वस्यालोपः इति यस्य हल इति सूत्रस्थभाष्यानुरोधात्कल्प्यम् । तच्च भाष्यं सूत्रान्तरस्थानेकभाष्यविरोधादेकदेश्युक्तिरिति यस्य हल इति सूत्रे विवरणे नव्यैरुक्तम् । तथा च तत्र यथावदन् शून्यहृदय इव तद्विरुद्धं कथमत्र वदेत् । पुनःप्रसंगोदाहरणं त्वीजतुरिति । तत्र हि परत्वात् संप्रसारणम् । यत्त्वेतदुदाहरणं खट्वायामिति । अत्र हि परत्वादामि कृते पुनःप्रसंगविज्ञानाद्याडिति पाठकेनोक्तं तत्तुच्छम् । निरवकाशत्वेनैवाम्प्रवृत्तेः निरवकाशत्वेन बाधे पश्चादुत्सर्गप्रवृत्तेर्याडिति न कश्चिद्दोषः । स्पष्टं चेदं नव्यग्रन्थेषु । ननु कार्यकालपक्षे तस्मिन्निति परिभाषाया ङमो ह्रस्वादचीत्यत्र तत्संस्कारार्थमुपस्थितायाः निरवकाशत्वेन कथं तस्मादित्युत्तरस्येत्येतद्बाध्यत्वम् ।

न हि तत्रोपस्थितया विध्यन्तरं सँस्क्रियते येन सावकाशत्वं स्यादित्याशङ्क्याह । त्रिपादीस्थेनेति । तथा च यस्या बाधो नाम विधिशास्त्रेणानाकर्षणमेवेति भावः । प्रदेशएवेति । विधिदेश एवेत्यर्थः अत्र प्रमाणं तु संज्ञाशास्त्रानुसंधानं विना विधिवाक्यार्थबोधानिष्पत्तिः । अयादिभ्यः परैव प्रगृह्यसंज्ञेति भाष्यं च । यद्यपीयं परिभाषेति । न कार्यमिति शेषः । एवंचेति । प्रतिद्वन्द्विभावापन्नकार्यद्वयनिमित्तकत्वेचेत्यर्थः । यथोद्देशेवेति । परीक्षा क्रियेत्यादिवदशआद्यजन्तमेतत् । नन्वसति ङमो ह्रस्वादचीत्यत्रैतत्प्रवृत्त्यनापत्तिः । तथा चोभयनिर्देशे पञ्चमीनिर्देशो बलवानिति भाष्यासङ्गतिरिति चेन्न । त्रिपादीस्थेन तयोराकर्षणेपि उक्तरीत्या त्रिपादीस्थत्वाभावेन विप्रतिषेधशास्त्रदृष्ट्या तयोरसिद्धत्वस्य पूर्वत्रासिद्धमित्यनेन बोधनासंभवेन तयोर्विषये विप्रतिषेधेत्यस्य प्रवृत्तेर्निर्बाधत्वादित्याशयात् । इति लोपे प्राप्त इति निर्मूलम् । पूर्वत्रासिद्धमित्यस्यापर्यालोचनदशायां बोध्यम् । एतत्तदोः । प्रकृतिवदनुकरणमित्यतिदेशेनैकशेषमाशङ्क्याह । अनुकार्येति । इति स्वादिसन्धिः ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । अर्थवदधातुरतिप्प्रातिपदिकमित्येव सूत्रं कार्यम् । तिबित्यारभ्य सुपः पकारेण प्रत्याहारः । तद्धितग्रहणञ्चोत्तरत्र न कार्यम् । यदा ऽर्थवदविभक्तिरधातुप्रातिपदिकमित्यस्त्विति तन्न । आद्ये प्रत्यासत्तिन्यायाश्रयणे सिपः पकारेण प्रत्याहारापत्तेः । व्याप्तिन्यायाश्रयणे तु कपःपकारेण तदापत्तेः । द्वितीये तु तत्रेत्यादौ विभक्त्यन्तत्वेन प्रातिपदिकत्वानापत्त्यातद्धितग्रहणस्यावश्यकतया न लाघवम् । आवर्तितेइति । स्वमते प्रत्ययपर्युदासाभावात्प्राचां मतेनेदं प्रत्ययस्य यत्रसञ्ज्ञेति । धर्मिग्राहकमानबलादिति भावः । अन्ये तु कृदतिङ्, षःप्रत्ययस्य, तद्धितश्चासर्वविभक्तिरित्यादावपि निषेधप्रवृत्तेरिष्टत्वेनायुक्तमेतत् । अन्यथा व्यतिसे इत्यादावेव निषेधः प्रवर्तेत । षडित्यादावेव चेत्सञ्ज्ञा प्रवर्तेत । तस्मात्तद्धितान्तस्य प्रातिपदिकसञ्ज्ञाविधिः कल्प्यत इत्याहुः । मूलोक्तं प्रत्ययपर्युदासं प्रत्याख्यातुमाह । अत्रेत्यादिना । एतत्सञ्ज्ञाफलभूतेति । इदं वस्तुस्थितिकथनं न तु अर्थवत्त्वशरीरघटकं फलाभावात् । अत एव शब्दरत्ने एतसञ्ज्ञाफलभूतेति न दृश्यत इति केचित् । वस्तुतस्तु ओदनं पचतीत्यादावोदनं पचेति समुदायस्यार्थवत्त्वेन प्रातिपदिकत्ववारणायैतत्सञ्ज्ञेति । तत्समुदायस्य तिङ्रूपविभक्त्यपेक्षया ऽर्थबोधजनकत्वेपि तदितराऽपेक्षया ऽर्थबोधजनकत्वात्प्रा-

तिपदिकं प्राप्तम् । एतत्सञ्ज्ञेत्युक्तौ तु एतत्सञ्ज्ञाफलभूताविभक्तीतरातिङ्पेक्षयैवार्थबोधजनकत्वात्तद्वारणं पत्येत्यस्य स्वातन्त्र्येण प्रयोगार्हत्वाभात् । एतेनैतत्सञ्ज्ञाफलभूतेति व्यर्थमेव शब्दरत्ने ऽदर्शनादिति पाठकोक्तमपास्तम् । शब्दप्रयोजनानुरोधेन तस्य पूरणीयत्वात् । एवं च देवदत्तस्य पुत्र इत्यत्र स्यपुत्र इति समुदाये षष्ठ्यर्थस्य पुत्रपदार्थेन्वयेनार्थवत्त्वेपि न प्रातिपदिकत्वं विभक्तीतरषष्ठीप्रकृत्यपेक्षयैव लोके ऽर्थबोधजनकत्वेन परिष्कृतार्थवत्त्वाभावात् । समासग्रहणकृतनियमेन तु नास्य वारणं षष्ठ्याः स्वातन्त्र्येण प्रयोगानर्हत्वात् । अत्र वदन्ति । एवंविधार्थवत्त्वग्रहणे खट्वशब्दस्य प्रातिपदिकत्वानापत्तिः । विभक्तीतरटाद्यपेक्षयैवाखट्वशब्दस्यार्थबोधकत्वात् । टाविधानं त्वनियतलिङ्गे चरितार्थम् । विभक्तीतरवाचकविवक्षणेपि एधाक्षकारेत्वादावेधामित्यस्य प्रातिपदिकत्वानापत्तिः । चकारेत्येतदपेक्षयैव लोके तस्यार्थबोधकत्वात् । यदि विभक्तीतरो वाचकः प्रत्ययो विवक्ष्यते तदा पञ्चनावप्रियेत्यादौ पञ्चनावेत्यस्य प्रातिपदिकत्वापत्तिः प्रियशब्दापेक्षया तस्यार्थबोधकत्वेपि प्रियशब्दस्याप्रत्ययत्वात् । एवं प्रत्ययस्यापि । यदि च विभक्तीतरत् यत्स्वगतवृत्त्याश्रय इत्युच्यते । तदा हरिष्वित्यादौ प्रत्ययस्य प्रातिपदिकत्वापत्तिः । प्रकृत्यपेक्षया तस्यार्थबोधकत्वेपि प्रकृतेरतादृशत्वात् । हारिद्रविण इत्यादौ णिनन्तस्य प्रातिपदिकत्वानापतिश्च । तस्य स्वगतवृत्त्याश्रयाध्येत्रणपेक्षयैवार्थबोधकत्वात् । यदि च विभक्तीतरद् यत् स्वसमवेतसञ्ज्ञाश्रयीभूतं तद्विवक्ष्यते प्रियशब्दश्च स्वसमवेतसमाससञ्ज्ञाश्रयः । चकारेत्ययं तु न तथा । हरिष्वित्यादौ प्रकृतिभागस्तु तथाविधवदत्वाश्रय इति प्रत्ययस्य तदपेक्षया ऽर्थबोधकत्वेन प्रातिपदिकत्वव्यावृत्तिः । एवं च कुम्भकारेत्यत्र कारेत्यस्य न प्रातिपदिकत्वमिति स्त्रीप्रत्ययप्रकरणस्थशेखरविरोधोपि । स्वसमेवेतसमासत्वाश्रयकुम्भेत्येतदपेक्षयैवार्थबोधकत्वात् । तथा च द्रष्टुं भुक्त्वा व्रजतीत्यादौ तुमुनन्तदीनां प्रातिपदिकत्वसिद्धिः । स्वनिष्ठार्थबोधकत्वप्रयोजकत्वस्य यातीत्यादेः स्वनिष्ठसञ्ज्ञानाश्रयत्वादित्युच्यते । तदा स्नात्वा कालकादावित्यादौ स्नात्वेत्यादेः प्रातिपदिकत्वानापत्तिः । तस्य स्वगतसमासत्वानाश्रयकालाद्यपेक्षयैवार्थबोधकत्वात् । एवं प्राच्छेदित्यादेः प्रातिपदिकत्वानापत्तिः । स्वगतसमासत्वाश्रयकृच्छकाराद्यपेक्षयैवार्थबोधकत्वात् । किं चोत्तरसूत्रेपि एवं विधार्थवत्त्वस्यैव विवक्षणीयतया प्रागुक्तसर्वपक्षेष्वपि तद्धितसमासयोः प्रातिपदिकत्वाना-

पत्तिः । अलौकिके प्रक्रियावाक्ये एव प्रातिपदिकत्वस्य वक्तव्यतया तस्य लोके सर्वथा ऽर्थाबोधकत्वादिति । अत्रोच्यते । अन्तिमः पक्ष एव साधीयान् । स्नात्वा कालकादौ तु न दोषः । समाससञ्ज्ञार्थं स्नात्वादेः सुबन्तत्वस्यावश्यकतया ततः पूर्वमेव प्रातिपदिकत्वप्रवृत्तेः । तस्यां च दशायां कालकादेः स्वगतसंज्ञानाश्रयत्वात् । एवं मूलकेनोपदंशमित्यादावप्यदोषो बोध्यः । मूलकेनेत्यादौ समाससंज्ञातः पूर्वं स्वगतसंज्ञानाश्रयत्वात् । अलौकिकप्रक्रियावाक्ये तु स्वप्रकृतिकपरिनिष्ठितनिष्ठं ईदृशार्थवत्त्वमारोप्य प्रातिपदिकत्वं निर्वाह्यम् । यद्वा विभक्तीतरत् शास्त्रे यत्स्वप्रकृतिनिमित्ततया नाश्रीयते तदेव प्रगृह्यते प्रत्ययस्य प्रकृतिस्तथा विधपञ्चगवेति समासस्य च धनेति तथाविधमुत्तरपदे विहितसमासमुपजीव्य टचः प्रवृत्तेस्तैनैर्धा खट्वः भुत्का हारिद्रविण इत्यादौ न दोषः । चकारेति तिङन्तस्य टापः व्रजतीति तिङन्तस्याध्येत्रणश्चामन्तादिति निमित्ततया शास्त्रे ऽनाश्रयणात् । कर्मण्यणित्यस्य कर्मोपपदसञ्ज्ञकं भवति धातोश्चाणिति वाक्यार्थे निमित्तीभावस्यानाश्रयणेपि तत्रोपपदं सप्तमीस्थमित्येतदेकवाक्यतया कुम्भेत्यादेः कर्मणो ऽणूनिमित्ततया ऽऽश्रयणमस्त्येव तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्यय इति तदर्थात् । तेन कारेत्यस्य न प्रातिपदिकत्वमिति स्त्रीप्रत्ययस्थशेखरोपपत्तिः । वस्तुतस्तु सन्नियोगशिष्टन्यायेनैव तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्यय इत्यर्थलाभे तत्रेत्यस्य तदर्थकस्यानाश्रयणेन कुम्भेत्यस्य शास्त्रे न निमित्तत्वेनाश्रयणमिति स्त्रीप्रत्ययस्थशेखरो ऽसंगत एव । गतिकारकोपपदानामित्यत्रोपपदग्रहणं सार्थकं दधिसेचावित्यादौ दधीत्याद्युपपदस्य सुबन्तेन समासश्चोपपद्यते । तेन मूलकोपदंशमित्यत्रोपदंशमित्यस्य प्रातिपदिकसिद्धिः । प्रादीनामुपसर्गसंज्ञायां धातोर्निमित्तत्वेपि प्रयोगे ऽनिमित्तत्वान्न दोषः । तेप्रागधातोरित्यत्र संज्ञानियमपक्षाश्रयणात् । नन्वेतत्संज्ञाफलभूतविभक्त्यपेक्षया लोके ऽर्थबोधजनकत्वमित्येतावदेवास्तु कृतं नञ्द्वयप्रवेशेनेत्यत आह । अहन्निति । तथाचाधातुरित्यादिपर्युदाससार्थक्याय नञ्द्वयप्रवेश इति भावः । न च नञ्द्वयप्रवेशो ऽधातुरिति पर्युदासश्च मास्त्विति वाच्यम् । दधि पश्य राजपुरुष इत्यादौ दधिराजेत्यस्य प्रातिपदिकत्वानापत्तेः । नचेति । नहीत्यर्थः । यद्यप्यस्यापत्यमिव्यतिस इत्यादौ केवलप्रत्ययस्याप्युक्तार्थबोधकत्वमस्ति तथाप्याद्ये तद्धितान्त-

त्वेन प्रातिपादकत्वभागेनान्यन्तु प्रत्ययान्तपर्युदासेनापि व्यावर्त्यम् । तथा च प्रातिपदिकत्वालक्ष्यप्रत्ययान्तपर्युदासव्यावर्त्यैदृशार्थबोधकं न किंचित्प्रत्ययसंज्ञकमस्तीति तात्पर्यम् । विशुद्धानां । प्रत्ययरहितानां कृत्तद्धितानामित्यादेः कृत्तद्धितानां केवलानां प्रकृत्यसमभिव्याहृतानामर्थो लौकिकः लोके प्रतीयमान इत्यर्थः । प्राग् विभक्तेः । विभक्त्युत्पत्तेः प्राक् । तदन्तस्य । कृत्तद्धितान्तस्य । तथैवार्थो । लौकिको ऽर्थः । न विद्यत इत्यत्रान्वयः । एवं च कृतद्धितान्तस्य विभक्त्यपेक्षया लोके बोधजनकत्वेपि विभक्तीतरानपेक्षेत्याद्युक्तार्थवत्वं सुस्थमिति ध्वन्यते । लौकिकार्थप्रत्यासन्नत्वं च कृत्तद्धितान्तार्थस्य विभक्तीतरानपेक्षया प्रतीयमानत्वात् । विभक्त्यन्तार्थो हि लौकिकः । सर्वथेतरनैरपेक्ष्येण लोके प्रतीयमानत्वात् । कृदन्तार्थस्तु विभक्तीतरानपेक्षया प्रतीयमानत्वात्तत्प्रत्यासन्नः । कृत्तद्धितार्थस्तु स्वप्रकृतिविभक्त्युभयापेक्षयैव कृदादेः प्रतीयमानत्वाद्विप्रकृष्ट इति बोध्यम् । तत्सामर्थ्यादित्येवेति । अधातुरिति पर्युदासेन पूर्वसूत्रे ऽर्थवत्वलाभात् । कृदादीनां चानर्थकानामप्रसिद्धेरिति भावः । सामान्यतोऽर्थवत्वग्रहणइति । उत्तरसूत्रे विशिष्टार्थवत्वस्यैवोपयोगेनार्थाधिकारानुरोधात्पूर्वसूत्रेपि तादृशार्थवत्त्वग्रहणे न्यायतः प्राप्ते ऽपि तत्परित्यागेन सामान्यतोर्थवत्वग्रहणे फलमाह । अतएवेति । अत एवेत्यारभ्य नाप्युत्तरसूत्रेणेत्यन्तमेकं वाक्यम् । प्रातिपदिकत्वं टाबापत्तेरिति वाक्यान्तरम् । तत्प्रत्याख्याने इत्यस्य च नानेन प्रातिपदिकमित्यनेनैवान्वयः । प्रत्ययान्तपर्युदाससत्त्वे तत एव पञ्चनावेत्यस्य प्रातिपदिकत्वं नेत्युक्तविधार्थवत्त्वस्यात्र सूत्रे ग्रहणेनेदं संभवतीति तत्प्रत्याख्यन इत्युक्तम् । अत एवेत्यस्य सूत्रद्वये उक्तविधार्थववत्त्वग्रहणादेवेत्यर्थः । अस्मिन्सूत्रे ईदृशार्थवत्त्वग्रहे पञ्चनावेति प्रयोजनोपन्यासः । उक्तविधार्थवत्प्रत्ययान्तस्य चेत्प्रातिपदिकत्वं तर्हि तथाविधतद्धितान्तस्यैवेति नियमाभिप्रायेण पञ्चनावेत्यस्योक्तविधप्रत्ययान्तत्वाभावेनोक्तनियमाप्रवृत्तावर्थवत्सूत्रप्राप्तिसंभवात् । प्रत्यायान्तसामान्यविषये नियमे विज्ञायमाने त्वत्र सूत्रे ईदृशार्थवत्त्वग्रहणे नेदं प्रयोजनम् । प्रत्ययान्तस्य चेत्प्रातिपदिकत्वं तर्ह्युक्तविधार्थवत्तद्धितान्तस्यैवेति नियमेनैतत्सूत्राविहितप्रातिपदिकत्वस्य व्यावृत्तिसंभवात् । बहुश्रेयसी प्रियातिसेत्यादौ नदीत्वातिस्त्रादयर्थमुपसर्जनपदार्थेपि स्त्रीत्वभानस्याङ्गीकृतत्वतया टाबापादनोपपत्तिः । स्वार्थविशिष्टार्थान्तरोपसंक्रान्तत्वमुपसर्जनत्वं तच्च बहुकुरुचरेत्या-

दाविव पञ्चनावेत्यादावपि ङीपो ऽप्राप्त्या टाबापादितः । ङीबापत्तिरिति पाठे तु यस्मान्ङीप्कर्त्तव्यस्तदर्थं प्रति टिदर्थस्याविशेषणस्वरूपमनुपसर्जनत्वमुपपादनीयम् । भिद्छिदित्यादावधातुरिति पर्युदासेन प्रातिपदिकत्वाप्राप्तौ कृद्ग्रहणस्य तद्विधानार्थत्वे नियामकत्वासंभवात्तद्धितग्रहणस्य तदुक्तिः । यत्त्वस्यापत्यमिरित्यादौ प्रत्ययपर्युदासात्प्रातिपदिकत्वाप्राप्तौ तद्धितग्रहणमपि विध्यर्थमेव न नियमार्थं यदि तु अ ङस् इत्यस्यां दशायां प्रवृत्तं प्रातिपदिकत्वमेकदेशविकृतन्यायेन इरित्यत्रापि सुलभम् । प्रत्यायान्तपर्युदासाभावे एव तद्धितग्रहणस्य नियमार्थत्वप्रक्रमादप्रत्ययान्तपर्युदासाप्रवृत्तेरित्युच्यते तदा भिद्क्विबित्यस्यां दशायां प्रवृत्तं प्रातिपदिकत्वं भिदित्यत्रापि सुलभमिति तत्तुच्छम् । प्रत्ययपर्युदासस्य मूलत एवाभावेन प्रत्ययान्तपर्युदासस्य च व्यर्थत्वेन शङ्क्यमानत्वेन त्वदुपन्यस्तशङ्काडम्बरस्यापरोद्घोषोर्धानुष्कस्य कण्ठाडम्बरत्वात् । किं चान्तरङ्गत्वात्क्विपो लोपे ऽधातुरिति पर्युदासेन भिदित्यादौ प्रातिपदिकत्वं दुर्लभम् । अस्यापत्यमिरित्यादौ प्रातिपदिकत्वं विना सुब्लुगेव नेति महद्वैषम्यम् । टाप्पक्षे गोस्त्रियोरिति ह्रस्वस्तु न शङ्क्यः । राजकुमारीपुत्र इत्यादाविव तद्वारणसंभवात् । नचैवं पञ्चनौशब्दस्याप्रातिपदिकत्वेन टजेव दुर्लभ इति वाच्यम् । समासान्तविधौ प्रातिपदिकाधिकाराभावस्य वक्ष्यमाणत्वात् । न च सन्निपातपरिभाषया टाप्ङीपोर्वारणम् । द्विगुसंज्ञाद्वारोत्तरपदानन्तर्यनिमित्तकस्य टचस्तद्विघातकत्वादिति वाच्यम् । कृन्मेजन्त इति सूत्रस्थभाष्यप्रामाण्येन परंपरयापि तद्विघातकत्वस्य ग्रहणेपि सन्निपातलक्षणस्य साक्षादेव ग्रहणमित्याशयात् । अत्र ङीबापाद्यमानो द्विगोरिति वा टिड्ढेति वा विहितो बोध्यः । इतिदिगिति । अन्ये त्वर्थवत्त्वमत्र शक्तिलक्षणाद्योतनान्यतमसंबन्धेनार्थोपस्थितिजनकत्वम् । गोपीत्यादौ ङीपुत्पत्तेः पूर्वमेव प्रातिपदिकस्य लक्षणावश्यकत्वेन गोपेत्यस्य प्रातिपदिकत्वासिद्धये लक्षणेति । द्योतकनिपातसंग्रहायाह । द्योतनेति । न तु विभक्तीतरसमभिव्याहारानपेक्षयेति परिष्कृतमर्थवत्त्वम् । सिद्धं त्वन्वयव्यतिरेकाभ्यामित्यारभ्य वर्णितार्थवन्तो ऽन्वयव्यतिरेकाभ्यामित्यन्तेनैतत्सूत्रस्थभाष्यग्रन्थसन्दर्भेणास्मदुक्तार्थवत्त्वस्यैवार्थवच्छब्दार्थत्वावगतेः । अत एव भाष्ये वर्णानामनर्थकानां प्रातिपदिकसञ्ज्ञामाभूदित्यर्थवदित्युक्तम् । न तु प्रत्ययस्य माभूदिति । नन्वोदनं पचतीत्यत्रौदनं पचेत्यस्य देवदत्तस्य पुत्र इत्यत्र पुत्रेत्यस्य देवदत्तो गार्ग्येति समुदायस्य च प्रातिप-

दिकत्वापत्तिः । अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययादेरोदनं पचतीत्यादेश्च लोके ऽर्थबोधनवृत्तिकल्पनेपि ओदनं पचेत्यादेः समुदायस्य तत्कल्पने मानाभावात् । प्रत्ययपर्युदासस्तु नास्त्येव प्रत्ययस्य फलाभावेनैव प्रातिपदिकत्वाप्रवृत्तेः । न च हरिष्वित्यत्र प्रत्ययस्य प्रातिपदिकत्वे औत्सर्गिकैकवचने च तस्य श्रवणापत्तिः । तस्य सति गमक एवोत्पत्तेः । अत एव ङ्याप्प्रातिपदिकादिति सूत्रे भाष्ये तदधिकारस्यासत्त्वे प्रत्ययादौत्सर्गिकैकवचनापत्तिर्नापादिता नचैवं धनं वन-मित्यादावपि विभक्त्यनुत्पत्तावर्थवदिति व्यर्थमिति वाच्यम् । निपातस्यानर्थ-कस्य प्रातिपदिकत्वविधानेनार्थवत्सूत्रस्थशेषभाष्यप्रामाण्येन चानर्थकप्रातिपदि-कादेकवचनोत्पत्त्यभ्यनुज्ञानात् । न च काण्डे इत्यादौ प्रत्ययस्य प्रातिपदिकत्वे ह्रस्वापत्तिः । नपुंसके वर्त्तमानत्वाभावेनादोषात् । स्पष्टं चेदं भाष्ये । न च व्यपदेशिवद्भावेन प्रातिपदिकावयवसुब्लुगापत्तिः । सुप्कार्यं त्वलुक्समासे चरि-तार्थमिति वाच्यं धातुसाहचर्येण मुख्यावयव एव सुब्लुक्प्रवृत्तेः । न चौप-गवयतीत्यादावणो णिजापत्तिः । उपगवर्थेनैकार्थीभूतत्वेनाणर्थमात्रस्य णिजर्थेना-नान्वयायोगात् । उत्तरसूत्रे तु शब्दाधिकाराश्रयणेन प्राशस्त्ये मतुपा प्राशस्त्या-र्थवत्त्वं विवक्षितम् । तच्च पृथगुपस्थितयोरर्थयोरन्वयबोधजनकत्वम् । एकार्थी-भाववत्वं वा लौकिकार्थप्रत्यासन्नत्वमपि लौकिकार्थसदृशत्वम् । लौकिकार्थो यथा योग्येतरान्विता सदृशत्वम् । पञ्चगव इत्यादौ तु तद्धितान्तत्वेन प्रातिपदिक-त्वेपि न टाप् । स्वार्थिकानां क्वचित्प्रकृतितो लिङ्गवचनातिवृत्त्या ऽर्धर्चोविमित्या-दाविव क्लीबत्वाश्रयणेनादोषात् । विशेषणपदार्थे स्त्रीत्वस्यानभ्युपगमाच्च । प्रियतिसेत्यादौ तु भाष्यप्रामाण्येन भौतपौर्विकं स्त्रीत्वमादाय तिस्रादेशः । विभ-क्तीतरेत्याद्युक्तार्थवत्त्वं तु गुरुतरमनेकदोषदुष्टं च । अर्थवदिति तु धनं वनमि-त्यादौ वर्णानां प्रातिपदिकत्ववारणायौत्सर्गिकैकवचनोत्पत्तेरुक्तदिशा ऽऽपादयितुं शक्यत्वात् । अथ वा हरिषु करोषीत्यादौ षुकरोषीति सुप्तिङन्तसमुदायस्यान-र्थकस्य प्रातिपदिकत्ववारणाय तत् । तस्य प्रातिपदिकत्वे तु सुपोधात्विति लुगापत्तिः । समासग्रहणकृतनियमेन तु न वारणम् । पूर्वभागस्याऽपदत्वात् । तदेतदभिप्रेत्योक्तं भाष्ये । ऽर्थवदिति व्यपदेशायेति । विशिष्टसञ्ज्ञिनो निर्देशायेति तदर्थः । वर्णानां च माभूदित्युत्तरभाष्यं तु प्रत्युदाहरणादिकप्रदर्शन-

परम् । दश दाडिमानीति निरर्थकपदसमुदायस्तु न व्यावर्त्यः । समासग्रहणकृतानियमेनैव व्यावर्त्तनात् । नचार्थवतां यः समुदायोऽर्थवान्स एव नियमव्यावर्त्य इति वाच्यम् । व्यावर्त्यसमुदायस्यार्थवत्त्वविशेषणवैयर्थ्यात् । भाष्ये तु दश दाडिमानीति पदसमुदायस्यानर्थकस्य प्रातिपदिकत्वमाशङ्क्यानर्थकत्वेन परिहृत्य ततो देवदत्त गामभ्याज शुक्लामिति सार्थकवाक्यस्य तदाशङ्क्य समासग्रहणकृतनियमेन वारितम् । न त्वर्थवदित्यस्य तद्व्यावर्त्यतया प्रदर्शितम् । समासग्रहणकृतानियमस्यासाधारणं प्रयोजनं प्रदर्शयितुमेवानर्थकसमुदायस्यार्थवदित्यनेन व्यावृत्तिः प्रदर्शिता । न तु तस्य तदेव व्यावर्त्यमित्यभिप्रेत्य । अप्रत्यय इति तु प्रसज्य प्रतिषेधः । तेन काण्डे हराविस्यादौ पूर्वान्तवत्वेन प्राप्तस्यापि प्रातिपदिकत्वस्य निषेधसिद्धिः । अन्यथा प्रतिषेधस्य शास्त्रविहितत्वाभावेन स्थानिवत्त्वान्तवत्वयोरप्रवृत्तौप्रातिपदिकत्वे लुगापत्तिः । शास्त्रतात्पर्यविषयस्यापि शास्त्रीयत्वे तु न मानम् । अन्यथा ऽजूभिन्ने ऽयादेशस्यापि शास्त्रतात्पर्यविषयत्वेन तस्मिन्नपि स्थानिवद्भावापत्तौ नायक इत्यादावयायनापत्तिः । अत एव प्रसज्य प्रतिषेध एव ब्रह्मबन्धूरित्यादौ प्रातिपदिकत्वं न स्यादित्युक्तं भाष्ये न पर्युदासे । अथवा पुनरस्तु पर्युदास इति भाष्यं तु प्रौढिवादपरं अन्यथा काण्डे इत्यत्र ह्रस्वस्य कथंचिद्वारणेपि सुपो धात्विति लुकः प्रसङ्गात् । अन्तादिवत्वयोरेकत्रार्थे ऽनाश्रयणेनोभयत आश्रयणे इति निषेधाप्रवृत्तेः । तस्य व्यपवर्गविषयत्वाच्च । अस्योदाहरणं त्वव्युत्पत्तिपक्षे घटः पट इत्यादि । व्युत्पत्तिपक्षे तु बहुपटवः, परमगार्ग्यायणः, शिवभागवतः, राजकुमारीश्रित इत्याद्युदाहरणम् । गार्ग्यभगवच्छब्दाभ्यां सुप्फगणप्रवृत्त्या शिवपरमेत्येतत्सहितस्यातद्धितान्तत्वात् राजन् ङस् कुमारी अमित्यस्यां दशायां षष्ठीततत्पुरुषयोर्द्वितीयातत्पुरुषयोर्युगपत्प्रवृत्त्या समुदायस्यासमासत्वात् इत्याहुः । कृत्तद्धितसमासाश्च । चक्रपाण्युक्तदूषणमुद्धर्त्तुमाह । एतेनेति । साजात्यप्रदर्शनमात्राभिप्रायकत्वेनेत्यर्थः । अर्थाननुगमेपि शब्दानुगमोस्त्येवेत्याशङ्क्याह । शब्दानुगमस्येति । अर्थस्यैव नियमशरीरे निवेशादिति भावः । व्यवच्छेद्याननुगमेपीति । संग्राह्यस्यैवानुगमः । यथा सास्नादिमत्वं गोर्लक्षणमित्यत्र संग्राह्याणां सकलगोव्यक्तीनामनुगमः । व्यवच्छेद्यं महिष्यादिकं तु न कोप्यनुगमयति । यथा च भगवान्पाणिनिः संग्राह्यान्साधुशब्दानेवानुगमयति नासाधुशब्दानिति भावः । अपास्त-

मिति । साजात्यप्रदर्शनार्थमेव यत्र संघात इति मूलस्य प्रवृत्तत्वेनानुगमस्य संभवेप्यनुपयोगेपि क्षत्यभावादिति भावः । वस्तुतो द्वावपि स्थूलदृश्वानौ । तथा हि । पदसञ्ज्ञकपूर्वभागघटितत्वस्य अनुगमरूपस्य संभवात् । गामानयेत्यादेरिव बहुपटव इत्यादेरपि प्रातिपदिकत्वाभाववारणाय व्यवच्छेद्यानुगमस्यावश्यकत्वाच्च । व्यवच्छेद्यानुगमस्यासंभवमनुपयोगं च वदन् चक्रपाणिः स्थूलदृश्वा । तदेतत् द्वयमभ्युपेत्य साजात्यप्रर्शनार्थत्वं वदन्नन्यो ऽतिस्थूलदृश्वा । यत्तच्छब्दार्थयोरननुगमे साजात्यस्यैवासंभवात् । समासवाक्ययोरेकधर्मवत्वं हि साजात्यम् । व्यवच्छेद्यानुगमस्यानावश्यकत्वे-साजात्यप्रदर्शनानुपयोगाच्च । ननु वाक्यसञ्ज्ञावारणायार्थवत्समुदायानामिति नियमशरीरमुत्का बहुपटव इत्यादौ दोषमाशङ्क्य सुबन्तानां समुदायस्य समासग्रहणं नियमार्थमित्युक्तं भाष्ये न तु स्वातन्त्र्येण प्रयोगार्हेति विशेषणेन पूर्वोक्तनियमशरीरस्थापितमित्याशङ्क्याह । भाष्येसुबन्तानामित्यनेनेति । तथा च सुबन्तानामिति भाष्येण पूर्वोक्तनियमशरीरे स्वातन्त्र्येणप्रयोगार्हेति विशेषणं देयमित्युक्तं भवतीति भावः । भेदे पृथक्प्रयोगे क्रियमाणे या ऽऽकांक्षा तन्मूलको यः संसर्गः परस्परमन्वय इत्यर्थः । भाष्यासंगतिःस्पष्टैवेति । इदमयुक्तम् । तद्धितान्तत्वप्रयुक्तप्रातिपदिकसञ्ज्ञायास्तदादिनियमाश्रयणेन वारणेप्यर्थवत्सूत्रेण तस्या दुर्वारत्वात् । किं च तदादिनियमाभावे देवदत्तो गार्ग्येति समुदायस्य तद्धितान्तत्वेन प्रातिपदिकत्वमापादितं भाष्ये । तदानीं च न समासग्रहणस्य नियमार्थत्वम् । समासस्य प्रत्ययान्तत्वात् । तदादिनियमस्य चाभावात् । किं तु विध्यर्थमेव । तथा च देवदत्तो गार्ग्येति समुदायस्य सूपपन्नं प्रातिपदिकत्वापादनम् । किं च कुम्भकारेत्यादिसमासे उत्तरभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावेन शुक्लीकृत्येत्यादौ कृभ्वस्तियोगे एव च्वेः साधुत्वात् कृभ्वस्तीन्विना शुक्लीत्यादिपूर्वभागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावेन च पटुपटुएकैकमित्यादेरतिदिष्टसमासत्वमाश्रित्य प्रातिपदिकत्वस्य वक्तव्यतया तद्घटकपूर्वोत्तरभागयोः स्वातन्त्र्येण प्रयोगार्हार्थवत्त्वाभावेन च स्वातन्त्र्येण प्रयोगार्हार्थवत्पूर्वोत्तरभागकत्वं न समासमात्रेस्तीति समाससाजात्येन नियमशरीरे नायं धर्मः प्रवेष्टुं शक्यः । एवं पञ्चगवधन इत्यादिसमासे पञ्चगवेति पूर्वभागस्य न स्वातन्त्र्येण प्रयोगार्हत्वम् । किं चैधामास मूलकेनोपदंश इत्यादिवाक्ये ऽर्थवत्सूत्रेण प्रातिपदिकत्वं दुर्वारम् । एधामासेत्यनयोः परस्परपरिहारेणोपदंशमित्यस्य

मूलकेनेत्येतत्परिहारेण प्रयोगार्हत्वाभावेनोक्तनियमेनाव्यावृत्तः । तस्मात्षष्ठीनिर्देशादिभिर्ये सबन्तानां सुमासाविहितास्तदेकवाक्यतापन्नं यत् कृत्तद्धितसमासाश्चेति तत्सुबन्तानां समुदायस्य समाससञ्ज्ञानियमपरम् । तेन नीलो घट इत्यादेः समुदायस्य प्रातिपदिकत्वव्यावृत्तिः । न चैवं गविस्ययमहेत्यादौ दोषः । गविस्तीत्यस्य प्रातिपदिकत्वेपि क्षत्यभावात् । गविस्ययमितिसमुदायस्य तु सबन्तसमुदायत्वेनैव वारणात् । देवदत्तो गविस्याहेत्यत्र तु देवदत्तो गविस्यस्य न प्रातिपदिकत्वं परस्परानन्वयेनानर्थकत्वात् । अनुकार्यानुकरणयोर्भेदाविवक्षाया एव वक्ष्यमाणत्वेन गविस्यस्यासुबन्तस्यासाधुत्वाच्च । नन्वेवमपि छत्रअहन्निति समुदायस्य प्रातिपदिकत्वं दुर्वारम् । सुबन्तसमुदायत्वाभावेनोक्तनियमेनाव्यावृत्तेरिति चेन्न । जहि कर्मणेत्येतदेकवाक्यतापन्नेनानेन सुप्तिङन्तसमुदायस्यापि प्रातिपदिकत्वानियमनात् । नन्वेवमपि पचतिभवतत्येितत्समुदायस्य प्रातिपदिकत्वं दुर्वारम् । उक्तनियमद्वयाविषयत्वादिति चेन्न । आख्यातमाख्यातेनेत्येतदेकवाक्यतापन्नेनानेन तिङन्तसमुदायस्यापि प्रातिपदिकत्ववारणात् । तदेतदभिप्रेत्यार्थवत्सूत्रे भगवता भाष्यकृतोक्तम् । तुल्यजातीयस्य नियमो यथाजातीयकानां च समासः सुबन्तानां च समासः सुप्तिङ्समुदायस्य तर्हि प्राप्नोति । सुप्तिङ्समुदायस्यापि प्रातिपदिकसंज्ञारभ्यते । जहिकर्मणेति । सा नियमार्था भविष्यति । तिङ्समुदायस्यापि तर्हि प्राप्नोति तिङ्समुदायस्यापि प्रातिपदिकसञ्ज्ञारभ्यते । आख्यातमाख्यातेनेति । सानियमार्था भविष्यतीति । नन्वेवमपि देवदत्तस्य पुत्र इत्यत्र पुत्र इत्यस्य, ओदनं पचतीत्यत्र ओदनं पचेत्यस्य, अजां गमयतीत्यत्राजां गमत्यिस्य प्रातिपदिकत्वं स्यात् । न चायं विभक्तीतरदेवदत्तेत्यपेक्षायां चैतत्संज्ञाफलभूतविभक्तीतरतिङपेक्षायार्थबोधकत्वेनैतत्संज्ञेत्याद्यर्थवत्त्वाभावान्न प्रातिपदिकत्वमिति वाच्यम् । ईदृशार्थवत्त्वस्य भवद्भिरनङ्गीकरात् । एवं भूसत्तायामित्यस्य प्रातिपदिकत्वं दुर्वारम् । भू इत्यस्य सुप्तिङन्तभिन्नत्वेनोक्तानियमत्रयाविषत्वात् । एतेन कटप्रुजुश्रीणामित्येतदेकवाक्यतापन्नेन कृत्तद्धितेत्यनेन धातुसुबन्तसमुदायस्योपपदतिङित्येतदेकवाक्यतापन्नेन चानेन सुबन्तसुप्तिङभिन्नप्रत्ययान्तसमुदायस्य प्रातिपदिकत्वानियमान्न दोष इति परास्तम् । देवदत्तस्य पुत्र इत्यादौ दोषानिवारणाच्चेति चेत्सत्यम् । प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां पदवाक्ययोश्च लोके ऽर्थबोधजनकत्वेन वृत्तिकल्पनेपि

स्यपुत्र इत्यादेस्तत्कल्पने मानाभावेन वृत्त्या ऽर्थवत्त्वाभावादेवादोषात् । कटप्रुपाचककुम्भकारादौ तु समर्थः पदविधिरिति शास्त्रप्रामाण्यादेव वृत्तिमत्त्वम् । उपपदमतिङित्येतदेकवाक्यतापन्नेन कृत्तद्धितेत्यनेन सुबन्तप्रातिपदिकसमुदायस्य प्रातिपदिकत्वानियमनात् न भूसत्तायामित्यत्र दोषः । भेदविवक्षया भूइत्यस्य प्रातिपदिकत्वान्निर्देशात्सुबुत्पत्तिर्नेत्यन्यत् । कटप्रु इत्येतदेकवाक्यतापन्नेन धातुसुबन्तसमुदायस्य प्रातिपदिकत्वानियमनाच्च । प्रकृतिवदनुकरणमिति प्रुइत्यस्यापि धातुत्वात् । अत एव सुबनुत्पत्तिः । नियमत्रयप्रदर्शनपरं भाष्यं तूपलक्षणम् । नन्वेवमपि पचति पचति तरामिति द्विर्वचनात्तरपि तिङन्तसमुदायसत्त्वेन नियमव्यावर्त्यापातः । एवं शिवभागवत इत्यस्यापि नियमव्यावर्त्यतापातः । सुबन्तसमुदायसत्त्वादिति चेन्न । तिङन्तसुबन्तमात्रघटितसमुदायस्यैव तेन व्यावर्त्तनात् । एतेन प्रत्ययान्तानां समुदायस्य चेत्प्रातिपदिकत्वं तर्हि समासस्यैवेत्येक एव नियमोस्तु कृतं नियमत्रयेणेत्यपास्तम् । प्रत्ययान्तमात्रघटितेति परिष्कारासंभवेनोक्तस्थले पाचकिरित्यादौ च दोषापत्तेः । न च प्रकृतिप्रत्ययभावापन्नसमुदायविषयक एक एव नियमोस्त्विति वाच्यम् । पचतितरामित्यत्रातिव्याप्तेः । तरामित्यस्याप्रत्ययत्वात् । यदि च प्रकृतिप्रत्ययभावानापन्नौ यावर्थवन्तावित्युच्यते तदापि पचति आमिति भागद्वयमादाय तत्रातिव्याप्तिः । उक्तभागद्वयस्य प्रकृतिप्रत्ययभावानापन्नत्वात् । आमस्तिङन्ताप्रकृतिकत्वात्कथं चित्तत्रातिव्याप्तिवारणे उक्तधर्मद्वयस्य समासमात्रवृत्तित्वासंभवः । बहुखट्वक इत्यादिसमासे पूर्वोत्तरभागयोः कबहुखट्व इत्यनयोः प्रकृतिप्रत्ययभावापन्नत्वात् । कपः समासान्तावयवत्वेन कान्तस्य समासत्वात् । भागवतशिवेत्यनयोः प्रकृतिप्रत्ययाभावानापन्नत्वादर्थवत्त्वाच्च शिवभागवता इत्यस्य नियमव्यावर्त्यत्वापाताच्च । नन्वेवमपि राजकुमारीश्रित उत्यत्र युगपद्वृत्तिद्वयपक्षे प्रातिपदिकत्वानापत्तिः । सुबन्तमात्रसमुदायसत्त्वादिति चेन्न । युगपद्वृत्तिद्वयोत्तरं राजकुमारीत्यत्य समासत्वात्प्रातिपदिकत्वेन पुनः सुपि पुनर्द्वितीयातत्पुरुषेणादोषात् । श्रितेत्यस्य प्रत्ययलक्षणेन सुबन्तत्वादुत्तरपदे चेति निषेधस्य पदान्तविधावेव प्रवृत्तेः । केचितु नियमस्य परस्परासमानाधिकरणसमाससञ्ज्ञाश्रयाघटितसुबन्तसमुदायविषयकत्वान्नोक्तदोष इति । तन्न । राजकुमारीश्रितस्य पुत्र इति वाक्ये प्रातिपदिकत्वापत्तेः । उक्तद्वयाश्रयघटितत्वसमासत्वानाश्रयघटितत्वोभयाभावनिवेशेपि

राजा कुमारीश्रितस्य सुन्दरवाक्ये तदापत्तिरिति दिक् । उक्तद्वयाश्रयघटितत्वैकार्थी-भावपर्याप्त्यधिकरणत्वोभयाभावनिवेशो न संभवति राजकुमारीश्रितपुत्रे तदभावात् । राजकुमारीश्रितो मूलकेनोपदंशमित्यादौ दोषाच्च । अत्र कुमारीश्रितशब्दादेव सुबुत्पत्तिरित्यपि कश्चित् । ननु शशशृङ्गादिसमासे शशशृङ्गादेरलीकत्वेनानर्थकत्वा-त्प्रातिपदिकत्वाप्राप्तौ समासग्रहणं विध्यर्थमेव स्यान्न नियमार्थमित्याशङ्क्याह । शशशृङ्गादिपदानामिति । विप्रदृष्ट्वादिचित्तस्थं न बहिष्ठं कदाचन । स्वप्नभ्रमम-दाद्येषु सर्वैरेवानुभूयत, । इति कौर्मस्मृतेरनादिवासनारूपेणान्तरवस्थितरजतादेः कामातिवृत्तिसहकारेण बहिर्विषयप्रदेशे आगमं स्वाकारेण विषयभासनं च न तु बाह्यः । कोपि विषयस्य विशेषाकारोस्ति । न च सौत्रान्तिकमतप्रवेशः । तेन तत्रारोपितसत्ताया अप्यनङ्गीकारादिति भावः । तदुक्तं तदस्यास्त्यस्मिन्निति सूत्रे न सत्तापदार्थो व्यभिचरतीति भाष्यव्याख्यावसरे कैयटे । यदि तु वृक्षादिनाबाह्य-सत्तासमाविष्टं वस्तु वाच्यं स्यात् । ततो वृक्ष इत्यस्मात्सत्तावगमादस्तीत्यस्य गतार्थत्वात् प्रयोगो न स्यात् । नास्तीत्यस्य च सत्ताविरोधात्प्रयोगाप्रसङ्गः । अङ्कुरो जायत इति च प्रयोगो न स्यात् । सतो जन्मविरोधात् । बौद्धसत्तायां ते दोषा नावतरन्ति । बुद्धिसत्तासमाविष्टस्य बहिःसत्त्वासत्त्वजननप्रतिपादनायास्ति नास्ति जायत इति प्रयोगादिति । नन्वक्षौहिण्यादौ समासे स्वातन्त्र्येण प्रयोगा-र्हार्थवत्समुदायत्वं न विद्यते तदवयवानां निरर्थकत्वादित्याशङ्कते । अक्षौहिणी-त्यादीति । अन्यत्रदृष्टार्थारोपेणेति । प्रातिपदिकत्वसिद्धये ऽर्थवत्त्वारोपस्यावश्यकतया तत एव समासे ऽर्थवत्समुदायत्वं सूपपादमिति भावः । विकारागमेति पाठः । एवमग्रेपि । तमुच्चार्येति । अर्थबोधकशब्दमुच्चार्येत्यर्थः । नभवधाद्यादेशानामिति । नाभिनभं च, हनश्च वधः, आदिपदाद्विरागविरंगं चेत्यस्य संग्रहः । श्रमकजिति । श्नमि प्रत्ययत्वाभावे शकारस्येत्संज्ञा न स्यात् । अकचि तदभावे सर्विकेत्यादावित्वं न स्यात् । बहुचितु फलं चिन्त्यम् । इतिदिगिति । अन्ये तु तृणह इति निर्देशात्प्र-त्ययपरत्वाभावेपि प्रत्यय इत्यस्योपस्थितिः । बहुचि तु प्रत्ययत्वस्य न फलम् । अव्ययसर्वनाम्नामित्यत्रापि प्रत्यय इत्यस्य संबन्धः । नयासयोरिति ज्ञापकात् । एवं च यत्र गमकं तत्र परश्चेत्येतत्सान्नियोगशिष्टस्य प्रत्यय इत्यस्यासंबन्धः । आद्युदात्तश्चे-त्यनेन तु न सन्नियोगशिष्टत्वम् । विप्रकृष्टत्वात् । तेन क्विबिजादेः प्रत्ययसंज्ञासिद्धिः ।

किंचेत्याद्युक्तमपि दूषणम् देशांशे निराकांक्षत्वेपि परश्चेत्यस्य संभवमात्रेण संबन्धसंभवः । विकारागमयोस्तु पञ्चम्यन्ताभावेनान्वयासंभवात्परश्चेत्यस्यानुपस्थितिः । न च सीयुटा व्यवधानाद्धातोः परत्वासंभवः । यासुट्परस्मैपदेष्विति सूत्रारम्भसामर्थ्येनागमातिरिक्तकृतव्यवधानाभावस्यैव परशब्दार्थत्वात् । इतरथा सीयुट इव यासुटोपि पूर्वं प्रवृत्त्या परस्मैपदविषयाभावात्तदसङ्गतिः । किं च स्थानिनः प्रत्ययत्वनिर्णयेन परश्चेत्यस्यासंबन्धेपि प्रत्यय इत्यस्य तत्संनियोगशिष्टाद्युदात्तश्चेत्यच् संबन्धः । किं च परश्चेत्यस्याप्रवृत्तावपि स्थानिवद्भावलब्धप्रत्ययसञ्ज्ञा संनियोगेनाद्युदात्तत्वोपपत्तिः । तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तम् । विकारागमेषु च परविज्ञानात्प्रयसञ्ज्ञा न भविष्यति प्रत्ययः परो भवतीत्युच्यते । न च विकारागमाः परे संभवन्तीति । प्रकृत्यर्थमात्रविवक्षायां । सिद्धावस्थाद्यविवक्षायाम् । ङ्याप्प्रातिपदिकात् । तिङन्तात्त्विति । पश्य मृगो धावतीत्यादौ । तिङोक्तत्वाच्चेति । ननु धावतीति तिङा कर्तृगता संख्या ऽभिधीयते न कर्मगतेति चेन्न । यास्काचार्यमते तिङर्थकर्तृमुख्यविशेष्यकशाब्दबोधस्याप्यङ्गीकारात् । यद्वा तिङन्तात् द्वितीयापाद्यमाना किं प्रधानक्रियागतैकत्वमादायाहोस्वित्प्रधानक्रियागतसंख्याया बाधात्तद्विशेषणकर्त्रादिगतैकत्वमादाय । आद्ये सङ्ख्याभावादित्युत्तरम् । द्वितीये तिङोक्तत्वाच्चेति । धावनकर्तुरेव दर्शने कर्मत्वात्कर्तृगतसङ्ख्याया अभिहितत्वे कर्मगता अपि तस्या अभिहितत्वमिति भावः । तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तम् । तिङोक्ता एकत्वादय इति तिङन्तान्न स्वादयो भवन्तीति । यद्यपि पचति भवतीत्यादौ प्रथमाया अप्यापादानसम्भवः । तथापि प्रातिपदिकेत्याद्येकवाक्यतयैव स्वादिसूत्रस्य विधायकत्वेन तिङन्तस्य प्रातिपदिकत्वाभावेन प्रातिपदिकार्थाभावात् प्रथमा नापादयितुं युक्ता इत्याशयेन द्वितीयादिरित्युक्तम् । केचित्त्वष्टाध्याय्यां कर्मणि द्वितीयेत्यस्य प्रथममुपादानात्तथोक्तिरित्याहुः । तेभ्यः तिङन्तेभ्यः प्रथमोच्चारितबोध्यादिति । तस्यापत्यमित्याद्यर्थबोधकशास्त्रेषु प्रथमोपात्तं यत्तस्येत्यादि तद्बोध्यो य उपग्वादिसम्बन्धस्तद्बोधकं यत् उपगु ङस् इत्यादि तस्मादित्यर्थः । प्राधान्यादिति । इदमयुक्तम् । समर्थादिति सुबन्तमेव विशेष्यतया प्रक्रान्तं नत्वन्यत् । द्वयोर्हि विशेष्यतया सम्भावनायामन्यतरस्य तथात्व निश्चयाय हेतूपन्यासो युक्तः । ननु सर्वशब्देप्याद्युदात्त एव

स्वाङ्गशिटामदन्तानामिति सूत्रेण ततश्च प्रातिपदिकादित्युक्तावप्युक्तदोषस्तदवस्थ इत्यत आह । सर्वशब्दस्येति । कौस्तुभोक्तं दूषयितुमुपन्यस्यति । नचेति । लुङ्निमित्तप्रत्ययादिति । स न्यायो लुक इव तदुपजीव्यस्य कार्यस्यापि प्राबल्यबोधक इति भावः । सौवरीणाम् । स्वरविधायकशास्त्रभवानाम् । स्वरशब्दात्तत्र भव इत्यणि द्वारादीनां चेत्यैजागमः । आद्युदात्तत्वसिद्धिरिति । नन्वेवं सति सर्वस्य सुपीत्यत्र सुपीति व्यर्थं स्यादिति चेत्सत्यम् । किमस्माभिः कर्त्तुशक्यं सर्वशब्दादाचारक्विपि तिपि चाद्युदात्तत्वाभावार्थं वा स्यात् प्रातिपदिकाधिकारे तु तस्यानुदात्तादिति विशेषणे विशिष्टस्य गम्भीरायां नद्यां घोष इत्यादाविव समर्थादित्यनेनान्वयार्थं तत्प्रकृतिके लक्षणायामनुदात्तादिप्रातिपदिकप्रकृतिकषष्ठ्यन्तादाञित्यर्थेन सिद्धे सार्व इत्यत्राञनापत्तिः । षष्ठ्या अनुदात्तादिप्रकृतिकत्वात् । षष्ठ्युत्पत्तिसमये सर्वशब्दस्यान्तोदात्तत्वात् । एवं च सर्वस्य सुपीत्यत्र सुपीत्यपि सार्थकम् । उञ्छादिषु पाठः सफलः । सर्व इत्यत्राप्रवृत्तेरुभयफलत्वात् । मानाभावादिति । अनुदात्तादेरित्यस्य षष्ठ्यन्तविशेषणत्वसंभवादिति भावः । नलक्षणेति । इदमयुक्तम् । तथा सति सार्व इत्यत्राञनापत्तेः । सुपि परे सर्वस्य सुपीत्यस्य प्रवृत्त्या सर्वेति प्रातिपदिकत्वस्यानुदात्तादित्वाभावात् । मम तु सुपः पूर्वमनुदात्तादित्वेनानुदात्तादिप्रकृतिकषष्ठ्यन्तत्वस्य तत्र सत्त्वेनाञ् सुलभः । किं च पदोद्देश्यकविधित्वाभावेन समर्थपरिभाषा गौणमुख्यन्यायश्च तद्धितविधौ नोपतिष्ठेयाताम् । अधिकमग्रे वक्ष्यामः । प्रातिपदिकग्रहणस्य प्रयोजनान्तरमपि भाष्योक्तं किंचित्प्रदर्श्यते । द्व्यचष्ठनिति वाचातरतीत्यत्र प्रसज्येत । घटेन तरतीत्यत्र च न स्यात्समर्थसुबन्तस्याद्ये द्व्यच्कत्वात् । द्वितीये तदभावात् । नौग्रहणं तु नियमार्थं स्यात् । बहुतरोदाहरणेति । सर्वनाम्नस्तृतीया च, भवत्या हेतोः कुसूलकूपकुंभशालं बिले, कुसूलीबिलम् । पूर्वसदृशसमाना, । पित्रा सदृशी । तद्व्याप्यधर्मा इति । आनुपूर्वीविशेषभिन्ना अपीत्यर्थः । अत एवानुपूर्वीविशेषव्याप्यधर्माणामप्यतिदेशादेव नञन्तानां यो बहुव्रीहिरिति । ननु नञन्तसर्वावयवको यो बहुव्रीहिरित्यर्थे बहुकुमारीक इत्यत्र कबनापत्तिः । नञन्तावयवक इत्यर्थे कुमारीभार्या इत्यत्रातिप्रसंग इति चेन्न । नञुत्तरपदक इत्यर्थेनादोषात् । अवयवविषयएवेति । मद्रराज्ञीत्यादिसमासावयवराजन्शब्दविषय एवेत्यर्थः । तथा च समास-

घटकराजन्शब्दत्वादिकमेव समासान्तविधावनया परिभाषया नातिदिश्यते । बहुव्रीहित्वादिकं त्वतिदिश्यत एवेति भावः । इति चरितार्थमिति । तथा चार्थिक-त्यत्र नेत्वविकल्पः अत्यन्तस्वार्थिकेषु ङ्याप्ग्रहणासंबन्धेनापः पूर्वमेव कपः प्रवृत्तेः किं तु नित्यमेवेत्वम् । न चैवं सति ङ्याप्ग्रहणवैयर्थ्यम् । अत्यन्तस्वार्थिका-नामन्तरङ्गत्वेन परत्वेन च ङ्याब्भ्यां प्रागेवोत्पत्तेः । कुत्सिताद्यर्थकतद्धितानां तु कुत्सित इति सूत्रस्थभाष्योक्तरीत्या स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वस्वीकारेण न्यायत एव ङ्याबन्तादुत्पत्तिसिद्धेरिति वाच्यम् । लिङ्गविशिष्टपरिभाषाया अनित्य-त्वज्ञापनार्थत्वात् । तेन समासान्तादिविधौ लिङ्गविशिष्टपरिभाषाया अप्रवृत्तिः । नन्वत्यन्तस्वार्थिकेषु ङ्याब्ग्रहणासंबन्धेपि घकालतनेष्विति ज्ञापकेन तद्धितानां सुबन्तादेवोत्पत्त्या लोहिताल्लिङ्गबाधनं वेति पुनरसङ्गतमित्यत आह । अत्यन्तस्वार्थि-कानामिति । अनन्तर्भावादिति । एतदुत्तरमनन्तस्येति शेषः । तस्य च द्विर्वचनाभाव इत्यनेनान्वयः इदं चोक्तार्थानामितिन्यायमननुसन्धाय प्रवृत्तम् । एकत्वं स्त्रीत्वं चोक्तार्थः । तद्युक्तस्य चावीप्सितत्वान्न वुन्नन्तस्य द्वित्वमित्यर्थः । विभक्त्यभावेनेति । अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेवोत्पत्तेरिति भावः । नन्वेतद्भाष्यं सुबन्तात्त-द्धितोत्पत्तावप्युपपन्नम् । नित्यत्वाद् वुनि अकादेशे च भत्वेन पदत्वाभावान्न तद्धि-तप्रकृतेर्द्वित्वम् । वीप्सायां स्त्रीत्वैकत्वयोरनन्तर्भावान् न तद्धितान्तस्य पदस्य । कैयटस्त्वसंगत एवेत्यरुचेराह । पुंयोगादितिसूत्रेइति । अधिकसापेक्षत्वेनेति । इनुणंतत्वरूपविशेषापेक्षत्वेनेत्यर्थः । न च सुबन्तद्वयसापेक्षसमासापेक्षयैकं सूबन्ताप-क्षाण्प्रत्ययस्यैवान्तरङ्गत्वमिति वाच्यम् । एतद्भाष्यप्रामाण्येन पदद्वयसापेक्षादपि विशेषापेक्षस्य बहिरङ्गत्वात् । उक्तरीत्यैवेति । सामान्यापेक्षत्वेनेत्यर्थः । उक्तदिशा पदद्वयापेक्षत्वेपि समासस्याणपेक्षायामन्तरङ्गत्वं बोध्यम् । अन्यत्रविस्तरइति । स्पष्टं चेदं सर्वमत्रत्यभाष्यकैयटयोः । तत्र हि ङ्याब्ग्रहणस्य कालितरेत्यादिप्रयोजनमुप-न्यस्य तस्य बहुग्रामत्केत्यादौ दोषमुद्भाव्य स्त्रीप्रत्ययोपि स्वार्थिकः समासान्ता अपि स्वार्थिकास्तत्र परत्वात्वात्समासान्ता भविष्यन्तीत्युक्तम् । कालिकेत्यादौ स्त्रीप्रत्ययात्पूर्वं परत्वादत्यन्तस्वार्थिके कानि प्रत्ययस्थादितीत्वेन सिद्धिः । लोहिनिकेति तु लोहिताल्लिङ्गबाधनं वेति वचनेन सिध्यतीमित्युक्तम् । भाष्ये कैयटे च ङ्याब्ग्रहणप्रत्याख्यानेन समासान्ते परिहारः कालितरेत्यादौ

तु पूर्वोक्तन्यायेनान्तरङ्गत्वात्स्त्रीप्रत्यये प्रकर्षप्रत्यय इत्युक्तम्। एवञ्चात्यन्तस्वार्थिके कनि इत्वाघटितमार्यकेत्याद्यसाध्वेव। तत्रतत्रेति। टाङसीत्यादौ। विभक्तिश्च। ननु त्रीणि त्रीणीत्यननुवर्त्य तिङ एतन्मात्रानुवृत्तौ विभक्तिपदेनैकैकप्रत्ययग्रहणात्प्रथमयोरित्यादौ षण्णां प्रत्ययानां ग्रहणं न स्यात् किन्तु द्वयोरेव तत्र सोरजादित्वाभावेनौजसोरेव ग्रहणं स्यात् इत्याशङ्क्याह। प्रथमयोरिति। बहुवचनापत्तिरिति। द्व्येकेष्विति स्यादिति भावः। यत्तु स्वरितात्संहितायामिति सूत्रे कैयटव्याख्यावसरे द्व्येकेषामितिस्यादित्यभिनवविवरणे उक्तम्। तदसत्। द्वन्द्वेचेति निषेधेन सुडप्राप्तेः। भर्तृदारयोरिति। बहुवचनान्तस्योत्तरपदत्वे बहुवचनमेव। पूर्वपदत्वे तु द्विवचनमित्यन्ये। एकदेशविकृतन्यायेनेति। आनुमानिकस्थान्यादेशभावेनेत्यर्थः। सरूपाणामेकशेष एकविभक्तौ। तत्रस्योदाहरणमाह। यथाभ्यामिति। भ्याम्यपीत्यर्थः। अन्ये तु प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्यः माता च जनयित्री मातारौ च धान्यस्य मातृमातार इति वैरूप्यविषयोदाहरणोपन्यासेन यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो वक्तव्यस्तस्यापि सरूपाणि मातृभ्यां मातृभ्यां चेति। अथ मतमेतत् विभक्त्यन्तानां सारूप्ये भवितव्यमेवैकशेषेणेत्यग्रिमभाष्येण च भ्याम्येकशेषो भवत्येव। अर्थविप्रतिषेधादत्रैकशेषो नेति कैयटोक्तं तु न युक्तम्। तैरित्यनुप्रयोगेस्वयर्थावगतिसंभवात्। सा च तौ च तैरित्येकशेषसंभवात्। अर्थविप्रतिषेधेनैकशेष इति वचनाभावाच्च। अत एव प्रातिपदिकानामेकशेष इति पक्षे एकविभक्तौ यानि सरूपाणि तेषामेकशेष इति एवकाराघटितो वाक्यार्थनिष्कर्षो भाष्यकृता दर्शितः। अपकर्षस्य भाष्यकृता कुत्राप्यनाश्रयणाच्च। अत एव प्रातिपदिकतन्त्रमाश्रित्यैकशेषप्रत्याख्यानेन फलभेदः। तत्र हि मातृभ्यामित्यत्र सारूप्यं तन्त्रं संभवति मातरावित्यादौ च नेत्याहुः। तद्धितान्तादौ वैरूप्यादिति। तथा च यानि रूपाण्येवेत्युक्तौ हरिणीशब्दयोरेकशेषो न स्यात्। एवकारानपकर्षेतु जननीवाचिपरिच्छेतृवाचिनोरेकशेषापत्तिरित्युभयतः पाशारज्जुरिति तत्परिहाराय विभक्तावित्यावश्यकमिति भावः। अन्ये त्वेवकारो नापकृष्यते ऽदर्शनात्। मातृशब्दयोस्तृक्तयोर्भ्याम्येकशेषो भवत्येवेत्युक्तम्। एवं शुद्धङ्यन्तकुमारीशब्दस्यौजसोरेकशेषो भवत्येव। शसि तु न। यण्पूर्वसवर्णाभ्यां रूपभेदात्। मातृमात्रोः प्रतिषेधो वक्तव्य

इति वार्तिकं तूपलक्षणम् । एकविभक्ताविति तु सहविवक्षाया उपलक्षणार्थम् । सहविवक्षायामेकविभक्तेरेव दर्शनात् । तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तम् । एकविभक्ताविति किमर्थम् । पयः पयो जरयति वासो वासश्छादयति ब्राह्मणाभ्यां कृतं ब्राह्मणाभ्यां देहीति असहविवक्षाविषयप्रत्युदाहरणदानेनैकविभक्तावित्यस्य सहविवक्षोपलक्षणत्वं स्पष्टमेव सूचितं विभक्तिः सारूप्येणाश्रीयत इति प्रातिपदिकैकशेषोपपादनप्रकरणस्थं भाष्यं त्वेकदेश्युक्तिः । नचैवं सति मातृमातरावित्यत्राप्येकशेषापत्तिः । शिष्यमाणस्य कृतदीर्घत्वे च तेन जननीबोधासंभवेनाकृतदीर्घत्वे च तेन परिच्छेत्तृबोधासंभवेनैकशेषाप्रवृत्तेः । एकशेषशास्त्रं हि एकस्य नानेकार्थकतोत्पादकं किं तु लोकसिद्धानुवादकम् । न हि लोके दीर्घोपधान्मातृशब्दाज्जननीबोधो ह्रस्वोपधाच्च परिच्छेत्तृबोधो दृष्टः । तदेतदभिप्रेत्य भगवता भाष्यकृतोक्तम् शब्दस्य स्वाभाविकी वा ऽनेकार्थता स्यात् वाचनिकी वा । तद्यदि तावत्स्वाभाविकी अशिष्य एकशेषः । किं कारणमेकेनोक्तत्वात् तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यम् । यदि तर्हि एकेनानेकस्याभिधानं भवति प्लक्षन्यग्रोधौ एकेनोक्तत्वादपरस्य प्रयोगो ऽनुपपन्नः । इदानीमेवोक्तमेकेनानेकस्याभिधानं भवतीति । सरूपाणामेकेनानेकस्याभिधानं भवति न विरूपाणाम् । किं कारणं सरूपाणामेकेनानेकस्याभिधानं भवति न विरूपाणामभिधानं पुनः स्वाभाविकमिति । एतद्भाष्येण हि शिष्यमाणस्य स्वविरूपार्थबोधकत्वं स्पष्टमेवोक्तम् । अत एव ङीबन्त ङीषन्त हरिणीशब्दयोस्तद्धितविवक्षानिमित्तकपुंवद्भावापेक्षया ऽनैमित्तिकत्वेनान्तरङ्गत्वादेकशेषे कृते स्वरभिन्नानामिति ङीबन्तस्य शेषे तस्मात्तस्य समूह इत्यर्थे ऽणि हारितमिति रूपं न भवति । तशब्दघटितस्य विरूपत्वेन हरिणीशब्दार्थाप्रतिपादकत्वात् । यत्र तु तद्धिते द्वयो रूपं समानं तत्र भवत्येवैकशेषः । यथा हारिण्योरपत्येहारिणेयाविति । अत्र भस्याढ इति पुंवद्भावो न । अढे इति पर्युदासादित्याहुः । तत्रस्योदाहरणमाह । यथा ऽक्षाभज्यन्तामित्यादि । यथा शब्दो ऽत्रोदाहरणार्थो न दृष्टान्तार्थः । अक्षशब्दः शकटाक्षस्य बिभीतकाक्षस्य देवनाक्षस्य च वाचक एकशेषेण तु नात्र निर्वाहः । एकत्रानन्वयेन सहविवक्षाया अभावात् । तथा च तदर्थमावश्यकेन तन्त्रेणैव निर्वाहे एकशेषारम्भो व्यर्थ इति भावः । एकशेषानिर्वाह्यं स्थलान्तरमाह । एवमक्षो भज्यतामिति । अत्रैकवचान्तत्वेनैकशेषः शङ्कितुमश-

क्य इति भावः । शब्दतन्त्रमर्थतन्त्रं चेति । अर्थस्य विजातीयत्वे शब्दस्यैकजातीयत्वे शब्दतन्त्रम् । अर्थस्यैकजातीयत्वे ऽर्थतन्त्रम् । पर्यायपरिवृत्त्यसहत्वेइति । पर्यायेण प्रवृत्तिः परिवृत्तिस्तदसहत्वे इत्यर्थः । एकार्थकानां शब्दानां पर्यायेणैवार्थबोधनाय प्रवृत्तिर्न युगपद्भिन्नार्थकानामेकानुपूर्वीकाणामप्यक्षादिशब्दानां युगपदेवार्थबोधनाय प्रवृत्तिरर्थभेदात् । तथा च बिभीतकाक्षबोधकाक्षशब्दस्य देवनाक्षवोधकाक्षशब्देन सह पर्यायपरिवृत्त्यसहत्वे युगपत्प्रयोगार्हत्वे भिन्नार्थत्वे शब्दतन्त्रमित्यर्थः । तत्सत्वे पर्यायपरिवृत्तिसहत्वे एकार्थत्वे इति यावत् । ननु तन्त्रस्थले बोद्धुरावृत्त्यैव बोधः । एकशेषस्थले तु नैवं तथा च कथं तन्त्रेण निर्वाह इत्याशङ्क्याह । अन्वयिपदार्थभेदादिति । आवृत्त्यैवेति । शब्दावृत्त्या पदार्थोपस्थित्यावृत्त्या चेत्यर्थः । दर्शनेनेति । घटोयं घटोयमित्यादौ । अन्यत्रासहविवक्षायाम् । सारवोसारवोर्मिजइति । सरय्वां भावः सारवः दाण्डिनायनेति निपातनात्साधुः । आरवेण सहितः सारवः । सारवश्चासौ सारवश्चेति कर्मधारयः । तथा चोक्तभाष्येण सारवेत्यादिमहाकविप्रयोगेण च सहविवक्षायामेवोक्तनियम इति सिद्धम् । केचित्तु तिष्यपुनर्वस्वोरिति सूत्रात् द्वन्द्व इत्यनुवर्त्य द्वन्द्वे प्रसक्ते सत्येकशेष इत्याहुः । ननु सरूपाणामेकशेष एवेति नियमवत्सरूपाणां सह विवक्षायामेवैकशेषो नासहविवक्षायामित्यपि नियमोऽङ्गीकार्यः । तेन तृतीयान्तचतुर्थ्यन्तयोर्ब्राह्मणाभ्यामित्यनयोर्ब्राह्मणाभ्यां कृतं ब्राह्मणाभ्यां देहीति पृथक् प्रयोगः । नत्वेकस्य निवृत्तिः । अन्यथा ब्राह्मणाभ्यां कृतन्देहीति प्रयोगापत्तिरित्याशङ्क्य द्वितीयानियमं स्वीकृत्योक्तप्रयोगापादनेनेष्टापत्तिमाह । असहविवक्षाविषयेणेति । पयइति । एकं प्रथमान्तमेकं द्वितीयान्तम् । नीलोत्पलस्पर्धिनीति । एकं द्विवचनान्तं नपुंसकं नेत्रे इत्यस्य विशेषणम् । एकं ङ्यन्तं तनोर्विशेषणम् । अन्यपदार्थावगतयइति । ननु चक्षिङो नुम्व्यावृत्तये कर्मधारयस्यावश्यकत्वे एकाभीदित्यिदं व्यर्थमिति चेत्सत्यम् । नन्वर्थं अर्थं प्रति तदपि प्रत्यर्थमिति घटघटाविति द्वन्द्वः कस्मान्न भवतीत्याशङ्क्याह । अनेकघटादिपदानामिति । तत्रपरइति । एकशेषे द्विवचनापत्तेः । सह विवक्षाभावेन तदसम्भवाच्चेति भावः । इत्यर्थबोधयितुमिति । एकग्रहणसामर्थ्यादप्यर्थान्तर्भावेण समासः । सरूपाणीत्यस्य विरूपाणि नेत्यर्थः । एवञ्चैवकारापकर्षो मास्तु तदपकर्षे तूक्तार्थसम्पादकैकग्रहणं मास्त्विति

भावः । दूषणंभाष्येउक्तमिति । समाहारद्वन्द्वविषये एकशेषे तु एतद्दूषणासंगतिरिति भावः । अत्र वदन्ति । सोयमाश्विकः सायेमाश्विकी तच्चेदमाश्विकं तदिदं सर्वमाश्विकं तानीमान्याश्विकानीति अबहुप्रकृतीनां यत्र वृत्तिस्तत्र फलसेनेति वार्त्तिकेन समाहार द्वन्द्वस्य निषिद्धत्वात् अप्रसङ्गात् द्वन्द्वे प्रसक्ते विधीयमान एकशेषस्तदा न प्राप्तः । इतरेतरयोगद्वन्द्वे तु प्रसक्ते एकशेषो विधेय इति । बहुवचनप्रसंगे एकशेषो विधीयते बहुवचने प्राप्ते एकवचनार्थमेकवाच्चास्यान्यतरस्यामिति स्यात् । किंचानेनेतरेतरद्वन्द्वयोगे एकशेषाभावोज्ञाप्यतान्तावताऽपि तस्य सार्थक्यसम्भवात् । तस्माद् घटश्च घटश्चानयोः समाहारे घट इत्येकशेषो भवत्येव । न च नपुंसकत्वप्रसङ्गः । समाहारद्वन्द्व एव तद्विधानात् । एवं च घटघट इत्यादेरनाभिधानं नाश्रयणीयमित्यपरमनुकूलमिति । अत्र ब्रूमः समाहारद्वन्द्वविषये एकशेषप्रवृत्तौ विभक्त्यतानामेकशेष इति पक्षे ऽयं तर्हि दोषः काश्चिद्वचनलोपः । द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति भाष्यं कश्चिदिति शिष्यमाणस्यैकवचनस्य लोपो वक्तव्य इति कैयटग्रन्थश्च व्याकुप्येत । एकवचनान्तस्यापि साधुत्वे तु तदसङ्गतिः । तेनैकवचनान्तस्यासाधुत्वलाभात् । एतद्भाष्यप्रामाण्यादेव समाहारद्वन्द्वविषये नैकशेषः । अत एवैकशेषोदाहरणानि द्विवचनबहुवचनान्तान्येव भगवता भाष्यकृता प्रदर्शितानि । नत्वेकवचनान्तानि । सूत्रशेषे च भाष्ये केष्वर्थेषु लौकिकाः शब्दान्प्रयुञ्जते । लोके चैकस्मिन्वृक्ष इति प्रयुञ्जते । द्वयोर्वृक्षाविति बहुषु वृक्षा इति । तेन गार्ग्योहं सः पिता इत्यादिभ्य एकवचनान्तेभ्यः क्रमेण गार्ग्यायणहंसोमातृबाधो न । गङ्गायां मीनघोषाविति च न । निवृत्तभेदानामिति । भेदेनाप्रतीयमानानामित्यर्थः । तथा च तिङन्तेभ्यो ऽभेदेनैव शब्दशक्तिस्वभावेन प्रतीत्या नानेकशब्दप्रयोगप्रसङ्ग इति भावः । ननु मातृमात्रोः प्रतिषेधो वक्तव्य इति वार्तिकप्रयोगः कथं एकशेषस्य दुर्वारत्वादिति चेन्न । एकशेषे सति विवक्षितार्थानवगमात्तदभावः । एवं ह्यत्रार्थो विवक्षितो जननीवाचिनः परिच्छेतृवाचिनश्चैकशेषप्रतिषेधो वक्तव्य इति । एष चार्थो मात्रोरित्युक्ते न गम्यत इति कैयटेन समाधानात् । एतेनान्हो मध्ये वा मनो रामरामाविति प्रयोगोपपत्तिः सङ्गच्छते । अत्र च नौवयोधर्मविषमूलमूलेति निर्देशोपि गमकः । स्वरभिन्नानामिति । भिन्नस्वराणामित्यर्थः । ननु स्वरभेदे कथं सारूप्यमिति चेन्न । रूप्यशब्देन वर्णानु-

पूर्व्या एव ग्रहणात् । तथा तृज्वत्क्रोष्टुरिति सूत्रे भाष्यम् । नहि स्वरो रूपवानिति । नविभक्तौतुस्माः । ननु प्राग्दिशीयाविभक्तौ नायं निषेधः प्रवर्तते इत्येवोदित्वेन ज्ञाप्यतामत आह । अत एवेति । उक्तज्ञाप्यांशं विहाय सामान्यतो ऽनित्यत्वज्ञापनादेवेत्यर्थः । अन्यत्रेति । न चैतस्तकारे तत्फलम् । अनुच्चारेणनाप्युपपत्तेः । एकवचनम् । नन्वेकवचनग्रहणेन प्रत्ययग्रहणपरिभाषोपतिष्ठते । एकवचनशब्दस्य प्रत्ययमात्रबाधकत्वाभावात् । त्वमावेकवचन इत्यादावर्थबोधकत्वस्याप्यङ्गीकारात् । सुः सम्बुद्धिरित्युक्तौ तूपतिष्ठेत । न च सञ्ज्ञाविधाविति निषेधः । यथा सामाश्रितशब्दयोगार्थोपपत्तये उक्तनिषेधाप्रवृत्त्या तदन्तविधेस्तथात्रापि तदन्तविधिशङ्काया अनिवारणात् । आमन्त्रणसाधनत्वस्यैव सम्बोधनसाधनस्यापि तदन्त एव सम्भवादित्याशङ्क्याह । सम्बुद्धाविति । इत्यंशेति। सम्बुद्ध्याक्षिप्तस्येत्यस्य तदुपस्थापितस्येत्यर्थ इति भावः । फलाभावादिति । आक्षेपकोपपत्तिरूपाक्षेपफलाभावादित्यर्थः । सम्बुध्युपपत्तिरिति । प्रयोग इति शेषः । तथा च प्रयोगे तदुपपत्तये प्रयोग एवाक्षेपः स्यान्न तु सूत्र इति भावः । आक्षिप्तस्याक्षेपकानुपपादकत्वेनाक्षेपासम्भवमुक्त्वा ऽऽक्षेपमूलभूतानुपपत्तेरभावेनापि तदसम्भवमाह । किंचेति । उक्तस्यार्थस्य यस्मात्स विहितस्तदादेरित्यर्थः स्यादत आहेति । अन्ये त्वङ्गाक्षेपाभावे एङ्ह्रस्वात्परा या सम्बुद्धिस्तस्या हलो लोप इत्यर्थेन हेकतरादित्यादौ सम्बुद्धेरनिवारणात् । अङ्गाक्षेपो व्यर्थ इत्याशङ्क्याह । कुलेतीत्याहुः । ननु पौर्वापर्यभावो ण्यन्तादिवद्भावेनैव साध्यतामत आह । ताद्रूप्यानतिदेशादिति । पौर्वापर्यानतिदेशादित्यर्थः । ह्रस्वान्तत्वानतिदेशादिति तु नार्थः । तस्य स्वतः सिद्धत्वेनातिदेशानपेक्षणात् । अन्याक्षिप्तस्य। अन्योपस्थापितस्य । वस्तुतस्तु येनोपस्थाप्यते तस्य तेनैवान्वय इति नियमे मानाभावः । गुणश्रुत्योपस्थापितस्यैक इत्यस्याङ्गेनानन्वयाद् व्यभिचारश्च । यदि च तस्याङ्गद्वारा गुणेनान्वयस्तर्हि प्रकृते ऽपि हल्द्वारा संबुद्ध्यान्वय इति तुल्यम् । एतदर्थमेवेति । अङ्गादित्यस्य हल्यन्वयसूचनार्थमित्यर्थः । नन्वेवमपि कतरदित्यत्र लोपो दुर्वारः । अदन्तस्य यस्माद्विहितस्तदादित्वात् । तकारस्य च संबुध्यवयवत्वादिति चेन्न । प्रत्ययघटकभागाघटितस्यैव तदादेर्ग्रहणेनादोषात् । न चैवं कुलेत्यत्र लोपानापत्तिः । मकारस्य संबुद्ध्यवयवत्वोपपादनायामित्यस्य परादिवद्भावेन संबुद्धित्वस्य वक्तव्यतया कुलेत्यस्य प्रत्य-

यघटकभागघटितत्वादिति वाच्यम् । संबुद्धयवयवत्वस्योपलक्षणत्वेन परादिवद्भावानाश्रयणेनादोषात् । मकारस्य संबुध्यवयवत्वं पूर्वमासीदेवेत्याशयात् । नन्वेङ्ह्रस्वात्परसंबुद्धेर्लोप इत्यर्थेपि कुलेत्यत्र लोपो भवत्येव एकदेशविकृतन्यायेन मस्य संबुद्धित्वात् । तथा चोक्तव्याख्यानक्लेशो व्यर्थ एवेत्याशङ्क्याह । मस्येति । संबुद्धित्वाभावादिति हेतोर्ह्रस्वान्तङ्गात्परसंबुद्धेरभावादिति व्यवहितसाध्येनान्वयः । स्थानिभूताल्धर्मत्वेनेति । अल्स्थानिभूतो यः सुरिति समुदायस्तद्धर्मत्वाभावेनेत्यर्थः । तथा च स्थानिवदादेश इत्यत्र स्थानिपदस्यादेशविधायकशास्त्रघटकस्थानषष्ठ्यन्तपदजन्यप्राथमिकोपस्थितिविषयपरत्वेपि संबुद्धित्वस्य तद्धर्मत्वाभावादतिदेशो न स्यादिति शङ्काभिप्रायः । तस्यानल्विधित्वादिति । तस्य संबुद्धित्वस्यानल्धर्मत्वादित्यर्थः । यथाश्रुतौ पूर्वोत्तरपक्षावसङ्गतावेव । संबुद्धित्वस्य स्थानिभूताल्धर्मत्वशङ्कायाः समुदायस्याम्स्थानित्वोपपादनेनैव निवारणीयतया संबुद्धिसञ्ज्ञायाः समुदायोद्देश्यकत्वोपपादनस्यासङ्गतत्वात् । इदमयुक्तम् । पूर्वोत्तरपक्षाभ्यां संबुद्धयवयवत्वस्य विशेषणताया एवावगमात् । तत्र चोक्तरीत्यादोषात् । अङ्गाधिकारस्थादिति । एतेनाङ्गसञ्ज्ञाकृतम्बहिरङ्गत्वमुक्तम् । न च गुणबहिरङ्गत्वस्य पूर्वपक्षाभिप्रेतत्वे परत्वान्नित्यत्वाच्चेति समाधानग्रन्थासङ्गतिरिति वाच्यम् । सञ्ज्ञाकृतबहिरङ्गत्वस्यामिति न्यासे परत्वान्नुडित्यादिभाष्येण समानाश्रये त्वपरनिमित्तापेक्षत्वेन बहिरङ्गत्वस्य चानाश्रयणमिति समाधानग्रन्थाशयात् । सामर्थ्यादेव । एङ्ग्रहणसामर्थ्यादेव ! एङ्ह्रस्वग्रहणसामर्थ्याच्चेति । ह्रस्वग्रहणं हेलक्ष्मीत्याद्यर्थं सन्निपातपरिभाषया ह्रस्वस्य संबुद्धिलोपानिमित्तत्वे तद्वैयर्थ्यम् । अभ्युच्चयइति । नित्यानित्ययोर्विप्रतिषेधायोगादिति भावः । अनवकाशत्वसंग्रहइति । ननु तथा सति गुणे कृते लोपाप्रसङ्ग इति चेन्न । एङन्तत्वनिमित्तकलोपप्रवृत्तेः सुलभत्वात् । विषय भेदे उत्सर्गापवादभावो नेति त्रिपथगायां निरूपितं न विस्मर्तव्यम् । त्रपो इत्यत्र लोपाप्राप्तिविषये गुणस्य चारितार्थ्याद् गुणस्य नलोपापवादत्वमित्याशङ्क्याह । नपुंसकइति । बाधकाबाधितप्राप्तेरभावेपि प्राप्तिमात्रमस्त्येवेति भावः । द्विमात्रवारणायेति । न चैवं पूर्वसवर्णदीर्घेण सिद्धेरतद्वैयर्थ्यमिति वाच्यम् । गौरीइत्यादौ त्रिमात्रप्रवृत्त्यर्थत्वात् । वा छन्दसीत्यनेनैकवाक्यार्थत्वाच्च । तस्माच्छसः । ननु तस्मादिति मास्तु । अक इत्यनुवर्त्याकः परस्य नत्वविधानेन

ऽहि इत्यादावदोषात्। न चादेः परस्येत्यादेर्नकारे हरीनित्यत्र दीर्घश्रवणानापत्तिः। शसः सो नः पुंसीति न्यासेनादोषात्। अकः परस्य शसः सस्य न इत्यर्थः। पूर्वसवर्णदीर्घस्य तक्रकौण्डिन्यन्यायेन बाधः स्यादिति तु न शङ्क्यम्। पूर्वसवर्णदीर्घे ऽकः परशसो ऽसंभवेनोक्तन्यायाप्रवृत्तावनवकाशत्वेन तं बाधित्वा नत्वे प्रवृत्ते पश्चात्तत्प्रवृत्तेः। ननु तितऊनित्यत्रोत्सर्गे कृते नत्वचारितार्थ्यादुक्तन्यायेन तस्य बाधे पुनरप्रवृत्तिरिति चेत्सत्यम्। अक इत्यस्य सकारविशेषणत्वेनादोषात्। अकू च सामर्थ्यात्प्रत्ययानवयवस्तथा च पूर्वसवर्णदीर्घोत्तरमेव नत्वप्रवृत्तिरिति न कश्चिद्दोष इत्यभिप्रायेण शङ्कते। तस्मादिति। किमिति। अट्कुप्वाङ्। तदुक्तित्वध्वननादिति। वस्तुतस्तु कृत्स्नं मूर्ध आर्ष्णोदित्यादौ णत्ववारणाय तु नैवं व्यवायेनेति लघुन्यासेन सिद्धे ऽट्कुप्वग्रहणसंतैरेव व्यवाय इत्यर्थकं भविष्यतीति सूपपन्नं भाष्यम्। आक्षरसमाम्नायिकैरिति। वर्णैरित्यर्थः। अक्भागे तु न वर्णत्वम्। यस्मात्प्रत्ययविधिः, गुणानां चेति न्यायेन तस्मिन्निति परिभाषाया अप्रवृत्तिमाशङ्क्याह। गुणकृतात्मेति। "गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तथा भूयसि वर्त्तत, इति न्यायः। वस्तुतो गुणानां चेति न्यायो नात्र शास्त्रे समाश्रीयते इत्युक्तं प्राक्। इयङाद्यापत्तिरिति। आदिपदग्राह्यं चिन्त्यं यत्तु पाठकेनोक्तमादिपदाद्यस्येति चेति लोपो ग्राह्य इति तच्चुच्छम्। तस्मिन्कर्त्तव्ये इकारस्य स्थानिवत्त्वादभीयादित्यसिद्धत्वाच्च न च न पदान्तेति निषेधः। लोपस्य पदानवयवत्वात्। चिणो लुङ्न्यायेन समानाश्रयत्वाच्च। षाम्शसोरित्येतत्साहचर्यात् सुप एवाच्प्रत्ययस्य ग्रहणे तु स्त्री औ इत्युदाहर्त्तव्यम्। अशब्दादौप्रत्यये रूपं परादिवद्भावेन च प्रत्ययत्वम्। एवं वारि औ इत्यत्रेको ऽचीति नुम् स्त्रीशब्दस्येयच्छब्देन समासे ऽचिश्निवतीयङ्। न च स्थानिवद्भावः। न पदान्तेति निषेधात्। ननु विधिग्रहणे कृतेपि स्त्रीयस्य सुनिरूपिताङ्गत्वमादायेयङ् दुर्वार इत्यत आह। प्रत्यासत्त्येति। तदादिग्रहणस्य भवामीत्यादिमूलोक्तं प्रयोजनं न युक्तम्। विधानसामर्थ्येन तत्राङ्गस्येत्यस्यासंबन्धकल्पनया दीर्घसिद्धेः। हन्तेर्लुङ्कयभिधाने दृश्यमानाभावादित्याभिप्रेत्य स्वयं तस्य फलमाह। तदादीति। वस्तुतश्चिकीर्षामित्यादौ चारित्तार्थ्यान्मूलोक्तमपि युक्तम्। ननु सन्संप्रसारण इत्यत्र संप्रसारणपदं लक्षणया स्थानिपरमतो न दोष इत्यरुचेराह। किञ्चेति। ननु

न लुमता तस्मिन्निति न्यासे लुमता लुप्ते प्रत्यये परतो यत्पूर्वस्य कार्यं तदेव निषिध्यत इति नात्र दोष इति चेद्दोषान्तरं गृहाण । श्रियावित्यादौ तावदियङनापत्तिर्दोषः । समुदाये व्यपदेशिवद्भावाऽप्रवृत्त्या श्रीत्यस्यानङ्गत्वात् । एवं जुहोतीत्यादौ गुणो न स्यात् । गुणस्तु कारोतीत्यादौ चरितार्थः । प्रत्यय इत्युक्तौ तु तत्परकस्य मुख्यतदादित्वव्यपदेशभाजो ऽसत्त्वेनासहायत्वाद् व्यपदेशिवद्भावः सुलभः । अथात्र कथंचिद्व्यपदेशिवद्भावं मन्यसे तदा श्र्यर्थमित्यादावियङापत्तिः । न लुमतेति निषेधस्योक्तविधया ऽप्रवृत्तेः । युवोरनाकाविति । तत्र हि अङ्गसञ्ज्ञायां न लुमतेति निषेधो न प्रवर्त्तते । तस्या अङ्गत्वविशिष्टानुद्देश्यकत्वादित्युक्तम् । ननु प्रत्यासत्त्या भिस्निमित्तकाङ्गस्यैव ग्रहणान्नोक्तदोष इत्याशङ्क्य समाधत्ते । भिसइति । चतुर्थ्येकवचनस्यैवेति । न सप्तम्येकवचनस्य । संश्लेषः संबन्धः । यत्रादित्वसापेक्षेति । इदं बह्वपक्षं बहिरङ्गमिति प्राचीनमतेन । किंचातिदेशिकेनेति । इदं प्राथमिकसपरिहारस्योपबृंहणं न समाधानान्तरम् । इत्युक्तमस्तीति । परिभाषेन्दुशेखरेण विरुद्धम् । ननु झलिति किमिति शङ्का निर्दला जसादावतिव्याप्तेः स्फुटत्वादित्याशङ्क्याह । उतइति । उत इत्यत्र झलीत्युक्तौ तु मिपि वृद्ध्यनापत्तिः । मझलोरित्युक्तौ त्वतो दीर्घ इत्यादावपि तदनुवृत्तौ भवामो रामाभ्यामित्यादावेव दीर्घः स्यान्न पचाव इत्यादौ । अप्रवृत्तिज्ञापनार्थमिति । अन्ये तु सुबामन्त्रित इत्यतो ऽनुवर्त्तमानसुप्पदवन्मध्ये यञीत्येतत्सम्बद्धत्वेन तत्सम्बद्धस्य निवृत्त्यै सुप्प्रतिनेत्यत्र सुप्पदवन्मध्ये यञीत्येतत्सम्बद्धस्य हलीत्यस्य निवृत्तये झल्ग्रहणं स्यादित्यज्ञापकमेत्वे संनिपातपरिभाषाप्रवृत्त्यभावस्य । तत्सम्बद्धस्यानुवृत्तौ तु रामेष्वित्यादौ षत्वं न स्यात् । सुपीत्यस्य तु यञ्सम्बद्धत्वेपि झल्ग्रहणसामर्थ्यात्केवलस्यानुवृत्तिः । किं च सुपां सुरिति यादेशे एत्वाभावार्थं झल्ग्रहणं एत्वे सन्निपातपरिभाषाया अप्रवृत्तौ हलि सर्वेषामिति निर्देशो गमक इत्याहुः । नुमापत्तेरिति वार्णादाङ्गमिति परिभाषया गुणं बाधित्वेति शेषः । सन्निपातपरिभाषया नुम्वारणे तु तयैव गुणोपि न स्यादिति भावः । इटि तु एभ्य इत्यादौ हलि लोपानापत्तिर्बोध्या । बाधित्वेतिशेषइति । यत्तु पाठकेनोक्तम् । एवं सति षडित्यादौ आन्तरतम्यात्षकार एव स्यान्न टकारः । अल्पप्राणतया प्रयत्नभेदात् । तस्माच्चर्त्वस्यासिद्धत्वाज्जश्त्वं ततश्चर्त्वमित्येव युक्तमिति । तन्न । उत्सर्गापवादभावपरित्यागे कारणाभावात् ।

षडित्यादौ तु न दोषः । शसिदयोः प्रतिषेधेन चार्विधौ झल्पदेन चर्भिन्नस्य जश्विधौ जश्भिन्नस्य ग्रहणबोधनेन जश्त्वोत्तरमेव चर्त्वप्रवृत्तेः । समानाश्रये चरितार्थस्य सवर्णदीर्घस्य व्याश्रये गुणेन वैरूप्यसंपादकादेशप्रवृत्तियोग्ये चरितार्थस्य चर्त्वस्य सारूप्यसम्पादकादेशप्रवृत्तियोग्यस्थले चर्त्वस्यासिद्धत्वेन तस्य जश्त्वे बाधनाच्च । अणुरपि विशेषो ऽध्यवसायकर इति न्यायात् । अन्ये तु ष्णान्ताषडिति निर्देशेन जश्त्वचर्त्वयोरुत्सर्गापवादभाव एव नेत्यन्यथा जश्त्वं बाधित्वा चर्त्वे षकारस्य तदभावपक्षे जश्त्वेन डकारस्य श्रवणापत्तौ टान्तानिर्देशानुपपत्तिः । न च पुनर्भावोपक्रमाच्चर्त्वे तत्सिद्धिरिति वाच्यम् । जश्त्वे पुनश्चर्त्वाभावस्योपक्रमे पुनर्भावपक्षे चर्त्वाभावाश्रयणायोगात् । तथात्वे शिशियतुरित्यादौ द्वित्वे कृते सम्प्रसारणे शिशुवतुरिति स्यादित्याहुः । व्यर्थंस्यादिति । ननु तादेशे चयो द्वितीया इत्यस्यानन्तरं स आर्द्धधातुक इति कार्यम् । शरीत्यनुवृत्त्या शरादावार्द्धधातुके तस्य द्वितीय इत्यर्थः । स चान्तरतम्यात्थ एव । तासस्त्योरित्यत्र सीति कर्तव्यम् । न च लाघवाभावः । तकारं कृत्वा थकारकरणापेक्षया साक्षात्थकरणाऽपेक्षप्रक्रियालाघवात् । थकाराभावे च खरि चेति चर्त्वेन तकारः । एवं सिद्धे तत्वविधानमित्याशयात् । प्राचां मते तस्य बहिरङ्गत्वेनासिद्धत्वात् द्वितीया प्रवृत्तेश्च । षडित्यत्रेति । अनन्तरत्वान्नृनचाप इत्यत्र तदनुवृत्तिरुचिता । ननु कष्टायक्रमणे इति निर्देशेन दीर्घमात्रे सन्निपातपरिभाषा न प्रवर्त्तते । अत एवाने मुगिति सूत्रे भाष्ये मुडिति न्यास आपादितः । नामीति सूत्रे भाष्ये चाग्नीनामित्युदाहृतम् । न तु वृक्षाणामिति । परत्वात्सुपि चेत्यस्य न्याय्यत्वात् । श्वान्नलोप इति सूत्रस्थं शकाराभावे यज्ञानामित्यादौ नामीति दीर्घत्वं बाधित्वा परत्वान्नलोपः स्यादिति भाष्यं तु सुपि चेति दीर्घापेक्षया नलोपस्य नित्यत्वाभिप्रायमिति न तद्विरोधः । एवं च रामाणामित्युदाहरणे नामीत्यस्योपन्यासो न युक्त इत्याशङ्क्य समाधानान्तरमाह । कृताकृतेति । नामीति सूत्रे भाष्ये ऽग्नीनामित्युदाहरणोपन्यासस्त्वन्यथासिद्धत्वाभिप्रायः । न तु वृक्षाणामित्यस्यानुदाहरणत्वाभिप्राय इति भावः । अयादिबाधमाशङ्क्येति । इदं तु भाष्यमायादयो वा गुपूधूपविच्छिपणिपानिभ्य आयः सार्वधातुक इति न्यासाभिप्रायम् । व्युत्पत्तिपक्षे ज्ञापकमिति । अनश्च इत्यादौ तु न दोषः ।

पदद्वयाश्रयत्वे न बहिरङ्गत्वात्तया नुटो ऽसिद्धत्वात् । एवं त्रिदमुणादीनामव्युत्पत्तिपक्ष एवेति स्वसिद्धान्तविरुद्धम् । यत्तु कश्चिदाह । नुटीति न्यासे सन्निपातपरिभाषया नुट् दीर्घनिमित्तं न स्यात् नामीति न्यासे तु नुटो न दीर्घनिमित्तत्वमिति न सन्निपातपरिभाषाविरोध इति तन्न । नामीति न्यासे ऽपि नुटो घटकतया दीर्घनिमित्तत्वात् । नुटीति न्यासे ऽपि कष्टायेति निर्देशेन दीर्घविधौ सन्निपातपरिभाषाप्रवृत्त्यभावकल्पनासम्भवाच्च । इण् चेक् चेति इतरेतरद्वन्द्वे द्विवचनमिति भ्रमनिरासायाह । वर्णग्रहणमिति । ठकारेति । वर्गद्वितियो न प्रथमः । तस्याल्पप्राणतया प्रयत्नभेदात् । द्वितीयमिति । ऊष्मणामर्षिद्विवृतत्वे ईषद्विवृतस्येत्येव सुवचम् । सर्वादीनिसर्वनामानि । तद्गुणसंविज्ञानइति । तस्यान्यपदार्थस्य ये गुणाविशेषणानि तेषां कार्यान्वायितया संविज्ञानं यत्रेति विग्रहः । संयोगेन समवायेन वा यत्र वर्तिपदार्थसंबन्धी अन्यपदार्थस्तत्र प्रायेणातद्गुणसंविज्ञानः यथा पीताम्बरमानय लम्बकर्णमानयेत्यादौ अन्यत्रत्वतद्गुणसम्विज्ञानः । यथा चित्रगुमानयेत्यादौ क्वचितु संयोगादिना वर्तिपदार्थसंबन्धिनो ऽन्यपदार्थत्वेपि अतद्गुणसंविज्ञानः । नागयज्ञोपवीती भोज्यतां लम्बकर्णो भोज्यतामित्यादौ । उद्भूतावयवभेद इति । उद्भूत आरोपितो ऽवयवस्तत्सहचारिता सङ्ख्या यत्रेति बहुव्रीहिस्तदाह । आरोपितेति । न हि तदन्तविधिम्बिनेति । इदमयुक्तम् । इश्च इतरश्चेति सर्वनामसञ्ज्ञानिषेधार्थस्यावश्यकत्वात् । तस्मादन्वर्थसञ्ज्ञाक्षिप्तसञ्ज्ञी सर्वादिभिर्विशिष्यते अपूर्वो वा तदन्तविधिरुपसङ्ख्यायत इति कैयटोक्तमेव युक्तमिति केचित् । भाष्यसूचितमिति । अथवाङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्वती स्येतत् सूत्रस्य भाष्यसूचितमित्यर्थः । सर्वनाम्नोऽव्ययवेटेरिति । न तुसुबन्तस्य टेः । तथा सति सर्वकाभ्यामित्यादौ दोषापत्तिः । ओकारसकारेति वार्तिकं तु युष्मदस्मच्छब्दाविषयकम् । अव्ययसर्वनाम्नामित्यस्य श्रुतत्वात्तेन टेरित्यनेन संबन्धः । प्रातिपदिकादिति चाऽव्ययसर्वनामात्मकप्रातिपदिकप्रकृतिकसुबन्तपरम् । परमत्वान्वयोत्तरं कुत्साद्यन्वयाविवक्षायामिदम् । कुत्साद्यन्वयोत्तरं परमत्वान्वये तु नेदमिति भावः । इदमयुक्तम् । सर्वनाम प्रकृतिकसुबन्तादित्यस्यानन्वयात् । परमभवकानित्यत्र भवच्छब्दस्य प्रत्ययलक्षणेन सर्वनामप्रकृतिकसुबन्तत्वेनाकच्प्रसिद्धेः । उत्तरपदे चेति निषेधस्तु पदान्तविधावेव । भवन्मते सुबुत्पत्त्यनन्तरं प्रातिपादिक-

मेव प्रकृतितया श्रियाकच्प्रवृत्तेश्च । परमत्वकुत्सयोर्युगपदन्वये युगपदेव समासतद्धितवृत्तिसम्भवाच्च । परमसर्वत्रेति तु कथञ्चिदुदाहरणं शक्यमुपपादयितुम् । परिनिष्ठितविभक्त्या समासेपि समुदायादुत्पन्नसप्तम्याः सर्वनामाप्रकृतिकत्वात्तदन्तात्त्रलो ऽसम्भवात् । घटस्य सर्वनामप्रकृतिकसप्तम्यन्तत्वेपि तस्मात् त्रलि परसादेस्तद्धितान्तत्वाभावेन प्रातिपदिकत्वानापत्तिः । शिवभागवतादाविव तदुत्पादने ऽपि तद्धितान्तत्वाभावेन समुदायस्याव्ययत्वानापत्तिः । तदनापत्तौ समुदायाद्विहितसुपो लुगनापत्तिः । सर्वनाम्नः परा या सप्तमी तदन्तात् त्रलित्यर्थे तु तच्छब्दान्नपुंसकात्कपरम्पदशब्दः प्रकृतिकसप्तम्यन्तं ये इति ततस्त्रलापत्तिः । परमसर्वे परमविश्वे इति भाष्योक्तं तदन्तविधिप्रयोजनन्तु समीचीनम् । अवयवस्य सर्वनामत्वे ततो जसो विहितत्वाभावेन शीभावानापत्तेः । इतिचरितार्थमिति । विहितविशेषणाभावे समुदायस्य विकल्पेप्यवयवस्य नित्यसर्वनामसञ्ज्ञामादाय नित्यं शीभावापत्तेः । यद्यप्येवं सति द्वन्द्वे चेति निषेधवैयर्थ्यमपि सुवचम् । तथाप्यामि सर्वनाम्न इत्यादौ विशेषणं स्वीकृत्य जसः शीत्यत्र तदाश्रयणे विवदमानं प्रत्येव मुक्तम् । किं च समुदायगतकुत्साविवक्षायां कप् प्रत्ययार्थं स निषेधः सार्थकस्तत्फलं वर्णाश्रमेतराणामित्यादौ सुडभाव इति मन्तव्यम् । अत्र यद्वक्तव्यं तदग्रे वक्ष्यते । बोधरूपतत्प्रवृत्तिकालइति । वस्तुतो बोधमात्रं न प्रवृत्तिः । किंतु पदैकवाक्यतया ऽन्वयार्हस्य सर्वस्योपस्थितौ वाक्यार्थबोधे वृत्ते पश्चाद्वाक्यैकवाक्यतया ऽन्वयार्हपरिभाषोपस्थितौ तदेकवाक्यतया महावाक्यार्थ बोधः । तन्मूलक अस्मादयमिति शृङ्ग्राहकतयोपस्थाप्यमानवाक्यार्थबोधो वा लक्ष्ये प्रवृत्तिः । अस्यां च दशायां कादेरनुबन्धत्वं ज्ञातुं सुशकमेव । प्राहुरिति । अन्येतु नानुबन्धकृतमनेकाल्त्वमित्यत्रानुबन्धपदस्य तत्त्वयोग्यपरत्वे ऽनकाल्शित्सर्वस्येत्यादस्य शित्वयोग्यपरत्वे न फलं प्रत्युत गौरवम् । किञ्चेत्सञ्ज्ञायोग्यशकारवत्त्वज्ञाने सर्वादेशत्वज्ञानं सर्वादेशत्वज्ञाने च प्रत्ययादित्वज्ञानं ततश्च शकारस्येत्सञ्ज्ञायोग्यत्वज्ञानमिति चक्रकापत्तिः । काणोक्तसूक्तरीत्या प्रवृत्तिकाले ऽनुबन्धत्वज्ञानं सुलभम् । केचित्तु नानुबन्धकृतमसारूप्यमित्यस्य वासरूपपरिभाषापवादतयोपसंजातनिमित्तोप्युत्सर्ग उपजनिष्यमाणनिमित्तेनापवादेन बाध्यत इति न धातुलोप इति सूत्रस्थकौस्तुभोक्तन्यायेन तेन तस्य बाधः । प्रकृते तु प्रथमत एवानेकाल्त्वात्सर्वादेशस्या-

पश्चादस्य निमित्तमस्तीत्युक्तन्यायस्याप्रवृत्तेर्विशेष इत्याहुः । अनेकाल्शित्सर्वस्येति सूत्रस्थं शित्सर्वस्येति किमुदाहरणम् । इदमइश् । शित्करणादेव सर्वादेशो भविष्यति । इदं तर्हि जश्शसोः शिः जसः शीति भाष्यं, लुटःप्रथमस्येति सूत्रस्थं डाविकारस्य शित्करणं सर्वादेशार्थं डाविकारः शित्कर्तव्यः किं प्रयोजनं सर्वादेशार्थमिति भाष्यं च शिदनुबन्धपदे शित्वानुबन्धस्त्वयोग्यपरमित्युपेत्य कृत्वा चिन्तान्यायेन प्रवृत्तमित्यन्यस्यायं स्थाने भवन्न प्रत्ययस्यासत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यादसत्यामित्संज्ञायां लोपो न स्यादसति लोपे ऽनेकाल् यदा ऽनेकाल् तदा सर्वादेशो यदा सर्वादेशस्तदा प्रत्ययो यदा प्रत्ययस्तदेत्संज्ञा यदेत्संज्ञा तदा लोप इति तदुत्तरभाष्येण तथात्वं सूचितमिति न तद्विरोधः । विभक्तियोग्यइति । ननूपसर्जनिष्यमाणेनोमत्तन्यायेन सिद्धे विभक्तिस्वयोग्ये लक्षणाश्रयणं व्यर्थमिति चेन्न । न बहुव्रीहाविति सूत्रस्थ भाष्यप्रामाण्येन निषेधविषये संज्ञाविषये वोपसर्जनिष्यमाणन्यायाप्रवृत्तेः । तत्र हि त्वकत्पितृक इत्यादावलौकिके प्रक्रियावाक्ये प्राप्ताकज्वारणाय बहुव्रीहिपदं लक्षणया बहुव्रीह्यर्थालौकिकप्रक्रियावाक्यपरमित्युक्तम् । उक्तन्यायेनैव पूर्वं सर्वनामसंज्ञायास्तन्निमित्ताकचश्चाप्रवृत्तिसिद्धौ लक्षणाश्रयणवैयर्थ्यं स्पष्टमेवाप्रातिपदिकस्येत्र प्रकृतित्वादिति । अकज्विधौ सर्वनामपदं तत्प्रकृतिकसुबन्ते न लाक्षणिकं नेदमदसोरकोरककारकत्वाव्यभिचारात् । ननु समस्तार्थमेतत्स्यादिति चेत्सत्यम् । काकवारविशेषप्रतिपादनपरभाष्यादेवोक्तार्थस्वीकारात् । अन्यत्र तु लाक्षणिकमेवेत्युक्तं ङ्याप्प्रातिपदिकादिति सूत्रे । अकज्विधौ प्रातिपदिकाधिकारस्य नोपयोगः । तस्य पञ्चम्यन्तत्वात् । तत्र सर्वनामपदेन लिङ्गविशिष्टपरिभाषया ङ्यन्तस्यापि ग्रहणाद्भवती शब्दे ङीपः प्राक् अकचि भवतकीति रूपम् । न च प्रत्ययः परः प्रयोक्तव्य एवेति नियमेन मध्येकजनुत्पत्तिः । त्वयकेत्यादाविव प्रकृतिप्रत्ययमध्येप्यकच्प्रवृत्तिसंभवात् । शब्दादिविधानेनोक्तनियमस्यानित्यत्व कल्पनात् । सुबन्तात्परेति । सुबन्तत्वज्ञानाव्यवहितोत्तरकालप्रवृतिक इत्यर्थः । प्रत्ययन्तरत्वेनव्याख्यानादिति । अस्यात्यन्तस्वार्थिकायज्विधानार्थमित्यनेनान्वयः । महाविभाषासंबन्धस्यावश्यकत्वेनेति । अस्य लक्ष्याविरोधादिति शेषः । अतएवेति । सुबुत्पत्तेः पूर्वमयजुत्पत्तेरेवेत्यर्थः । ननु सुबुत्पत्त्यनन्तरमयजुत्पत्तावप्युभशब्दात्सुबन्तात्स्वार्थे ऽयचि ततः सप्तम्यान्ततस्त्रल्युभयत्रेति रूपं सिद्ध्यति । न हि अवयवार्थकायजन्तस्योभयशब्दस्य सर्वादिषु

पाठः न स्वार्थिकायजन्तस्येत्यत्र मानमस्तीति चेन्न । सुबुत्पत्त्यनन्तरमयजुत्पत्तौ नियामित्यत्रोभादित्यस्य संबन्धेन तस्य तत्प्रकृतिकसुबन्ते लक्षणायां मानाभावेन सुपि परत उभशब्दादयचि तस्य सप्तमीरूपस्य सुप उभशब्दप्रकृतिकस्य सर्वनामप्रकृतिकत्वाभावेन त्रलाद्यनापत्तिरित्याशयात् । घकालतनेष्विति ज्ञापकं तु सार्थकतद्धितविषयं न चोभशब्दपाठस्य त्रलाद्युत्पत्तिरपि प्रयोजनमस्त्विति वाच्यम् । तथासत्युभस्य सर्वनामत्वे किं प्रयोजनमकजर्थं पाठः क्रियते उभकौ किमुच्यते ऽकजर्थमिति । न पुनरन्यान्यपि सर्वनामकार्याणि । अन्याभावो द्विवचनटाब्विषयत्वादित्यादि भाष्यग्रन्थसंदर्भसूचितप्रयोजनान्तराभावाभिप्रायाविरोधात् । आद्युदात्त एवेति । नान्तोदात्तः चित्वेनान्तोदात्तस्य प्राप्तत्वेनोदात्तग्रहणवैयर्थ्यात् । ननु क इदानीमन्यस्यान्यत्र भवति उभयोन्यत्रोभयशब्दोस्यान्यत्र भवति इति भाष्यम् । अस्योभशब्दस्यान्यत्र द्विवचनभिन्ने परत उभय इति रूपं भवति । अयज् भवतीति फलितार्थः । तथा चायच् प्रत्ययस्य द्विवचनभिन्ने परत एव विधानेन सुबुत्पत्तेः पूर्वमेवायजिति पूर्वग्रन्थासंगतिः । भाष्यसूचिताकजतिरिक्तसर्वनामकार्याभावविरोधश्च । उभयत्रेत्यादावुभशब्दात्सप्तमी द्विवचनोत्तरमत्र त्रलुत्पत्त्या द्विवचने च सति अयजभावेन सर्वनामप्रकृतिक सप्तम्यन्ताभावेन त्रलनापत्त्या तदर्थं उभशब्दपाठस्यावश्यकत्वादित्याशङ्क्याह । द्विवचनविषयत्वाभावसंभावनेति । परिनिष्ठिते प्रयोगे इति शेषः । तथा चान्यत्रेत्यस्य द्विवचनपरत्वाभावे इति नार्थः किंतु परिनिष्ठिते प्रयोगे द्विवचनविषयत्वाभावसंभावनायामित्येवार्थ इति न पूर्वोक्तदोषद्वयमिति भावः । नन्वेवमप्युभावित्यत्राप्ययच् स्यात् । अयचि ततो द्विवचनेपि परिनिष्ठिते प्रयोगे उभशब्दस्य द्विवचनपरत्वाभावात् । अयचा व्यवधानादित्यत आह । उभयशब्दस्यवेति । वस्तुतो ऽयमार्थिको ऽर्थो नतु वाच्योऽर्थः अन्यत्रत्यस्य प्रकृतद्विवचनभिन्ने एव शक्तत्वेन ततो द्विवचनपरत्वाभाव इत्यर्थलाभात् । अस्येत्यस्योभयशब्दस्येत्यर्थे क इदानीमस्यान्यत्र भवतीत्यादि भाष्यग्रन्थस्यानन्विततार्थत्वापत्तेश्च । भाष्याक्षरार्थस्त्वस्योभशब्दस्य परिनिष्ठिते प्रयोगे द्विवचनभिन्नपरत्वे उभय इति रूपं बोध्यमिति । अत्रेरनेकाच इति सूत्रस्थगतिकारकपूर्वस्यैप्यत इत्यस्येवार्थिकार्थ एव तात्पर्यं न वाच्यार्थे । ननु यत्र द्विवचनविषयत्वाभावसंभावना तत्रैवायजिति नियमो व्यर्थः । उभावित्यादौ वृत्तेरभावेन वृत्तिविषये विहितस्यायचो ऽप्रवृत्तेः । अकजन्तात्तु नायच् । अनभिधाना-

दित्युक्तमेवेत्याशङ्क्य तत्फलमाह । उभयोर्वासइति । नन्वेवं सति वृत्तिविषय इति व्यर्थम् । उभावित्यादौ द्विवचनपरत्वादेवायचो ऽप्रवृत्तेरिति चेत्सत्यम् । एतत्फलितार्थकथनमेव वृत्तिविषयइति । एवञ्चान्यत्रेत्यस्योभावित्यपि प्रत्युदाहरणं दातुं शक्यम् । तत्परत्वविषयाभावेइति । परिनिष्ठिते प्रयोगे तत्परत्वाभावसंभावनायामित्यर्थः । यथाश्रुतमूलं तु न युक्तम् । द्विवचनपरत्वाभाव इत्युक्तौ संप्रति द्विवचनपरत्वाभावाभावेनोभयत्रेत्यादावयजनापत्तेः । न चान्तरङ्गत्वाद्विभक्त्युत्पत्तेः पूर्वमयजापत्त्या तद्वैयर्थ्यापत्तेः । इत्यादौ तु नेति । अत्यन्तस्वार्थिकायजिति शेषः । निर्देशेनेति । इदमुपलक्षणम् । अत्यन्तस्वार्थिकायचोन्तरङ्गत्वे सुबुत्पत्तेः पूर्वमेवोत्पत्तेः स्वीकारेणावयवार्थकायचः पूर्वं स्वार्थिकायच्युभशब्दस्य प्रकृतिकसुबन्ताभावेनोभादुदात्त इत्यस्यावयवार्थकायज्विधायकस्य निर्विषयत्वापत्तेः । अनभिधानमेवेति । अत्र प्रमाणं तु कप्रत्ययस्य द्विवचनत्वमाश्रित्योभशब्दप्रत्याख्यानपरं भाष्यम् । तथा हि । द्विवचनशब्दस्य तत्सञ्ज्ञकपरत्वे रूपप्ययच् भवति । द्वित्वविशिष्टार्थवाचकपरत्वे तु स नेति फलभेदादनभिधानम् । ननूभशब्दपाठो मास्तु । न च कप्रत्ययापत्तिः । वृत्तिविषये सुबुत्पत्तेः पूर्वमेवायजुत्पत्तिस्वीकारेण कप्रत्ययस्य च सुबुत्पत्त्यनन्तरमेवोत्पत्त्या पूर्वमयच्प्रत्ययजन्तस्य सर्वादिषु पाठेन ततो ऽकच एव प्रवृत्तेः । न चायजन्तस्य सर्वनामत्वेप्युभशब्दस्य सर्वनामत्वाभावात्ततः कप्रत्ययापत्तिरिति वाच्यम् । सुबुत्पत्तेः पूर्वमेवायजुत्पत्तिस्वीकारेणोभयशब्दस्यासुबन्तत्वेपि न ततः कप्रत्ययप्राप्तिः । प्रत्ययः परः प्रयोक्तव्य एवेति नियमेनोभशब्दायचोर्मध्ये कप्रत्ययासम्भवाच्चेत्याशङ्क्याह । अयचोपीति । कुतो न वाच्य इत्यतः । तत्र हेतुमाह । उपजीव्यत्वेनेति । परिनिष्ठिते प्रयोगे द्विवचनपरत्वाभावो हि अयजुपजीव्यः । यदि चायचि कृते ऽकच् स्यात्तदा स्वार्थिकायजन्तस्य द्वित्वविशिष्टबोधकत्वेन ततो द्विवचनापत्तौ द्विवचनपरत्वाभावमुपजीव्यं व्याहन्येतेति कप्रत्ययस्यैव प्राप्तिरित्यर्थः । नन्वपवादे ऽयचि जागरूके कथं क इत्याशङ्क्याह । अपवादस्त्वन्यत्रेति । उपजीव्योपजीवकभावादन्यत्रेत्यर्थः । तथा च द्विवचनपरत्वाभावसम्पादनद्वारा स्वोपजीव्यकप्रत्ययविघातकाकचो ऽयच् न निमित्तं भवतीति नात्राकच् प्रवर्तत इत्यर्थः । अतएवोपसर्जनव्यावृत्तिरिति । इदमुपलक्षणम् । वृत्त्युत्तरमुपसर्जने कुत्सादियोगा-

संभवात् । ततः पूर्वं तद्योगे त्वकजिष्ट एवेति । अज्ञाताद्यर्थविशिष्टस्वार्थेइति । सुबन्तात्कप्रत्ययविधानेप्यभिधानेप्यभिधानस्वाभाव्यात्सूत्रे विभक्तिविशेषस्यानुपादानाच्च अज्ञातत्वादिविशिष्टप्रातिपदिकार्थे एव कप्रत्यय इति भावः । परेत्वित्यादि । निषेधाश्चबलीयांसइति । ननु स्वरंतेर्वेदृत्वाद्धनोः स्ये इति विप्रतिषेधेनेति विप्रतिषेधानुपपत्तिः । उक्तन्यायेन विकल्पस्य बलवत्वादिति चेन्न । ऋद्धनोः स्ये इत्यस्य निषेधसमकक्षत्वात् । नचैवमप्याकडारादन्यत्र सञ्ज्ञाया बाध्यबाधकभावाभावादिदमयुक्तमिति वाच्यम् । विजातीययोस्तदभावेपि सजातीययोस्तदङ्गीकारात् । नित्यविकल्पयोः सञ्ज्ञयोरेकसञ्ज्ञाधिकारबहिर्भूतयोरपि तदङ्गीकाराद्वा । भावाभावयोर्विरोधेन तयोः साक्षाद्विरोधात् । साक्षादविरुद्धयोरेवैकसञ्ज्ञाधिकारबहिर्भूतयोस्तयोर्बाध्यबाधकभावः । साक्षाद्विरुद्धयोस्तुल्ययोः सा ऽस्त्येव । यथा तपरस्तत्कालस्याणुदित्सवर्णस्येत्यनयोः । अत एव पूर्वादीनां वैकल्पिकीं सर्वनामसञ्ज्ञां नित्यसञ्ज्ञा बाधते । नन्वेवं पूर्वे इत्यादौ शीभावोत्तरं न स्यात् । पूर्वपरेत्यादिना जसि परतः सर्वनामसञ्ज्ञाविकल्पविधानेन जसः सर्वनाम्नो विहितत्वाभावादित्याशङ्क्याह । पूर्वपरेत्यादिन्त्विति । तथा च पूर्वे इत्यादौ जसः पूर्वं प्रवर्तमानां सर्वादीनीत्येतद्विहितां सर्वनामसञ्ज्ञामुपजीव्य शीभावप्रवृत्तिरिति भावः । नन्वसिद्धं बहिरङ्गमित्यनेनान्तरङ्गोत्तरं प्रवर्त्तमानबहिरङ्गस्यासिद्धत्वेनाभावबोधनान्न दोष इत्याशङ्क्य समाधत्ते । असिद्धमिति । नन्वन्तरङ्गप्रवृत्युत्तरं प्रवृत्तिनिमित्तसद्भावाधीनबहिरङ्गप्रवृत्तेरन्तरङ्गपरिभाषया निवारणाभावेपि बहिरङ्गा वैकल्पिकी सर्वनामसञ्ज्ञा ऽसम्भवादेव न प्रवर्त्तते । न हि नित्यसञ्ज्ञोत्तरं प्रवर्त्तमानमपि पूर्वपरेति शास्त्रं सर्वनामसञ्ज्ञाया अभावं बोधयितुं क्षमम् । भावाभावयोर्विरोधात् । विधायकशास्त्रभेदेन सञ्ज्ञाभेदे तु पूर्वपरेत्यादिना स्वविहितसञ्ज्ञाया अभावबोधनेपि सर्वादीनीत्येतद्विहिताया अभावाबोधनात् । तामाश्रित्य नित्यं शीभावो दुर्वार इत्याशङ्क्याह । तदुत्तरमपीति । शास्त्रभेदेन सञ्ज्ञाया भेदाभावेपि जातसञ्ज्ञाया एव पूर्वादिष्विवोभयोरपि अभावबोधनं सम्भवति । लुगादिनेव जातनिवृत्तेरङ्गीकारादिति भावः । ननु प्रथमचरमेत्यादौ जसीति विषयसप्तमी तथा चान्तरङ्गबहिरङ्गयोर्युगपत्प्राप्त्याऽन्तरङ्गं बलीय इत्यस्यात्र विषयोस्त्येवेत्याशङ्क्याह । जसीति । तदुत्तरमेतद्विषयादिति । तथा च प्रातिपदि-

कसञ्ज्ञोत्तरमेव शीभावविषयसत्त्वेन तदुत्तरमेव वैकल्पिकी सर्वनामसञ्ज्ञा। नित्यसर्वनामसञ्ज्ञा तु प्रातिपदिकसञ्ज्ञासमकालमेवेति न तयोर्युगपत्प्राप्तिरिति भावः। आनुमानिकयानयेति। अन्तरङ्गं बलीय इत्यनया ऽसिद्धं बहिरङ्गमित्यनया वेत्यर्थः। नन्वारते यथोद्देशे नित्यपाक्षिकयोर्युगपत्प्राप्त्यभावः। तत एव चान्तरङ्गं बलीय इत्यस्याप्रवृत्तिश्च तथापि कार्यकालपक्षेत्त्येव तयोर्युगपत्प्राप्तिः। शीभावप्रवृत्तिकाल एव नित्यसञ्ज्ञाप्रवृत्तेरित्याशङ्क्याह। सर्वनामसञ्ज्ञायामिति। उक्तयुक्तयेति। सर्वनाम्नो विहितत्वेन शीभावसिद्धिरित्युक्तयुक्तयेत्यर्थः। यद्यपि कथञ्चिद्युगपत्प्रवृत्तिं गृहीत्वा ऽन्तरङ्गं बलीय इति नित्यसञ्ज्ञाप्रवृत्तावपि तदुत्तरबहिरङ्ग इति पूर्वशेखरोक्तयुक्त्या सूपपादा। अन्यथान्तरङ्गं बलवदित्यस्य विषयाभावेऽपि प्रातिपदिकसञ्ज्ञासमकालमेव सर्वनामसंज्ञाङ्गीकारात्तन्निवृत्तिर्न स्यात्। तथा प्यन्तरङ्गम् बलवदिति न्यायेन बाधितस्य पुनरप्रवृत्तिरित्यभिप्रायेणेदम्। अत एवेति। उक्त युक्त्या नित्य सञ्ज्ञायाः वैकल्पिकसञ्ज्ञया बाधायोगादेवेत्यर्थः। नातिप्रसङ्गइति। न षट्त्वस्रादिभ्य इति निषेधोऽपि बोध्यः। नन्वेवं प्रत्याहाराश्रयणे टिड्ढेति सूत्रे तयप् ग्रहणं व्यर्थमित्याशङ्क्याह। तयप्ग्रहणंत्विति। अवयुत्यावयवेनैकदेशेन। अवयुत्येति ल्यबन्तं वेति। अवयुत्या ऽनुवाद इति पाठे त्ववयुतेः प्रत्याहारैकदेशस्यानुवाद इति षष्ठीसमासः। ननु स्थानिवदित्यतिदेशप्रापिताया निरवकाशत्वाच्चेत्ययुक्तम्। द्वये इत्यादौ सावकाशत्वाच्चेत्याशङ्क्याह। अनभिधानमेवेति। वस्तुतो नेदं युक्तम्। अनभिधाने प्रमाणाभावात्। धातोश्च द्वये प्रत्ययास्तिङः कृतश्चेति भाष्य प्रयोगाच्च। अन्ये तु सर्वनामसञ्ज्ञायां कार्यकालपक्ष एव तत्पक्षे च सञ्ज्ञायाः कार्यनिमित्तनिमित्तिकत्वम्। अत एव पूर्व परेत्यादि चारितार्थम्। अन्यथा पूर्वं नित्यसर्वनामसञ्ज्ञायां तत एव नित्यशीभावप्रवृत्तौ तद्वैयर्थ्यम्। न चास्मिन्पक्षे सर्वनाम्नो विहितत्वाभावेनोभये इत्यादौ शीभावानापत्तिः। विहित विशेषणतायाः श्रयणात्। अदन्तात्सर्वनाम्नः परस्य प्रत्यासत्या तत्पर्याप्ताङ्गसञ्ज्ञानिमित्तस्य जसः शीत्यादिरूपेण वाक्यार्थबोधाङ्गीकारेण विहितविशेषणफल सिद्धेः। नान्तरङ्गं बलीय इत्यस्यात्र विषय इत्याद्ययुक्तम्। तदप्रवृत्तावपि नित्यसर्वनामसञ्ज्ञायाः पूर्वप्रवृत्तिस्वीकारेण तयादेशे उभयप्रतिषेध इति वार्तिक

वैयर्थ्यात् । पूर्वपरेत्यादितु पक्षे तदभावमात्रबोधकमित्याद्यप्ययुक्तम् । प्रथमादिशब्दविषयकाप्राप्तविभाषायामगतेः । प्रथमादिशब्देसर्वनाम सञ्ज्ञाविकल्पसामर्थ्येन चास्मदुक्तार्थकल्पनैव ज्यायसी । तदुत्तरमप्येतत्प्रवृत्त्येत्याद्यप्ययुक्तम् । कार्य काल पक्षाश्रयणेनैवोपपत्तौ पूर्वादिषु जाततन्निवृत्ति कल्पनाया अयुक्तत्वात् । सञ्ज्ञाविषये निषेधविषये वा ऽक्लृप्तस्योपसञ्जनिष्यमाणन्यायस्य पूर्वादिष्वाश्रयणमप्यगतिकगतिः । उभयशब्दे तु नोपसञ्जनिष्यमाणन्यायावकाशः । द्वितीये इत्यादौ तच्चारितार्थ्यात् । एवं जसीत्यस्य विषयसप्तमीत्वमप्यगतिकगतिः । तथा च नित्यविकल्पयोः सञ्ज्ञयोरन्तरङ्गबहिरङ्गभावात्परत्वाद्विकल्पे प्राप्ते तयादेश इति वार्तिकं प्रवृत्तम् । वस्तुतस्तु जसि विकल्प विषयेपि अकजाद्युदात्तत्वार्थ नित्यसञ्ज्ञा प्रवर्तते एव । शीभावः परं वैकल्पिकीं सञ्ज्ञामाश्रित्य प्रवर्त्तते न नित्यम् । अन्यथा विकल्पवैयर्थ्यापत्तेः । नित्यविकल्पयोर्विधायकशास्त्रभेदेन भेदान्न विरोधः । तथा च तयादेश इति वार्तिको स्थितिः । स्थानिवदतिदेशप्रापिताया इत्यप्ययुक्तम् । द्वयशब्दे चारितार्थ्यात् । तदनभिधानस्य निरस्तत्वात् प्रत्यक्षस्येत्याद्यप्ययुक्तम् । पचावेदमित्यादौ पूर्वान्तवद्भावेन लोडुत्तमत्वाद्याश्रित्य प्रवर्त्तमानस्यैत्वादेरन्तरङ्गपरिभाषाया बाधदर्शनात् । स्योन इत्यादौ स्वसमकालप्राप्तिकस्यापि स्थानिवद्भावेनाङ्गत्वमाश्रित्य प्रवर्तमानस्य गुणस्यान्तरङ्गपरिभाषाबलेन यणा बाधदर्शनाच्चेत्येकदेशविकृतन्यायस्य लौकिकत्वे ऽपि स्थानिवदतिदेशस्य प्रत्यक्षत्वादित्याहुः । तद्ध्वनयन्नाह इति । युः शब्दार्थमात्रविवक्षायां लिङ्गान्तरेष्युदाहरण संभवात् स्त्रियामेवोदाहरणोपन्यासो व्यर्थः स्यादिति भावः । एकोन्यार्थे इति कस्य चिदभियुक्तस्य वचनं न तु कोशः । तेनैकदिगित्यत्रैकशब्दः समानार्थः । तेन तद्योगे तुल्यार्थैरिति तृतीया । एका मातेत्यत्र साधारणार्थः । नन्ववधिनियमो व्यवस्थे त्ययुक्तम् । तस्य पूर्वादिशब्दार्थत्वाभावात् । देशवाचिनः सर्वनामत्वानापत्तेश्च न हि काशी प्रयागादेव पूर्वा न ग्रामान्तरादित्यवधेर्नियमोस्तीत्याशङ्क्याह । नियमेनावधिसापेक्षइति । उत्तरेइति । नियमेनापेक्ष्यमाणो ऽपि पूर्वपक्षा नावधिरिति भावः । केचित्त्ववधित्वमेतद्द्वयावर्त्यं दुर्वचम् । भिन्नभावस्तु पूर्वादिभ्य इति विकल्पात्पक्षे तु सह इष्यत एव तस्माद्दक्षिणा गाथका इत्येव प्रत्युदाहरणमित्याहुः । ननु कुरुपूत्तरशब्दस्य केवल-

रूढत्वे व्यवस्थाभावादेव संज्ञाया अभावादसंज्ञायामिति व्यर्थमित्याशङ्क्य योगरूढि-माश्रित्य समाधत्ते । सुमेर्ववधिकेति । तात्कालिकेति पाठः । तत्तदवधिकेति । यन्निरूपितदेशस्य पूर्वत्वादि तदवधिकेत्यर्थः । अपरशब्दो रूढो न नञ्समासः । परापरशब्दयोः समानार्थत्वात् । अन्तरमवकाशावधीति । अवकाशो यथान्तरं देहि, । अवधौ मासान्तरे देयं, परिधाने ऽन्तरे शाटकः, अन्तर्द्धौ घनान्तारितः सूर्यः, । भेदे उदरमन्तरं कुरुते, । यदन्तरः सिंह शृगालयोर्द्वयोः, । तादर्थ्ये तवान्तरे ऋणं गृहीतम्, । छिद्रे ऽन्तरं पश्याति, । आत्मीयेऽन्तरे जनाः, । विनार्थे उदाहरणं मृग्यम् । बहिरर्थे अन्तरे चाण्डालगृहाः, । अवसरे ऽन्तरज्ञः सेवकः, । मध्ये ऽनयोरन्तरे शैलः, । अन्तरात्मनि अन्योन्तरआत्मा ऽऽनन्दमयः, । चकारात्सदृशार्थो ऽपि । यथा स्थानेन्तरतमः । विनाबहिः शब्दयोरव्ययत्वे ऽपि चार्थयोगमाश्रित्य द्वन्द्वः । नत्वकजाद्युदात्तत्वादाविति । अकजाद्युदात्तत्वे तु नित्यं स्तः । तयोः कर्तव्ययोः सतोः सर्वादीनीति नित्यं सञ्ज्ञासत्त्वात् । सा तु शीभावोपयोगिनी । शीभावे विकल्पविधानसामर्थ्यात् । वर्णाश्रमेतरे इत्यादौ तु नैते । द्वन्द्वे चेति नित्य संज्ञा निषेधात् । विकल्पस्य च शीभावमात्र फलकत्वात् । एवं प्रथमे इत्यादावपि न ते । बोधकत्वरूपेति । लोके इति शेषः । वस्तुतस्त्वेकार्थीभावकल्पनातः पूर्वमेवाकचः प्राप्तिर्बोध्या । अन्तरङ्गानपीति न्यायस्तु संज्ञातिरिक्तान्तरङ्गबाधकत्व विषयः । अर्थातिरिक्तनिमित्तविनाशकविषयो वा । ननु स च समासे ऽपि श्रूयेतेत्यस्यातिभवकानित्येव दृष्टान्ततया प्रदर्शनीयः । अतिक्रान्त इत्यादिकं तु न प्रदर्शनीयम् । प्रकृतासंगतेरित्याशङ्क्याह । अतिक्रान्त इत्यादीति । तथा चातिक्रान्तो भवकन्तमिति लौकिकविग्रहवाक्य इवालौकिके प्रक्रियावाक्ये प्रवर्त्तमानो ऽकच् यथातिभवकानिति समासे श्रूयते तथा त्वकं पितेति लौकिक विग्रह वाक्य इवालौकिके वाक्ये प्रवर्तमानो ऽकच् त्वत्कपितृक इति समासे ऽपि श्रूयेते ति मूलार्थ इति भावः । प्रत्यङ्गमन्तरङ्गम् । एतच्चेति । भाष्यकृत्कारिष्यमाण सूत्रप्रत्याख्यानस्य सूत्रकृदभिमतत्वमित्यर्थः । भाष्येध्वनितमिति । एवं हि तत्र भाष्यम् । क्वायमकारः श्रूयते न क्वचित् श्रूयते लोपोस्य भवति । यदि न क्वचित् श्रूयेत किमर्थमिदमुच्यते न लोप एवो च्यते । नैवं शङ्क्यं लोपे सति गुणः प्रवर्तेत । अत्वे च न सति अकारलोपस्य स्थानिवद्भावाद् गुणो न भविष्यति । ननु च लोपे ऽपि न

धात्विति निषेधो भविष्यति । आर्धधातुकनिमित्ते लोपे प्रतिषेधः । न चैष आर्धधातुकनिमित्तो लोपः । अपि च प्रत्याख्यायते खल्वपि स योगः । तस्मिन्प्रत्याख्याते गुणः स्यादेवेति । एवं च प्रत्याख्यानविरुद्धफलकसूत्राशयकल्पनं वृत्तिकाराणामनुचितमिति सूचितं तदाह । एवं चेति । कैयटे स्पष्टमिति । नन्वेवं सूत्रमतेऽतिसर्वायेत्यादौ स्मै प्रसंगः । बहुव्रीहिग्रहणस्योपसर्जनोपलक्षणत्वात् संज्ञायां तु व्यवस्थायामसंज्ञायामिति पृथक्कृत्य निषेधो बोध्यः । अन्तर्गणकार्यमप्यनुपसर्जनादित्यस्याकारात्कारान्तनुपर्जनस्य द्रष्टव्यावित्यर्थेन परिहर्त्तव्यम् । सत्त्वमप्यर्थाधिकाराश्रयणेन परिहर्त्तव्यम् । अन्ये तु प्रियविश्वायोपसर्जनप्रतिषेधेनाप्येतीतिसद्धमिति न बहुव्रीहाविति सूत्रस्थ भाष्येण न कोपधाया इत्ययं योगः पुंवद्भावमात्रस्य विषये तत उत्तरमाद्यस्य योगस्य विषय इति न कोपधाया इति सूत्रस्थभाष्येण "सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्त्तिके, इत्यभियुक्तोक्त्या च संज्ञोपसर्जनप्रतिषेधोपि सूत्रकृत्संमत एव । अत एव बहुव्रीहिपदस्य तदर्थालौकिकवाक्यपरत्वं लक्षणया स्वीकृत्य त्वत्कपितृक इत्यादावकजभावः फलमित्युक्तं भाष्ये । तथा चात्र सूत्रकृद्भाष्यकृन्मते विरुद्ध एव । उत्तरमुनिस्मृतिश्च प्रबलेत्येव तत्त्वम् । विभाषा दिगिति सूत्रस्थं भाष्यं त्वेकदेश्युक्तिरित्याहुः । ननु सर्वार्थवाचकत्वं सर्वविश्वयोरेव नत्वन्येषामपीत्यत आह । प्रसिद्धसर्वीयेति । तथा च स्वप्रवृत्तिनिमित्तसमानाधिकरणकृत्स्नधर्माश्रयवाचकत्वं सर्वार्थवाचकत्वम् । मानाभावइति । तेन त्यदादीनीत्येकशेषोपि संज्ञोपसर्जनयोर्न । त्यदादीनि चेति वृद्धसंज्ञापि न । नामपदस्वारस्येनेति । घटपदं घटत्वस्य नामेत्यप्रयोगादिति भावः । पूर्वादिसंग्रहायेति । ननु दिग्वाचकपूर्वादीनां न स्वप्रवृत्तिनिमित्तसमानाधिकरणकृत्स्नधर्माश्रयवाचकत्वमिति चेन्न । सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित, इति प्रमाणानुरोधेन तत्तद्वर्षवासिनां सूर्योदयाधिकरणत्वेन परिदृश्यमानभागविशेषाणामेव तत्तद्देशवासिनः प्रतिपूर्वादिकृत्वाङ्गीकारेण सर्वार्थवाचकत्वोपपत्तेः । ननु द्वयोस्त्रिषु वा संकेतितसर्वादीनां सर्वनामसंज्ञा दुर्वारा सर्वार्थवाचकत्वादित्याशङ्क्याह । संज्ञाव्यावर्त्तये इति । अभिव्यक्तयेतिन्यायमूलकेति । नन्वस्य न्यायस्य यत्तदिति चेत्सत्यम् । अभिव्यक्तेति न्यायस्य पदकार्यविषयकत्वमन्यत्रोक्तं तु हेयमेव । तथा चायं न्यायः प्रातिपदिककार्यविषयोपि । अत एव संज्ञात्रिशब्दे त्रयादेशाभावः । युष्मदस्मद्भ्यां ङसोशित्यादौ

आत्वाद्यभावश्च । अयं निर्देशः प्रातिपदिककार्येत्येतत्प्रवृत्तेर्लिङ्गम् । सर्वनामपदवत्त्वांश एवेति । इमरांशस्तु योगार्थानुगुणानामेव संज्ञित्वसूचनायेति भावः । अन्यथा महासञ्ज्ञाकरणानुपयोगात् । एकपदोपस्थाप्ययोरिति । यत्तु परेषां कृतीष्टसाधनत्वयोर्लिङुपस्थाप्ययोः परस्परान्वयस्य दृष्टत्वाद्धातोः पृथक् फलव्यापारौ शक्यौ चेत्तयोरुद्देश्यविधेयभावेनान्वयापत्तिः । पृथगुपस्थिततयोस्तयोस्तथान्वयस्यौत्सर्गिकत्वादिति मञ्जूषायां फलव्यापारयोः पृथक् शक्तिवादस्य स्वयमपि दूषितत्वाच्चिन्त्यमेतदिति पाठकेनोक्तम् तन्न । कृतीष्टसाधनत्वयोर्लिङ्त्वाख्यातत्वादिरूपकृतावच्छेदकभेदेन शाब्दबोधविषययोस्तथान्वयाङ्गीकारेपीतरत्र तथान्वये मानाभावात् । मञ्जूषाग्रन्थस्तु पृथगुपस्थितयोस्तथान्वयस्यौत्सर्गिकत्वादेकपदोपस्थाप्ययोरन्वयाङ्गीकारे एवमन्वयः स्यादित्येवं परः । अत एव वषट्कर्तुः प्रथमभक्ष इत्यादौ भक्षप्राथम्ययोर्नोद्देश्यविधेयभावेनान्वयः । यद्यप्येवकारार्थयोरन्ययोगव्यवच्छेदयोः परस्परमन्वयोस्ति । तथा ऽपि नोद्देश्यविधेयभावे न सः । अगतिकगतिश्चेति न दोषः । निपातातिरिक्तनामपदोपस्थाप्ययोस्तथान्वयाङ्गीकाराद्वा । अन्यतरवियोगेनेति । यत्तु "अरिमेदः पलाशश्च बाहुः कल्पद्रुमश्च ते, इति पदश्लेषो दाहरणे ऽरीणांमेदः पलं चाश्नातीत्यरिमेदः पलाशस्तेबाहुररिमेदसञ्ज्ञकः पलाशसञ्ज्ञकश्च कल्पद्रुम इत्यर्थके परस्परमुद्देश्यविधेयभावेनान्यतरवियोगेनान्यत्रान्वयस्य दृष्टत्वादिदञ्चिन्त्यमत एव दुष्टपदं, श्रुतिकटु,च्युतसंस्कृतीति पददोषविशेषलक्षणं सूत्रे । ननु श्रुतिकटुप्रभृतिशब्दानां लक्षणपरत्वे विभागपरत्वाभावाल्लक्ष्यानुपस्थितौ कथं लक्षणवाक्यत्वनिर्वाह इत्याशङ्क्य रूढियोगाभ्यामुभयार्थोपस्थितौ लक्ष्यलक्षणयोरपि प्रत्ययः । यथा घ्राणरसनचक्षुस्त्वक् श्रोत्राणि इन्द्रियाणि भूतेभ्य इति गौतमीयेन्द्रियलक्षणसूत्रे इति काव्यप्रदीपकृता व्याख्यातमिति पाठकेनोक्तम् तन्न । अरिमेदपलाशशब्दौ हि योगरूढौ मण्डपादिशब्दवत् । न तु योगरूढौ रूढौ वृक्षयोर्मेदः पलानशितृत्वात् । स सर्वनामशब्दस्तु योगरूढः । योगरूढस्थले च शेखरोक्तो नियम इति नोक्तश्लेषोदाहरणविरोधः । काव्यप्रदीपकृदुक्तिस्तूक्तनियमविरोधेन प्रौढिवादरूप इति दिक् । ननु सर्वनामपदस्य योगरूढत्वेन तदनुगुणानामेव सञ्ज्ञित्वकल्पनात् । नतूपसर्जनादीनां सर्वादीनां गणाद्बहिर्भावस्तथाचातिसर्वायेत्यादौ समुदायस्य सञ्ज्ञा दुर्वारा ।

तस्य प्राधान्येन स्वीयप्रकृतिनिमित्तवत्सर्वोपस्थापकत्वादित्याशङ्क्याह । तदन्तस्वेइति । अवयवद्वारेति । व्याख्यानादन्तावयवद्वारोक्तसर्वार्थवाचकानामेव सञ्ज्ञित्वकल्पनायामुपसर्जनस्य सर्वादिबाहिर्भाव अर्थादापतितः । योगार्थानुगुणत्वेन तस्यतत्त्वे मानाभावादिति भावः । येन विधिरिति सूत्रे कैयटे नोक्तं पक्षं दूषयति । एतेनेति । आक्षेपम्विनैवोक्तरीत्या निर्वाहसम्भवेनेत्यर्थः । इतो ऽस्तुरिति । वस्तुतः प्राप्ताप्राप्तविवेकन्यायायनुसन्धानादाद्यपक्षोप्येतत्पक्षसम एव । इतरविशेषणत्वेनार्थोपस्थापकत्वमिति । तेषां घन इत्यादौ तु तच्छब्दस्येतरविशेषणतया स्वार्थबोधकत्वे ऽपि न तथोपस्थितिजनकत्वं उपस्थिते शक्तिग्रहासमानविषयत्वात् । नन्वेवं परस्मैपदं परस्मैभाषा इत्यादौ स्मै भावो न स्यादिति चेन्न । अन्तरङ्गत्वेन स्मायादिषु कृतेष्वेव समाससञ्ज्ञाप्रवृत्तेः । समासस्य विप्रयोजकत्वाभावेनान्तरङ्गानपीति न्यायाविषयत्वात् । राजकुमारीपुत्र इत्यादौ ह्रस्वधारणप्रकारेण निर्वाहसम्भवाच्च । अत्र सञ्ज्ञोपसर्जनीभूता इति वार्त्तिकारम्भादन्वर्थसञ्ज्ञाश्रयणमेव श्रेयः सञ्ज्ञोपसर्जनीभूतप्रथमचरमादीनां सञ्ज्ञाव्यावर्त्त्य इति बोध्यम् । नावयवानामिति । केचित्तु मासपूर्वायेत्यादौ स्मायादिवारणाय विहितविशेषणाश्रयणे गौरवात्सप्तमीनिर्देशानुरोधाच्च तृतीयासमासे विद्यमानसर्वादीनां निषेधः स च पूर्वोक्तरीत्या पाठाद्बाहिर्भावद्वारैवेति सर्वाद्यन्तत्वप्रयुक्तसर्वनामसञ्ज्ञासमुदाये न प्रवर्त्तते । स्पष्टं चेदं विभाषा दिगिति सूत्रे वृत्तिपदमञ्जर्योः । अत एव भाष्ये ऽत्र सूत्रे समास इति वर्त्तमाने पुनस्तदुपादानं योगविभागेन वाक्ये निषेधार्थमित्युक्तम् । प्रथमार्थकसप्तमीनिर्देशे तु तदनुपपत्तिरित्याहुः । अवयवस्यानिषेधेफलाभावइति । के चित्तु विहितविशेषणानाश्रयणे एवं सति संभवतीति वर्णाश्रमेतराणामित्यादौ सुडभावस्तत्फलमित्याहुः । अन्यथातवेति । अवयवनिषेधवादिनस्तथेत्यर्थः । अतएवेति । उक्तरीत्या ऽवयवेभ्यः पृथक् तदनुत्पत्तेरेवेत्यर्थः । अन्यथा समुदायस्य शीभावे कर्त्तव्ये एव विकल्पोप्यवयवस्य नित्यसर्वनामसञ्ज्ञामाश्रित्याकचो दुर्वारतया तदसङ्गतिः । मम त्ववयवस्य सर्वनामत्वेपि तदभावे कुत्सान्वयाकजभावः । समुदायकुत्सामादाय तु नाकच् समुदायस्यासर्वनामत्वादिति भावः । नन्ववयवकुत्साविवक्षाया उक्तरीत्या ऽभावे ऽकचः प्राप्तिरेव नेति शीभावं प्रति विभाषा ऽकज्झि न भवति इति भाष्यं पुनरसङ्गतमेवेत्यत

आह । समुदायेति । यद्वा त एवेत्यस्यावयवमात्रस्य निषेधाभावादेवेत्यर्थः । तथात्वे हि सर्वाद्यर्थकसर्वाद्यन्तत्वेन समुदायस्य नित्यसर्वनामसञ्ज्ञायामकच्स्यादेवेति भाष्यासङ्गतिः । अकज्झिनभवतीति । ननु कृताकचा समासेनानेन विकल्पः । अज्ञाताद्यर्थकत्वेनासर्वार्थकत्वात् । पूर्वं द्वन्द्वे जसि सर्वनामसञ्ज्ञा विकल्पे पश्चादवयवकुत्सामादायाकचि शीभावविकल्पघटितं रूपमित्यवयवकुत्साद्यर्थकाकजभिप्रायकत्वमप्यकज्झि न भवतीति भाष्यस्य संभवतीत्याशङ्क्याह । तत्रेति । मानाभावाच्चेति । अन्ये तु दाण्डिनायनसूत्रे स्वरसर्वनामैकश्रुत्या द्वयोरैक्ष्वाकशब्दयोरिवोदात्तानुदात्तयोस्त्वशब्दयोः सकृत्पठितेन ग्रहणे सिद्धे च त्वेत्युभयपाठः एकस्य तान्तत्वे मानमित्याहुः । जराया जरसन्यतरस्याम् । अकृपरिमाणस्येति । परिच्छिन्नपरिमाणस्येत्यर्थः । स्थानिबुद्ध्यैवेति । नचैवं लावस्थायामप्यपिबदित्यादौ आगमिबुध्या साट्कस्य पिबादेशापत्तिरिति वाच्यम् । उक्तयुक्त्या निर्दिश्यमानत्वाप्राप्तावपि पादः पदिति सूत्रस्थभाष्यप्रामाण्येन सागमस्य निर्दिश्यमानत्वानङ्गीकारात् । अन्ये तु निर्दिश्यमानत्वं स्वबोध्याघटितत्वे सति स्वबोध्यत्वम् । तच्च सागमके तदन्ते च न । आदेशे त्वस्त्येवेति तत्र निर्दिश्यमानपरिभाषयाऽऽदेशवारणम् । यद्वा स्वंरूपमित्येतद्भिन्नशक्तिग्राहकशास्त्राननुसंधानकालीनस्थानषष्ठ्यन्तपदजन्योपस्थितिविषयत्वरूपं निर्दिश्यमानत्वमादेशेपि । यदागमन्यायोपि शक्तिग्राहक एव । अस्य च्वावित्यादौ जातिपक्षेऽथवा यतः षष्ठ्युच्चारिता तत्त्वतत्स्थानिकत्वान्यतरत्वम् तिसृणामित्यत्र तिस्रादेशे कृते त्रयादेशाशङ्कापरभाष्यप्रामाण्यादित्याहुः । वैचित्र्यायेति । न च पदत्वभत्वयोर्द्वयोरननुसंधानेपि नापि निर्जरसेत्यादिसिद्धेरतस्तयोरलेखः । अन्ये तु दद्भ्यां माभ्यामित्येतदर्थं स्वादिष्वित्यस्यावश्यपाठ्यतया दत्त इत्यादौ जश्त्वशङ्काया यचि भमित्यपि पाठ्यमिति विशेष इति वाच्यम् । तथा सति शिवोर्च्ये इत्युदाहरणे प्रथमयोः पूर्वसवर्णे नादिचीत्यनयोरनुपन्यसनीयत्वापत्तेः । तदभावपक्षे तस्याप्राप्तेरिति । अभावपक्षोपक्रमे पुनर्भावपक्षस्वीकारायोगादिति भावः । तस्याप्राप्तेत्यस्य । जरसादेशस्याप्राप्तेरित्यर्थः । पाठकस्तु तस्याप्राप्तेति पाठं स्वीकृत्य संनिपातपरिभाषाया अप्राप्त्येत्यर्थमाह । ध्वनितंचेदमिति । नपुंसकाद्वितीयैकवचने जरसभाव इत्येतदर्थमित्यर्थः । भवितव्यमिति । उक्तमिति शेषः प्रश्लेष आवश्यक इत्युत्तरमित्याहुः । परत्वेत्यपपाठः । विभक्त्यादेशानामिति । पूर्वोक्तो-

पदलक्षणविभक्तिसंबन्धिकार्यमात्रस्येत्याह । विभक्तिसम्बन्धीति । इत्याहुरिति । अन्ये तु नुम्जरसाविति वार्तिके नुम्पदं लक्षणया नुम्शीभावोभयपरम् । यद्वा नित्यत्वात्पूर्वं शीभावः जरसादेशस्तु न नित्यः । शीभावे कृते नुमि तदप्राप्तेरिति शङ्कापरिहाराय शीभावोत्तरमपि विप्रतिषेधेन जरसः प्राप्तिरिति भाष्यकृतोक्तम् । न तु शीभावोत्तरमेव जरसित्याशयेन । अयं विप्रतिषेधोपन्यासः जरसो नुमा समबलतामभ्युपेत्य । वस्तुतो जरसादेशः सर्वविधिभ्यो बलवान् जरसो ऽवकाशो जरसा जरसेइति जराया इति सूत्रस्थभाष्यप्रामाण्यात् । अन्यथा जरस इत्यत्र जरसादेशात्परत्वाद्याडाप इति याडिति तदसङ्गतिः । एवं च विभक्तिसंबन्धिकार्यमात्रं पूर्वविप्रतिषेधेनेत्यस्य क्वावकाशः । जरसादेशस्य सर्वतः प्रबलत्वात् । एतेन एवं स्त्रियां जरसादेशे कृते इत्यारभ्य तथां परत्वादित्यन्तो ग्रन्थो निरस्तो वेदितव्यः । तथा च पुंसि निर्जरेण निर्जरसेत्यादिरूपं स्त्रियां जरायै जरस इत्यादि भवति । नचैवं टाङसीति सूत्रस्थकैयटासंगतिरिति वाच्यम् । वैकल्पिकत्वेन प्रथमं जरसादेशाभावे इनादेशे कृते पश्चात्प्राप्तस्य जरसः सन्निपातपरिभाषया वारणमित्याशयात् । न चाऽभावोपक्रमे पश्चान्न भावपक्षादरणम् । अन्यथा शिश्वियतुरित्यादौ द्वित्वोत्तरं विभाषा श्वेरिति संप्रसारणापत्तिरिति वाच्यम् । अकारनिमित्तकस्य जरसो ऽभावोपक्रमेपि इकारनिमित्तकस्याभावानुपक्रमात् । शिश्वियतुरित्यादौ तु शिबुद्ध्यैव पश्चात्प्रवृत्तेर्विशेषः । नपुंसकाद्वितीयैकवचने तु जरसादेशो भवत्येव । अथेह तु कस्मान्न भवति अतिजरसं पश्येति भाष्यात् । अम्लुग्भ्यां जरसः परत्वाच्च । न च लुकः सर्वविधिभ्यः प्राबल्यं वहिरङ्गलुक एव तथात्वात् । स्वमोरिति सूत्रस्थं त्यदादिभ्यश्चेति वक्तव्यमिति वार्तिकं मानं तेन भवतादित्यत्र लुकं बाधित्वा तातङ् । अतिजरमतिजरैरिति भवितव्यमित्याग्रिमभाष्यं तु प्रथमैकवचनाविषयम् । ध्वनितं चेदं जराया इति सूत्रे भाष्ये यथा हि । अथेह लुकस्मान्न भवति अतिजरसं पश्यति पूर्वपक्षिणा शंकितं ततः पूर्वपक्षिणा ऽस्त्यत्र विशेषः । नाकृते ऽम्भावे जरसादेशः प्राप्नोति किं कारणमचीत्युच्यते । न चायं परिहारः द्वितीयैकवचनेत्यवशिष्ट इति वाच्यम् । अनवबोधात् । किं कारणमचीत्युच्यत इत्यन्त एव विशेषप्रतिपादनपरो नात्र सः । तस्य चायमाशयः । अतोमित्यम्प्रवृत्तिं विना न जरसभावः सोर्हल्ङ्यादित्वात् । अम्भावे तु न लुक् । अमा बाधितत्वात् । अमा

बाधितस्यापि पुनः प्रवृत्तौ ज्ञानमित्यत्रापि तदापत्तिरिति । न च जरसादेशार्थे सोरम्विधाने ऽकारादेशविधानेनैव सिद्धावम्विधानवैयर्थ्यात् । ततो द्वितीयैकवचने लुकं समाधत्ते सिद्धान्ती । यदा च जरस् भावः कृतस्तदा लुङ् न भविष्यति। सन्निपातलक्षणो विधिरनिमित्तमिति । यदाचेत्यास्यामं लुकं च बाधित्वा परत्वादिति शेषः । ततः पुनः पूर्वपक्षी प्रथमैकवचने तृतीयाबहुवचने च शङ्कते । यद्येवमति। जरसा ऽतिजरसैरिति न प्राप्नोति । अतिजरमतिजरैरिति भवितव्यमिति। लक्ष्यानुरोधाज्जरसादेशविषये सन्निपातपरिभाषा नाश्रीयत इति तद्भावः । ततः सिद्धान्त्याह । गोनर्दीय आह इष्टमेवैतत्संगृतमित्यादि । किं कारणमचीत्युच्यते ऽअम्भावे कृते सन्निपातपरिभाषया न जरसिति नव्योक्तपाठोत्तरं तु भाष्यपुस्तकेषु क्वापि नोपलभ्यते । पूर्व ग्रन्थासंगतेश्च प्रथमैकवचने ऽतिजरसं तिष्ठती त्यत्र लुक् कुतो न शङ्कित इति तटस्थेन शङ्किते सन्निपातपरिभाषया जरसादेशाप्रवृत्त्योक्तरूपमेव दुर्घटमिति समाधानस्य पाठान्तरकल्पनया भवदभिप्रेतस्य प्रतिपादनायास्त्यत्र विशेष इत्युक्त्यसंगतेः । तथोक्त्या हि अतिजरसं तिष्ठतीति रूपं स्वीकृत्य विशेषमात्रमभिधित्सितमिति प्रतीयते । किं चास्त्यत्र विशेषः । नात्राकृते ऽम् भावे जरसा देशः प्राप्नोति किं कारणमचीत्युच्यतेऽम्भावे कृते सन्निपातपरिभाषया न जरसिति भवत्कल्पितपूर्वभाष्येण प्रथमैकवचने ऽम्भावोत्तरमेव जरस् प्राप्नोति । द्वितीयैकवचने त्वमादेशात्प्रागेव परत्वाज्जरसिति लभ्यते । तच्च विभक्त्यादेशाः । पूर्वविप्रतिषेधेनेति वदतस्तव विरुद्धम् । यद्येवमतिजरसमतिजरसैरिति न प्राप्नोतीति भाष्यस्य भवदुक्तं द्वितीयैकवचनाभिप्रायकत्वमपि न युक्तम् । यद्येवमिति पदस्वारस्येन पूर्व ग्रन्थोक्तं युक्तिमुपजीव्येयं शङ्केति प्रतीयते । पूर्वग्रन्थार्थश्चोक्तरीत्या ऽति जरसं पश्येत्यादावमादेशात्पूर्वं जरसः प्रवृत्तिः । तदङ्गीकारे च द्वितीयैकवचने कथं सन्निपातपरिभाषया जरसादेशाभावः । किं च द्वितीयैकवचने लुकि पूर्वपक्षिणा शङ्किते ततः परेण प्रथमैकवचने लुक् कुतो न शङ्कित इति पृष्टे ऽस्त्यत्र विशेष इति पूर्वपक्षिणा विशेषे प्रतिपादिते पश्चात्प्रवृत्तो यद्येवमिति ग्रन्थो नं तावत्पूर्वपक्षिणः । तेन जरसादेशमङ्गीकृत्यैव लुक आपादनात् । नापि तटस्थस्येष्टमेव ह्येतत्संगृहीतमित्यग्रिमभाष्यासङ्गतेः । अतिजरसैरित्युपन्यासासङ्गतेश्च । नापि सिद्धान्तिनः । तेन जरसादेशाभावप्रतिपादनद्वारोक्तरूपस्यैव

खण्डनीयतया ऽतिजरसमिति न प्राप्नोतीत्यनिष्टापादनासङ्गतेः । अत एव ह्याप्ग्रहणे ऽदीर्घ इतिवदित्याद्यप्ययुक्तम् । अदीर्घपदेन दीर्घभिन्नजरसोपि ग्रहणात् । दीर्घभिन्नस्य ह्रस्वस्यैव ग्रहणे तु चित्रायां जातश्चित्र इत्यादौ हल्ङ्यादिलोपयाडागमाद्यापत्तिरित्याहुः । पद्दन्नोमास् । अन्यतरस्यामित्यस्यानुवृत्तिं दूषयित्वा स्थानुरूपाः स्थानिन आक्षिप्यन्त इत्युक्तमपि दूषयितुमाह । शिरसो ग्रहणं कर्त्तव्यमित्युक्तमिति । विकल्पानुवृत्तौ दूषणान्तरमाह । वाकेशेष्विति । ये च तद्धित इत्यत्रैव वा केशेष्वित्यारम्भेणान्यतरस्यां ग्रहणस्याननुवृत्तेरुत्तरत्र मण्डूकप्लुत्या तदनुवृत्तेश्च कल्पनामपेक्ष्य सर्वथा तस्यास्वरितत्वकल्पनैव न्याय्येति भावः । ननु याडादीति । ह्रस्वनद्याप इत्यत्र न प्रश्लेष इत्यभिमानेनेदम् । जरसामित्यादौ नुडभावार्थं तु प्रश्लेष आवश्यक इत्युक्तं तु न विस्मर्तव्यम् । व्याख्यानादिति । अन्त्यत्वप्रयुक्ता यस्येत्सञ्ज्ञेति व्याख्यानात् औटष्टकारेणैव प्रत्याहारो न तु टाटकारेणेत्यर्थः । प्रथमैकवचनमिति । सप्तमीबहुवचनग्रहणे ऽसर्वनामस्थान इति व्यर्थं स्यादित्यर्थः । व्याख्यानादिति । तदुत्तरं प्रत्ययाभावाच्च । कप्रत्ययावधीत्युक्तौ कप्रत्ययस्य न स्वादिषु ग्रहणमिति प्रतीयते अत आह । तदन्तेष्विति । नपदान्तसूत्रस्थइति । तत्र हि वेतस्वानित्यत्र रुत्वमाशङ्क्य भत्वेन समाहितं तत्र च भसञ्ज्ञाया रुत्वप्रतिबन्धातिरिक्तं न किञ्चित्कार्यम् । व्याप्त्यर्थेति । ननु मर्यादार्थकाङा उवार्थादिति निर्देशेपि न कोपि दोष इति चेन्न । समाहारे द्वन्द्वबहुव्रीहिसञ्ज्ञयोः समावेशापत्तेः । वक्तुंयुक्तमिति । नतूक्तं वर्णगौरवात्पदगौरवस्य गरीयस्त्वादिति पाठकः । सख्यावाच्येकशब्दोपादानादिति । वस्तुतस्तु दीक्षितो नव्यश्च द्वावपि स्थूलदृश्वानौ केवलार्थैकशब्दस्यैवात्र ग्रहणात् । कैवल्यं हि सजातीयसञ्ज्ञान्तरासमानाधिकृतत्वम् । एकाकी तिष्ठतीत्यादौ तथा प्रतीतेः । ननु परत्वानवकाशत्वाभ्यामेव बाधसिद्धौ आकडारादेकेति व्यर्थमित्याशङ्क्याह । आभ्यामेवेति । परत्वानवकाशत्वाभ्यामेवेत्यर्थः । अन्यत्राकडारीयविषय सञ्ज्ञाभिन्ने । लोकेसञ्ज्ञाविषयइति । ग्राम इति सञ्ज्ञाया वारणसीति सञ्ज्ञायाः कृष्णदेवदत्तादिसञ्ज्ञया वृष्ण्यन्धकादिसञ्ज्ञायाश्च बाधादर्शनादित्यर्थः । आकडारेइति । तेन धनुषाविध्यतीत्यत्र न पञ्चमी । विरोधाभावेनेत्युक्त्या तत्स्पष्टत्वात् । पर्यायापत्तिर्दोष इति । इदम-

शुक्तम् । विप्रतिषेधे परमिति परकार्यस्यैव प्रवृत्तेः । वाच्यसामान्यचिन्तयेति । अत्र च सिति चेति सूत्रं मानम् । तद्धि भवदीय इत्यादौ पदत्वार्थम् । अन्तरङ्गत्वात्सुप्तिङन्तमिति पदत्वे तु तद्वैयर्थ्यम् । नन्वाकडारीयसज्ञयोः कार्यकालत्वे एकदेशस्थत्वेन या परेत्यसङ्गतमित्याशङ्क्याह । आकडारस्थेति । णलुत्तमोवेति । पुरुषसञ्ज्ञा तिङ्षु परस्मैपदसञ्ज्ञाया बाधिका ऽपवादत्वात् । परस्मैपदसंज्ञा तु शतृक्वसोश्चरितार्था । तथा च परस्मैपदानामित्यनेन शतृक्वसोरेव णलादेशः स्यात् । तस्य च स्थानिवद्भावेनोत्तमत्वाभावात्तदसंगतिरिति भावः । इदमुपलक्षणं तयोः समावेशे सिचि वृद्धिरित्यपि ज्ञापकं बोध्यम्। एकदेशिनएवेति । इदमयुक्तम् । इशब्दस्य तदन्तसंज्ञापक्षेपि समानावधिकया लघुसंज्ञया परत्वाद्बाधेन घित्वानापत्तेः । घिसंज्ञा तु हरिशब्दे चरितार्था तत्र भिन्नावधिकत्वेन द्वयोः समावेशात् । अस्य स्त्रीईत्यत्र गुरुसंज्ञाया बाधेन नदीत्वानापत्तेश्च । तस्मादेरत्रित्यादिनिर्देशैस्तयोः समावेशो भवता वाच्यः । स च समो वर्णसंज्ञापक्षेपि । तथा हि वेतस्वानित्यादौ भसंज्ञाया इवादीदपदित्यादौ अभ्यासेकारस्य घिसंज्ञायां दीर्घो लघोरित्यस्य वैयर्थ्यापत्त्या तद्बलेन तयोः समावेशकल्पनात् । पञ्चमीसमासाश्रयणादिति । परस्येत्येतदर्थान्तर्भावेण वृत्तिः पञ्चमी भयेनेत्यत्र पञ्चमीति योगविभागेन भाष्यकृता तत्पर इत्यत्र पञ्चमीसमासाश्रयणादिति भावः । दीक्षितेन पञ्चमीसमासोदाहरणस्यापी पचन्नित्यस्य विदिसाहर्येण लङ एव झेर्जुसमाश्रित्यान्यथा साधनात्पंचमी समासस्य लङि जुस्वारणप्रयोजनमाह । तेनेति । अतएवेति । एवं जातीयस्थले जुसो ऽनिष्टत्वादेवेत्यर्थः । इदमुपलक्षणम् । अविन्दन्नित्यादौ सिजभ्यस्तेति जुसभावोपि फलम् । ननु झेरित्यत्रेकारो ऽविवक्षितः । तथा च ङितो झस्य जुसिति वाक्यार्थः । इतश्चेतीकारलोपे झमात्रस्यैव ङित्त्वादिसंभवात् । तथा च प्रत्यैपिषन्नविन्दन्नित्यादौ न दोषः झत्वस्यालूवृत्तित्वेन स्थानिवद्भावेनानेतुमशक्यत्वात् । एवं च पञ्चमीसमासस्योदाहरणं मृग्यमिति चेत्सत्यम् । पञ्चमीसमासानित्यत्वे ज्ञापकमाह । प्रविगणय्येति । निष्ठायां सेटीत्यत्र सेड्ग्रहणमप्यत्र ज्ञापकं बोध्यम् । तद्धि कारितमित्यादाविटि कृत एव णिलोपो यथा स्यान्न ततः प्रागित्येतदर्थम् । पूर्वं णिलोपे हि एकाजिति निषेधादिण् न स्यात् । पञ्चमीसमासस्य नित्यत्वे हि पूर्वं णिलोपेपि तस्य स्थानिवद्भावादेवेण्निषेधाप्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेव । केचित्यादि आहुरि-

त्यन्तो ऽपपाठः । स्थानिवद्भावलब्धाकारस्यैव प्रविगण्येत्यादौ व्यपदेशिवद्भावेन लघुपूर्वत्वस्वीकारे प्रचिकीर्षेत्यादावयादेशापत्तेः । अन्तरङ्गपरिभाषावारणायाह । वतिघटितेति । इदमयुक्तम् । न लुमतेति निषेधानित्यत्वेन सुप्परत्वमादाय त्वन्मतेपि सूत्रेण सिद्धिसम्भवात् । तदनित्यत्वस्यागतिकगतित्ववत् शब्दत्वेन सादृश्यमादाय पदादि प्रवृत्तिरपि अगतिकगतिः । भाष्यपठितेति । इदमप्ययुक्तम् । नासिकाशब्दप्रयोगाभावाय तदावश्यकत्वात् । तस्याइति । व्यवस्थाया इत्यर्थः । नलुमतेति निषेधाऽनित्यत्वे न सर्वत्र सुप्परत्वादिति भावः । पादःयतीत्यादौ पद्भाववारणाय सुप्येव पदादय इति व्यवस्थार्थं तच्चारितार्थ्यादयुक्तमेतत् । नन्वेवं सूत्रवैयर्थ्यं प्राप्नोतीत्यत आह । तत्वेपीति । अनादेशत्वेपीत्यर्थः । आवश्यकत्वादिति । एतेन पादशब्दात् हृदयशब्दात्सौ तन्निमित्तके पद्हृदादेशे सान्निपातपरिभाषया लोपलुकौ न स्यातामित्यपास्तम् । ननु कोशे पद्हृदादिवत् नसमासादयोपि कुतो नोक्ता इति चेन्न पदादीनामिव तेषां सर्वनामस्थानप्रयोगाभावादित्यवेहि । ननु कोशशब्दानां लोकप्रसिद्धशब्दानुकरणत्वेन शब्दपरत्वादभिव्यक्तपदार्था य इति न्यायेन पदाद्यप्रवृत्तिसम्भवात्पदङ्घ्रिः स्वान्तं हृदित्यादेः प्रकारार्थत्वप्रयोजनस्योक्तिरसङ्गतेत्यत आह । कोशेशब्दाइति । अर्थपराएवेति । अनुकरणत्वे प्रमाणाभावादिति भावः । ननु तत्तदर्थे शक्तिग्रहस्य कोशाधीनत्वात् शक्तिग्रहमन्तरेणार्थपरत्वासम्भवात्कोशस्थशब्दानामर्थपरत्वं शशविषाणसदृशमतआह । शक्तिग्रहस्त्विवति । सामान्यतइति । अर्थविशेषापुरस्कारेणेत्यर्थः । इदं पदमर्थबोधकं पदत्वात् गोपदवदित्यनुमानं बोध्यम् । एवञ्चेति । अनेनानुमानेन सामान्यतो विष्णुपदार्थोस्तीति ज्ञाने विष्णुपदश्रवणेन तत्स्मरणत्वे इत्यर्थः । इतिक्रमेणेति । कोशस्थं पर्यायेष्वेकं पदं विशिष्यार्थबोधकम् विदितशक्तिकैकपदम् पुरुषं प्रत्येव कोशस्य शक्तिग्राहकत्वादत आह । स्वस्वप्रसिद्धेति । तत्तत्पुरुषस्येति । कं चित्पुरुषं प्रति विष्णुपदमर्थविशेषे गृहीतशक्तिकमन्यं प्रति नारायणपदम् तथेति भावः । अत्र भाष्यं प्रमाणयति । अतएवेति । इदमुद्गीताधिकरणस्थ शङ्करभाष्योपलक्षणम् । तत्र हि सामानाधिकरण्यं चतुर्धा ऽध्यासेनापवादेनैकत्वेनेति । अध्यासनयथा । इयं प्रतिमाविष्णुरिति, । अपवादेन यथा नेदं रजतमि, त्येकत्वेन यथा द्विजोत्तमो

ब्राह्मणो भूदेव, इति । विशेषणत्वेन यथा । नीलमुत्पलमित्युदाहृतम् । तत्रैकत्वोदाहरणे उक्तरीतिः स्पष्टैव । कोशतात्पर्यादिति । तथा च भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः । कृतोऽत्र भिन्न लिङ्गानामनुक्तानां क्रमादृत इति कोशकारैः परिभाषितम् । अस्यार्थः । भेदस्य लिङ्गभेदस्य स्वरूपभेदस्य चाख्यानाय द्वंद्वैकशेषसंकरा न कृता इति । लिङ्गभेदाख्यानाय ह्रादिनी वज्रमस्त्री स्यात्कुलिशमित्यस्य स्थाने कुलिशह्रादिनीवज्रा इति द्वन्द्वः । सहो बलं सहामार्ग इत्यस्यापवादः भिन्नलिङ्गानामनुक्तानां क्रमादृत इति । भिन्नलिङ्गानामिति भिन्नस्वरूपाणामुपलक्षणम् । तेन समानलिङ्गानां समानस्वरूपाणां द्वन्द्व एकशेषश्च कृत एव । यथा । स्वर्गनाक त्रिदिवत्रिदशालया इति । पादा रश्म्यङ्घ्रितुर्यांशा इति च । अनुक्तानामित्यनेन जनयित्रीप्रसूर्माता । तातस्तु जनकः ऽपितेति स्थानान्तनिर्दिष्टानां द्वन्द्वैकशेषौ कृतावेव । मातापितरौ पितराविति । एतेन खं नभः श्रावणो नभा इत्यत्र खश्रावणौ तु नभसी इति न कृतमिति मञ्जूषोक्तमपास्तम् । नभोन्तरिक्षङ्गगनं नभाःश्रावणिकश्च स इत्येवं स्वस्वपर्यायेषु पठितत्वात् । क्रमादृत इति क्रमःप्रस्तावस्तंविना संकरो न कृतः । सति प्रस्तावे संकर एव । यथेन्द्रादि प्रस्तावे मेरुः सुमेरुरित्येवमादिरूपेण गिरिवर्गादिभ्यः कृष्यसंकरो न कृतः । सति प्रस्तावे संकरः कृतः । ननु विष्णुपादार्थाभिन्नो नारायणपदार्थ इत्यादिबोधे एकशेषो न प्राप्नोति । इदित इत्यादि निर्देशेन सहविवक्षायामेव तत्प्रवृत्तेरिति चेन्न । करीरादि पदार्थानामप्रसिद्धानां मिलितानां प्रसिद्धघटपदार्थेन्वयभेदेनान्वये घटः करीरः कलश इत्यादौ करीरादिपदानामेकशेषापत्तिरित्याशयात् । पाणिनिनेति । प्रकृतिवदनुकरणमित्यदेशे अत्वकरणवदेकशेषाकरणादिति भावः । एतेनेति । उत्तरपदे इत्यस्य सप्तम्यन्तत्वाभावेनेत्यर्थः । इत्यदन्ताः । भाष्यानुक्तक्विब्भ्य इति । एतेन ध्यायते धीरित्युपपन्नम् । ईत्वं न कृतमितीति । इदमप्राधान्येन वर्णाश्रये प्रत्ययलक्षणमिति वार्तिकमतेन । वस्तुतस्तु शंस्था इत्यत्र क्विपि ईत्वापादनं न तावद्वार्तिकमतेन । तेन ईत्वमवकारादाविति निषेधारम्भात् । नापि भाष्यमतेन । तेन वर्णाश्रये प्रत्ययलक्षणानङ्गीकारात् । तदेतदभिप्रेत्याह । अन्येत्विति । दीर्घविधायकेति । नन्वेवं रामानित्यत्र दीर्घे कृते आतो ऽनाप इति लोपापत्तिरिति वाच्यम् । आतो ऽनाप इत्यनेनाकारान्तादङ्गाद्विहिते भसञ्ज्ञानिमित्ते प्रत्यये लोपविधानेनादोषात् ।

एवं राभाणामित्यादावपि वक्ष्यमाणरीत्या दीर्घे आतो लोपो नेति बोध्यम् । इत्यादन्ताः । यूइतीति । पूर्वसूत्रे तस्य दीर्घपरत्वेपि शब्दाधिकारादत्र ह्रस्वपरत्वम् । ह्रस्व इत्यनेन समानाधिकरण्यानुरोधात् । तदेतदभिप्रेत्याह । अनुवृत्तयुभ्यामिति । अनवकाशत्वादिति । ननु गवाम्पत्यै ब्राह्मण्यै इत्यत्र पतिःसमास एवेति नियमेन घित्वाप्रवृत्तौ चरितार्था नदीसञ्ज्ञा मत्यै इत्यादौ परत्वाद् घित्वेन बाध्यते । अत एव ऊदुपधाया गोह इति सूत्रे उऊदिति प्रश्लेषमाश्रित्य गोह इति विकृतनिर्देशः प्रत्याख्यातो भाष्ये । तत्र हि । निजुगुहतुरित्यत्र चरितार्थमुत्वं बाधित्वा गूहयतीत्यादौ परत्वाद् गुणे आन्तर्याद्दीर्घ ऊकार इत्युक्तम् । निजुगुहतुरित्यादौ गुणस्य प्राप्तिसत्त्वेप्युत्वस्य तदपवादत्वमनाश्रित्येदं भाष्यं प्रवृत्तमिति स्पष्टमेवेति चेत्सत्यम् । नन्वधिकारादित्यसङ्गतम् । एतस्य परिभाषात्वात् । अधिकारत्वे हि प्रतिसूत्रे संबन्धकल्पनागौरवम् । बहुषु बहुवचनमित्यादौ तदसंबन्धाय मण्डूकप्लुतिकल्पनेऽतिगौरवमित्यत आह । बुद्धिस्थत्वादित्यर्थइति । स्पष्टतयेति । शब्दस्वरूपं विशेष्यमध्याहृत्य तदन्तविधिस्तु कल्पनीयत्वादस्पष्ट इति भावः । नमुनेइति । न मुने इत्यत्र नेत्यकारस्तूच्चारणार्थ इति भावः । वार्तिकविरोधादिति । पूर्वपक्षिणो वार्तिकविरोधस्याकिञ्चित्करत्वादिदमयुक्तम् । अमुनाघटेनेति लक्ष्यासिद्धेरिति तु वक्तुं युक्तम् । नीतिनोक्तमिति । ने इति निर्देशस्तु शब्दस्वरूपस्य विशेष्यत्वेन नपुंसकत्वमाश्रित्य तस्यापि नुमोपि ज्ञानगौरवमिति । नन्वाङो नुट् पुंसीति न्यासोस्तु न मुने इत्यत्र च न मुनीत्येव च न्यासोस्त्विति चेन्न । अमुष्मै कुलायेत्यादौ मुत्वस्य सिद्धत्वेन नुमापत्तेः । ननु नुम्विधिं प्रति सिद्धत्वेपि स्मायादेशं प्रत्यसिद्धत्वेन मुत्वात्पूर्वं स्मायादेशे कथं नुमः प्राप्तिरिति चेन्न । अने इत्यादौ मुत्वस्यासिद्धित्वेन सवर्णदीर्घस्येनादेशगुणयोर्वावारणाय नाभावे कर्त्तव्ये कार्यमात्रं प्रत्यसिद्धत्वनिषेधावश्यकत्वात् । सवर्णदीर्घस्मायादेशयोर्न्नुम् विघटकाविशेषात् । पररूपन्त्वन्तरङ्गत्वान्मुत्वात्पूर्वमेव प्रवर्त्तते । न मुने इत्यत्र मुनीति न्यासे तु आङो नुट् पुंसीति सुवचम् । नत्वस्येति । आङित्यस्यासञ्ज्ञात्वमनाश्रित्याङो नादेशविधानादेव ढकि लोप इत्यादौ विषयप्रत्ययस्याङादेशं विधाय तदीयङकारस्य नेत्वमित्यर्थः । एवमौङ इत्यत्रापि बोध्यम् । वार्तिकमनेपीति । अपिना भाष्यकृन्मतेपि । याटि कृते निर्दिश्यमानपरिभाषया

शीभावस्य प्रवृत्त्ययोग्यत्वेन खट्वायामित्यादावाट इव भाष्यकृन्मतेपि निरवकाशत्वेनेति न पाठः । पूर्वंशीभावप्रवृत्तेः । केचित्त्वङ्गस्येत्यनेन सामानाधिकरण्यायाबन्ताङ्गस्य निमित्तस्यौङः शीभावविधानात् कृतेपि याटि शीभावप्रवृत्तेः । भाष्यकृन्मते तक्रकौण्डिन्यन्यायादेव शीभावेन याटो बाध इत्याशय इत्याहुः । अल्विधित्वेनेति । ननु ङकारस्य वस्तुतो ऽनुबन्धत्वेनैतस्याप्यनुबन्धकार्यत्वमिति चेन्न । तथा सति प्रपठ्येत्यादाविडापत्तेः । त्काप्रत्ययककारस्यानुबन्धत्वेन स्थानिवद्भावेन वलादित्वस्य सुवचत्वात् । नन्वेवं तिविंशतेर्डिति, । ष्ठिवुक्लमुचमां शिति, अनुदात्तङित आत्मनेपदमित्यादावपीत्पदं व्यर्थमिति चेत्सत्यम् । ङसेरित्येवेति । न च द्विवचननिर्देशात् ङसोर्ग्रहणं स्यादिति वाच्यम् । अतीत्यस्यानुवृत्त्या दोषाभावात् । औतस्तकारस्योच्चारणार्थत्वादित्सञ्ज्ञां विनैव निवृत्तिः । अत एव न स्वरितत्वमिति प्राचीनोक्तं दूषयितुमाह । यादित्विति । स्वभावत एव निवृत्तिवादस्योभयत्रोच्चारणार्थे इत्सञ्ज्ञकेच । ननु तपरस्तत्कालस्येत्यनेन औकार एव विधेय इति न विभक्ताविति शङ्कासमाधाने निष्पले इति चेत्सत्यम् । ध्वनितइति । तत्र हि नान्नलोप इति न्यासे नन्दितेत्यादौ नलोप आपादितः । उक्तपरिभाषासत्वे तु न शब्दस्य प्रत्ययत्वाभावादेव नलोपाप्रसक्तौ तदसङ्गतिः । नेतिदिगिति । ननु तपरस्तत्कालस्येत्यनेनौकारमात्रस्यैव तस्य तित्वाभावात्स्वरितत्वशङ्का तत्समाधाने द्वे अपि निष्फले इति चेन्न । किमोदित्यत्रापि तथात्वापत्तौ क्वेत्यत्र स्वरितत्वानापत्तेः । यदि च तदर्थंतित्पदम् तिद्बोध्यपरम् । तदाप्रकृतेपि तदापत्तेः । नव्यमते ऽणुदित्सूत्रस्थभाष्यानुरोधेनानुबन्धाविनिर्मुक्तपदार्थोपस्थित्यङ्गीकारेण तित्पदस्य तद्बोध्यपरत्वस्यावश्यकत्वाच्च । तदेतदभिप्रेत्य तित्स्वरितमिति सूत्रे कैयटेति । ताप्रत्यायितसञ्ज्ञाधर्मेण सञ्ज्ञी कथ्यत इत्यस्ति तित्पदव्यपदेश आदेशस्येत्याद्युक्तम् । समुदायस्येति । नानर्थकेति परिभाषा त्वत्रैव सूत्रे भाष्ये प्रत्याख्याता । शस्येति । आस इति समुदायात्पूर्वत्वेपीति शेषः । अदृष्टार्थमिति । यत्तु पाटकेनोक्तं हल्ङ्याबिति सूत्रे हलन्तानां सुतिसीनामित्यर्थे हन्यादित्यादौ यासुड्विशिष्टस्य लोपः स्यादिति तन्न । सुतिसीनां तस्मादित्युत्तरस्येति परिभाषया यन्तत्वकल्पेनन निर्दिश्यमानपरिभाषाप्रवृत्तौ दोषाभावात् । व्यत्यादित्यत्र रुदिहीत्यत्रादः सर्वेषामङ्गार्ग्यगालवयोरि-

स्याभ्यामण् नेष्यत एव हल्ग्रहणात् । वस्तुतस्तु गुणोऽपृक्ते इत्यस्य हलादौ सार्वधातुके इत्यर्थे ऊर्णोतीत्यत्रापि गुणापत्तिः । नचोर्णोतेर्विभाषेत्यस्य वैयर्थ्यमिति वाच्यम् । सूत्रद्वयस्य विषयव्यवस्थाया एवानापत्तेः । एवमदः सर्वेषामित्यस्य हलादेः सार्वधातुकस्येत्यर्थापत्तौ अत्तिअत्तामित्यादावडापात्तिः । तस्मादपृक्तसञ्ज्ञासूत्रं दृष्टार्थमिति । ह्रेधेति । गोबष्कयणीबहुश्रेयसीत्याद्यर्थमिदम् । रामइत्यादाविति । राजेत्यादौ तु संयोगान्तलोपेन सिद्धिः । यद्वा हल्ङ्याब्भ्यः किमित्यस्य ङ्याब्भ्य इति किमर्थमित्यर्थः । समुदायद्वारा ऽवयवप्रश्ने तात्पर्यात् । इदितोरित्यर्थइति । सञ्ज्ञाविधौ प्रथमान्तयोरेवोपयोगात् । सख्यत्रयवभिन्नाविदुतावित्युचितम् । वर्णसञ्ज्ञापक्षे सूत्रार्थमुक्त्वा तदन्तसञ्ज्ञापक्षे तं वक्तुमाह । तदन्तेति । यज्ञमध्ये । ब्रह्मयज्ञमध्ये । अतएवासाधुत्वादेव । आद्यन्यासे दोषमाह । सुपतिनेति । द्वितीये दोषमाह । सुसख्येति । इदमुपलक्षणम् । पतिसुतान्वयानित्यादौ द्वन्द्वेघीति पूर्वनिपातोपि पूर्वन्यासेन सिध्येत् । उत्तरन्यासे च बहुसखिशब्दे घित्वं न स्यादित्यपि बोध्यम् । भाष्ये स्पष्टत्वादिति । तथा च भाष्यम् । बहुष्विति वक्तव्यम् । इह माभूत् कियान् न वक्तव्यम् किमेतत्परिप्रश्ने वर्तते परिप्रश्नश्चानिर्ज्ञाते । अनिर्ज्ञातम् च बहुषु । द्व्येकयोः पुनर्निर्ज्ञातम् । निर्ज्ञातत्वात् द्व्येकयोः परिप्रश्नो न परिप्रश्नाभावात्किमेव तान्नास्ति । कुतः प्रत्यय इति । स्वतन्त्रास्तु किमः प्रश्नार्थकत्वात्प्रश्नस्य च संशयपूर्वकत्वात्संशयस्य च तत्तद्धर्मावाधिकविषयकोटिकत्वात्तत्रैकत्व द्वित्वयोरिव त्रित्वादीनामपि परिस्फुरणात् द्वित्रा इत्यादाविव स्वौजसिति विभिसूत्रगतं परत्वमादाय बहुवचनम् । तथा च कति पुत्रा इति प्रश्ने द्वौ पुत्रावित्युत्तरं लोके कुर्वन्तीत्याहुः । बहुगण । नविंशदन्तेति । इदमुपलक्षणम् । त्यन्तपर्युदासोप्यत्र ज्ञापकः । यत्तु पाठकेनोक्तम् । त्यन्तपर्युदासो न ज्ञापकः कतिव्यावृत्त्याचरितार्थत्वादिति तत्तुच्छम् । भाष्यकृता त्यन्तपर्युदासे ऽर्थवतस्तिशब्दस्य ग्रहणमित्युक्तत्वेन विंशतिशब्द एव त्यन्तपर्युदासप्रवृत्तेः । कतिशब्दात्तु कनिष्ट एव । स्पष्टं चेदं भाष्ये इति । तथा च भाष्यम् । अथवा महतीयंसञ्ज्ञा क्रियते तत्करणे एतत्प्रयोजनम् । अन्वर्थसञ्ज्ञा यथा विज्ञायेत । संख्यायतेनयेति संख्या । एकादिकया चापि संख्यायत इति । ननु महासञ्ज्ञा-

करणेन तदर्थानुगुणं सञ्ज्ञित्वं कल्प्यतां प्रदेशेषु लोकप्रसिद्धार्थावगतिस्तु कुत इति चेन्न । तदर्थाननुगुणानां वक्ष्यमाणप्रकारेण साञ्ज्ञित्वव्यावृत्तिसम्भवात् । नियतविषयपरिछेदहेतुत्वाभावेन बह्वादीनामन्वर्थसञ्ज्ञाननुगुण्याच्चागत्या महासञ्ज्ञाप्रकरणेन प्रदेशेषु लोकप्रसिद्धार्थावगतेः कल्पनात् । एतन्न्यायोपयोगः । कृत्रिमा कृत्रिमन्यायोपयोगः । अभ्यासाम्रेडितेति । तत्र महासञ्ज्ञाकरणे ऽपि न लोकप्रसिद्धार्थस्य ग्रहणं ऐच्छिक द्विःप्रयोगेपि अभ्यासादिकार्यापत्तेः । ननु संख्यापदेन लोकप्रसिद्धार्थग्रहणे सूत्रे बहुगणयोर्ग्रहणं व्यर्थम् तयोरपि संख्यावाचित्वादित्याशङ्क्याह । सूत्रे इति । अत एव । बहुत्वादेः संख्यात्वाभावादेव । इदमुपलक्षणम् । बह्वादीनां ग्रहणं शक्यमकर्तुं ज्ञापकात्सिद्धमिति भाष्यस्य । बह्वादीनां सख्यावाचकत्वे तु ज्ञापकवैयर्थ्यम् । ननु बहुत्वादेः सख्यात्वाभावे एकादिकया चापि संख्यायत इति भाष्यविरोधः । तत्रापि शब्देन बह्वादीनामपि ग्रहणादित्याशङ्क्य समाधत्ते । यात्त्वित्यादिना । स्वव्याप्येति । तथा च स्वव्याप्यत्रित्वादिद्वारा बह्वादीनां सख्यार्थकत्वेपि साक्षात्तदभाव इति भावः । कैय्यटोक्तं दूषयति । एतेनेति । नियतविषय परिछेदहेतुत्वाभावेन बहुत्वादीनामसख्यात्वेनेत्यर्थः । अथवा महतीयं सञ्ज्ञा क्रियत इति भाष्यमुपादाय कैयटेनोक्तम् । ननु महत्याः सञ्ज्ञायाः करणात्संघवैपुल्यवाचिनोर्बहुगणयोरसञ्ज्ञा माभूदेकादीनान्तु कथंस्यात् । नैषदोषः । संख्येति योगो विभज्यते । तत्रचान्वर्थसञ्ज्ञानुरूपः सर्वः सञ्ज्ञा आक्षिप्यते । ततो बहुगणेत्यादि । इदम्भूर्यादिव्यावृत्त्यर्थं नियमार्थं व्याख्यायते ऽन्वर्थसञ्ज्ञाश्रयणादेव संघवैपुल्यवाचिनोर्बहुगणयोः संज्ञा नेति । ननु महासंज्ञाकरणसामर्थ्याल्लौकिकसंख्याया अपि प्रदेशेषु ग्रहणमित्ययुक्तम् । संघवैपुल्यवाचिनोर्बहुगणयोः सञ्ज्ञानिरासार्थं तत्सार्थक्यादित्याशङ्क्याह । संघेति । यद्वा लोकप्रसिद्धसंख्यावाचित्वस्य बह्वादिष्वभाव इति पूर्वमुक्तत्वेनान्वर्थसञ्ज्ञाबलेन संघवैपुल्यवाचिनोर्बहुगणायोर्व्यावृत्तिरिति वक्तुमशक्यम् । एवं पतिशब्दोपि डत्यन्तत्वेन सञ्ज्ञिकोटौ निविष्टो न व्यवच्छेद्येत्याशङ्क्याह । सङ्ख्येत्यादिनेत्यलमित्यन्तेन । पतयेइति । संख्यापदानुवृत्तिरप्युणादीनां व्युत्पत्तिपक्षस्य ज्ञापिका । अतो न संकर इति । वस्तुतस्त्वनेकसञ्ज्ञाकरणसामर्थ्यादाकडारीयत्वाभावेपि नासां सञ्ज्ञानां समावेशः । लोपसञ्ज्ञा त्वासां विषये प्रवर्त्तत एव । बाधकाभावात् । नह्येताविव लोपसञ्ज्ञा प्रत्ययदर्शनमुदि-

श्य विहिता किन्त्वदर्शनमात्रम् । एकसञ्ज्ञोद्देश्यकानेकसञ्ज्ञानान्तु पृथक् सञ्ज्ञाकरणसामर्थ्यान्नियुक्तः समावेशः । न लुमतेति निषेधारम्भाच्च लोप सञ्ज्ञैव तासां विषये प्रवर्त्तते । ननु यथा लोपसञ्ज्ञा एतासां विषये प्रवर्त्तते तथैता अपि लोपसञ्ज्ञाविषये प्रवर्त्तेरन् । तथाचागोमती गोमती सपंन्ना गामेतीभूतेत्यत्र च्वेर्लोपे तत्र लुक् तद्धितलुकीति ङीपो लुक् प्रसज्येत । छिद्भिदित्यादौ श्लावितिद्वित्वं प्रसज्येत । च्वेः क्विपश्चादर्शनस्य लुक्श्लुसंज्ञाप्रवृत्तेः । वेरपृक्तस्येति लोपे प्रत्ययत्वव्याप्यधर्मपुरस्कारेणैव प्रत्ययस्योपपादनादिति चेन्न । पृथक्सञ्ज्ञात्रयविधानसामर्थ्येनासां स्वभिन्नसञ्ज्ञासामान्यविषये ऽप्रवृत्तिकल्पनात् । लोपसञ्ज्ञायास्त्वासां विषये प्रवृत्तिरुपपादितैव अत एव प्रत्यायादर्शनन्तु लुमत्सञ्ज्ञाप्राप्नोति । तत्र को दोषः । तत्र लुकि श्लुविधिप्रतिषेधः । नवा पृथक्सञ्ज्ञाकरणात् । तथैव तर्हिअदर्शनसामान्ये लोपसञ्ज्ञा लुमत्सञ्ज्ञा अपि लोपसञ्ज्ञां अवगाहेरन् । तत्रकोदोषः । गोमतीत्यत्र लुक् तद्धितलुकीति ङीपो लुक् प्रसज्येत । ननु चात्रापि न वा पृथक् सञ्ज्ञाकरणादित्येव सिद्धं । यथैव तर्हि पृथकसञ्ज्ञाकरणसामर्थ्याल्लुमत्सञ्ज्ञामपि लोपसञ्ज्ञा नावगाहते । एवं लोपसञ्ज्ञापि लुमत्सञ्ज्ञांनावगाहते । तत्र स एव दोषः । लुक्युपसंख्यानमित्यादि भाष्योक्तं संगच्छते । न वा पृथक् सञ्ज्ञाकरणादिति भाष्यस्य तद्भावितसञ्ज्ञाभिप्रायकत्वे तु गोमतीत्यत्र लुक् तद्धितलुकीति लुगापादनपरभाष्यं यथैव तर्हीत्यादि तदुत्तरभाष्यं चासंगतं स्यात् । तद्भावितसञ्ज्ञाश्रयणे गौरवं च । विहितविशेषणमिति । अत्र वदन्ति । एवं सति परमकतीत्यत्र षड्भ्यो लुगिति लुगनापत्तिः । डत्यन्तस्य षट्सञ्ज्ञाविधानात् । न चायं समास एव दुर्लभः दिक्संख्येसञ्ज्ञायामिति नियमादिति वाच्यम् । दिक्संख्येसमानाधिकरणविशेषणत्वेनोपादाय प्रवर्त्तमानसमाससञ्ज्ञाया एव तेन नियमेन व्यावृत्तेः । अत एव सर्वादिसूत्रे परमपञ्चेति प्रयुक्तं भाष्ये । न च बहुगणु, डुतिचेत्यनयोर्द्धिस्तदन्तविधिः । अति कतय इत्यत्रापि षट्सञ्ज्ञायां लुगापत्तेः । बह्वादीनामसंख्यात्वस्य तथास्वीकृतत्वेनान्वर्थसञ्ज्ञाबलेन संख्याषट्सञ्ज्ञयोरुक्तस्थले वारणसंभवादिति । आघ्नीयेति । आङो यमहन इत्यात्मनेपदं विधिलिङुत्तमपुरुषैकवचने इट् गमहनेत्युपधालोपः सीयुटः-सकारस्य प्रत्ययावयवस्य लोपे प्रत्ययलक्षणेन झलादिप्रत्ययपरत्वेनानुनासिकलोप वारणाय घप्रत्ययग्रहणं तस्मिंस्तु सति कृत्स्नप्रत्ययलोप एव तत्प्रवृत्ते र्न दोषः । चरिता-

र्थमिति । प्रत्यावयवेव प्रत्ययत्वस्वीकाराभावे तु प्रत्ययरूप शराभावेन षत्वाप्रवृत्तौ सातिग्रहणं व्यर्थं स्यात् । ननु प्रत्ययरूपसकारस्य कुत्राप्यसंभवएव कुतोनोक्तः । अवैषीदित्यादौ आदेशरूपत्त्वेनैव षत्वसिद्धेरितिचेन्न । इन्द्रोमावक्षन् सेदेवान्यक्षदित्यत्र वहियजिभ्यां लेटि सपि प्रत्ययरूपसकारसंभवादिहापीति भाष्यम् । तदाहेति । अतिदिश्यमानकार्याणामुत्पत्तिदेश एव देश इत्येतत्प्रमेयमेवेत्यर्थः । प्रत्ययलोप इति । गुणे प्राप्ते इति वक्तव्ये जसि चेति गुणे प्राप्त इत्युक्तयैतल्लब्धम् । न लुमताङ्गस्य । लुप्तप्रत्ययपरतो यः पूर्व इत्यस्य फलमाह । तेन पञ्चेत्यादाविति । वार्तिकमतेनैतत्सूत्रोदाहरणमाह । राजपुरुषादाविति । सर्वमतसाधारण्येनैतत्सूत्रोदाहरणं तु कतीत्यादि । लब्धाङ्गसञ्ज्ञक इत्यस्य प्रयोजनमाह । अङ्गसञ्ज्ञात्विति । अन्यथान्तरङ्गानपीति न्यायेनाङ्गसञ्ज्ञातः पूर्वं लुक् प्रवृत्तौ यथोद्देशेपि स न स्यादिति भावः । अतएवेति । अङ्गसञ्ज्ञायामुक्तरीत्या न लुमतेति निषेधाप्रवृत्तेरेवेत्यर्थः । स्त्रीप्रत्ययलुकीति । इदमुपुलक्षणं तथाहि । इदं स्त्रियां चेत्यत्र स्त्रीईइति प्रश्लिष्य ईकारेपरतः स्त्रियां तृज्वद्भावः । अत एव ज्ञापकात्तुनन्तान्ङीषिति भाष्योक्तपक्षान्तराभिप्रायेणायं ग्रन्थः । आहोस्वित् स्त्रियां क्रोष्टोरङ्गस्य तृज्वद्भाव इति पक्षान्तराभिप्रायेण । नाद्यः । स्त्रीप्रत्ययलुकि प्रत्ययलक्षणेन ईकारपरकत्वस्य न लुमतेति निषेधे जागरूकेसत्यसम्भवेन तत्पक्षेपि च क्रोष्ट्रे इति रूपस्यैव दुर्लभत्वात् । नान्त्यः । तत्पक्षे तृज्वत्त्वप्रवृत्तेः पूर्वं स्त्रीप्रत्ययस्यैवाभावेन तल्लुकः खपुष्पगन्धायमानत्वात् । तस्मात्पंचभिः क्रोष्ट्रीभिः क्रीतं कुलमित्यर्थे ठकि तस्याऽध्यर्धेति लुकि पञ्चक्रोष्टु इत्यत्र तृज्वत्वमिति वक्तुं युक्तम् । वस्तुतस्तु पञ्चभिः क्रोष्ट्रीभिः । क्रीतं कुलमित्यर्थे ठकः पूर्वतृज्वत्वविनाशकत्वाभावेनेति वक्तुंयुक्तम् । अन्तरङ्गत्वात् । अङ्गसञ्ज्ञाया लुगुत्तरमपि प्रत्ययलक्षणेन प्रवृत्त्या लुकोऽन्तरङ्गतृज्वत्त्वाविनाशकत्वाभावेनान्तरङ्गानपीति न्यायाप्रवृत्तेः । अङ्गस्य क्रोष्टुरिति । अङ्गस्यावयवो यः क्रोष्टुशब्द इत्यर्थः । अङ्गसञ्ज्ञा च भवति प्रत्ययलक्षणेनेति । नन्विदं भाष्यं पञ्चभिः क्रोष्ट्रीभिः क्रीतैरथैः पञ्चक्रोष्टृभीरथैरित्युदाहरणं प्रवृत्तं तत्र च श्रूयमाणभिसमाश्रित्याङ्गसञ्ज्ञा भविष्यतीति न प्रत्ययलक्षणोपयोग इति चेन्न । तस्य पञ्चक्रोष्टृइत्युदाहरणोपलक्षणेनादोषात् । तथाचोक्तदिशान्तरङ्गत्वेन तृज्वत्त्वस्य समाससञ्ज्ञातः पूर्वमेव तृज्वत्त्वप्रवृत्त्या न प्रत्ययलक्षणोपयोग इति वाच्यम् । अङ्गसञ्ज्ञा तु भवतीति भाष्यस्य लुकोन्तर-

ङ्गनिमित्तविनाशकत्वाभावसम्पादनार्थत्वेनादोषात् । नियमतइति । नन्वेवं तृज्वत्त्वस्यापि परनिमित्तकत्वेन तस्मिन्न लुमतेति निषेधप्रवृत्त्यापत्तिरिति चेन्न । नलुमतेति निषेधे व्याख्याने शब्दतः परनिमित्तकत्वस्यैवाश्रयणात् । अतएवेति । उरादित्यत्र शब्दतः परनिमित्तकत्वानाश्रयणे न लुमतेति निषेधाप्रवृत्तेरेवेत्यर्थः । इदमयुक्तम् । अत्वप्रवृत्तावपि गुणो यङ्लुकोरिति निषेधेनेष्टसिद्धेः । यत्तु चर्करीत्यजर्या इत्यादौ तयोस्तिप्निमित्ताङ्गत्वमादायात्वप्रवृत्तिरिति पाठकेनोक्तं तन्न । अङ्गाधिकारस्थाभ्यासकार्याणामभ्यासाङ्गोभयनिमित्तप्रत्यय एव प्रवृत्तेः । अत एव जिहननीयिषतीत्यादौ न कुत्वम् । कार्यकालत्वस्याभावाच्चेति । इदमयुक्तम् । कार्यकालं सञ्ज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति यचिभमित्याद्यनेकभाष्यविरोधात् । कैयटोक्तं दूषयति । एतेनेति । आकडारस्थस्य कार्यकालत्वाभावेन प्रत्यय इत्यस्यावृत्तिं विनैवोक्तदिशा निर्वाहेण चेत्यर्थः । पदैकवाक्यतयेति । यत्राङ्गमिति श्रूयते तत्र यस्मात्प्रत्यय इत्युपतिष्ठते इति सूत्रार्थाश्रयणात् । अस्मिन्पक्षे च प्रत्यय इत्यस्यावृत्तिर्नापेक्षिता । अङ्गाक्षिप्तप्रत्ययनिमित्तमिति । न लुमतेति निषेधस्तु अनाक्षिप्तप्रत्ययनिमित्तककार्य एवेति चर्करीत्यादावत्वप्रवृत्तिरिति भावः । अनङापत्त्याचिन्त्यमिति । इदं च विशेषणतया वर्णाश्रयणे प्रत्ययलक्षणं न भवतीति वार्तिकमतेन दूषणं न वस्तुतः । अपास्तमिति । वस्तुतस्त्वाकडारीयेष्वपि कार्यकालपक्षस्योपपादितत्वात्कैयटोक्तमपि युक्तम् । आवृत्तिरप्यावश्यकी अङ्गसञ्ज्ञायामुपक्षीणायाः परबुद्धेरङ्गसञ्ज्ञायामुपक्षीणत्वेनोरदत्वस्य प्रत्ययनिमित्तत्वात् । कुलालपितुर्घटं प्रतीव ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य प्रश्नक्रियां प्रतीवान्यथासिद्धत्वात् । स्वमोर्नपुंसकादिति सूत्रे इति । एतत्सूत्रोत्तरवर्तीनि नेतराच्छन्दसीति सूत्र इत्यर्थः । पदान्तरसन्निधानंविनेति । वस्तुतो ऽलिंगे युष्मदस्मदीत्यत्र टाबभावोपपादनार्थं प्रवृत्तत्वेनेदृशार्थकत्वं न युक्तम् । न चाटाव्यत इत्यादौ पदान्तरसंनिधानं विना स्त्रियां वर्तमाने टाबित्यर्थ इति वाच्यम् । मानाभावात् । न षडित्यत्र षड्ग्रहणवैयर्थ्यापत्तेश्च । तस्मादलिङ्गे युष्मदस्मदीति वार्तिकं कस्य चिद्दृपेर्मतमाश्रित्य प्रवृत्तमिति बोध्यम् । उच्चारणार्थत्वशङ्कावारणायेति । इदमयुक्तम् । त्रयोदशेत्यादौ सान्तादेशविधायके त्रेस्त्रय इत्यादाविवात्रापि सान्तत्वभ्रमवारणसंभवात् । अभ्युच्चयायेति । भवामीति प्रत्युदाहरणस्यापि निर्दुष्टत्वादिति भावः । केचित्तु नुमः

पूर्वं परत्वात् त्यदाद्यत्वे पश्चादुगिदचामिति नुमि सर्वनामस्थाने चेति दीर्घे भवानिति सिध्यतीत्याहुः । तन्न । नलोपापत्तेः । झलन्तानामेवोगितां नुम् विधानाच्च । अन्यथा विनुणि नुमापत्तेः । अपरे तु इदं जातिपक्षे । व्यक्तिपक्षेत्ववत्वसन्तस्येति सूत्रे ऽस्याप्यतोनुपस्थितिसामर्थ्यात्सौ न त्यदादीनाम इत्यस्य प्राप्तिरिति शङ्का स्यात् । अतो भवन्तावित्यपास्तमित्याहुः । इति इदन्ताः । ईदन्तेभ्य इति । वातप्रपूर्वान्मा-धातोः क्विपो न भिधानमित्यर्थः । वातप्रमीशब्दाचाराक्वन्तात्कर्त्तरि क्विबित्यन्ये । मृगाकृतिरिति । हरिणाकृतिः । यूस्त्र्याख्यौ । दीर्घाज्जसि चेति निषेधमाशङ्क्याह । वाच्छन्दसीति । मूलविभुजादिभ्यइति । आतोनुपसर्गे क इत्यनेन तु न । उपसर्गत्वात् । अत एव "यस्मिन्दशसहस्राणि पुत्रे जाते गवां ददौ । ब्राह्मणेभ्यः क्रियाख्येभ्यः सोयमुञ्छेन जीवतीति, सिद्धम् । प्राधान्येनतद्बोधकत्वनिवेशेइति । नन्वेवं कुमारी वर्षाभू शब्दे नदीसञ्ज्ञा दुर्वारा । विशेषणतया नित्यस्त्रीलिङ्गार्थबोधकत्वादिति चे-त्सत्यम् । अवयवस्त्रीविषयत्वात्सिद्धमिति वार्तिकस्य यथोद्देशपक्षाभिप्रायेण प्रवृ-त्तेः । तथाचावयवस्त्रीविषयत्वात्सिद्धमिति भाष्यमुपादाय कैयटेनोक्तम् । अन्तर-ङ्गत्वात्पूर्वरूपमेव स्त्र्याख्यत्त्वात्प्रवृत्ता नदीसञ्ज्ञा पश्चादुपजायमाने लिङ्गान्तरयो-गे न निवर्त्तत इति । आकाडारस्थेत्यारभ्य केषाञ्चिन्मतम् । कार्यकालत्वाभावादित्यु-त्तरं अवयवस्त्रीविषयत्वात्सिद्धमित्येतद्यथोद्देशपक्षाभिप्रायकमेवेति शेषः । कथमिति । पौर्वापर्याद्यभावादिति शेषः । भाष्येस्पष्टमिति । वस्तुतो नैवं भाष्यकृतोक्तम् । किन्त्वम्बार्थानां ह्रस्वः । नदीह्रस्वयोर्न्यासे जसि चेति नद्या अपि गुणः प्राप्नोतीत्या-शङ्क्यैवं तर्हि योगविभागः करिष्यते ततो ह्रस्वःअम्बार्थनद्योरिति वर्त्तते । अनयो-र्ह्रस्वस्य ह्रस्वो भवति । किमर्थमिदं गुणो भविष्यति तद्बाधनार्थं ततो गुणश्च गुणो-भवति ह्रस्वस्येति । अथवा ह्रस्वस्य गुण इत्यत्राम्बार्थनद्योर्ह्रस्व इत्येतदनुवर्त्तत इत्युक्तम् । वक्तुमशक्यइति । अम्बार्थनद्योर्गुण इति न्यासेनेत्यर्थः । गुणः स्यादे-वेति । अनित्यस्थले लक्ष्यैकचक्षुष्कताया आवश्यकत्वेन न लुमताङ्गस्येत्यस्याप्र-वृत्तौ बीजाभावान्नदीसाहचर्यात्स्त्रीलिङ्गस्यैवाम्बार्थस्य ग्रहणादनः शब्दे गुणप्राप्ते रभावाच्चेति मौनिश्रीकृष्णभट्टाः । अयंह्रस्वइति । विधानसामर्थ्यलभ्यो भाष्यो-क्तयोगविभागलभ्यो वा ह्रस्व इत्यर्थः । वृद्धिवारणायेति । न चान्तरङ्गायां वृद्धौ बहिरङ्गस्योत्वस्यासिद्धत्वम् । नाजानन्तर्य इति निषेधात् । पररूपं बाधकमिति ।

न चाड् विधानसामर्थ्यम् । ङेरामि नुड्बाधनार्थं चारितार्थत्वात् । यत्त्वेवं सति ह्रस्वनद्यापो नुडित्यस्यानन्तरं ङेर्नेत्येव ब्रूयादिति मौनिश्रीकृष्णभट्टाः । तन्न । षट्त्रिचतुर्भ्यश्चेत्युत्तरसूत्रेषु नेत्यस्यानुवृत्तिप्रसङ्गात् । ननु ह्रस्वनद्याप इति सूत्रे आङेरिति पाठ्यम् । अथवा ङेराम् उकारानुबन्धविशिष्टः कार्यः । तथाचैवं लघुन्यासेन सिद्धे ऽड्विधानं पररूपबाधनार्थमिति चेन्न । सखीशब्दात् ङस्यटि पररूपेपि तस्य पूर्वस्माद्विधौ स्थानिवत्त्वेन रव्यत्यादित्युत्वाप्रवृत्त्यर्थं अड्विधानं स्यादित्याशयात् । अतएवेति । अनवकाशत्वेन बाधे ऽपवादप्रवृत्त्युत्तरमुत्सर्गप्रवृत्ते-रेवेत्यर्थः । किन्तर्ह्यनवकाशत्वादिति । अलोन्त्यपरिभाषैकवाक्यतया गणेरन्त्यस्य अस्येत्वामित्यर्थे ऽनवकाशत्वमिति भावः । वस्तुतस्त्वेवमर्थाश्रयणेनानवकाशत्वोप-पादने ऽभ्यासविकारे बाध्यबाधकभावो नेति परिभाषाश्रयणेपि हलादिःशेषो न स्यात् । इत्वस्योक्तरीत्या निर्विषयत्वापत्तेः । तस्माद्युगपद् द्वयोरसम्भवे ऽनवका-शत्वं यथा ऽडामोरामः ङिद्वचनापहारकत्वेनागामिन एवासत्वेन युगपत्तयोः प्रवृ-त्त्यसम्भवात् । नुकूदीर्घयोस्तु युगपत्प्रवृत्त्यसम्भवः । दीर्घेण सर्वस्यागमिनो नाप-हारात् । इत्वहलादिःशेषयोरपि न युगपत्सम्भवः । एकस्य स्थानिन आदेशद्व-यासम्भवात् । प्रक्रियावासनावतां इत्वं हि रूपान्तरप्राप्तिः । लोपः सर्वथा निवृ-त्तिरिति । तथा च लोके ऽपि ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टामिति भोजनपरिवेषणयोर्युगपदसम्भवेन स्वप्रवृत्तिसमये भोजनबाधेपि परिवेषणानन्तरं माठरकौण्डिन्ययोर्भोजनं दृश्यते । हयवरट्सूत्रे च भाष्ये नेदानीन्तौ भुञ्जाते इति कालविशेषप्रदर्शनं च कृतम् । च्छ्वोरिति सूत्रे च भाष्ये ऊठाष्टित्वे ऊडुत्तरं वलोप उक्तः । ऊठ्वलोपयोर्युगपदसम्भवादिति दिक् । ननूङ्चगमादीनामिति वार्ति-कनिष्पन्नभ्रूशब्दस्य धातुत्वादेव सिद्धे तदुपादानं व्यर्थमतआह । भ्रूशब्दस्येति । सुभ्रुवाविति सिद्धमिति । तथा च प्रयुज्यते । गूढसूचितरहस्यविभेदः सुभ्रुवां प्र-ववृते परिहास इति । एवमिवर्णोवर्णान्तधात्वन्तस्याङ्गस्येत्यर्थात्सुश्रियावित्यादावि-यङ् सिद्धिः । न भवतीत्युक्त्या क्रियान्वयेन प्रसज्यप्रतिषेधशङ्कां निराक-रोति । धात्ववयवसंयोग पूर्वभिन्न इति । उदियादिति । उत्पूर्वादीङ्गतावित्यस्मा-त्किपि रूपम् । इत्यर्थेनसिद्धेरिति । वस्तुतस्तु संयोगाभिन्नात्संयोगैकदेशात्तद्घ-टितसमुदायाद्वा परस्य संयोगपूर्वकस्यापि यणापत्तेः । धात्ववयवसंयोगात्परस्य

नेत्यर्थेतूदियादित्यादौ दोषः । पर्युदासाभावेनोक्तार्थालाभादिति पूर्वग्रहणमावश्यकं किमिति । पूर्वसूत्रात् द्व्योरित्यनुवृत्त्या सिद्धमित्याशयः । निषेधादिति । ननु खरकुट्यै ब्राह्मण्यै इत्यादौ शाकलं प्राप्नोतीति चेन्न । उत्तरपदत्वेति वार्तिकारम्भे तत्प्राप्तावपि प्रत्याख्यानपक्षे तदप्रवृत्तेः । प्रतिपदोक्तत्वादिति । तथा च दुर्धियावित्यत्र बहुव्रीहौ यण् नेति तदाशयः । विशिष्टरूपोपादान विषय इति । दिक्समास इति वत्कातिसमास इति विशिष्ट कपोपादाने इत्यर्थः । इतिविग्रहाभिप्रायेणेति । प्रकृष्टन्ध्यायतीति विग्रहे तु नित्यस्त्रीत्वाभावः । सत्त्वभूतार्थकेति । शुद्धधात्वर्थविशेषणत्वे तु कर्मकारकत्वमस्त्येवेति भावः । सूत्रारम्भेपीति । भयहेतुरिति हेतुपदस्वारस्यात् । तथा च सत्वारम्भेपि षष्ठीसमाससम्भवान्नोक्तस्थले यणिति भावः । अभ्युच्चयेति । पूर्वपरिहारे ऽरुच्यभावादिति भावः । अनयोरेव निषेध इति । तथा च सुध्युपास्ये निषेधप्रवृत्तिर्नेति भावः । प्रकारान्तरमाह । सुपीति वेति । यलोपे सख इति । यावत्पर्यन्तं लोपो व्योरित्यस्य प्रवृत्तिसम्भावना तावत्पर्यन्तंवेरप्टक्तेति लोपो न प्रवर्त्तते । ननु नः क्य इति निषेधः दन्त्यान्तविषयकोनुनासिकान्त्याविषयो वा स्यादित्याशङ्क्यासति बाधक इति न्यायाल्लक्ष्यानुरोधाच्च सामान्यापेक्ष इत्याह । नःक्यइति । परपदस्थाजादेशस्यैवेति । अपीपचान्निति पञ्चमीसमासप्रयोजनप्रदर्शनपरभाष्यप्रामाण्यादिति भावः । अनित्यत्वादिति । अन्तरङ्गपरिभाषया अनित्यत्वेनैव निर्वाहे नाजानन्तर्यपरिभाषा नाश्रयितव्येति मतेनेदम् । नन्वल्लोपस्य स्थानिवत्वाद्यणि प्राप्ते क्लौलुप्तं न स्थानिवदित्यसङ्गतम् । लोपस्य लोपकर्मत्वाभावादित्यत आह । भावेक्तइति । अस्मादेव भाष्यप्रयोगात्क्वचित्सकर्मकेभ्योपि भावे क्तो भवति यत्र प्रयोगस्य न गत्यन्तरमिति भावः । ननु नैवं विज्ञायते क्वौलुप्तं न स्थानिवत् कथं तर्हि क्वौविधिं प्रति न स्थानिवदिति न पदान्तसूत्रस्थ भाष्यात्क्वौलुप्तं न स्थानिवदिति नास्त्येवेत्याशङ्क्याह । अस्याप्यर्थस्येति । तथा चोक्तभाष्यं सर्वत्र नैवम्विज्ञायते क्वौ लुप्तं न स्थानिवदिति सर्वत्र क्वौ विधिम्प्रति न स्थानिवदिति विज्ञायते इत्यर्थकमिति भावः । पदकार्यविषयएवेति । एवं चाभिव्यक्तपदार्था य इति न्यायमूलकं प्रसिद्धे इति सर्वनामप्रकरणस्थस्वग्रन्थविरुद्धं तस्मात्तन्न्यायप्रवृत्तावपि विशेषणतया ऽभिव्यक्तपदार्थकत्वमादायानङ् बोध्यः । क्विबन्तस्य

धातुत्वमिव । इति ईदन्ताः । प्राधान्याच्चेति । सर्वेषां कार्याणां रूपनिष्पत्त्यर्थत्वादिति भावः । ननु रूपातिदेश एव रादेशो न स्यात् वर्णसंस्थान विशेषस्यैव रूपत्वेन स्वरस्यारूपत्वात् । अत एव विभिन्नस्वरकयोर्निभिन्नार्थयोर्हरिणीशब्दयोः सरूपाणामित्येकशेष इत्याशङ्क्याह । तच्चेत्यादि । अथ तदाकर्षाभावादिति । यद्यपि स्थानषष्ठ्यभावेन स्थानेन्तरतमपरिभाषा नोपतिष्ठते तथापि रूपातिदेशस्य फलतः स्थान्यादेशभावपर्यवसायित्वेनोक्तपरिभाषाप्रवृत्तिमभिप्रेत्येदम् । सञ्ज्ञाशब्दानामिति । इदमुणादिव्युत्पन्नानामित्यनेन पाक्षिकं । यथान्यासइति । ण्वुल्तृचौ अप्तृन्तृच् इति यथा न्यासे इत्यर्थः । नियमफलं चिन्त्यमिति । मातरौ पितरावित्यादौ निरनुबन्धकत्वेन तृन्तृजन्तत्वाभावादेव दीर्घापत्तेरिति भावः । विशिष्टाभावस्येति । भ्यामि तृतीयादिपरत्वेपि शस्यजादिविभक्तिपरत्वे ऽपि क्वचिद्विशेषणाभावेन क्वचिद्विशेष्याभावेन चादित्वविशिष्टतृतीयादिविभक्तिपरत्वाभावस्य । एतेनेति । उक्त नियमस्यैव निर्दुष्टत्वेनेत्यर्थः । तथा च तृज्वत् क्रोष्टुरित्यस्य तृज्वत्सर्वनामपरत्वएवेति नियमपरत्वे सर्वनामस्थाने तुन्नन्तस्यापि प्रयोगापत्तिः । आवृत्त्या द्विविधनियमपरत्वे ऽपि क्रोष्टुपुत्र इत्यादौ तृजन्तस्य प्रयोगापत्तिः । तृजन्तं सर्वनामस्थान एवेति नियमे विभक्त्यन्तर एव तृजन्तप्रयोगवारणात् । तत्र लक्षणवशेनेत्वप्रवृत्तावपि किर इत्यस्यानुकरणत्वाभावात् । धातोः कार्यमुच्यमानमिति परिभाषात्तु किरश्च पञ्चभ्य इति निर्देशादनित्या । इत एव निर्देशादिति । अनुकार्यानुकरणयोरभेदविवक्षा त्वप्रामाणिकीति भावः । न वलोप इति । लोपः शाकल्येत्यनेन । लोपोव्योरिति लोपस्तु छान्दसः परनिमित्तकत्वेन बहिरङ्गश्च । यद्यपि लोपः शाकेति लोपस्य पाक्षिकत्वेनापि परिहारः सुलभस्तथा ऽपि पक्षेपि लोपाकरणयोपपत्तितनमित्यदोषः । इत्यृदन्ताः । उक्तोत्तरत्वादिति । इदमयुक्तम् । विवृतत्वसाम्येन कदाचिद्विवृतस्य लकारसाम्येन कदाचिदीषत्स्पृष्टस्येत्याद्युक्तरीत्यैतद्दोषद्वयावारणात् । न च धातॄणामित्यत्र रेफद्वयाघटितत्वविवृत्तरूपधर्मद्वयसाम्येन विवृत एव दीर्घो भविष्यतीति वाच्यम् । तथा सति होतृल्कार इत्यत्रापि लकारद्वयाघटितत्वविवृतरूपधर्मद्वयसाम्येन विवृतस्यैवापत्तावीषत्स्पृष्टस्य पक्षेप्यनापत्तेः । वस्तुतस्तु गम नित्यत्रेषत्स्पृष्टस्य शङ्कैव निर्दला । तस्य पूर्वसवर्णत्वाभावात् । गमॄणामित्यत्र तु पक्षे ईषत्स्पृष्ट लकार इष्यत एव । नविशेषइति ॥ ननु क्तेतरा क्त्वा तेन क्रातिरा इत्यत्र ऋत्यक इति प्रकृतिभावे

ऋकारस्य यणि रपरत्वे रोरीति लोपे ढ्लोप इति दीर्घे विशेषःस्पष्ट इति चेत्। न। यणो बहिरङ्गतया इको यणित्येकवाक्यतापन्नोरणूपर इत्यस्यापि बहिरङ्गतया रेफस्यासिद्धत्वेन दीर्घाप्राप्तेः। यद्वा । ढसाहचर्येणानागमकरेफपरत एव दीर्घाङ्गीकारेणादोषात्। यत्तु आ च आ च ऋ आ तेन ऋरा इत्यत्र दीर्घापत्तिमाशङ्क्य यणोऽचः परेति स्थानिवत्त्वेन ऋकारपरत्वबुद्धौ लोपप्रयोजकरेफपरत्वाभावान्न दीर्घ इत्युक्तम्। तन्न। ढ्रेति सूत्रे पूर्वेणाण्ग्रहणस्य निश्चितत्वेन दीर्घप्राप्तेरेवाभावात्। पदान्तविधित्वेन स्थानिवद्भावस्य दुर्लभत्वाच्च। ढढंमानंचिन्त्यमिति॥ इदमसंगतम्। अग्निपुराणे इको यणित्यस्य ऌकृतिरित्युदाहरणदर्शनात्। अलोन्त्यस्येत्यतोऽल्ग्रहणमपकृष्य शब्दाधिकारं चाश्रित्योः स्थाने ऌकाराभिन्नोण् रलपर इत्यर्थाङ्गीकारेण ऌकृतिरित्यग्निपुराणोक्तप्रामाण्येन मूलोक्तसाहचर्याश्रयणाद्वा नोरण् इति सूत्रस्थभाष्याविरोधः। महासंज्ञयानव्ययत्वादिति । यत्त्विदं स्वरादिनिपातमव्ययमिति सूत्राविषयकं कृन्मेजन्त इति सूत्रविषये तु अन्वर्थसंज्ञा नाङ्गीक्रियते। अत एव कुम्भकारेभ्य इत्यत्राव्ययसंज्ञापादककृन्मेजन्तसूत्रस्थभाष्यं संगच्छते इति । तन्न । अव्ययीभावविषये वचनप्रामाण्याल्लिङ्गाद्यन्वयेऽव्ययत्वाङ्गीकारेप्यत्र तथाङ्गीकारे मानाभावात्। कृन्मेजन्तसूत्रस्थभाष्यं त्वेकदेश्युक्तिः। आद्गुणस्तुनेति । तस्मिन्सति उत्तरपदपरकसहशब्दाभावेन सादेशो न स्यात्। इकारैकदेशस्य तदुत्तरनिमित्तकत्वाभावेन नाचःपरस्मिन्निति स्थानिवद्भावेनोत्तरपदत्वं प्रत्याशा । एतेनात्राद्गुणे विशिष्टस्य सादेशापत्त्या ऽकारान्त रूपमापद्येतेति मिश्रोक्तं परास्तम्। इत्यन्य इति। इदं चिन्त्यम्। असिद्धवत्सूत्रे भाष्ये ओः सुपीत्यत्राकारप्रश्लेषपरभुवोवुगितिवार्त्तिकस्थ ओरिति प्रयोगासङ्गतेः। संभवति चात्र पूर्वान्तत्वेनोकारस्य पदान्तत्वम्। तस्मात्सेरोसुपीत्यादौ पञ्चमीसमासेन स्थानिवद्भावान्नोत्वप्राप्तिरिति पदान्ताद्ङः परो रुर्नास्ति इति भाष्यविरोधो न। एवम् 'मदमत्तमयूरस्य पृष्ठे माल्यवतो गिरेः। सीताविरहसन्तप्तं रामं मुहुरमूमुहत्' ॥१॥ इत्याभियुक्तो क्तौ गिरा इरति कर्तृगुप्तोक्तावपि बोध्यम्। त्वद्रीत्या तस्याप्यसङ्गत्यापत्तिः । अयचीति। असर्वनामस्थान इत्यत्र अ इति पृथक्पदं निषेधार्थकं स एवात्राकारो निर्दिष्टः। न त्वसर्वनामस्थानेऽयचीति पदच्छेदः। नञ्द्वयवैयर्थ्यात् । असर्वनामस्थाने इति। प्रसज्यप्रतिषेध

इति वक्तुं युक्तम् । ननु सर्वनामस्थाने पूर्वं पदं नेत्येवास्तु किं यचीति विशेषणेनेति चेत् न । सुवागिति विशिष्टस्य सुबन्तत्वप्रयुक्तप्राप्तपदत्वस्यापि प्रत्ययलक्षणेन सर्वनामस्थानपरत्वेन निषेधापत्तेः । पूर्वमिति । सर्वनामस्थानं यस्माद्विहितस्तदादीत्यर्थः । यस्मात्प्रत्ययविधिरित्यतस्तदनुवृत्तेः । सुबन्तमिति । सुप्तिङन्तमित्यतः सुबित्यनुवर्तते इति भावः । स्वमतेनाह । उत्तरपदत्वेचेति । अत्र यद्वक्तव्यं तदन्यत्र वक्ष्यते । नन्वन्तर्भूताविभक्त्या मा भूत्पदत्वं पूर्वान्तत्वेन तु दुर्वारमेवेत्यत आह । आतिदेशिकस्यपीति । स्पष्टमेवेति । प्रत्ययलक्षणेन प्राप्तपदत्वस्य तेन निषेधादिति भावः । प्रतिषेधाच्चेति । प्रतिषेधाद्वेत्यर्थः । पूर्वान्तत्वेन प्राप्तपदत्वस्य वारणायाह । तद्घटितस्येति उत्तरपदत्व इत्यत्रोत्तरेत्यावर्तते । एकमुत्तरपदपरमपरं तु उत्तरपदघटितपरं वाशब्दश्चार्थे इति भावः । केचित्तु वाशब्दः पक्षान्तर बोधकः । उत्तरपदघटितत्वं चोत्तरपदाविषयकपदविषयकप्रतीत्यविषयत्वम् । से इत्येतद्घटक एइत्यस्य परादिवद्भावेनोत्तरपदविषयत्वात्तदविषयकपदविषयकप्रतीत्यविषयत्वं घटादिपदे तदविषयत्वं से इति समुदायस्य तद्घटक एइत्यस्य चेति तयोः पदत्वेन्तर्वर्तिविभक्तेः प्रत्ययलक्षणं न भवतीत्यर्थः । एतेन दधिसेगिति समुदायस्योत्तरपदघटितत्वेन समुदायोत्तरलुप्तसोः प्रत्ययलक्षणाभावप्रसङ्गात्तद्घटितस्येत्यसंगतमित्यपास्तमित्याहुः । णितइति ॥ णिद्वत इत्यर्थः । वस्तुतस्तु सर्वनामस्थान इति सप्तम्यन्तं, गोत इति षष्ठ्यन्तं, णित्पदं णित्त्वप्रयुक्तकार्यपरम् । एवं च गोशब्दस्य सर्वनामस्थाने परतो णित्त्वप्रयुक्तं कार्यं भवतीत्येवार्थो युक्तः । परत्वादिति । आङ्गत्वादिति वक्तुं युक्तम् । तपरकरणेनेति । परे तु त्वदुक्तरीत्या गोद्योशब्दातिरिक्तौकारान्ताभावेन तयोश्च णित्त्वस्येष्टत्वेनात्राङ्गस्य विवक्षितत्वे द्योर्णित्त्वं वक्तव्यं स्यादिति लाघवाद् गकाराविवक्षैव । चित्रगो इत्यादौ तु विहितविशेषणेन, लक्षणप्रतिपदोक्तपरिभाषया वा न दोषः । एवं च 'गोः पूर्वत्वणित्त्वात्त्वे'त्यत्र णित्त्वात्वग्रहणं न कार्यमित्यपरमनुकूलम् । ध्वनितं चेदं तपरकरणा'णित्त्वात्वयोः स्थानिवत्त्वप्रतिषेध'इति वार्तिकप्रत्याख्यानपरभाष्येण । प्रकृतसूत्रस्थं भाष्यन्त्वेकदेश्युक्तिरित्याहुः । तृतीयादिष्विति । अजादिष्विति शेषः । सूत्र इति । अस्य वक्तव्येत्यनेनान्वयः । 'द्योश्च वृद्धिर्वक्तव्ये'त्यस्य 'गोतोणिदि'ति सूत्रे द्योग्रहणं कर्तव्यमिति तात्पर्यम् । वार्तिक इति । औतोम्शसोरिति सूत्रस्थे इति शेषः । एतेनास्य वार्तिकस्य

औतोमिति सूत्रे दर्शनाद् गोत इति सूत्रे इति शेखरोक्तिरसंगतेत्यपास्तम् । इदानींतनभाष्यपुस्तकेषु वार्तिकत्वेन नेदमुपलभ्यते तथापि वार्तिकसाजात्याद्वार्तिकत्युक्तम् । ईदृशानामिति । अजादिविभक्तिपराणां सुपराणां चेत्यर्थः ॥ इति श्रीमद्राघवेन्द्राचार्यविरचिते विषम्याख्ये लघुशब्देन्दुशेखरव्याख्यानेऽजन्ताः पुल्लिङ्गाः ॥

रमयेति । अमन्तत्वेन मित्त्वाद्ध्रस्वः । लिङ्गाविशिष्टपरिभाषयेति प्राग्ग्रन्थेऽभिहितत्वेन तद्विपरीतमाह । पूर्वान्तत्वेनेति । पञ्चम्येति आबन्तादिति मूलानुसारेण । अभत्वादिति । एवं च नैतदर्थं श्यां प्रतिषेध इति भावः । आप इति । संबुद्धौ चेति सप्तम्या षष्ठ्यन्तत्वं परिकल्प्यत इति भावः । समानकार्यित्वाभावेऽपवादत्वं नेति मतेनाह । शीघ्रेति । अनेनेति । प्रश्लेषपक्ष इदम् । वस्तुतस्तु हल्ङ्यादिलोपापवादत्वेन पुनरुत्सर्गाप्रवृत्तौ एङ्ह्रस्वादिति लोप इत्याशय उचितः । नन्वेवं सति अचः परस्मिन्निति सूत्रे पूर्वेत्यस्याभावेन हेगौरीत्यादौ दोषमाशङ्क्य एङ्ग्रहणसामर्थ्यादिति वर्णितम् । भवद्रीत्या तक्रकौण्डिन्यन्यायेन बाधे पुनरुत्सर्गाप्रवृत्तौ एङ्ह्रस्वादिति लोपस्यैवावश्यकत्वेन एङ्ग्रहणसामर्थ्यस्यासंगतत्वमिति चेत् । न । तस्य तक्रकौण्डिन्यन्यायानाश्रयणेन ङ्याब्ग्रहणेऽदीर्घ इति न्यासाश्रयणेन च प्रवृत्तत्वात् । संनिपातेति । आतिदेशिकसंनिपाताविघातस्य न संनिपातपरिभाषाप्रवर्तकत्वमिति भावः । परस्येति । तेन यस्यै इत्यस्य सिद्धिः । नस्याद्इति । चेन द्वयोरेककपालं विधेयत्वप्रतीतेरिति भावः । नापीति । नच विधानवैयर्थ्यम् । एकवचने तत्साफल्यात् । आपइति । कार्यभेदेपि संनियोगशिष्टत्वमात्रेण चः समुच्चायकमिति भावः । नचैवमिति । तुल्यन्यायात्सर्वस्यै इत्यादावप्युक्तरीत्यैवाभिप्रेतेति भावः । सिद्धान्तीति । आबन्तत्वस्य सुबन्तत्वेनापि सुलभत्वाच्चिन्त्यमेतत् । सर्वनामत्वमपि स्थानिवद्भावेन सुलभम् । लिङ्गविशिष्टेति । इदं यथोद्देशे । कार्यकाले तु मदुक्तरीतिरेव शरणम् । सकृद्गतेति । बुद्धावित्यादिवत्संनिपातपरिभाषयापि सुवारः सुट् । यत्तच्छब्दाभ्यामिति । प्रतीत्येत्वं तस्य इत्यर्थ इत्यनेनान्वयः । हेतुत्वं च तृतीयार्थः । तत्त्वं च न विधाविति न्यायद्वारकम् । इत्यन्यत्रेति । अत्रायं संग्रहः ॥

> दैक्षितं त्वज्जजं भाट्टं प्राक्रियमतं तथा ।
> विवेचयामि निष्कृष्य साधकैर्बाधकैस्तथा ॥ १ ॥

तथा हि । तत्रेदं प्रक्रियमतं सा पूर्वा उत्तरा यस्यास्तस्यै उत्तरपूर्वायै इत्येव ।

या पूर्वा सोत्तरा यस्येत्युक्तौ सचेतसामुत्तरापदस्यैव प्रवृत्तिप्रकारकज्ञानविशेष्यत्वस्य सर्वानुभवसिद्धतया तस्यैव गुणवाचकत्वेन पूर्वनिपातौचित्यात् । न विधाविति न्यायस्तु श्रोतृप्रतिपन्नार्थस्य तं प्रतिबोधनाय तद्विपरीतार्थबोधकस्यान्याय्यत्वमूलको नात्र-प्रवर्तते । लोकानां तद्विपरीतबोधाजननेरनुभवसिद्धत्वात् । यच्छब्दयोगः प्राथम्यमित्याद्यसमस्तविषयकम् । सप्तमी विशेषणे इति शास्त्रेण तन्न्यायबाधात् । एतद्विरोधादेव च हितयोगे चेति वार्तिकस्थउद्देश्यविधेयभावेन बोधे समासानिष्टत्वप्रतिपादनपरो-रत्नग्रन्थोप्यपास्तः । हरिदीक्षितास्तु विशेषणविशेष्यभावो हि लोकाधीनः । लोके च शुक्ती रजतं यस्य शुक्तिरजतको देवदत्त इत्यादौ गुणपररजतपदसंनिधानेपि अधिष्ठानबोधकशुक्तिपदस्यैव विशेषणसमर्पकत्वानुभवात्पूर्वाशब्दस्याधिष्ठानबोधकस्यापि पूर्वनिपातः । अत एव या पूर्वा सोत्तरा यस्योन्मुग्धस्य स पूर्वोत्तर इति उद्देश्यविधेयभावभावानुगतपूर्वनिपातो भाष्यकृतोदाहृतः । न विधाविति न्यायस्तु उक्तरीत्या प्रवृत्त्येदृशे विषये विधेये एव लक्षणेति वदन्ति । भट्टास्तु या पूर्वेत्यादिभाष्ये उद्देश्यविधेयभावानुगतपूर्वनिपातस्यापि करणादुद्देश्यपदेपि लक्षणा भाष्यकृत्संमता । अनुभवसिद्धं शुक्तिरजतको देवदत्त इत्यादि त्वप्रामाणिकमेव । अधिष्ठानबोधकस्य विशेष्यसमर्पकत्वमनुभवासिद्धमिति तु शपथैकसमधिगम्यं विधेय बोधके तु न लक्षणा । उक्तन्यायात् । एतदप्रवृत्तिबीजकथनं तु स्वमौढ्येनैव । ईदृशे विषये विधेयबोधके एव लक्षणायाः सार्वजनीनानुभवसिद्धत्वेन या पूर्वेत्यादि भाष्यसंगतेः । उक्तभाष्याविरुद्धस्य प्रत्युत तदनुकूलस्योक्तन्यायस्य त्यागे बीजाभावाच्च । एवं च या पूर्वा सोत्तरेत्यादिविग्रहे उद्देश्यविधेयभावानुगतपूर्वनिपात एवेति भाष्यानुसारिसरणिरिति वदन्ति । अत्रमानमिति । अन्तरायां पुरीति भाष्योदाहरणात्पूःशब्दस्य प्रयोगे एवायं निषेध इति केचित् । अन्ये तु स्वं रूपमिति शास्त्रात्पूःपदस्य स्वरूपपरत्वे प्रत्यासत्त्याऽन्तरशब्दार्थकविशेष्यसमर्पके पूःशब्देऽसतीत्यर्थः । एवं च नगरीविशेष्यत्वे सर्वनामत्वमिष्टमेवेत्याहुः । अतएवाजर्यं संगतमिति सूत्रे"मृगैरजर्यमि"त्यादौ संगतमिति विशेष्यमध्याहार्यमित्यभियुक्ताः । प्रश्लेषादिति । येन नाप्राप्तिन्यायमाश्रित्येदम् । एत्वशीनुट्याडामामीति । इदमेवमेत्वेपीति वक्ष्यमाणं च चिन्त्यम् । तथाहि । नित्यत्वस्यं एत्वविषये जरस्यापि तौल्यादिति । तस्मात्परत्वादेत्वे पश्चाज्जरसि लक्ष्ये लक्षणस्येति न्यायेन पुनरत्वाप्रवृत्तिरित्येव तत्त्वम् । प्रश्ले

षड्ति । याडामोः कृतयोरपि पश्चान्निशादीनां प्राप्तिः संभवत्येव । आमि ङित्वद्वयेन पश्चान्निशादिप्रवृत्तेः संनिपातपरिभाषाविरोधाभावादित्याशयः । यद्वा । शस्प्रभृतिष्विति विषयसप्तमीति पूर्वमेव निशादीनां प्रवृत्तिरिति भावः । फलाभावेनेति । इदं चिन्त्यमिति शेषोध्यसखीति सूत्रे निरूपितम् । वर्णग्रहणेपीति । वर्णग्रहणे तत्प्रवृत्तौ बहूपप्लवापत्तेः । ओदिति सूत्रस्थभाष्यस्य चैकदेश्युक्तित्वमित्यन्यत्र प्रपञ्चितम् । पदाङ्गेति । शब्दस्वरूपस्याप्यध्याहारेण पृथक् तदन्तविधिरिति भावः । लाक्षणिकत्वेन समाधायेति । एवं च तद्भाष्येणाकारप्रश्लेषोपि सूच्यते इति भावः । वार्तिकस्येति । चित्रायां जातश्चित्र इत्यादौ दोषवारणायोभयोरप्यावश्यकत्वेन चिन्त्यमेतत् । यत्तु निशे इत्याद्यर्थं तस्यावश्यकत्वाच्चिन्त्यमित्याहुस्तत्तुच्छम् । पद्न्निति सूत्रस्य प्रयोगनियमार्थत्वाज्जरसपेक्षया याटः परत्वान्न जरसर्थमपि तत् । अर्द्धखट्वायामिति । अर्द्धं नपुंसकमिति सूत्रप्रत्याख्यानपक्षे तु गोवाश्यायै इत्यादिबोध्यम् । मानाभावादिति । इदं चिन्त्यम् । अतिखट्वायेत्यादावुक्तरीत्यैव याडप्रवृत्तौ आकारप्रश्लेषवैयर्थ्यापत्तेरेव मानत्वात् । अतिखट्वायेत्यादौ संनिपातपरिभाषयापि याटो वारयितुमशक्यत्वादिति बोध्यम् । अत्र निष्कर्षस्तु आबन्तान्तमित्येव सर्वत्र वाक्यार्थः । परम्परयापि कार्यमालोच्य स्थानिवत्त्वं प्रवर्तते एव । अतिखट्वायेत्यादावुक्तैव गतिः । आ आबितिप्रश्लेषस्तु चित्र इत्याद्यर्थं इति सुधीभिराकलनीयम् । आहुरिति । अत्र पाठकाः । विभ्राग् विभ्राड्डिति दीप्त्यर्थफणादितद्भिन्नभ्राजिभ्यां साध्यम् तच्च फणादिदीप्त्यर्थक भ्राशिभ्राजिभ्यां सुसाधमिति सूत्रे भ्राजिग्रहणं व्यर्थम् । तस्मात्फणादिभ्राशिरशान्तः । वाभ्राशेत्यत्र शान्तपाठात्तालव्यान्त इति तिङन्तशब्दरत्नग्रन्थस्तु चिन्त्य एवेत्याहुः । तच्चिन्त्यम् । भ्राशिति तालव्यान्तपाठस्य धातुसूत्रयोश्चिरतरसार्वजनीनसंप्रदायसिद्धस्यापलापायोगात् । भ्राजिग्रहणं तु विभ्राजयतेर्णिजन्तात्क्विपि टिलोपे षत्वार्थः । यत्तु वृक्षं वृश्चतीति क्विबन्ताण्णिजन्तात्क्विपि वृक्षव् इति लण्सूत्रस्थकैयटप्रयोगमुपादाय टिलोपे आनुमानिकस्थान्यादेशभाव वृक्षवृश्चवृक्षव्-अनयोरेव । एकदेशविकृतन्यायस्तु नाद्धाधिकविकार इति न षत्वमित्युक्तं विवरणकृद्भिः । तच्चिन्त्यम् । अर्थवतो वृक्षवृश्चवृक्षव्अनयोःस्थान्यादेशभावस्य भ्राजिग्रहणसार्थक्यानुग्राहकस्य संभवेन षत्वप्राप्तेस्तदवस्थत्वात् । अत एवारुच्या वृक्षं वेति वाति वेति विग्रहप्रदर्शनं कैयटोपाध्यायैःकृतमिति सुधियो विभावयन्तु । चिन्त्यमि-

ति । इदं चिन्त्यम् । धातोरित्यस्यैकाच इत्युत्तरार्थमात्रानुवृत्तस्य विशेष्यत्वेन तदन्तविधेरसुलभत्वात् । षत्वाप्राप्ताविति । वाचादीनामनभिधानमिति भावः । धुङ्भावइति । वर्णग्रहणे यदागमन्यायाप्रवृत्तिरिति भावः । तन्नेति । जश्त्वामित्यादि भाष्यकृत्प्रयोगनिर्वाहायोक्तार्थज्ञापकस्य संभवेऽयस्मयादित्वकल्पनानौचित्यात् । अन्यथा पुमान् स्त्रियेति निर्देशस्यानुपदं स्वेनैव ज्ञापकत्वोक्तेरसङ्गतिरिति । तथा शास इव अनिदित् असिद्धवत्पूर्वपदादित्यादिषु सूत्रेषु भाष्यकृद्भिर्निर्देशज्ञापकत्वोक्तेरसङ्गतिः । कुत्वाद्यनापत्तेश्चेति तु दृष्टापत्त्या ज्ञापनादाह । अचोऽक्षु इति तु ज्ञापकसिद्धस्यासार्वत्रिकत्वात्सिद्धम् । अत एव स्तोश्चुनेत्यादौ विसर्गषत्वजश्त्वादीन्येवमेव । वस्तुतोऽस्मान्निर्देशादेकवर्णात्मके पदे पदान्तत्वप्रयुक्तकार्याणि न । विसर्गस्यायोगवाहकत्वेनाश्रयं विना तस्य प्रयोक्तुमनर्हत्वाच्च । स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वेन जित्यादितः शादीनामबोधेनैकवर्णात्मके पदान्तत्वप्रयुक्तकार्याप्रवृत्तेर्युक्तिसिद्धत्वाच्च । अनुकार्यस्वरूपभङ्गाभियेत्येतदपि स्थान्यर्थाभिधानसमर्थेति युक्तिमूलकमेव । सख्युरित्यादौ तु विकृतेनापि स्थान्यर्थाभिधानाद्युक्तस्तत्रादेशादिः । अत एव त्रः संख्याया, ष्णान्तेति निर्देशोपपत्तिः । तत्र नलोपे हि शून्यमेवावतिष्ठेतेत्युक्तन्यायेन तत्र नलोपाप्रवृत्तिरिति सचेतसः परिभावयन्तु । विचार्यइति । हो ढ इति सूत्रे भाष्ये एकाच इत्युत्तरसूत्रे धातोरित्यनुवृत्तेरुक्तत्वेन मध्यस्थेप्यस्मिन्ननुवृत्तेः स्पष्टत्वेन विचार्य इत्युक्तिश्चिन्त्यैव । ङिदाक्षिप्तेति । ननु ङित्त्वस्य प्रत्ययाप्रत्ययसाधारण्येनाव्यभिचारस्यैवाक्षेपनियामकत्वेन कथमत्र नाक्षेपः । नन्वियङुवङ्स्थाने ढकाराव्यवहितोत्तरवर्तिङित्प्रत्यय एवेति वाच्यम् । एवं सति तदव्यवहितोत्तरवर्तिङितः प्रत्ययासाधारणतया प्रत्ययग्रहण इति परिभाषोपस्थित्यैव निर्वाहे ऽङ्गाक्षेपकरणानौचित्यात् । न चोपात्तरूपं ङित्त्वं प्रत्ययाप्रत्ययसाधारणमिति उपात्तरूपस्य प्रत्ययासाधारण्यानिमित्तकप्रवृत्तिकपरिभाषाया अप्रवृत्तिरित्याशयः । एवमपि धीचित्रावित्यादौ चित्रङादिङित इयङ्स्थानिनः परत्वेन व्यभिचार एव । न चेदं सकलसंज्ञास्थलं तत्स्थलीयेयङ्स्थानिनः परं ङित्त्वं तु प्रत्ययासाधारणमेवेति वाच्यम् । द्वन्द्वे घीत्यस्याप्रवृत्त्या मतिचित्रयोर्द्वन्द्वे चित्रमती इत्येतत्सिद्धेरेव फलत्वात् । न च लौकिकविग्रहवाक्ये विभक्त्या व्यवधानेन ङित्परत्वाभावेन नदीत्वाप्रवृत्तौ घिसंज्ञायां द्वन्द्वे घीत्यस्याप्रवृत्तौ पश्चात्प्रवृत्तनदी-

त्वेन प्रथमप्रवृत्तकार्याप्रवृत्तिरिति वाच्यम् । दण्डिदत्ताविस्याद्यनुरोधेन प्रयोगसमवायिघित्वस्य तत्प्रवृत्तिप्रयोजकतया प्रकृते च नदीत्वेन बाधे घित्वस्याप्रयोगासमवायित्वेन द्वन्द्वे घीत्यस्य प्रथममप्यप्रवृत्तेः । न च हरिश्चाहश्चेति विग्रहे परिनिष्ठिते रूपे यणादेशेन घित्वस्य प्रयोगसमवायित्वाभावात्तत्र द्वन्द्वे घीत्यस्याप्रवृत्तिरिति वाच्यम् । यणादेशेपि स्थानिवद्भावेन घित्वस्य सुलभत्वात् । तदन्तसंज्ञापक्षे घित्वस्य षट्त्ववदलधर्मत्वाभावात् । शेषग्रहणप्रत्याख्यानपक्षे उपसंजनिष्यमाणन्यायेन भाविनदीत्वमालोच्य पूर्वं घित्वाप्रवृत्तेश्च । न च तदन्तविध्यर्थं शेषग्रहणस्य नव्यैः स्थापितत्वेन तत्पक्षे प्रथमतो घित्वप्रवृत्तिर्निर्बाधैव । पश्चादाकडारीयत्वादिति नदीत्वाप्रवृत्तिरिति वाच्यम् । अन्तरङ्गानपीतिन्यायेन समासलुकः पूर्वं घित्वाप्रवृत्तेः पश्चाच्च नदीसंज्ञाविषयसत्त्वेन न घित्वं न च ङित्परकत्वं निमित्तीकृत्य ङित्त्वे नदीसंज्ञा तदभावे तु नेति मतीत्त्युत्तरं चित्रस्य व्यवस्थापने नदीत्वस्यापि तस्येष्टत्वात् । द्वन्द्वे घीत्येतत्प्रवृत्तिफलं संपादितमेव । पूर्वं चित्रस्य व्यवस्थापने तु न नदीत्वमित्युभयतः पाशेति वाच्या । चित्रे परतो मतिशब्दस्य नदीसंज्ञया द्वन्द्वे घीत्यस्याप्रवृत्तौ रामादीनां पूर्वं निपातापत्तेः । किंच कर्त्रीशब्दादाचारक्विबन्तात्संबुद्धौ सुलोपे चित्रङि परतो ङिति ह्रस्वश्चेति विकल्पनात्सिद्धिरिति फलम् । एतेन वामीत्येतदकरणलाघवेन वाचि ह्रस्वश्चेति वक्तव्ये ङिति ह्रस्वश्चेत्युक्तिः संनिपातपरिभाषाया अनित्यत्वज्ञापनायेति बृहच्छब्दरत्नोक्तमपास्तम् । ननु वामीत्येतत्साहचर्येण ङित्प्रत्यय एवेति चेत् न । आमोपि प्रत्ययाप्रत्ययसाधारणत्वादितिचेद् । अत्राहुः । इयङाक्षिप्तप्रत्ययेन ङिद्विशेषणात्तद्विशेषिणाङ्गस्याक्षेप इत्याशय इति । नेयङित्यादौ इयङाक्षिप्तस्याङ्गस्येयङ्विशेषणतैवोचिता । प्रकृते च ङिदाक्षिप्तस्याङ्गस्य तुल्यन्यायान्ङिद्विशेषणात्वेपि स्त्रीत्वे न तद्विशेष्यत इति । असंभवीति । अतिश्रियेत्याद्युदाहरणाविषय इत्यर्थः । श्रियेत्यादौ तु संभवोऽस्त्येवेति भावः । एवं च प्राचां मते अतिश्रिये इति भाष्योदाहरणासंगतिः । अङ्गाक्षेप इति युक्तिसिद्धत्वेन तस्य नित्यस्त्रीत्वाभावात् । सूचितमिति । प्रवृत्तावित्यस्य नदीसंज्ञाप्रवृत्तिकाल इत्यर्थः । एवं च यदा नदीसंज्ञा कर्तव्या तदा स्त्रीवाचकावेव न पुंवाचकावित्यर्थेनान्यत्र पुंवचनत्वेपि प्रवृत्तिकाले पुंवाचकत्वाभावस्य विवक्षितत्वसूचनादिति भावः । इति वक्तव्यमित्यस्य ङिति ह्रस्वश्चेत्यपहायेत्याशयः । नदीसंज्ञौ भवत इत्य-

रस्वारस्येन स्वातन्त्र्येण विधायकत्वावगतेः । अनेन च वार्तिकेन कटप्रुवे ब्रा-
ह्मण्यै इत्यादावपि नदीसंज्ञा प्राप्नोत्येव । प्रवृत्तौ पुंवाचकत्वाभावात् । प्रथमलि-
ङ्गग्रहणं चेत्येतदप्रवृत्त्यन्वाख्यायकत्वं तु श्रिये ब्राह्मणायेत्युदाहरणविषयएव ।
अतिश्रिये इत्याद्युल्लेखस्तु यथाश्रुतसूत्रसत्त्वे ङिदाक्षिप्तस्याङ्गस्य स्त्रीत्वाभावान्न-
दीत्वाभावेन सिध्यतः कथमिदानीं सिद्धिरिति शङ्कानिरासाय । यङ्यक्यवलोप
इति वार्तिकस्य लवितेति प्रयोजनदानवद् दृष्टान्तार्थं वेति भावः । वाक्यद्वयेपी-
ति । ह्रस्वौचेत्यादिति । वार्तिके भवत इत्युक्तत्वादिति भावः । यत्तु कौमुद्यां वा
नदीसंज्ञौ स्त इत्यर्थो दर्शितस्तत्तुच्छम् । नित्यस्त्रीलिङ्गावित्युक्त्या निषेधविकल्प-
स्यावश्यकत्वेन वा नदीसंज्ञौ स्त इत्यस्य फलितविधिविकल्पाशयकत्वस्यैव निर्णयेन
स्वाभिमतेऽर्थे तदुपष्टम्भकरणाश्रयणौचित्यात् । ह्रस्वयोर्ग्रहणमिति पक्षोपपादने
इति । इत्थं हि तदुपपत्तिः । यू इति इत्वोत्वावच्छिन्नयोर्ग्रहणम् । न चैवं बहु-
शकटिरित्यादौ कबापत्तिः । यूस्त्र्याख्यौ, नेयङुवङ्स्थानौ, वामी, इत्येतदुत्तरं ङि-
तीति योगे नेयङुवङ्स्थानावस्त्री, वा, नदीत्यनुवृत्त्या निषेधविकल्पं स्वीकृत्याग्रिमे
ह्रस्वाविति न्यासे इयङुवङ्स्थानौ वेति निवर्त्य ङिति नदीत्यनुवर्त्य ङित्येव यू ह्रस्वौ
नदीत्येवं नियमेनादोषादिति पाठकाः । एवं शकट्यादिशब्देषु नदीत्वस्य ङित्येवेति
नियमेन वारणेपि इष्वादिषूभयलिङ्गेषु नदीत्वानापत्तिः । अतस्स्त्र्याख्यावित्यस्य
नित्यस्त्रीत्वमजानत एकदेशिन इत्यवश्यं वक्तव्यमिति भावः । वस्तुतस्तु शकट्या-
दीनां ङिति नदीविकल्पानापत्त्या नियामकत्वस्याग्रे दूष्यमाणत्वेन तद्भाष्यस्य पूर्व-
पक्ष्युक्तित्वस्य सर्वैर्वक्तव्यत्वेपि शेषो घीति सूत्रे शेषग्रहणमकृत्वा यथा न्यासएव
बहुशकटिरित्यादौ घिसंज्ञाया बाधेन दोषाभावप्रतिपादनावसरेपि भाष्ये निषेधविक-
ल्पत्वकथनेन तद्भाष्यस्यैकदेश्युक्तित्वे मानाभावेन त्वदुक्ताशयासङ्गतेः । तस्मान्ङि-
तीति सूत्रेऽङ्गाक्षेपस्य युक्तिसिद्धत्वेन प्राधान्यात्तस्यैव स्त्र्याख्यावित्यनेन सबन्धा-
त्तस्य नित्यस्त्रीत्वार्थकत्वे ऽतिश्रिये इति भाष्योदाहरणासङ्गत्यापत्त्या इयङादंशे तद-
संबन्धेन निषेधविकल्पमात्रबोधकत्वेपि तदसङ्गत्यापत्त्या नित्यस्त्रीत्वार्थकत्वमजानत
एकदेशिन इत्याशयः । भाष्यादिति । द्वेष्यं विजानीयादिति भाष्येण प्रथमलिङ्ग-
ग्रहणं चेत्यस्याप्रवृत्तौ अतिश्रियै ब्राह्मण्यै इति भाष्योदाहरणासङ्गतेरिति भावः ।
नदीत्वप्रयुक्तामिति । नित्यनदीत्वप्रयुक्तमित्यर्थः । यश्चेति । एतस्य दूरस्थितेन

एवामित्यनेनान्वयः । सादृश्यं च त्रिलिङ्गगतत्वेन । तत्फलं तु नित्यस्त्रीत्वनिवेशे दोषाभावसूचनम् । यद्वा नन्वित्यस्यैवमित्यनेनान्वयः । तस्य च नित्यस्त्रीत्वानिवेश इत्यर्थः । एवं च नित्यस्त्रीत्वानिवेशे खरकुट्यै इत्यादौ भाष्यसंमतत्रिलिङ्गत्वप्रकृते अनियतलिङ्गत्वेन नदीत्वापत्तिरिति वाक्यार्थः । न चैवं चञ्चा ब्राह्मणा इत्यत्र नत्वाप्रवृत्तिरित्यत आह । चञ्चाइति इति भट्टाः । पाठकास्तु चञ्चान् ब्राह्मणान् पश्येत्यारभ्य पुँस्त्वे वाच्ये नत्वमित्यर्थादित्यन्तस्य इत्यर्थान्नत्वमिति कृत्वान्वयस्य एवमित्यादिनान्वयं कृत्वा इति न च वाच्यमित्यन्वयः कर्तव्य इत्याहुः । तद्विरुद्धेति । ननु तच्छब्देन प्रकृतिलिङ्गं परामृश्यते तत्कार्यं वा । नाद्यः । स्वाश्रयपुँस्त्वस्य प्रकृतिलिङ्गाविरुद्धस्य वक्ष्यमाणत्वात् । नान्त्यः । तत्प्रयुक्तकार्यस्यैवाभावातिदेशाप्रवृत्तेः । न च टाबादिरेव तत्फलम् । तावतापि स्वाश्रयनत्वस्य तदविरुद्धत्वादिति चिन्त्यमेतत् । ननूक्तं हि प्रकारद्वयमतिदेशसत्त्वे एव तत्प्रत्याख्याने तु कथमित्याह । युक्तवद्भावादिति । ननु च पदार्थमात्रे शास्त्रीयलिङ्गत्रयस्यासंभवादत आह । यद्यपीति । तत्सत्तानुमानादिति । ननु गौर्यै पदार्थायेति विशेषदर्शनेन कुतो न पुँस्त्वानुमानं तथा चाडाद्यनापत्तिरिति चेत् । न । भावानवबोधात् । अनुमानप्रकारस्तु खरकुटीशब्दो वस्तुतः पुँस्त्वविशिष्टार्थप्रतिपादकः । प्रवृत्तिनिमित्तसमानाधिकरणपुंस्त्वसमानाधिकरणस्वाभिन्नप्रवृत्तिनिमित्तवत्समानाधिकरणत्वात् । नीलो घट इत्यादौ घटपदसमानाधिकरणनीलपदवत् इति । न च पूर्वोक्तो दोषो नोद्धृतः । द्वितीयप्रवृत्तिनिमित्ते व्यतिरेकित्वाविशेषणदानात् । न चैवमपि गौर्यै प्रकाण्डायेत्यादौ नदीत्वानापत्तिः । उक्तप्रवृत्तिनिमित्तवन्निष्ठतादात्म्यसंसर्गावच्छिन्नविशेष्यतानिरूपितप्रकारताश्रयत्वस्य हेतुत्वात् । न चैवं हरिणा देवतयेत्यादौ देवताया अपि विशेष्यत्वादस्त्रियामिति नात्वनिषेधापत्तिः । सामान्यविशेष्यभावे विशेष्यवाचकस्यैव विशेष्यत्वात् । वस्तुतस्तु स्वस्वप्रवृत्तिनिमित्तानुयोगितावच्छेदकप्रवृत्तिनिमित्तवत्समानाधिकरणं हेतुः । न च गौरीत्वानु इति वाच्यम् । तस्य गौरीत्वानुयोगिताव्यभिचारितत्वात् । न चैवमपि पदार्थादिशब्दे गौर्यादिप्रतिपादनकाले लिङ्गान्तरोपसर्जनेन नित्यस्त्रीत्वव्याहतिः (१) यस्य नदीसंज्ञा कर्तव्या तज्जन्यस्वार्थविशेष्यकरणस्वप्रवृत्तिनिमित्तकत्वस्य स्त्र्याख्यपदेन विवक्षितत्वादिति दिक् । इत्याहुरिति । अत्रेदं वक्तव्यम् । अङ्गाक्षेपस्तावदप्रामाणि-

कः । आक्षेपेपि इयङाद्यंशे एव तस्यान्वयः । तथा च 'ह्रस्वेयुवङ्स्थानप्रवृत्तौ च स्त्रीवचन' इति वार्तिकविरोधाभावादियङाद्यंशे नित्यस्त्रीत्वे बाधकाभावः । अतिश्रियै ब्राह्मण्यै इत्यादावर्थान्तरसंक्रमप्राक्कालीननित्यस्त्रीत्वस्य ग्रहणेन भाष्यस्य सामञ्जस्यात् । न चापर आहेति वार्तिके प्रवृत्तौ स्त्रीवचनाविति निश्चयः पठ्यते । अग्रे गत्वा प्रथमालिङ्गग्रहणं चोदितमित्यस्योपलक्षणत्वेन तत्प्रत्याख्यानरीतीनां तद्द्वेष्यं विजानीयादित्युच्यते । एवं चातिश्रिशब्दघटकश्रीशब्दस्य कथं स्त्रीत्वविशिष्टार्थप्रतिपादकत्वम् । न चावयवस्त्रीविषयत्वात्सिद्धमित्युक्तयुक्त्या नित्यस्त्रीत्वार्थप्रतिपादकत्वं किमिदं प्राग्रीत्या उत नव्यरीत्या । नाद्यः । प्राचां मते प्रधानेन स्त्रीत्वनिवेशेन स्त्रीत्वनिवेशो न उक्तन्यायात् । नान्त्यः । श्रियै ब्राह्मण्यै इत्यादौ सर्वथा प्रथमलिङ्गग्रहणं चोदितमित्यस्योपलक्षणत्वेन तत्प्रत्याख्यानरीतीनां सर्वासामप्यनाश्रयणसूचनात् । एतेन नित्यस्त्रीत्वं यथोद्देशेन सूपपादमिति अपास्तम् । न चैवं श्रियै इत्यादीनां नित्यस्त्रीत्वमव्याहतम् । लिङ्गान्तराप्रकारकबोधजनकत्वात् । नन्वेमपि अतिश्रिये ब्राह्मणायेत्यत्र श्रीशब्दस्य लिङ्गान्तरावाचकत्वेनातिप्रसङ्गो दुर्वार इति चेत् । न । घटकतयापि लिङ्गान्तरावाचकत्वस्य विवक्षितत्वात् । नन्वेवं सति श्रीशब्दस्य घटकतया श्र्यतिक्रान्तबोधकत्वेन तस्य च लिङ्गान्तरसमानाधिकरणबोधकत्वेन नित्यस्त्रीत्वार्थकत्वाविशिष्टप्रातिपदिकत्वाभाव इति चेत् । न । स्त्रीवचनावेवेत्येव व्यावर्त्या लिङ्गान्तरांशे घटकतयापीति निवेशेपि सूत्रोपात्तनित्यस्त्रीत्वांशे तदनिवेशात् । न च लिङ्गान्तरासमानाधिकरणत्वेन च नित्यस्त्रीत्वार्थकत्वाविशिष्टप्रातिपदिकत्वाभाव इति वाच्यम् । स्त्रीवचनावेवेत्येव व्यावर्त्य लिङ्गान्तरांशे घटकतयापीति निवेशेपि सूत्रोपात्तनित्यस्त्रीत्वांशे तदनिवेशात् । न च लिङ्गान्तरासमानाधिकरणप्रवृत्तिनिमित्तवद्बोधकत्वे विशेष्यतया, यथाकथं चिद्वा । नाद्यः । अतिश्रियै इत्यादौ प्रकृत्युत्तरं तदभावात् । नान्त्यः । अवयवस्त्रीविषयत्वात्सिद्धमिति न्यायाङ्गीकारापत्त्या प्रथमालिङ्गग्रहणं चोदितं तदिह द्वेष्यं विजानीयादिति भाष्यविरोधात् । अत एव शेखरे एतच्च प्रवृत्तौ स्त्रीवचनावेवेति सूचितमित्युक्तम् । किमर्थं पुनरिदमुच्यते इत्युक्त्वा प्रथमलिङ्गग्रहणं चोदितं तद् द्वेष्यं विजानीयादित्युक्त्या प्रथमालिङ्गग्रहणं चेत्येतदननुवृत्तितात्पर्यकमुक्तवार्तिकमित्यर्थस्य लाभात् । अन्यथा त्वद्रीत्या प्रथमालिङ्गग्रहणं चेत्यस्यास्य च उभयोरावश्यकत्वे

कथनीयं स्यादिति चेद् । अत्र ब्रूमः तद् द्वेष्यं विजानीयादित्यस्य श्रिये ब्राह्मणायेत्युदाहरणविषयत्वात्सामान्यप्रवृत्तभाष्यस्य सति प्रतिबन्धके विशेषविषयत्वात् । बाधकानि च वक्ष्यामः । किं च शकट्यै ब्राह्मणायेति भाष्यविरोधः । तथा हि । किमत्र क्यजन्तात्किबुत क्विबन्तात्किबाहोस्वित्कनो लुप् । नाद्यद्वितीयौ । दीर्घतुगापत्तेः । न तृतीयः । स्वमते यथाकथं चित्स्त्रीत्वनिवेशेन श्रिये ब्राह्मणायेत्यादाविव विकल्पापत्तेर्दुर्वारत्वात् । यत्त्वत्र पाठकेनोक्तम् 'अतिशकट्यै ब्राह्मण्यै इत्यत्र वृत्तेर्ब्राह्मणीबोधिकायाः स्त्रीत्वान्नदीत्वं तदवयवस्यापि शकटिशब्दस्य नदीत्वसूचनाय शकट्यै ब्राह्मण्यै इति, तथातिशकटये ब्राह्मणायेत्यत्र वृत्तेर्ब्राह्मणबोधिकायाः पुँस्त्वान्नदीत्वाभावेऽवयवस्य सत्यपि स्त्रीत्वे नदीत्वाभावसूचनाय शकटये इत्युक्तम्' इति । तत्तुच्छम् । अवयवशकटिशब्दस्य नदीत्वतदभावसूचने पर्याप्त्या उत स्वरूपसंबन्धेन । नाद्यः । असंभवित्वात् । नान्त्यः । फलाभावात् । विशिष्टस्य नदीसंज्ञातदभावान्यतरोक्त ऽवयवेऽतदन्यतरस्य सर्वैरुक्तत्वात् सूचनेऽस्य निस्सारत्वात् । किञ्चाङ्गस्यैव नदीसंज्ञायां घटकस्य शकटिशब्दस्य घित्वस्याप्रतिबद्धप्रवृत्तिकतयाऽतिशकट्यै इत्यादौ घेर्ङितीति गुणापत्तिः । किञ्चातिश्रियै इत्यादौ विशिष्टस्य नित्यस्त्रीत्वाभावेन नेयङिति निषेधाप्रवृत्तौ चरितार्थस्य नदीत्वस्य श्रिये इत्यत्र 'निषेधाश्चे'ति न्यायेन नेयङिति निषेधापत्तिः । ननु शेषपदेन स्वरूपेण नदीशून्यत्वस्य विवक्षितत्वान्नाद्यो वार्थे निषेधस्य प्रविष्टत्वेन 'निषेधाश्चेति' न्यायानवतारादिति चेत् । न । हरेर्मतये इत्यादौ दोषप्रसङ्गात् । 'स्वरतिसूति'इति सूत्रे स्वरतेरुदात्तत्वे एव 'निषेधाश्चे'ति संचारेण भाष्ये सङ्क्षेणट्त्वबाधकत्वापादनेन विधिमुखेन प्रवृत्तौ तदसंचारबोधकत्वाच्च । यत्तु पाठकेनोक्तं 'वाक्यभेदेन निषेधविकल्पकत्वमपीति' तत्तुच्छम् । भाष्यात्तदलाभात् । मानाभावाद्गौरवापत्तेश्च । किञ्च प्रथमालिङ्ग्रहणं चेत्यस्य फलदर्शनावसरे लुप्स्वरकुट्यै ब्राह्मणायेति भाष्ये उक्तम् । स्त्रीत्वविशिष्टमेव य आह सः स्त्र्याख्यः । न चायं तथा । स्त्रीत्वेन रूपेण वस्तुतः पुँस्त्वविशिष्टस्याभिधानादित्यर्थकः स्वाश्रयस्य पुँस्त्वस्यानिवर्तनान्नायं स्त्रियं स्त्रियामेव वर्तत इत्यादि कैयटेनोक्तम् । भवद्रीत्या तस्माच्छसो नः पुंसि,त्यादौ कृत्स्नस्य निरूपितत्वसंबन्धेन किञ्चिल्लिङ्गाविशिष्टस्य शक्तावन्वये स्वनिरूपितशक्तिसंबन्धेनेतरत्रान्वयं वा शक्तिनिरूपकत्वस्य स्वनिरूपकतावच्छेदकालिङ्गेपि ला-

भस्य सार्वजनीनानुभवसिद्धस्य च त्यागेनोक्तार्थकरणानौचित्यादुक्तभाष्यकैयटासङ्गतिः । मन्मते तु श्रिये ब्राह्मणायेत्यादौ लुपि विकल्पाभावः फलं नित्यस्त्रीत्वस्य ङिति ह्रस्वश्चेत्यत्रापि संबन्धात् । प्रथमलिङ्गग्रहणं चेत्यस्य तदविषयत्वाच्च । किञ्च सत्यभिधाने इष्टापत्तिरिति शेखरः । तत्फलं तु श्रिये ब्राह्मणायेत्यादिना विवरणेन यूस्त्र्याख्याविति सूत्रस्थेन विरुद्धः । किञ्च निषेधविकल्यकत्वप्रतिपादकेष्विति सूत्रस्थभाष्यविरोधश्च । ब्रस्यैकदेशयुक्तित्वकल्पनं त्वप्रामाणिकम् किञ्च ङिति ह्रस्वश्चेति सूत्रे स्त्र्याख्याविति विशिष्टानुवृत्तिप्रतिपादनपदानुवृत्तिपरभाष्यस्वारस्येन ङिति ह्रस्वश्चेत्यस्यापि नित्यस्त्रीत्वविषयकत्वमेव लभ्यते । वस्तुतस्तु ङिति ह्रस्वश्चेति सूत्रे ह्रस्वदीर्घयोरंशयोरपि स्त्र्याख्यपदानुवृत्तिपरभाष्यस्वारस्यान्नित्यस्त्रीत्वार्थकानामेवोदाहरणदानाच्च । ङितीति सूत्रे शब्दद्वयसाधारण्येनापि नित्यस्त्रीविषयमेव । अत एव यूस्त्र्याख्याविति सूत्रे भाष्ये यू इति ह्रस्वयोर्ग्रहणमिति पक्षोपपादनावसरे शेषोघीति सूत्रे शेषग्रहणमकृत्वा घिसंज्ञाया बाधनादोषाद्ध्रस्वयोर्ग्रहणमिति भाष्ये उक्तं ह्रस्वांशे स्त्र्याख्यावित्यस्यासंबन्धे तु स्त्रीवाचकपतिशब्दः पतिः समास एवेति नियमेन घित्वाप्रवृत्तौ नित्यनदीत्वप्राप्त्या तदसंगतिः स्पष्टैव । किञ्चाङ्गाक्षेपेऽतिश्रिये इत्यादौ विशिष्टस्य स्त्रीवाचकत्वाभावादत्र नदीत्वाप्रवृत्तौ तदुदाहरणपरभाष्यासङ्गतिः स्पष्टैव । ननु अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्प्रतिषेधे यण्स्थानयोरपि य्वोः प्रतिषेधः प्रसज्येत । एवं चाध्यै ब्राह्मण्यै इति भाष्यासंगतिः । त्वन्मतेऽङ्गानाक्षेपेण ङिति ह्रस्वश्चेति विकल्प आपादयितुं शक्यो न तु निषेध इति चेत् । न । तद्भाष्यस्य युक्त्यसहत्वेन चिन्त्यतायाः कैयटेनैवोक्तेः । तथा हि । आध्यायतीति विग्रहो वा आ इषद् ध्यानं धीर्यस्येति वा । नाद्यः । नित्यस्त्रीत्वाभावेन नदीत्वाप्राप्तेः । नान्त्यः । नद्यृतश्चेति कबापत्तेः । न च ऋदन्तसाहचर्येण समासात्पूर्वावस्थायामुत्तरपदस्य नदीत्वे एव कपः प्रवृत्तिरिति विवरणोक्तं युक्तम् ? । प्रियतिसृ इत्यादौ समासोत्तरमपि ऋदन्तस्य सत्त्वात् । न च तत्र कपोऽनिष्टत्वम् । तावतापि साहचर्यासंभवात् । त्वदुक्तसाहचर्याश्रयो नद्युत्तरपदादित्यर्थो निष्फल एव स्यात् । प्रियचतसृकं इत्यादौ समासोत्तरमपि ऋदन्तस्य सत्त्वाच्च । तत्र तु मानाभावेन कपा प्रवृत्तिकल्पनानौचित्यात् । कृशब्दस्य दीर्घान्तस्य पदान्तरेण बहुव्रीहौ नपुंसकह्रस्वत्वे समासोत्तरमपि ऋद-

न्तस्य सत्त्वेन साहचर्याश्रयणायोगाच्चेति बहुतरमुक्तं विचार्य भाष्यकैयटाद्यारूढमनुनोक्तं मामकमिति सूक्ष्मधियो विभावयन्तु । य्वोह्रस्वाविति । सावर्ण्यं षष्ठ्यर्थः । बाधादिति । नदीसंज्ञकेष्वेवाभ्यां बाधः कुतो न विनिगमनाविरहादित्यत आह । नदीग्रहणानुवृत्तेश्चेति । ननु तिस्रो भार्या यस्येति बहुव्रीहौ स्त्रियाः पुंवदिति पुंवद्भावे ततस्तिसृभावानापत्तेराह । तृतीयान्तेनेति । भार्याभरणीय इति । भार्याशब्दस्य संज्ञाशब्दत्वे क्रियावाचित्वाभावात् । कर्तृकरण इति तृतीयासमासो न प्राप्नोतीत्याशङ्कापरिहाराय भरणीयमित्युक्तमिति पाठकाः । तन्न । संज्ञाशब्दस्य नित्यस्त्रीलिङ्गत्वेन तत्त्वशङ्काया असंभावितत्वात् । तस्माद्वस्तुस्थितिकथनमेतत् । यत्तु पाठकेनोक्तं भृञोऽसञ्ज्ञायामिति क्यपा भाष्यम् चिन्त्यमिति तन्न 'भृञोऽसंज्ञायामिति सूत्रे तदनुबन्धकपरिभाषया भौवादिकस्य भृञोसंज्ञायामित्यत्रग्रहणेन जौहोत्यादिकाद् द्व्यनुबन्धकाद्ण्यतारूपसिद्धेः । आचेर । अलोन्त्यपरिभाषयैवसिद्धेइति । एतदारभ्येति दिगित्यन्तस्यायं भावः । तिसृचतसृ इत्यनयोरनुवृत्तौ अचीति सप्तमीनिर्देशेन तस्य षष्ठ्यन्तत्वकल्पनया सिद्धे ऋत इति व्यर्थमिति शङ्काग्रन्थार्थः । यदि ऋत इति नोच्येत तदा कस्य रेफ इत्याकाङ्क्षायां पूर्वत्र क्लृप्ततया क्लृप्तस्य त्रिचतुरोरित्यस्यैवानुवृत्तौ रादेशस्तिसृचतस्रोरेवबाधकः स्यादिति समाधानग्रन्थार्थः । त्रिचतुरोरित्यस्यैव कार्यतया क्लृप्तस्य ऋत इत्यनेन संबन्धेन निर्वाहे तिसृचतृसृ इत्यस्यानुवृत्तिः । स्थानिवद्भावान्वेषणमूलकलाघवानुरोधेन तिसृचतृसृ इत्यस्यानुवृत्त्युक्तिः । विप्रतिषेधासम्वादादाह ॥ अत्रेति ॥ असंभवमेव व्यनक्ति । एतेनेति । नुडन्तरङ्गइति । आमिति शब्दस्वरूपस्य श्रोत्रेन्द्रियेणैव सुग्रहत्वात् । स्त्रीत्वविभक्ति त्रिचतुराङपेक्षत्वेन ह्रस्वाङ्गानपेक्षनुडपेक्षया बहिरङ्गत्वं तिसृचतस्रोरिति भावः । विनिगमनाविरहेण सञ्ज्ञार्थकृत बहिरङ्गत्वानाश्रयणे गमकमिदमित्याह । अर्थसञ्ज्ञाकृतेति । सञ्ज्ञार्थेति । पूर्वनिपातस्यानित्यत्वादित्यनिर्देशः यत्तु पाठकेनोक्तम् 'अन्तरङ्गत्वादायादेशेपि पश्चातिसृभावे लक्ष्येलक्षणस्येति न्यायेन पुनस्त्रयादेशाप्रवृत्तौ निषेधस्य साफल्याज्ज्ञापकत्वमनुपपन्नमिति' । तन्न । नतिसृचतसृइत्यन्तरङ्गे निषेधे कर्तव्ये ऽर्थसञ्ज्ञापेक्षस्य बहिरङ्गस्य तिस्रादेशस्यासिद्धत्वेन तिसृग्रहणवैयर्थ्यापत्त्या तत्सामर्थ्येन सामान्यतोऽर्थकृतबहिरङ्गत्वानाश्रयणबोधनमित्याशयात् । न चान्तरङ्गत्वादायादेश इत्यपवादानुपयोग इति वाच्यम् । अस्य ग्रन्थस्य परत्वात्तिस्रादेशे सकृद्गतिन्यायेन पुन-

त्रयादेशाप्रवृत्तिरिति । भाष्यविरोधस्य सूपपादात् दूषणान्तरस्य सुवचतार्थत्वात् । न चत्वारीत्यादौ अप्रुत्रित्यस्य प्रतिपदोक्तत्वेन प्रथमतः प्रवृत्तिदर्शनात्प्रकृतेपि आमिति विशिष्य प्रत्ययविशेषनिमित्तकत्वेनास्य प्रतिपदोक्तत्वादिति चेत् । न । तिसृविधावपि स्त्रियामित्युपपादनेनार्थविशेषविशिष्टप्रकृतेरुपादानेन प्रतिपदोक्तत्वस्योभयत्र तौल्यात् । अपरे तु त्रयादेशस्य विभक्तिविशेषापेक्षत्वाद्विभक्तिसामान्यापेक्षस्य तिसृभावमपेक्ष्य नास्ति अन्तरङ्गभाव इति प्राहुः । तन्मतं दूषयति । वस्तुत इति । ननु रुद्यादित्यादौ रुदादिभ्य इति प्रकृतिविशेषापेक्षाभ्यामडीड्भ्यां धातुमात्रापेक्षस्य यासुटोऽन्तरङ्गत्वमुच्यते । एवं च रुदादिभ्यः स्वरूपेणैवोपादानं न विशेषधर्मेणेति चेत् । न । सार्वधातुके इत्युक्तया प्रकृते धातुत्वस्यावश्यकतया धातुत्वज्ञानमपि विशेषशास्त्रप्रवृत्तावौपयिकतयापेक्षितमिति सामान्यशास्त्रप्रवृत्तौपायिकधातुत्वानुसंधानं, तद्भिन्न धर्मानुसन्धानं चेति यासुटोन्तरङ्गत्वेपि प्रकृते सार्वधातुकत्ववत्सामान्यधर्मापेक्षस्य विशेषधर्मस्यानुपपादनेन वैषम्यमित्याशयात् । यत्तु वर्णो वर्णेनेति सूत्रे कर्मधारय बहुव्रीह्योरन्तरङ्गबहिरङ्गभावं विचारयता भाष्यकृतैवार्थकृतबहिरङ्गत्वस्याश्रयणात् । अयुक्तमेतदिति पाठकेनोक्तं तदति मौढ्यात् । प्रत्यङ्गवर्ती लोक इत्यादिना अचः परस्मिन्निति सूत्रस्थभाष्योपपादितदिशोपस्थितिकृतमन्तरङ्गबहिरङ्गभावाश्रयणेन तद्भाष्यप्रवृत्तेः । अत एव स्वार्थद्रव्यादिप्रयुक्त कार्याणामन्तरङ्गबहिरङ्गभावोऽचः परस्मिन्निति सूत्रस्थं भाष्यं च संगच्छते । स्वरूपामिति । स्वप्रवृत्तिनिमित्तभूतत्रित्वचतुष्ट्ववत्सखे यर्थः । तेन 'प्रियत्रिस्त्रियादौ प्रियास्त्रयो यस्यास्सेत्यर्थकेऽजहत्स्वार्थावृत्तिके पक्षे त्रिशब्दस्य विशिष्टार्थबोधकत्वं त्रिशब्दस्याक्षतमेवेति तिस्त्रापत्तिरिति, परास्तम् । नङेरामिति । सन्निपातपरिभाषयापि त्रयादेशो वारयितुं शक्य इत्यपि बोध्यम् । यणादेशे तु न सन्निपातेति प्रवर्तते इति तु मूल एव स्फुटीकृतम् । ननु प्रियाजस् इत्याद्यलौकिकविग्रहवाक्ये कुतो न तिस्रादिस्तथा चालौकिकप्रक्रियावाक्यस्य ऋदन्तप्रकृतिकसुबन्तोत्तरपदत्वादलौकिके कप्स्यादित्याशङ्क्याह । प्रियाजस् इति । अलौकिकवाक्य इति ॥ अपरिनिष्ठितत्वरूपं तत्त्वं तु नातिदेशसहस्रेणापि देष्टुं शक्यमिति भावः ॥ एतेन 'बहुशकश्रौ इत्यादौ कबापादनं' परास्तम् । सन्निपातपरिभाषयापि कप सुपरिहर इत्यपि बोध्यम् । नुमः परत्वादिति ॥ इदमुपलक्षणं शौ आमः परत्वस्या-

पि। तिस्रादेशःपुनरारम्भस्तु सकृद्गतिन्यायादिति बोध्यम् । सामान्यापेक्षत्वे प्रमाणमाह । प्रत्यय इति । एवं च रादेशस्यापवादत्वेपि न दोषभावः । नयासयोरिति । पररूपस्यापि क्ङितीति चेति सूत्रस्थभाष्यप्रतिपादिते औयत इत्यादि लक्ष्यसिद्ध्युपपादकेऽसिद्ध इव पररूपस्याप्यसिद्धत्वमिति भावः । ननु स्त्रीभिर्भाययेत्येतदित्यर्थे ऽस्त्रीति निषेधस्य तिस्त्रिशब्दे कथन्निषेधप्रवृत्तिसंभवेनत्यत आह । नन्विति ॥ ह्रस्वेवर्णान्तमिति पाठः । पञ्चम्यन्तपाठस्तु लेखकप्रमादात् । पाठकास्तु स्त्रीशब्दस्य तदवयवे लक्षणायां मानाभावात्स्त्रीभिन्नावयवावित्येवार्थः । एवं च परमस्त्र्यादिशब्देषु निषेधो नैव प्रवर्तत इत्याहुः । नन्वस्त्रीत्यस्य प्रसज्यप्रतिषेधत्वे इयङुवङ्स्थानावित्येतत्सम्बन्धत्वमेव नेत्याह । प्रसज्येति । पाठकस्तु ननु प्रसज्यप्रतिषेधङ्गिदाक्षिताङ्गेन स्त्रीशब्दस्य संबन्धात्तदन्तविधौ अतिस्त्रीत्यादावपि निषेधः स्यादित्यपि मूलाशयः संभवतीत्याह । श्रयन्त्येनामिति । इदमार्थिकार्थकथनम् । विग्रहस्तु श्रायत इत्येव । कर्मणीति । इदं क्रियान्वयि । बाधकाविषयेति । स्थितिशब्दस्वारस्यादिति भावः । अङ्गेति । नदीसंज्ञाप्रयुक्तकार्यप्रवृत्तिप्रयोजकविभक्तिनिमित्तकलब्धाङ्गसंज्ञकसमानानुपूर्वीकावयवस्वप्रयोज्यबाधकाबाधितप्रवृत्तिके इयङुवङ्स्थानभूताविति तु निष्कर्षः । तेन प्रधीशब्दघटकधीशब्दस्याङ्गत्वसत्त्वेपि न कश्चिद्दोषः । एतेन 'प्रधीति समासार्थालौकिकविग्रहवाक्ये नदीसंज्ञाभावेनोपपादयिष्यमाणः कबभावो व्याख्यात इति दिक् । अमीति च्छेदभ्रमनिरासायाह । आमीति । भिन्नक्रमइति । सूत्राक्षरात्तल्लाभप्रकारस्तु इत्थम् । आख्यापदस्य रूढ्यर्थबोधजनकत्वपरत्वेन मण्डपादिपदानां रूढानां पदसमभिव्याहार विशेष एव यौगिकार्थबोधजनकत्वात्तेन चायमर्थ उपलक्ष्यत इति भावः। स्त्र्युरूयेति । पदान्तरसन्निधानाधीनेत्यर्थः । स्त्रीपुंसेति । समासान्तः अजन्तः । निसस्त्रीत्वालाभ इति । स्वरसत इति भावः । इदमुपलक्षणं 'प्रथमाऽलिङ्गग्रहणं च'त्यस्य, लुबन्तखरकुट्यै इति भाष्योपन्यस्त फलस्य । अन्यथा तस्य पदान्तरसमभिव्याहारं विना स्त्रियां वर्तमानत्वेन सूत्रेणैव सिद्ध्या तदसङ्गतिः । संभावितनदीत्ववत्प्रकृतिकलुबन्तोत्तरपदकादित्यर्थभ्रमं निराकर्तुमाह । ऋकारसाहचर्येणेति । प्रियतिसृणी इति भाष्यादृकारांशे संभावितत्वानिवेशेन तेन सह द्वन्द्वानिर्दिष्टत्वात् । आध्यै इति । भाष्योदाहरणात्तत्त्वनिर्णय इति भावः । एतेन 'अलौकिकप्रक्रिया-

वाक्ये तत्प्रवृत्तेः प्रागुपपादितत्वेन साहचर्याश्रयणं विफलमित्य'पास्तम् । आध्यै इत्यारभ्य इतीत्यन्तः कैयटग्रन्थो न्यूनतां परिहरति । इदृशइति । उक्तरीत्येति । यत्र नदीकार्याश्रयइत्युक्तरीत्येत्यर्थः । विशिष्टस्यापीति । न भूसुधियोरिति यण्निषेधादित्यर्थः । समुदायस्येति । ह्रस्वौ चेयङुवङ्स्थानौ चेति वार्तिकादिति भावः । पूर्वं सुष्ठु धीर्यस्यास्सा, सुष्ठु ध्यायतीति विग्रहद्वयस्य उपक्रान्तत्वात्प्राथमिकविग्रहे च 'ह्रस्वौ चे'त्युक्तवार्तिकेन नदीत्वविकल्पात्पुंवदित्यस्यासङ्गत्यापत्त्याह । इतिविशेषइति । समुदायस्यचेति । समुदायस्य बहुव्रीहित्वान्नित्यस्त्रीत्वाभावात्तदंशे ऽप्रातिलक्षणो बाध इति निषेध इति बोध्यम् । विरहपोषकत्वादिति । एवं च विशिष्टे धर्मबुद्ध्याऽसाधुशब्दोच्चारण एवानिष्टोत्पत्त्या विरहपोषकत्वतात्पर्येण तदुच्चारणे न दोषः । वाक्यैकदेशन्यायेनाह । समासपदघटकेति । एतन्न्याये बीजं कारके स्फुटीभविष्यति । व्यवहितस्यापि निषेधमाह । स्त्रियांयादिति । भाष्येति । तत्र हि सन्निपातपरिभाषाफलत्वेन तिस्र इत्यादौ टाबभाव उक्त इति स्वस्रादिषु पाठोऽप्रामाणिक इति तत्त्वमिति सिद्धम् ॥

॥ इत्यजन्ताः स्त्रीलिङ्गाः ॥

अतोम् ॥ अङ्गस्येति पञ्चम्या विपरिणम्यते इति भावः । दीर्घवारणेत्विति तुनाऽरुचिर्बोधिता । तद्बीजं तु आने मुगिति सूत्रे भाष्ये मुडिति न्यासे पचमान इत्यादौ अतो दीर्घो यञीति दीर्घापत्तिर्भाष्ये दत्ता । तथा एङ्ह्रस्वादिति सूत्रे भाष्ये हल्ग्रहणानुवृत्त्यभावे कुण्डशब्दात्सम्बुद्धौ अमादेशे आदेः परस्येत्त्यकारलोपे सुपि चेति दीर्घे 'कुण्डाम्' इति प्राप्नोतीत्युक्तमेतद्भाष्यद्वयप्रामाण्यात्सामान्यतो दीर्घविषये संनिपातपरिभाषानाश्रयस्य स्वीकर्तव्यत्वात् । अत एव सर्वेषामित्यादौ बहुवचने झल्येदित्येत्वसिद्धिः । अत एव रामायेत्यादौ सुपि चेति दीर्घसिद्धिः । न चैवं निकुचिते उपधात्वं निमित्तीकृत्य जायमानमकित्त्वं गुणस्य निमित्तं स्यादेवेति गुणापत्तिः । कित्प्रत्ययं निमित्तीकृत्य प्रवृत्तस्य नलोपस्य तद्विघातकाकित्त्वनिमित्तस्यायोगादेव दोषवारणात् । न च बहुवचने झलीति सूत्रे झल्ग्रहणाद्बाल सर्वेषामिति निर्देशा,त्कष्टायेति निर्देशाच्च विशिष्य तत्र तत्राप्रवृत्तिः कल्प्यते इति वाच्यम् । प्रतिलक्ष्यमप्रवृत्तिकल्पनापेक्षया लाघवेन सामान्यत एव तत्कल्पनौचित्यमित्याशयात् । श्वान्नलोप इति सूत्रस्थ भाष्यं तु सुपि चेत्यपेक्षया नित्यत्वात्पूर्वं

लोपः स्यादित्यभिप्रायकमिति न तद्विरोध इति दिक्। ननिमित्तेति ॥ इदं चिन्त्यम्। संनिपातपरिभाषाया उपजीव्यविरोधस्यान्यायमूलकत्वेनातो मू इति मादेशोपजीव्यस्यादन्तसंनिपातस्याविनाशेन प्रकृतपरिभाषाया अप्रवृत्तेः। प्रकृतिप्रत्ययसंनिपातं प्रयोगिणमादाय प्रकृतपरिभाषासञ्चारस्तु न। तस्य शैव इत्यादि साधरण्येनाङ्गसञ्ज्ञा तद्वनिमित्तं स्यादिति भाष्यैकदेशयुक्तित्वस्य वक्ष्यमाणत्वात्। भवतीत्यादावववादीनामप्यनापत्तौ दोषाः खल्वपीतिकल्पेनेति भाष्यासंगत्यापत्तेश्च। व्याख्यानादिति। सूर्यतिष्येति सूत्रे यग्रहणादिति तु नोक्तम्। अन्ततो दीर्घशङ्कावारणाय व्याख्यानस्यावश्याश्रयणीयत्वेनेति भावः। नित्यस्त्रीत्वमिति। विभक्तिमपेक्ष्य स्त्रीलिङ्गनिर्देश इत्यसंगतम्। नदीत्वापत्तेरिति। गौरादित्वान्ङीषिति तु हेयमेव। गौरादित्वे मानाभावात्। वस्तुतस्तु जसः शीति निर्देशानुपपत्त्या गौरादित्वमेव न्याय्यमिति कैयटः। व्याख्यानादिति। साहचर्याश्रयणेपि सुप्त्वेनैव तत्वमित्यत्र व्याख्यानमेव शरणमिति भावः। प्रकरणाच्छ्रुतेनेति। ननु कथमेतत्रिचतुरोरित्यादौ द्वयोरपि सूत्रोपात्तत्वेनोपस्थितत्वमूलकस्य प्रकरणाच्छ्रुतेरिति न्यायस्यावतारेपि नपुंसकस्य प्रकृतेऽनुवर्तमानतया तन्न्यायाविषयत्वात्पूर्वसूत्रे नपुंसकस्येत्यस्याङ्गसंबन्धत्वेन तस्यैव विशेषणत्वौचित्याच्च। किञ्च झलचोरपि श्रुतत्वान्नपुंसकस्येत्यनेनैव संबन्धापत्तावङ्गस्येति झल्भ्यां विशेष्यत इति पूर्वग्रन्थासंगतिः। किं च नपुंसकस्येत्यस्याङ्गविशेषणत्वेन तदन्तविध्यापत्तावतिज्ञानानित्यादौ नुमापत्तिरिति चेन्न। भावानवबोधात्। तथाहि। अनुवृत्ते तज्जातीयपदान्तरानुसन्धात्वेनानुसन्धीयमानस्य नपुंसकपदस्य सूत्रे श्रूयमाणास्थ्यादिभिरेवान्वयस्य प्रकरणाच्छ्रुतेरिति वाचनिक्यै व परिभाषा स्वीक्रियत इति। एतेन प्राधान्य दङ्गविशेषणं स्यादित्यपास्तम्। वाचनिक्यानया तद्बाधात्। किञ्च न्यायसिद्धत्वेपि तत्त्वार्थनिर्णयदशायां स्वान्वयितयेतराकाङ्क्षाक्षणेन नपुंसकस्येत्याद्यन्वयवेलायामस्थ्याद्युपस्थितेरावश्यकत्वेन प्राकरणिकाङ्गानुसंधानात्पूर्वमेव नियमेनास्थ्यादीनामुपस्थित्या तेनैवान्वयस्यौचित्यात्। नपुंसकानुवृत्तिराढगमहनेति विहितक्यन्ते दधिनेत्यादावनङाद्यप्रवृत्तये। आध्यकारेण सिद्धये सपूर्वग्रहणेन प्रत्ययविधौ प्रतिषेध इति न ज्ञाप्यते किं तु येनविधिरित्यस्यानित्यत्वं ज्ञाप्यते इति बोधनमात्रेण प्रकृतेऽङ्गविशेषणत्वेपि न क्षतिरित्याशयेन तथाकरणात्। वाशाविति वक्तव्ये वा नपुंसकस्येति न्यासेन श्रुतस्यानुसंधीयमानस्य

वा विशेष्यविशेषणत्वान्यतररूपेण श्रुतेनैव संबन्धस्य ज्ञापनाच्च । तेनैवैवं विधे विषये क्लृप्तसंबन्धत्यागबोधनाच्च । अन्यथा आच्छीनद्योरिति सूत्रेऽपि तथापत्तौ नपुंसकग्रहणवैयर्थ्यं तादवस्थ्यं स्यात् । 'तच्च झलज्भ्यां विशेष्यत' इति ग्रन्थस्तु-न्यायप्रवृत्तौ विशेषाभावेन तदनादरेण प्रवृत्त इत्यदोषः । इतिप्रायोवादइति । अत एव पुमः खय्यम्परे इति सूत्रे संबन्धमनुवर्तिष्यत इति भाष्यमुपादाय संबन्धमिति कर्मणि घञ् प्रथमान्तमिति कैयटेनोक्तम् । घञजप इत्यस्य भावघञ्विषयकत्वं तु न युक्तम् । कर्मण्यणीति सूत्रे मासं भक्षोऽस्येति भाष्यविरोधात् । सरूपभङ्गाभयेति । अस्याशय उक्तः । त्रश्चेति सूत्रे सर्वादिषु अन्यडतरात्प्राक् पठित्वा-अद्डन्यादिभ्य पञ्चम्य इत्येव सूत्रयितुमुचितम् । नाद्ड्इति । अत्र वदन्ति । अङ्गस्येति षष्ठी डतरादिभ्य इति पञ्चमी तत्राशक्यं विविभक्तिकत्वाड्डतरादिभ्य इत्यनेनाङ्गस्येति विशेषयितुं तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात्प्रत्ययः डतरादिभ्यो यो विहित इति भाष्यस्यायमर्थः । डतरादिभ्य इति ल्यब्लोपे पञ्चमी अर्थपरश्चायं निर्देशो लक्षणया । एतदर्थमेव बहुवचननिर्देशः । तथा च डतरार्थमाश्रित्य विहितयोः स्वमोरिति पर्यवसितम् । एवमेव षड्भ्यो लुगित्यत्रापि । न च कतरधनमित्यादावतिप्रसङ्गः । प्रत्यासत्त्योपस्थितडतरादिभ्यः परयोरेव विधानात् । न च लुप्तकन्नन्ते कतरशब्देऽतिप्रसङ्गः । तत्र कनुत्पत्तौ दृढतरमानाभावादुत्पत्तौ वास्येष्टत्वे बाधकाभावात् । न च कतर इवान्य इति विग्रहे कतरान्यशब्देऽतिप्रसङ्गः । व्याघ्रादित्वे मानाभावात् । तत्त्वे वा यादृशडतराद्यन्यतमार्थमाश्रित्य स्वमौ विहितौ ततः परत्वस्य विवक्षितत्वात् । न चोक्तानेकविधक्लेशाश्रये मानाभावः । आरम्भप्रत्याख्यानस्यैव मानत्वात् । नव्यमते च उपसर्जनप्रतिषेधारम्भे परमकतरदिष्यते प्रत्याख्याने तु नेति फलभेदः स्पष्ट एव । किञ्च नव्यमते संज्ञोपसर्ज्जनप्रतिषेधप्रत्याख्यानावसरे परमकतरमिति न सिध्यति इति वार्तिककृतं प्रति भाष्यकृता न्यूनतोद्भावनीया स्यादिति । भत्वाभावइति । ननु यथोद्देशे डटि जातस्यानिवृत्तिरिति चेत् । न । आकडारस्थेषु कार्यैक्यतारूपकार्यकालस्याभावेपि कार्यप्रवृत्तिकाले एव प्रवृत्तिकत्वरूपकार्यकालत्वस्वीकारस्य प्रागुपपादितत्वात् । प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वेन पूर्वपक्षस्वारस्यादाह । यद्वेति । नन्वन्त्यवर्णतद्वर्णयोरितराव्यवधाने एवेति परिभाषेन्दुशेखरे उक्तं तदनेन

विरुध्यते इति चेत् । न । शब्दत उद्देश्यत्वेनोपधातिरिक्तक्ताव्यवधाने एवेति तदर्थनादोषात् । प्रकृते च नकारो नोपधाया इत्यतोनुवृत्त्या शब्दत उद्देश्यत्वेन नोपात्त इत्यदोषात् । अभिमानइति । अत्र यद्वक्तव्यं तत्प्रागेवोक्तम् । सत्त्वप्रधानस्येति । अत्र वदन्ति । शब्दादीदृशार्थलाभः । किञ्च पर्जन्यवल्लक्षणप्रवृत्त्या प्रथमतो ह्रस्वे कृते ऊखतुः प्रेखतुरित्यादाविव लक्ष्ये लक्षणस्येति न्यायेन पुनःप्रवृत्तिरेव नास्ति । अत एव ज्ञानेभ्य इत्यादौ न ह्रस्वःस्यात् । किञ्च धनलक्ष्यादौ अतिप्रसङ्गवारणाय प्रधानाप्रधानन्यायेन नपुंसकत्वविशिष्टार्थविशेष्यकबोधजनकस्यैव ह्रस्वस्य वक्तव्यतया काण्डे इति सप्तम्यन्तजन्यबोधविशेष्यस्य नपुंसकत्वाश्रयत्वाभावादेव दोषवारणे उक्तप्रयासवैयर्थ्यम् । एतेन 'प्रातिपदिकपदमनतिदिष्टप्रातिपदिकत्ववत्परं श्रीपादौ प्रत्ययलक्षणापदेशेनैव प्रातिपदिकसञ्ज्ञा । काण्डादौ प्रकृतिगतस्य प्रातिपदिकत्वस्यातिदेशेनानातिदिष्टन्तत् । सत्त्वप्रधानस्येत्येतदपि प्रकृतिविषयकं फलितार्थकथनमेवं च न शब्दाधिक्यार्थाधिक्यम्' इति परास्तम् । एतेनैवं च नपुंसकपदं नपुंसकत्वपरं तस्य च प्राधान्यासंभवान्न प्राधानन्यायावतार इति बालप्रतारकं निरस्तमिति चेच्चिन्त्यमेवैतत् । न चान्तवद्भावेन नपुंसकत्वविशिष्टार्थविक्षेष्यक,बोधजनकप्रातिपदिकत्वमपि स्यादिति कथं मध्यमःप्रकारः इति वाच्यम् । अन्तवद्भावेनार्थानतिदेशात् । अन्यथा सत्त्वप्रधानत्वमप्यतिदिश्येत । ननु शब्दस्वरूपस्यापि कथमतिदेशः । अशास्त्रीयत्वात् । तथा च बहूपप्लवापत्तिरिति चेत् । न । तस्यापि स्वंरूपमिति शास्त्रबोधितत्वात् । न च तत्प्रत्याख्याने गत्यसंभवः । तत्प्रत्याख्याने शब्दप्रधानतया शब्दस्य शास्त्रीयत्वात् । अथ वा लोड्रूपस्यमे र्निर्विधानेन शब्दस्याशास्त्रीयस्याप्यतिदेशत्त्वबोधनात् । साड्रूपस्य सहेःकार्येण च तथैव बोधनात् । एकदेशविकृतन्यायेन सिद्धे तदनुपयोगाच्च । प्राधान्यमिति । प्रकारतानिरूपितत्वमित्यर्थः । एवं च प्रकारता भिन्नविशेष्यताशालिनी लिङ्गसंख्याकारकान्वय्यर्थबोजनकत्वरूपसत्त्वप्राधान्यस्याभावादिति भावः । तत्संसर्गकस्तद्घटितसंसर्गकः प्रथमार्थस्यातत्प्रकृत्यर्थस्य । एवं च तिङःकर्तृत्वशक्तिमानर्थो द्योत्यःकर्तृक्रियाभावश्च वाच्यः । एवं प्रथमायास्तिङर्थकाण्डार्थाभिन्नत्वन्न प्रत्ययार्थः प्रधानमिति व्युत्पत्तिभङ्गः काण्डार्थाभेदान्विततिङर्थस्योक्तसंबन्धेन क्रियायामन्वयात् । अन्ये तु कटं भीष्ममित्यादिवत्पार्ष्णिकपरस्परावच्छेदः । उक्तसंबन्धेन द्वयोरपि क्रियायामेवान्व-

थादित्याहुः । चिन्त्यप्रयोजनमिति । यत्तु पाठकेनोक्तं 'चिन्ताबीजन्तु नपुंसकवृत्तेरिदंशब्दादधुनाप्रत्यये इशादेशे नुमापत्तौ यस्येति लोपो न स्यादिति' तत्तुच्छम् । नस्ताद्धित इति टिलोपेनापि तत्सिद्धेः । अतिप्रसङ्ग इति । प्रवृत्तिनिमित्तभेदाच्छब्दभेदेनायं दोषः । एवं च तत्पक्षे यथाश्रुतमेव रमणीयम् । पुमान्यस्मिन्निति । पुंसा प्रवृत्तिनिमित्तवृत्तित्वं च स्वनिष्ठाधेयतानिरूपिताधारतासंबन्धेन । एवं च बोधनकर्मीभूतपुंस्त्वविशिष्टाधिकरणं प्रवृत्तिनिमित्तमित्यर्थः । ततोऽर्शआद्यचि तद्धेतुकप्रवृत्तिक इत्यर्थः । क्लीबपदं च लक्षणया क्लीबत्वविशिष्टार्थप्रतिपादकपरं तत्र च तद्धेतुकप्रवृत्तिकस्याभेदेनान्वये धनवान् सुखीत्यादिवद्धर्मिपारतन्त्र्येण तस्याश्रयतासंबन्धेनान्वयः । समानानुपूर्वीकइति । इदं प्रग्वशब्दव्यावृत्तये इति पाठकाः । तत्तुच्छम् । ग्रामण्ये सेनान्ये कुलायेत्यादौ पुंवद्भावेन ह्रस्वाप्रवृत्तिप्रतिपादनपरभाष्यासङ्गतेः । ह्रस्वेकारान्तस्य भाषितपुंस्कत्वाभावात् । इकः किं श्रीपणेत्यग्रिमग्रन्थासङ्गतेश्च । अज्ग्रहणवैयर्थ्यापत्तेश्चेति यत्किञ्चिदेतत् । तस्माद्यस्येगन्तक्लीबस्य पुंवद्भावःकर्त्तव्यस्तस्य नपुंसकत्वप्रयुक्तकार्याप्रवृत्तिप्रक्कालीनरूपस्य भाषितपुंस्कत्वे पुंवदित्यर्थः । समानानुपूर्वीकत्वं च तत्कालीनमेव ग्राह्यम् । एतेन'ऐडविडवृन्दारके कथं पुवत्त्वमिडविडशब्दस्य भाषितपुंस्कत्वाभावादिति' परास्तम् । प्रत्यासत्तेरिति । समानानुपूर्वीकेत्यनेनान्वयि । समानार्थेनेति तु उपरञ्जकतया । द्वन्द्वेप्रयुक्तइति । नन्वनड्यपि फिष इत्यन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थं स्यात् । न च झलां जश् झशीत्यादौ जशिति सञ्ज्ञाप्रतिपत्तये अयस्मयादित्वेन जश्त्वाप्रवृत्तिकल्पनवल्लक्ष्ये प्रवृत्त्यर्हस्य झटिति प्रतिपत्तये आद्युदात्तोच्चारणं न्याय्यमिति वाच्यम् । एवं सति विशेषयत्नस्यैवाश्रयणात् । विशेषयत्नश्च स्थान्यनुरूपानुच्चारणशास्त्राप्राप्तोच्चारणान्यतररूपः । अत एव सहस्योदात्तानुदात्तघटितत्वेन स्वरितस्यैव तदनुरूपत्वात्सादेशे उदात्तोच्चारणं विवक्षार्थं प्रकृते च शास्त्राप्राप्तमुच्चारणं छान्दसत्वादिना शास्त्राप्राप्तत्वे नतिसृचतसृ इत्यादावपि तुल्यम् । झटिति लक्ष्यप्रवृत्त्यर्हप्रतिपत्तिफलकशास्त्राप्राप्तोच्चारणं तदित्यपि न । चतसर्यपि तौल्यात् । किञ्च कैवलास्थिशब्दस्यान्तानुदात्तत्वेनानुदात्ताद्यवयकानड्योपि प्रवृत्त्यर्हस्य झटिति प्रतिपादकत्वाच्छान्दसत्वादिना फिट्शास्त्राप्रवृत्तिकल्पनमधिक एव यत्नः । लक्ष्येषु यद्यद्गुणकप्रवृत्त्यर्हं तत्तद्गुणकस्य झटिति प्रतिपादनं त्वशक्यमेवेति चेत् । अत्र केचित् । आनड्डादीनां

व्युत्पत्तिपक्षे आद्युदात्ततया तदेकवाक्यतायै अव्युत्पत्तिपक्षेऽपि फिष इत्यस्येदृशे विषये अप्रवृत्तिरिति प्राहुस्तन्न । ईदृशे विषये व्युत्पत्तिपक्षस्यैव निर्मूलत्वात् । तथाहि । अर्थपरे हि शब्दे मञ्चकादौ मञ्जकादिव्यावृत्त्यर्थं गवादौ गोण्यादिव्यावृत्तये प्रकृतिप्रत्ययकल्पनया साधुत्वान्वाख्यानेपि शब्दपरेष्वसाधोर्व्यावर्त्याभावात्तत्कल्पने मानाभावात् । अन्यथा अनङादिकल्पकधात्वादिष्वपि भ्वादिषु प्रकृतिप्रत्ययादिकल्पना स्यादित्यनवस्था स्यात् । कल्पकाविशेषात्तन्निर्णयेतूदात्तसंपादकस्यापि कल्पनासंभवाच्च । आद्युदात्तत्वे फिट्शास्त्रबाधापत्यानाधायकपक्षैक्यरूपाय व्युत्पत्तिपक्षेपि तस्यैव युक्तत्वाच्च । तस्माज्ज्ञापकोपवर्णनभाष्यप्रामाण्यादीदृशे विषये फिट्शास्त्राप्रवृत्तिकल्पनैव भाष्यतात्पर्यम् । तथा च वृद्धिसूत्रे भाष्यम् । उभयमिदं गुणेषूक्तं भेदका, अभेदका इति किं पुनरत्र न्याय्यम् । अभेदका गुणा इत्येव न्याय्यम् । कुत एतत् । यदयमस्थिदधिसक्थ्यक्ष्णानङुदात्त इत्युदात्तग्रहणं करोति । अत्र वयं विचारयामः । स्वं रूपमिति शास्त्रारम्भे स्वरस्य रूपत्वाभावेन तस्यासंज्ञित्वे फिष इत्यादिशास्त्रप्राप्तस्वरघटितस्योच्चारणेपि तस्य तत्तच्छब्दाद्बोध्यत्वादस्याःपरिभाषाया उपयोगश्चिन्त्य इत्यायाति । तत्प्रत्याख्यानपक्षेपि सख्युरित्यादौ विकृतस्याग्रहणन्तत् । पदत्वप्रयोजकसुबुत्पत्तिप्रयोजकप्रातिपदिकप्रवृत्तिकालीनतदाश्रयरूपस्य ग्रहणेनोदात्तादीनामग्रहणात् । यूस्त्र्याख्यावित्यादावपि प्रातिपदिकत्वाश्रयस्य प्रातिपदिकाश्रयसंगतेः प्रागस्वरकत्वमेव । ऐक्ष्वाकादावेकश्रुते सर्वस्वरसंग्रहकत्ववत्प्रकृते त्यादावपि एकश्रुत्याऽनुकृतस्य शास्त्रकृत्कृतविकृतस्य सर्वस्वरसंग्राहकत्वं भवत्येव । एवं चैषा परिभाषा निष्फला । तथाप्येवंविधार्थकस्य न्यायसिद्धार्थस्य बोधकमुदात्तग्रहणमिति भाष्याशय इति तत्त्वमिति सुधियो विभावयन्तु । अन्तोदात्तेति । हन्तेराद्यचोरैक्यादाद्युदात्तस्यापि तदनुरूपत्वं वक्तुं शक्यम् । तथापि धातोरित्यन्तत्वप्रयोज्यमेवोदात्तत्वं हन्तेरिति तदेव स्थान्यनुरूपमिति भावः । प्रयोगे शेषनिघातेनानुदात्तत्वात्स्थानिनो भविष्यत्कालीनप्रवृत्त्यर्होऽनुदात्तोच्चारणस्य लक्ष्यश्रवणार्हगुणकझटिति प्रतिपत्तिजनकत्वादाह । अनुदात्तोवेति । यत्तु पाठकेनोक्तम् । उपदेशेऽनुदात्तत्वाच्चेति । तत्तुच्छम् । उपदेशेऽनुदात्तत्वेप्यान्तरतम्यपरीक्षावसरे तस्याभावादनुपयोगात् । तेनेति । प्रतिपदोक्तपरिभाषानुसंधाने नपुंसकपदानुसंधाने च न विशेष इति भावः । ज्ञानवत्त्वेति । लाघवानादरवन्मतुप् । लिङ्गसिद्धेति ।

गवां मधुसंबन्धस्य क्षीरसमवायिरूपस्ययेव सामर्थ्याल्लाभ इति भावः । यद्यप्यनुप-दोक्तमृद्वीकाविकारवाचिमधुशब्दलिङ्गव्यत्ययोदाहरणसंभवेपि तादृशार्थविवक्षये-त्थमुक्तमिति भावः । नित्यत्वादेवेति । इदं चिन्त्यम् । तृज्नुटोर्विप्रतिषेधोपपत्त-येऽवश्याश्रयणीयेन तृच्प्रवृत्त्युत्तरकालीनसंनिपातपरिभाषाप्रयुक्ताऽप्रवृत्तिप्रयुक्ता नित्यत्वेनैव पूर्वविप्रतिषेधोपपत्तेः । तद्ग्रहणेनेति । इकोचीति सूत्रस्थ अतिराभ्या-मित्यादौ नुमि कृते रैशब्दान्तत्वं नास्तीति विवरणं तु निर्दिश्यमानरैशब्दान्तत्वाभि-प्रायकमिति । तेन न विरोध इति बोध्यम् । षष्ठीनिर्देशाभावादिति । अत्र मौनि-श्रीकृष्णभट्टाः । 'एवं सति परमक्रोष्टुशब्दे तदन्तविधिना विशिष्टस्यैवादेशा-पत्तिः । न च प्रयोगनियमार्थत्वेन निर्वाहः । क्रोष्टुशब्दस्तृज्वद्रूपको भवतीति शाब्दे निष्पन्ने क्रोष्टुशब्दस्य तद्वद्रूपकत्वासंभवात्प्रयोगनियमस्य फलितत्वेन केव-लक्रोष्टुशब्दग्रहणे तस्य सर्वनामस्थानपरत्वाभावाच्छ्रौतवाक्यार्थविषयकत्वफलित-स्याप्यविषयत्वात्तृज्वद्भावस्यैवानापत्तेः । एतेनाङ्गसंज्ञानिमित्ते सर्वनामस्थाने क्रोष्टु-स्तृज्वदित्यपास्तम् । अङ्गाधिकारे तदन्तविधेः सत्त्वेनेति ग्रन्थासंगत्यापत्तेश्चेति' वदन्ति । तत्राहुः प्रत्ययग्रहणपरिभाषायां तदन्तांशस्य शब्दस्वरूपादिविशेष्याध्या-हारमूलकत्वेनैकदेशान्वयस्वीकारादिना तृजन्तार्थलाभप्रयोजकादन्तविध्यावश्यक-तया तथैव पुनर्विशेष्यमध्याहृत्य तृजन्तान्तेत्यर्थस्वीकारेणादोषात् । एतेन 'षष्ठ्य-र्थकविभक्तिमात्रस्य नाभिनभं चेत्याद्यनुरोधेन निर्दिश्यमानपरिभाषाप्रवृत्तियोग्य-ताया वृद्धिसूत्रस्थ भाष्यकैयटादिध्वनिततया षष्ठीनिर्देशाभावादित्याद्यसंगतमिति पाठकोक्तमपास्तम् । नाभ्यादौ प्रकृतपरिभाषावश्यकत्वे तदर्थं तत्र षष्ठ्यर्थावश्यक-त्वेपि प्रकृते तदर्थकत्वे मानाभावात् । षष्ठीनिर्देशाभावादित्यस्य तदर्थकविभक्तिनि-र्देशाभावादित्यर्थः । यतश्चेति सूत्रे कारकेष्विति वदेदिति भाष्येण निर्धारणसप्त-मीस्थले एकवचनान्तत्वस्यासाधुत्वादाह । सौत्रमिति । यत्तु पाटकेन 'निर्धारणस-प्तमीस्थले प्रकृते समुदायबोधकत्वे ऽनुद्भूतावयवभेदविवक्षया बहुवचनं स्यादित्यभि-प्रायकं निर्धारणस्यानेकविषयत्वादाह' इत्यवतारितं तत्तुच्छम् । अनुद्भूतावयव-भेदविवक्षया निर्देशोपपत्तौ सौत्रत्वकल्पनाया अन्याय्यत्वापत्तेः । नियम्यत इति । ननु यथासंख्यपरिभाषैकवाक्यतया ऐच्स्थानिकऋलृवर्णविधायकत्वसंभवे-त्यागायोगः । न चैवमेजित्येवब्रूयादिति वाच्यम् । यथासंख्यसंपादनेन कृतार्थ-

त्वात् । न च ह्रस्वादेश इति व्यर्थम् । ह्रस्वादेशे प्राप्ते इत्यर्थेन विषयविशेषबोधनेन साफल्यात् । किञ्च शास्त्रान्तरप्राप्तस्य नियामकत्वे एच इति व्यर्थं परिभाषाप्रकरणानुरोधेनैतस्यापि परिभाषात्वेन परिभाषाणामनियमे नियमकारित्वेन यस्येगनिग्घ्रस्वप्राप्तिस्तस्येग्रूपह्रस्वप्रापकत्वेन इगनिग्घ्रस्वप्राप्तेश्चैच एव संभवादिति चेत् । न । परिभाषाप्रकरणानुरोधेनादेशपदानुरोधेन चैतस्य विध्यन्तरशेषतयैव लक्ष्यसंस्कारकत्वेन नियामकत्वस्य न्यायप्राप्तत्वात् । आदेशपदं हि स्थाननिमित्तसंबन्धार्थकार्थेन नित्यसापेक्षत्वात्तेनैवान्वयि । तथा च एचः स्थाने आदिश्यमानेषु ह्रस्वेष्वित्यर्थे एतद्विधेयानामेतद्वाक्यविधेयज्ञानाधिकरणक्षणपूर्वक्षणावश्यकज्ञानविषयोद्देश्यज्ञानसमये ज्ञानासंभवाच्छास्त्रान्तरप्रापितानामेव ग्रहणबोधनद्वारा विधायकत्वव्युदासात् । यथासंख्यशास्त्रप्रवृत्तौ विधायकत्वापत्त्यादेशग्रहणबोधितार्थासंगत्यापत्तेः । एतदर्थमेव ह्यादेशग्रहणम् । एज्ग्रहणं तु स्थानेन्तरतमपरिभाषाबाधनेन श्रीपामित्यादाविग्रूपह्रस्वव्यवस्थापकनिरासाय । न चैवमिग्ग्रहणमेव तत्र कुर्यादिति वाच्यम् । सामर्थ्येन विनिगमनाविरहादजन्तेषु सर्वेषु एतस्य पाक्षिकप्रवृत्तिप्रसङ्गात् । अचश्चेति परिभाषाप्रवृत्त्यर्थं ह्रस्वग्रहणस्यावश्यकर्तव्यत्वाच्च । अनेकह्रस्वविधायकेषु ह्रस्वेग्ग्रहणयोः करणेऽन्त्यन्तगौरवापत्तेश्च । एतेन 'ह्रस्वे प्राप्ते एच इग्भवतीति विधायकमेवास्तु किमितराङ्गबोधकादेशग्रहणेन' इत्यपास्तम् । यथासंख्यापत्तेः । परिभाषाप्रकरणबाधापत्तेश्च । भाव्यमानोप्युकार इति परिभाषया दीर्घोकारस्यापि विधानापत्तेश्चेति सूक्ष्मचेतसो विभावयन्तु । नचेति । इयं वृथा चिन्ता । विषयसप्तमीत्वस्यास्मिञ्छास्त्रे फलप्रमाणाभ्यामेवाश्रयणात् । अत्रेदं बोध्यम् । प्ररीणामित्यत्र सन्निपातपरिभाषया पूर्वमात्वाप्रवृत्तावपि कृते दीर्घे तद्विरोधाभावादात्वे प्राणामित्येव रूपम् । तद्विषय इति । नुड्विषये इत्यर्थः । एवं च सामान्यतो नुड्विषये संनिपातपरिभाषाऽप्रवृत्तिर्नामीति शास्त्रेण बोध्यते इति भावः । नन्वेवं सति रामाणामित्यादौ नामीति दीर्घ इति ग्रन्थासंगतिः ऽत आह । नामीतिदीर्घस्त्विति । वर्णमात्राश्रयेति । इदं चिन्त्यम् । तुमूविधौ यस्मात्प्रत्ययविधिस्तदादीत्यस्योपस्थितौ तस्यापि प्रकृतिप्रत्ययसमुदायाश्रयणाद्बहिरङ्गत्वात् । न च पदद्वयाश्रयत्वेन ह्रस्वो बहिरङ्गः । तावतापि ह्रस्वशास्त्रीयानिमित्तसमुदायबाहिर्भूतक्विब्निमित्तकत्वेन तुकोपि बहिरङ्गत्वात् । न च प्रातिपदिकसंज्ञायां क्विबन्तत्वबुद्ध्यैव प्रवृ-

स्या ह्रस्वस्यापि क्किबाश्रयत्वमस्त्येवेति वाच्यम्। एतस्य समासत्वनिमित्तकप्रातिपदिकत्वनिमित्तकत्वेनैतन्निमित्तकोटौ क्किपोऽप्रवेशात्। एतेन विश्वौह इत्यादौ संप्रसारणस्य बहिरङ्गत्वं समुदितप्रातिपदिकापेक्षत्वाद्, गुणस्य त्वन्तरङ्गत्वमिति अन्तरङ्गबाहिरङ्गभावमाश्रित्यान्तरङ्गपरिभाषाज्ञापकवर्णनपरशेखरादियोजनाप्यपास्ता। बहिरङ्गशास्त्रीयनिमित्तसमुदायान्तःपातिणिनिमित्तकत्वाद् गुणस्य। किञ्च निमित्तं च सप्तम्याद्यन्तोपात्तमेवेति परिभाषेन्दुशेखरेण च विरुद्धमिदमत एव वाऽरुचेराह। यत्विति। अप्रवृत्तमिति। तत्फलन्तु प्रकृत्येत्यादौ ल्यपोऽसिद्धत्वाभावेन तुक्प्रवृत्तिः। उपजीव्यविरोधादिति। ग्रामकुलमित्यादाविति भावः। एवं हि कृतितुग्ग्रहणस्यान्तरङ्गपरिभाषायास्तुग्विषयेऽप्रवृत्तिज्ञापकता भग्ना। स्वास्मिंश्चारितार्थ्यविरहाच्च शङ्कते। व्यर्थेति। समाधत्ते। तत्स्थेति। अन्यत्र निरूपितामिति। अत्र पाठकाः। अत्रारुचिबीजन्तु उक्तभाष्यैकदेश्युक्तित्वे मानाभावः। शैव इत्यत्राङ्गसंज्ञाया लोपनिमित्तत्वापादनं तु दाक्षिरित्यत्र प्रत्ययस्य तदनित्यत्वापादनेन तुल्यम्। सामर्थ्यादाङ्गो वारणविचालो भविष्यतीति प्रदीपकृदुक्तम्। प्रतिविधानमपि तत्र तुल्यम्। अत्र तु मते शैव इत्यत्र चरितार्थस्य लोपस्य दाक्षिरित्यत्राकारान्ते प्रत्युपजीवक इञ् निमित्तं न स्यात् इति प्रतिविधानान्तरमास्थेयं स्यादित्याहुः। तत्तुच्छम्। भवतीत्यादिषु विजातीयेषु बहुषु स्थलेषु सन्निपातपरिभाषाया अतिप्रसक्तत्वेन दोषाः खल्वपि साकल्येन परिगणिता इति भाष्यासंगत्यापत्तेः। संनिपातपरिभाषाया उपजीव्यविरोधमूलकत्वेन तत्संगतेश्चेति दिक्। ननु ङ्मोजन्त इति सूत्रे ह्रस्वस्य पितीति सूत्रे विषये एव संनिपातपरिभाषायाः भाष्ये संचारितत्वात्। तेन ग्रामणिपुत्र इत्यादौ तुगभावः संनिपातपरिभाषया सिध्यतीत्यर्थेन विरोधो ह्रस्वस्य पितीति सूत्रेऽन्तरङ्गपरिभाषया अप्रवृत्तेरिति स्वीकारित्यर्थत आह। एकदेशिन इति॥ इत्यजन्ता नपुंसकलिङ्गाः। होढः। ढास्त्विति। प्रतिपत्तिलाघवायेति शेषः। धुडित्याद्यसिद्धेरिति। झषन्तत्वाभावेन भष्भावानापत्तेरिति भावः। आदिपदेन लीढ इत्यादि ग्राह्यम्। दादेर्धातोः। ढत्वस्यापि विधानार्थमिति। वाग्रहणं समुच्चयार्थमिति भावः। उक्ताशयम्। औपदेशिकदादित्ववति लक्षणेत्युक्ताशयम्। अन्यत्र विस्तर इति। अन्ये तु पूर्वत्र निषेध्यसमर्पके दादेरित्यस्यौपदेशिकदादित्ववति लक्षणायां धातोरित्युत्तरसूत्रे दादेरित्यनुवृत्ति-

वैयर्थ्यं अपवादपक्षेपीत्याद्यपि न । औपदेशिकदादित्ववतो धातुत्वाव्यभिचारेण धातोरित्यस्य वैयर्थ्यापत्तेः । तस्माद्दादेरित्यस्यौपदेशिकदादित्ववति लक्षणायां मानाभावात् । धातोरित्युत्तरसूत्रे दादेरित्यनुवृत्तिस्त्वधोगित्यत्र पूर्वसूत्रप्राप्तढत्वनिवृत्त्यर्था । तथा हि धातोर्घ इत्येतन्मात्रेण धुगित्यादिसिद्धौ धातोरित्यनुवृत्तिर्वैयधिकरण्येनान्वयेनादादावपि अधोगित्यादौ घत्वार्था । तत्सामर्थ्येन चाधोगित्यत्र न पूर्वेण ढत्वम् । धातोरिति तु दारुलिट्शब्दे घत्वाभावार्था । दामलिहमात्मन इच्छति दामलिह्यति ततः क्विप् दामलिगित्येव घत्वप्रवृत्तेरेवेत्याहुः । इत्यादिसिद्धय इति । आदिपदेन दुग्धमित्यादिपरिग्रहः । तत्र हि घत्वे झषस्तथोरिति धत्वसिद्धिः । नन्वौपदेशिकप्रायोगिकयोरिति परिभाषयैवौपदेशिकदादित्ववतो ग्रहणे सिद्धे दादिग्रहणं व्यर्थमत आह । औपदेशिकेति । धातोरिति सूत्रे दादेरित्यनुवृत्तिर्व्यर्था । प्रयोगो-नास्तीति कृत्वेति । औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणमिति परिभाषासत्त्वे तु लौकिकप्रयोगे सानुबन्धकानां प्रयोगो नास्तीति औपदेशिकप्रयोगग्रहणमिति भाष्यासङ्गतिः । उक्तपरिभाषयौपदेशिकप्रयोगस्य मुख्यत्वबोधनादिति भावः । ननूक्तपरिभाषयौपदेशिकदादित्ववतो ग्रहणे ऽपि नोक्तभाष्यविरोधः । सानुबन्धकग्रहणेष्वित्युक्तयोक्तभाष्यस्य सानुबन्धकविषयत्वात् इत्याशङ्क्योक्तभाष्यं सर्वविषयकं न सानुबन्धकमात्रविषयम् । न्यायस्य सर्वत्र तौल्यादित्याह । अनुबन्धप्रस्तावादित्यादिना । वक्तुंयुक्तमिति । बशस्स्थाने आन्तरतम्येन भषमेव प्रवर्त्यार्थाज्झकारस्य निवृत्तेरिति भावः । वस्तुतस्तु मदोज्झमाचष्टे मधोगित्यादौ कुत्वप्रवृत्त्या प्रयोगे ज्झन्तासंभवेपि अमङणनमिति सूत्रस्थभाष्योक्तदिशा प्रातिपदिकसंख्यासाम्यमादाय परत्वादन्तरतमपरिभाषां बाधित्वा यथासंख्यशास्त्रप्रवृत्तौ गर्धबित्यादौ भकारापत्तेः । अत एव भष्भषन्तस्येति नोक्तम् । स्थान्यादेशनिमित्तानां यथासंख्यविज्ञाने भान्तस्य यो बश् तस्य भ इत्यादि सूत्रार्थपर्यवसाने गर्दभमित्यादौ भष्भावानापत्तेरिति दिक् । मूले झलीतिनिवृत्तमिति । न च बुद्धिध्व इत्यत्र भष्भावनिवृत्तये ध्वमो झलीति विशेषणमावश्यकमिति वाच्यम् । इटो ध्वमो ऽनवयवत्वेपि भष्भावनिमित्तध्वशब्दानवयवत्वेनैकाच्ध्वशब्दयोरिटा व्यवधानेनादोषात् । तद्वाडिति । इदमयुक्तम् । भष्भावे प्रवृत्तेपि झलां जशोन्त इति जश्त्वेन पुनर्दकारप्रवृत्तेः । बशःकिमिति । झलां जशोन्त इति सूत्रस्थझल्ग्रहणमत्रैव कृत्वा जस्यैव भष्विधेय इति भावः । कारकं

प्रतीति । भावे क्विप्यपि न साध्यत्वमात्रेण भानं धात्वर्थस्येति तत्रापि धातुत्वं न सुलभमिति भावः । प्रत्ययनिमित्तकत्वाभावादिति । भ्रौणहत्ये तत्त्वनिपातनेन साजात्यात्प्रत्ययनिमित्तककार्ये एवास्याः प्रवृत्तिरिति भावः । केचित्तु संशब्देनेन विहितप्रत्ययः क्विबेव तमाश्रित्यैव धुगित्यत्र घत्वादि । प्रत्ययनिमित्तककार्ये एवास्याः प्रवृत्तिरिति तु न । अनुदात्तस्य चर्दुपधस्याऽचि विभाषा इत्यादौ तदप्रवृत्त्यापत्तेरित्याहुः । इग्यणः । भाष्यविरोधादिति । ननु वकारस्य ऌकारोऽप्यन्तरतम इति तद्वारणाय यथासंख्यसंबन्ध आवश्यक इति चेन्न । ऌकाराऽघटितत्वेनान्तर्यादुकारस्यैव प्रवृत्तेः । अत्रपक्षइति । वर्णसञ्ज्ञापक्ष इत्यर्थः । वचनप्रामाण्याद्भविष्यतीति । अन्ये तु वर्णसंज्ञापक्षे न तद्भावितपक्षाश्रयणम् । सूत्रशाटकन्यायेनाप्यपरिहार्यस्यान्योन्याश्रयस्यापत्तेः । अदुहितरामित्यत्र तु यथासंख्याविज्ञानान्न दोषः । ऌकारोपदेशः किमर्थः । ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थ इति ऋऌक्सूत्रस्थं भाष्यं तु यथासंख्यशास्त्रप्रवृत्तेरप्युपलक्षणम् । एवं च वकारस्थाने ऌकारवारणायोक्तं कुसृष्ट्याश्रयणमपि न । केचित्तु संप्रसारणस्येति दीर्घारम्भसामर्थ्येन संप्रसारणप्रत्ययनिमित्तकाङ्गावयवस्यैव हलः परस्य संप्रसारणान्ताङ्गस्यैव हल इति दीर्घविधानेनादुहितरामित्यत्र न दीर्घः । संप्रसारणनिमित्तप्रत्ययस्यैवाप्रसिद्धेः । उक्तार्थाश्रयणफलं तु निरुतमित्यादौ दीर्घाभाव इत्याहुस्तन्न । उत्तरपदनिमित्तकसंप्रसारणस्य बहिरङ्गत्वेनासिद्धत्वाद्धल इति दीर्घाप्राप्तेः । परेत्वेनेको ह्रस्व इति ह्रस्वबाधनार्थत्वाच्च दीर्घस्य द्युभ्यामित्यत्र तु दिव उदिति तपरत्वसामर्थ्येन दीर्घबाधः । भाव्यमानोप्युकारः सवर्णान् गृह्णातीत्यस्यार्थस्यापि तपरत्वं ज्ञापकमस्तु । एकस्यानेककल्पकत्वे बाधकाभावात् । वस्तुतो ऋत उदिति तपरत्वं भाव्यमान इति परिभाषाया ज्ञापकम् । दूच इत्यस्याभिधाने चिकीर्षक इत्यादिवद्बाहिरङ्गत्वेनासिद्धत्वान्न तपरत्वसामर्थ्येन दीर्घत्वस्य वारणम् । द्युभ्यामित्यत्र तूत्वदीर्घत्वयोरन्तरङ्गपदत्वद्वाराभ्यां निमित्तकत्वेन नान्तरङ्गबहिरङ्गभावः । अक्षद्यूरुण इत्यत्रापि न पूर्वरूपम् । ऊठि पूर्वरूपात्परत्वादन्तरङ्गत्वाच्च तस्य हल इति दीर्घेऽल्विधित्वेन स्थानिवत्वेन संप्रसारणत्वाभावात् । यद्वा च्छ्वोः-शूडित्यत्र ह्रस्वे विधातव्ये दीर्घविधानं च्छ्वोरिति विहितस्योठः संप्रसारणपदेनाग्रहणज्ञापनार्थं तेनाक्षद्यूरुण इत्यत्र न पूर्वरूपमिति दिगित्याहुः । सोर्लोपे द्युकाम-

इत्यत्र संप्रसारणस्येति दीर्घो न । उत्तरपदानिमित्तके संप्रसारणे एव तत्प्रवृत्तेः । न चाक्षद्व्यूण इत्यत्र चरितार्थस्य संप्रसारणस्येति दीर्घविधानस्य सामर्थ्येन हल इति दीर्घस्य हूत इत्यादौ प्रवृत्तिर्न स्यात्पूर्वरूपस्य संप्रसारणत्वाभावादिति वाच्यम् । पूर्वरूपस्य संप्रसारणग्रहणेन ग्रहणत्वकल्पनादिति दिगित्याहुः । ननु संप्रसारणासंप्रसारणयोर्जातस्य पूर्वरूपस्य संप्रसारणाभावेन पूर्वरूपोत्तरं संप्रसारणं न स्यादित्याशङ्क्याह । नसंप्रसारणइति । इदमयुक्तं अचःपरेति स्थानिवत्वेन पूर्वरूपस्य संप्रसारणत्वात् । नचैवमिति । पूर्वरूपोत्तरं वचनप्रामाण्यान्निषेधप्रवृत्तावपि सवर्णदीर्घोत्तरमपि तत्प्रवृत्तौ मानाभाव इति भावः । अन्यत्रापिण्वुलिति । णिजन्ताद्विचि तु प्रष्ठौह इति रूपं दुर्लभम् । णिचा व्यवधानेनोठोऽप्रवृत्तेः । तत्रोपदेश इति । रुत्वशास्त्रवैयर्थ्याभावादित्यर्थः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते इति न्यायादिति भावः । भाष्यध्वनितत्वमेवाह । एवमेवेति । लोपेन प्रत्ययानुत्पत्तेरस्वीकारे एवेत्यर्थः । अन्ये तु विषयभेदेनोत्सर्गापवादभावः । अचि रादेशस्य नुडपवादत्वमपि न विषयभेदात् । निरूपितं चेदं सविस्तरं त्रिपथगायाम् । तथाचोत्सर्गापवादभावाभावे ऽनड्वानित्यस्य प्रत्ययलक्षणसूत्रासत्वे नित्यत्वात्सोर्लोपे नुमोरनापत्त्या तस्य तत्सूत्रोदाहरणत्वमुपपद्यत एव । इमन्नुम्विधिसामर्थ्येन भूतपूर्वगत्याश्रयणसंभवेप्यन्यार्थमारब्धेऽपि प्रत्ययलक्षणसूत्रेणैव निर्वाह उचित इति भाष्याशयः । किं च लोपशास्त्रेणानुत्पत्तेरन्वाख्यानेप्युत्सर्गापवादभावस्यावर्जनीयतया ऽमादिविषये हल्ङ्यादिसूत्रेण प्रत्ययानुत्पत्तेरेवान्वाख्यानमसंभावि । किं च हेगौरीत्यादौ सन्निपातपरिभाषया संबुद्धिलोपानापत्तिप्रतिपादकभाष्यासंगतिः । अपि च णिलोपशास्त्रेण णेरनुत्पत्तेरन्वाख्यानेनाटिटदित्यादौ सणिच्कस्य द्वित्वानापत्तिः । यदि च द्विर्वचनेचीति निषेधाद् द्वित्वे कर्त्तव्ये न तदनुत्पत्तिबुद्धिः । द्वित्वोत्तरं तु तदनुत्पत्तिरिति कथं चिदुच्यते तर्हि अनड्वानित्यत्राप्यमा बाधात्तत्प्रवृत्तिकाले न तदनुत्पत्तिबुद्धिः पश्चात्तु तथेति सुवचम् । अतृणेडिति तदुदाहरणं तु भवत्येव । तृणेढीत्यादौ चरितार्थस्येमो हल्ङ्यादिलोपानपवादत्वादित्याहुः । तान्तस्य विधानमिति । इदमयुक्तम् । तपरस्तत्कालस्येति तत्कालस्य संज्ञित्वबोधनात् । सर्वादेशत्वापादनमिति । बोधकगतमनेकाल्त्वं बोध्ये उपकरोतीत्यभिप्रेत्येदम् । तदभावः फलमित्युक्तमिति । तित्स्वरितमित्यत्र

तित्पदं तिद्बोध्यपरमित्यभिप्रेत्येदम् । तथाच कैयटेनोक्तम् । तिता प्रत्यायितः संज्ञी संज्ञाधर्मेण कथ्यत इति अस्ति तद्व्यपदेश आदेशस्येति । एतेन तपरसूत्रेणाज्मात्रस्य विधेयत्वात्तत्रानेकाल्त्वातित्वयोरभावादिदमप्ययुक्तमित्यपास्तम् । उच्चारणार्थानामपीति पाठः । अनुनासिकपरस्यवेरिति । उच्चारणार्थानां विनैवेत्संज्ञानिवृत्तावनुनासिकपरस्य वेः कुत्राप्यभावेन सूत्रस्य निर्विषयत्वं स्यादिति भावः । उच्चारणार्थानामित्संज्ञां विना निवृत्त्यनिवृत्तिविचारः काकदन्तपरीक्षामनुकरोतीति नात्रास्माभिः सूक्ष्मेक्षिका कृता । अतएवसुबुत्पत्तिरिति । इक्प्रत्ययान्तत्वादवणौगमिरित्यादीति । आदिपदेन ब्रुवो वचिरित्यादि संग्रहः । नोपधालोपइति । वचिरित्यत्र संप्रसारणमप्येवमेव न । ऊणूनेति । इदमुतस्तपरत्वं त्विति पूर्वग्रन्थेन विरुद्धम् । ज्ञापितेपि स्वस्मिन् चारितार्थ्यासंभवात् । उठो ऽप्रवृत्तौ व्यञ्जनस्य स्थाने आन्तर्याद् ध्रस्वस्यैव प्रवृत्तेः । दीर्घस्यबहिरङ्गतयेति । उत्वदीर्घयोस्तुल्यनिमित्तकत्वेनान्तरङ्गबहिरङ्गभावो न युक्तः । पदलाघवाभावइति । षट्त्रिचतुर्भ्यो हलादिःषट्चतुर्भ्यश्चेत्यनयोश्चतुर्ग्रहणद्वयस्यानुकरणम् । षट्कतीत्यत्र तु चतुर्ग्रहणं कर्त्तव्यमेव । कतिग्रहणे न षडिति स्वरूपग्रहणात् । रान्तस्य षट्संज्ञायान्तु पदत्रयमिति पदगौरवमिति भावः । सचार्थप्रधानएवेति । प्रधानाप्रधानयोः प्रधानस्यैव ग्रहणमिति न्यायात् । परत्वस्येवेति । अवधितासंबन्धेन शब्दनिष्ठपरत्वस्येत्यर्थः । तत्रसंवन्धइति । इदृशस्थले द्वयीगतिः । अवधित्वं पञ्चम्यर्थः । अवधिता निरूपकत्वं वा । तथा च तत्र संबन्धे अवधित्वसंबन्धे तन्निरूपितसंबन्धे अवधितानिरूपितसंबन्धे चेत्यर्थः । परम्परासंबन्धेनेति । स्वबोधकप्रतियोगित्वसंबन्धेनेत्यर्थः । गौणेर्थे न विभक्तिः । प्रकृतिप्रत्ययार्थयोः परम्परासंबन्धेन नान्वय इत्युक्तार्थद्वये भाष्यं साधकमाह । अतएवगङ्गायामिति । परम्परासंबन्धेनान्वये तु गङ्गापदार्थस्य प्रवाहस्य समीपवर्तितीरनिष्ठत्वसंबन्धेनाधारत्वे ऽन्वयसंभवात् । स्वरितत्वप्रतिज्ञाश्रयणं व्यर्थं स्यात् । एवं गौणेर्थे विभक्त्युत्पत्तावपि बोध्यम् । इदं भाष्यं गङ्गापदस्य तीरे लक्षणामनाश्रित्योक्तम् । णत्वात्पूर्वमेवेति । इदं द्वित्वविषये ऽसिद्धं नेति पूर्वत्रासिद्धमित्यस्यार्थमभिप्रेत्य । गस्यैवद्वित्वेइति । पूर्वत्रासिद्धमित्यस्य वर्णद्वित्वे प्रवृत्त्यभावे जश्त्वद्वित्वचर्त्वानामसिद्धत्वात्कुत्वे द्वित्वचर्त्वयोरसिद्धत्वाज्जश्त्वे ततश्चर्त्वस्यासिद्धत्वाद् गस्यैव द्वित्वे इत्यर्थः । गकारे झलि पेर

इति । इदं गस्यैव द्वित्वमिति पूर्वोक्तं च स्वग्रन्थविरुद्धं स्वेन पूर्वं अवसाने चर्त्व-स्य जश्त्वापवादत्वोक्तेः । उक्तरीत्यैवेति । अवसाने चर्त्वस्यासिद्धत्वादित्युक्तरीत्यै-वेत्यर्थः । इत्येवार्थ इति । द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये परमसिद्धमित्यर्थ इति भावः । अन्ये तु पूर्वत्रासिद्धीयमद्वित्व इदं पदद्वित्वविषये द्विर्वचने परसवर्णत्वं सिद्धं वक्त-व्यम् । उभौ साभ्यासस्येति वार्त्तिकसूत्राभ्यां लिङ्गाभ्यां तेन ऊर्णुनाव औजढदित्यादि सिद्धम् । अन्यथा परत्वाण्णत्वढत्वयोस्तदसिद्धिः । द्वित्वे कृते द्वित्वाश्रयस्य कार्ये कर्त्तव्ये ऽसिद्धत्वं नेत्यपि न मानाभावात् । अभ्यासे जश्त्वचर्त्वयोरेत्वतुको-रिति वार्तिकाच्च । अत एव फलभजिग्रहणं ज्ञापकम् । अभ्यासादेशसिद्धत्वस्येति । अत एव हलिति सूत्रे भाष्ये उक्तं त्वद्रीत्या द्वित्वाश्रयस्यैव जश्त्वासिद्धत्वाभावेन ज्ञापकोपन्यासवैयर्थ्यम् । सुपि भूतो द्विरुच्यत इति पाठ इति दिगित्याहुः । सप्त-मीबहुवचनमिति । न तु प्रत्याहारान्तर्गतानां सप्तमीबहुवचनभिन्नानां स्वरादित्वा-भावात् । एवं चेति । सप्तमीबहुवचनस्य ग्रहणे सिद्धे इत्यर्थः । यथा च भ्यामा-दावप्राप्तविधिसर्गविधिरयं नेति भावः । षडित्यन्वर्थसंज्ञेति । षडिक्राचरतीति षट् । प्राधान्येन संख्येयबोधकः । टाप्निषेधानापत्तेरिति । स्त्रियां यद्यत्प्राप्नोति तन्ने-त्यर्थाश्रयणसामर्थ्येन भूतषट्त्वमादाय निषेधप्रवृत्तेः स्वैनोक्तत्वेन वृत्तेः प्राक् स्थि-तषट्त्वमादाय निषेधप्रवृत्तेः संभवात् । चिन्त्यमेतत् । यद्वेत्युक्तं दूषयति । आ-कडारसूत्र इति । षड्भ्यइतिसूत्रविषयइति । तत्र हि षट्भ्यो लुगित्यत्र विहित-विशेषणमाश्रितं त्वद्रीत्या प्रियपञ्चानामित्यत्र षट्त्वाभावादेव लुगप्रवृत्तौ तदाश्र-यणवैयर्थ्यम् । इत्युक्तमिति । प्रधानाप्रधानन्यायेनोपसर्जने षट्त्ववारणमशक्यम् । प्रिय-पञ्चानामित्यत्र पञ्चन्शब्दस्य प्राधान्येन संख्येयबोधकत्वात् । अन्यथा त्रिचतुरोरि-त्यादावर्थवत्परिभाषया प्रधानन्यायेन च प्राधान्येन त्रित्वादिविशिष्टबोधकग्रहणे प्रि-यातिसेत्यादौ तिस्रादेशायनापत्तिरित्युक्तमित्यनेन ध्वनयति । अनभिधानमेवोचित-मिति । सुध्युपास्येत्यादिप्रयोगानुरोधेन । न पदान्ताः परेणः सन्तीति भाष्यस्य कार्यभाज इति पूरणावश्यकत्वे कमल् वृक्षवित्यादिरणोप्रगृह्यस्येति कार्यभाक्-त्वमस्त्येवेति भावः । यान्तास्तुनसन्तीति । एचो ऽयवायाव इति सौत्रो निर्देश इति भावः । अयादेश इत्याद्यभियुक्तप्रयोगाच्चिन्त्यमेतदिति केचित् । अङ्गानपेक्ष-त्वेनेति । संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणाच्चिन्त्यमेतदिति केचित् । अन्तरङ्गत्वा-

द्वित्वे ऽकजिति । अज्ञाताद्यर्थापेक्षत्वेनाकचो बहिरङ्गत्वमिति कैयटोक्तरीत्येदम् । भाष्ये तु परत्वाद्वित्वमित्युक्तम् । ननु यद्यकचः परत्वाद्वित्वं तर्हि कादेशोपि परत्वात्ततः प्राप्नोति । यद्यन्तरङ्गत्वाद्वित्वं कादेशोप्यन्तरङ्गत्वात्ततः प्राप्नोतीति चेन्न । अकज्विधौ तिङश्चेत्युक्त्या समनिमित्तकयोरकच्चधिभावयोः परत्वाद्वित्वे ऽकच् घकालतनेष्विति ज्ञापकेन सुबुत्पत्त्यनन्तरमकजुत्पत्तावप्यकचः प्रातिपदिकमात्रनिमित्तकत्वेनान्तरङ्गत्वाबकाचि ततः कादेशः । अत एव भ्यामादौ किमेष्टेरेव प्रागकच् न तु सुबन्तस्य टेः तदेतत्परत्वाद्वित्वे ऽकजिति हुझल्भ्यो हेरिति सूत्रस्थभाष्येण कादेशः खल्वपि अवश्यं साकच्कार्थो वक्तव्य इति त्यदादीनामिति सूत्रस्थभाष्येण च सूचितं भवति । ननु संनिकृष्टं साविति कुतो वा नानुवर्त्तत इत्याशङ्क्याह । साविदमइति । इदमुपलक्षणम् । यः सावित्युत्तरसूत्रे सुग्रहणाच्चेत्यपि बोध्यम् । अदन्तत्वाभावादिति । तस्य चेत्यनाश्रित्येदम् । विशिष्टशक्ततयेति । सत्यन्यस्मिन्पूर्वो नास्ति तत्रादिशब्दस्य सत्यन्यस्मिन्यस्मात्परो नास्ति तत्रान्त्यशब्दस्य शक्तेरित्यर्थः । असहायेइति । असहायत्वं चात्र मुख्यव्यपदेशनिमित्तरहितत्वम् । तच्चौपगव आभ्यामित्यनयोरस्ति । सत्यन्यस्मिन्निति विशेषणस्याभावात् । तथा च यन्निरूपितमादित्वमन्त्यत्वमवयवत्वं वा स्वस्यानेयं तदवयवस्वेतराद्वितीयासमभिव्याहृतमसहायत्वम् । सभासन्नयने, दरिद्राधातौ चाकार इत्यनयोर्नासहायत्वम् । तत्समुदायाघटकस्वेतरवर्णसत्वात् । हरी इत्यादौ द्विवचननिरूपितमन्तत्वं ईकारस्यानेयं तदवयवः स्वेतरो न कोपीति असहायत्वं सुस्थम् । एवं व्यतिसे इत्यादावपि । हरिष्वित्यादौ सोर्न पदत्वम् । यस्माद्विहितस्तदाद्यवयवकत्वस्य तत्तत्सत्वगर्भस्य व्यपदेशिवद्भावालभ्यत्वादेवं प्रचिकीर्ष्य गत इत्यादौ नायादेशः । अवयवत्वतद्व्याप्यधर्माणां व्यपदेशिवद्भावलभ्यत्वेपि लघुपूर्वत्वस्य तदलभ्यत्वात् । अत एव दधीत्यादौ न यण् । अच्परकत्वस्य व्यपदेशिवद्भावालभ्यत्वात् । केचित्तु मुख्यव्यपदेशभागघटकत्वमसहायत्वमित्याहुः । अकोकोरिति । अनाप्यको नेदमदसोरकोरित्यनयोरित्यर्थः । नन्वशो ऽनुदात्तत्वविधानं व्यर्थम् । आभ्यामित्यादावूडिदं पदादिति विभक्तेरुदात्तत्वेन शेषनिघातेनाशो ऽनुदात्तत्वासिद्धेरित्याशङ्क्याह । अनुदात्तौत्विति । शित्वादिति । अश्विधानसामर्थ्याच्च निर्दिश्यमानपरिभाषा ऽकचो व्यावर्त्तनाय न प्रवर्त्त इति भावः । ननु तदादेरित्यस्य

विशेष्यतया तदन्तविधावनाभ्यामित्यादौ सवुट्कस्यादेशापत्तेर्निर्दिश्यमानपरिभाषाया अप्रवृत्तेरिति चेन्न । अकजूव्यावृत्तिफलिकाया एव तस्या अप्रवृत्तिकल्पनात् । वुड्व्यावर्तिका सा प्रवर्त्तत एव । ननु संज्ञोपसर्जनयोस्त्यदाद्यत्वाप्रवृत्तावशूवचनं सार्थकमिति न तत्सामर्थ्यम् । तथा च साकच्के निर्दिश्यमानपरिभाषया ऽऽदेशो न स्यादित्याशङ्क्याह । संज्ञोपसर्जनयोरिति । अन्यार्थापत्तेरिति । आभ्यामित्यादौ दीर्घादिबाधनार्थत्वापत्तेरित्यर्थः । नकारलोपइत्यर्थइति । इदानीन्तनमूलपुस्तकेषु नलोप इत्येव पाठः । पर्युदासइति । प्रसज्यप्रतिषेधे तु पूर्वजातप्रातिपदिकत्वस्यापि निवृत्त्यापत्तिरिति भावः । अतएवेति । सप्तम्यन्ताद्राजन्शब्दात्क्यचो ऽनभिधानादेवेत्यर्थः । नलोपःसुप् । नियमशास्त्राणां विधिमुखेनैव प्रवृत्तिर्न निषेधमुखेनेत्याह । अन्यनिवृत्तिफलकेति । पशुपशायामिति । स्पशेर्यङन्तादप्रत्यये संज्ञापूर्वकविधेरनित्यत्वात्पृषोदरादित्वाद्वा साधुः । गम्यतइत्युक्तमिति । तेन प्रतिषेधस्याशाब्दत्वमुक्तं भवति । ङ्णमेजन्त इति सूत्रस्थेड्विधिराकारलोपस्येति भाष्यं भोभगो इति सूत्रस्थं किं पुनः कारणं सुकारपर एवोदाह्रियत इति भाष्यं चात्रार्थे गमकं बोध्यम् । प्रतिषेधस्य शाब्दत्वे स्वार्थहानिपरार्थकल्पनयोरापत्तिश्च दोषो बोध्यः । न च मूलकेनोपदंशमित्यत्र कृदन्तत्वप्रयुक्तप्राप्तस्य समासग्रहणकृतनियमेन परत्वाद्बाधो न स्यादिति वाच्यम् । गम्यप्रतिषेधस्यैव परत्वेन बाधकत्वसंभवात् । यत्तु एच इगिति सूत्रस्थं भाष्यं नानेनेको निवर्त्त्यन्तेपि तु अनिको निवर्त्त्यन्ते । तच्च वार्त्तिकमुभयप्राप्तौ कर्मणीति निषेधे कादिप्रयोगे ऽप्रतिषेध इति तदुभयं गम्यमानप्रतिषेधपरम् । नानेनेकोनिवर्त्त्यन्ते इत्यस्य नानेनेको ऽपूर्वा विधीयन्त इत्यर्थः । अप्राप्तसिद्धत्वेति । परत्र षत्वे पूर्वस्य नलोपस्यासिद्धत्वाप्राप्तेरित्यर्थः । वैरूप्येति । स्वरविध्यादौ नियमार्थत्वं सुप् विधौ तु विध्यर्थत्वमिति वैरूप्येत्यर्थः । वस्तुतस्तु क्रादिसूत्रवत् कृत्तद्धित इति सूत्र इव च नियमशास्त्राणां विधिमुखेन प्रवृत्त्या शाब्दबोधे न वैरूप्यम् । तस्य पूर्वं पदत्वेइति । एतत्फलं तु द्युलिहावित्यत्र द्वन्द्वे घीति पूर्वनिपातः । कृतीतिकिमिति । कृति परतो विधौ नलोपो सिद्ध इत्येव सिद्धे तुग्ग्रहणं चिन्त्यप्रयोजनम् । अस्मादेवेति । एतत्प्रयोजनं चिन्त्यम् । वाह ऊठ्सूत्रस्थोठ्ग्रहणस्य बहिरङ्गपरिभाषायां ज्ञापकत्वस्य भाष्योक्तस्यासंगतिश्चाद्धति तुगेव नेति । अयं सूत्रतात्पर्यविषयो नियमो न तु शब्दमर्यादया

लभ्य इति बोध्यम् । स्पष्टार्थमिति । अन्तग्रहणाभावे वम इत्यस्य षष्ठीत्वसंभावनायां वकारमकारसंबन्धी यः संयोग इत्यर्थः स्यात्ततश्च जम्भासुहरिततृणसोमेभ्य इति कृतसमासः तस्य सुजम्भादेः शसादौ निषेधापत्तिरिति केचित् । वमादिति न्यासे तु दोषश्चिन्त्यः । श्रीकृष्णभट्टास्तु येनविधिस्तदन्तस्येत्यस्यानित्यत्वज्ञापकमन्तग्रहणमिति समासप्रत्ययविधौ प्रतिषेध इति सिद्धमित्याहुः । वृत्रहणी इत्याद्यनेकोदाहरणोपन्यसनं वैचित्र्यार्थम् । नियमशास्त्राणां विधिमुखेन प्रवृत्तेरित्याशङ्क्याह । एतत्फलभूतेइति । ननु वृत्रहयतीत्यत्राव्यवधान एव स्यान्न द्वाभ्यां व्यवधाने घातक इत्यादावित्याशङ्क्याह । इदमिति । प्रघनाघन इत्यत्रेति । केचित्त्वभ्यासस्य निरर्थकत्वान्नात्र णत्वम् । मूर्तौ घन इति निपात उपसर्गयोगेऽपि प्रघन इत्यत्र वार्त्तिकमतेऽपि प्राप्तणत्ववारणाय अगारैकदेशे प्रघण इति कृतणत्वनिर्देशस्योपसर्गात्परस्य घनो नस्य णत्वं नेत्यर्थज्ञापकत्वाश्रयणाच्चेत्याहुः । हादेशेष्विति । अर्थतः कवर्गविशेषणं तत्फलं तु करणे योविद्रुष्वित्यनेन हन्तेरप्रत्यये घनादेशे च द्रुघण इत्यत्र पूर्वपदात्सञ्ज्ञेति णत्वसिद्धिः । हस्थानिककवर्गाभावात् । ननु वृत्रघ्न इत्यादौ न णत्वम् । नकारमुपजीव्य जातस्य ताद्विघातकणत्वानिमित्तत्वादिति चेन्न । त्रैपादिके कार्ये सन्निपातपरिभाषाया अप्रवृत्तेः । अत्र चेदं वार्त्तिकं भाष्यं च मानम् । तेन जग्घमित्यादौ घत्वादिसिद्धिरित्यन्यत्र विस्तरः । मूलेऽनिनस्मिन्निति । अल्लोपोनः । अन उदाहरणं राज्ञः, अस्थ्ना । इन उदाहरणमिन्हन् । दण्डी, वाग्मी । अस उदाहरणं अत्वसन्तस्य चाधातोः, । सुपयाः, सुस्रोताः । मन उदाहरणं । मनः, सुशर्मा, सुप्रथिमा । अत्र च ज्ञापकमत्वसन्तस्येति सूत्रे ऽधातोरिति पर्युदासः । न संयोगादिति निषेधश्च । असतेर्विचि यज्वानौ ब्राह्मणश्च णिजन्ताद्विचि तस्मिन्नुपपदे ऽनितेर्वाच निषेधौ सफलाविति केचित् । अलैवानर्थकेनेति । अत्र च ज्ञापकं नेदमदसोरिति सूत्रे ऽदसो ग्रहणम् । इति युवोरनकावित्यत्रेति । इति शब्देनातिप्रसङ्गाभावरूपसाध्यांशमात्रं विवक्षितम् । भाष्ये नपुंसकस्य झलच इति सूत्रे योगविभागेनोक्तार्थज्ञापनात् । तत्रैवेति । असिद्धत्वाभावकल्पने एव । असाधुत्वंलभ्यतइति । अविशेषेण प्रवृत्तवार्तिकस्य कनिप्रत्ययान्तविषयकत्वस्यापि कल्पनात् । मतुप्वन्योर्विधानादित्युक्तग्रन्थानुरोधेन वनिबन्तविषयकत्वे तु कन्यन्तार्थं तदावश्यकत्वेन मघोनश्च न शिग्यामित्यसंगतं

स्यादिति भावः । ननु कनिन्प्रत्ययस्य लोकवेदसाधारण्येन विधानादुक्तवार्तिकस्य कन्यन्तविषयमसंभवीत्याशङ्क्याह । तथाचेति । ननु निपातितान्तोदात्तमादाय मघोन इत्यस्य सिद्धावपि वनिबन्तमादाय यस्येति चेति लोपः स्यादित्याशङ्क्याह । छन्दसीति । नाल्लोपेति । अल्लोपो दृष्टान्तार्थः । अन्नन्तत्वाभावादिति । ननु वस्नसादाविव स्थानिवद्भावेनान्नन्तत्वं सुलभम् । आनुमानिकस्थान्यादेशभावाश्रयणात् । स्थानिनि मघवन्शब्दे ऽन्नन्तत्वसत्वात् । न चान्नन्तत्वविशेषणवैयर्थ्यम् । युवतीः पश्येत्यादौ संप्रसारणनिवृत्त्यर्थत्वात् । न चात्र विभक्तौ लिङ्गविशिष्टाग्रहणमिति निषेधः शङ्क्यः । तदननुसंधानेनैव तत्प्रवृत्तेरिति चेन्न । श्वन इत्युभयोः शेष इति भाष्यस्याकारवकारयोरुक्तं कार्यद्वयम् । अन्संबन्धिनोस्तयोर्बोध्यमिति वाक्यार्थाश्रयणेनादोषात् । अन्नन्तत्वाभावादिति शेखरग्रन्थो न चादेशे कृते ऽन्नन्तत्वमस्तीति कैयटग्रन्थश्चासंगत एव । अल्लोपदृष्टान्तोप्ययुक्तः । अनो ऽकारस्यैव लोपविधानेनान्नन्तत्वस्य श्रौतमानुमानिकं च स्थानिवत्वमाश्रित्य दुर्लभत्वेन धीवरीत्यादिवल्लोपवारणस्य सुकरत्वेप्यन्नन्तत्वमाश्रित्य प्रवर्त्तमानसंप्रसारणस्य दुर्वारत्वात् । अथवा युवतीः पश्येत्यादौ विभक्तौ लिङ्गविशिष्टाग्रहणमिति परिभाषया संप्रसारणाभावमभिप्रेत्यान इत्युभयोः शेष इति भाष्यं प्रवृत्तम् । एवञ्चानामित्यर्थेपि न दोषः । विशेषणसामर्थ्येन श्रूयमाणान्नन्तत्वविवक्षणात् । लिङ्गविशिष्टाग्रहणादिति । इदमुपलक्षणम् । झलन्तस्योगितो ऽग्रहणादित्यपि बोध्यम् । सर्वानुदात्तस्यादिति । न गोश्वन्नित्युदात्तनिवृत्तिस्वरस्यापि निषेधाङ्गीकारादिति भावः । सावेकाच इत्यस्यैव न गोश्वन्निति निषेध इत्याभिप्रेत्याह । उदात्तनिवृत्तिस्वरेणेति । अत्राद्यपक्ष एव श्रेयानेवन्तर्हि न वयं लक्षणस्य प्रतिषेधं शिष्मः किं तर्हि येन केन चित्प्राप्तस्य विभक्तिस्वरस्यायं प्रतिषेध इति असिद्धवत्सूत्रस्थभाष्यविरोधः । यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत नैवं शक्यमिति तदुत्तरभाष्यं तु विभक्तिग्रहणमनुवर्त्य स्वरमात्रप्रतिषेधपक्षखण्डनपरम् । आद्युदात्तत्वमिष्यतइति । सावेकाच इति विभक्तिस्वरस्तु न गोश्वन्निति प्रतिषिद्ध इति भावः । इदमयुक्तम् । अल्लोपपक्षेप्युक्तरीत्योदात्तनिवृत्तिस्वराप्रवृत्तौ फिष इत्यस्य पुनः प्रवृत्त्या शुनेत्यस्याद्युदात्तत्वात् । न च लक्ष्ये लक्षणस्येति न्यायावतारः स्थानिभेदेन संप्रसारणस्येव फिष इत्यस्यापि पुनः प्रवृत्तिसंभवात् ।

अत एवासिद्धवत्सूत्रे भाष्ये ऽल्लोपेन वा निवृत्तौ पूर्वत्वेन वा निवृत्तौ स्वरे विशेषाभावप्रतिपादनं संगच्छते । तन्मात्रनिषेधइति । मात्रशब्दः कात्स्न्र्ये सर्वसंप्रसारणनिषेध इत्यर्थः । पूर्वमिति । यकारस्य संप्रसारणप्राप्तेः पूर्वं पूर्वरूपोत्तरं सवर्णदीर्घरूपैकादेश इत्यर्थः । नन्वनञः किमिति प्रश्ने ऽनर्वा यज्वविदिति हरणं नोपपद्यते ऽसाविति प्रतिषेधविषयत्वेन द्व्यङ्गविकलत्वादत आह । अनङ्प्रत्युदाहरणस्येति । अनर्वन्शब्दोऽव्यावर्त्यइत्यर्थइति । तत्फलन्त्ववर्णावित्यादीति भावः । ननु परस्मैपदानामित्यादावित्राकारसमुदायस्य विधेयत्वे ऽनेकाल्त्वात्सर्वादेशः स्यादित्याशङ्क्याह । विशेष्येति । भाष्येत्विति । अष्टन आ विभक्ताविति सूत्रे इति शेषः । एतेन पथिमथीति सूत्रे एवं भाष्ये नोपलभ्यत इति कस्यचिच्छङ्का निरस्ता । तत्प्राप्तस्येति । गुणाभेदकत्वप्रयुक्ता प्राप्तिः । प्रश्लेषान्निवार्यत इति दीक्षितोक्तं दूषयन्मतान्तरमाह । केचित्त्विति । इदंसर्वमिति । प्रतिपत्तिलाघवेन तथैवोच्चारणे कर्तव्ये इत्यादिभाष्योक्तमा आदिति प्रश्लेषादिति मूलोक्तं चेत्यर्थः । गुणाभेदकत्वेन प्राप्तस्य जातिपक्षेण प्राप्तस्य चेत्यर्थः । अतएवेति । गुणाभेदकत्वप्रयुक्तप्राप्तेरप्यणनणूसाधारण्येनाप्रत्यय इत्यनेन निषेधादेवेत्यर्थः । इत्युक्तमिति । षण्णां ग्रहस्य प्राप्तत्वेन जातिपक्षगुणाभेदकत्वपक्षयोस्तपरसूत्रस्य नियमार्थत्वेन प्रापकत्वासंभवादिति पाठकस्तन्न । नियमशास्त्राणां विधिमुखेन प्रवृत्तेः । गुणाभेदकत्वेन प्राप्नोतीत्यनुक्त्वा तपरस्तत्कालस्येति प्राप्नोतीत्युक्त्या गुणाभेदकत्वेन प्राप्तस्याप्यप्रत्यय इत्यनेन निषेध इति सूचितं भवतीत्याशयस्तूचितः । तथा च तपरस्तत्कालस्येति प्राप्नोतीति भाष्यं गुणा अभेदका इत्यभिप्रायकम् । सर्वत्र सर्वविषये जातिपक्षप्रयुक्तप्राप्तेश्च प्रतिषेधकमित्यर्थः । तत्रेति । अप्रत्यय इत्यत्रेत्यर्थः । तदाशयः । गुणाभेदकत्वेन प्राप्नोतीत्यनुक्त्वा तपरस्तत्कालस्येति प्राप्नोतीति वदतो भाष्यकारस्याशय इत्यर्थः । गुणाभेदकजातिपक्षयोरणूग्रहणस्याभावेनाणूग्रहणस्य च तत्रसंबन्ध इत्ययुक्तमिति बोध्यम् । अत एव । अप्रत्यय इत्यत्राणूग्रहणासंबन्धादेव । ननु जशादिविधौ जश्त्वजात्याश्रयसर्वजकारग्रहणासिद्धिः । भाव्यमानेनेति निषेधात् तत्र चाणूग्रहणसत्वादित्यत आह । परिभाषायामिति । पञ्चानामित्यादाविति । नन्वन्त्यबाधे ऽन्त्यसदेशस्येति परिभाषया सिद्धे उपधाग्रहणं व्यर्थम् । अत उपधाया णौ चङ्युपधाया इत्यादावुपधाग्रहणं न व्यर्थम् । ननन्द अचका-

ह्रस्वदित्यादौ वारणार्थत्वात् । अत्र हि नोक्तपरिभाषया निस्तारः । अन्त्यसदेशान-न्त्यसदेशयोरेकस्मिन् लक्ष्ये प्राप्त्यभावादिति चेन्न । पक्तारावित्यादावृतोर्ङीति गुणं बाधित्वा दीर्घवारणायोत्तरार्थं तदावश्यकत्वात् । चतुर्णामिति । इदं तितऊना-मित्यस्योपलक्षणम् । लिङ्गादिति । वस्तुतस्तु अस्मान्निर्देशान्नतिसृचतसृ इति धर्मिग्राहकमानाच्च त्रिपायां सन्निपातपरिभाषा न प्रवर्त्तत इति तत्वम् । तत्रापि प्रश्लिष्टेति । ननु प्रश्लिष्टेपि गुणाभेदकत्वाश्रयणेन प्रश्लेषवैयर्थ्यमित्याशङ्क्याह । प्रश्लेषेणेति । एवमन्यत्रापीति । आ सर्वनाम्न इत्यादौ । ऊङिति । ङित्वमादेः परस्येत्यस्य बाधनार्थं अष्टन्शब्दो घृतादित्वादन्तोदात्तः । व्यर्थमेवतदिति । तथाचात्वस्य वैकल्पिकत्वेन च प्रक्रियालाघवायाशि विधातव्ये उङ्विधानसाम-र्थ्यात्पूर्वं गुणे ततो वृद्धौ रूपसिद्धिरिति वाच्यम् । उशि नादिचीति निषेधेन पूर्व-सवर्णदीर्घस्याप्रवृत्त्याङि तस्य तस्माच्छसोनेति नत्वस्य च प्रवृत्त्या फलभेदाज्ज्ञापि-तेपि स्वस्मिन्न चारितार्थ्यमिति भावः । कार्यकालपक्षइति । यथोद्देशपक्षे तु झल्यु-पोत्तममिति स्वरे ऽल्विधिभिन्ने स्वरे कर्त्तव्ये स्थानिवत्वेन षट्त्वं सुलभं षट्-त्वस्य समुदायवृत्तित्वेनाल्वृत्तित्वाभावात् । भविष्यति किञ्चित्कार्यमित्यभिसंधा-यात्वप्रवृत्तेः पूर्वकार्याभावेपि षट्त्वप्रवृत्तेः । ननुकार्यकालपक्षे आत्वात्पूर्वं कार्या-भावेन षट्त्वाप्रवृत्तावपि परत्वान्नित्यत्वाच्च झल्युपोत्तमामिति बाधित्वा ऽत्वे कृते स्थानिवद्भावेन नान्तत्वमाश्रित्य षट्संज्ञा क्रियत इत्याशङ्क्याह । अल्विधित्वे-नेति । यथोद्देशपक्षस्यैवेति । ननु यथोद्देशपक्षस्यैवाश्रयणेन ज्ञापनेपि स्वस्मिन्न चा-रितार्थ्यम् । अष्टन्शब्दस्य त्रः संख्याया इत्याद्युदात्ततया ऽन्तानुदात्तत्ववारणा-याष्टनो दीर्घादित्यस्य शासि प्रवृत्तेरावश्यकतया तत्र झल्युपोत्तममित्यस्याप्राप्तया चरितार्थस्याष्टनो दीर्घादित्यस्याष्टाभिरित्यादौ झल्युपोत्तममित्यनेन परत्वाद्बाधः स्यादेवेति चेन्न । अष्टन्शब्दस्य घृतादित्वेनान्तोदात्तत्वात् । नन्वेवमपि दीर्घग्रह-णस्य न स्वस्मिन्चारितार्थ्यम् स्वरविधौ स्थानिवत्वनिषेधेनाष्टाभिरित्यत्र झल्युपो-त्तममित्यस्याप्राप्तेरिति चेन्न । अनन्तरस्येति न्यायेनाचः परस्मिन्नित्यस्य स निषेध इत्यङ्गीकारात् । नन्वेवं सत्यष्टानामित्यत्राष्टनो दीर्घादिति विभक्त्युदात्तत्वं न स्यात् । नलोपस्यासिद्धत्वेनाष्टन्शब्दस्य दीर्घान्तत्वाभावादित्याशङ्क्याह । अन्तो-दात्तत्वंत्विति । तत्प्रकृतेऽङ्गति । नुटि कृते इत्यर्थः । तथाच नुट्दृष्ट्या नलोप-

स्यासिद्धत्वेन नुटो न स्वोपजीव्यविघातकादर्शनमिति संनिपातपरिभाषायाः प्रवृत्तिरिति न वाच्यमिति भावः । इदं कार्यकालपक्षेपि बहिरङ्गपरिभाषायास्त्रिपाद्याम-प्रवृत्तिप्रतिपादकस्वग्रन्थविरुद्धम् । नार्कुट इत्यस्य पूर्वत्र वृद्धौ कृतायामपि परस्य विसर्गस्यासिद्धत्वाश्रयणेन त्रिपाद्यां तदप्रवृत्त्युपपादनात् । अन्तरङ्गपरिभाषादृष्ट्या विसर्गासिद्धत्वं तु तत्र पक्षे न त्रिपाद्यां तदप्रवृत्त्युपपादकम् । यद्यपीदं तत्रासिद्धं त्विह सिद्धमिति भाष्योक्तरीत्या तत्र पक्षे ऽसिद्धत्वेप्यन्यपरिभाषाणामिवास्या अपि प्रवृत्तेर्दुर्वारत्वात् । आशास्त्रीयत्वेनेति । राजभ्यामित्यादौ नान्तत्वस्यादन्तत्वाभावस्य वा अशास्त्रीयस्य दीर्घाप्रवृत्तये ऽतिदेशदर्शनादिदमयुक्तम् । सुबादिविधावेव नलोपस्यासिद्धत्वेन सन्निपातपरिभाषया नलोपस्यासिद्धत्वेन नाभावः । सुब्विधौ कृते इत्यर्थे तु न मानमिति वक्तुं युक्तम् । नलोपोवेति । वाशब्द इवार्थः । नन्वेवमात्वे हलीत्यस्यापकर्षः । परत्वान्नित्यत्वाच्च नुटं बाधित्वा ऽत्वे नुट् न स्यादिति तत्प्रवृत्तये । यदि च कृतात्वस्यापि षट्त्वं तदा स व्यर्थ इत्याशङ्क्याह । कार्यकालपक्षेइति । ननुकार्यकालेपि नुडर्थं षट्सञ्ज्ञायां ततः प्राप्तनुटं परत्वाद्बाधित्वा ऽत्वेपि स्थानिवत्त्वेन षट्त्वमाश्रित्य नुट्सुलभ इत्याशङ्क्याह । तत्तद्विधीति । ततश्च नुटमिव षट्त्वमपि बाधित्वा परत्वादात्वमिति भावः । ननु लक्ष्यानुरोधेन यथोद्देशपक्षस्यैवाश्रयणेन नुट्सिद्धौ कार्यकालपक्षाश्रयणेन दोषोद्भावनं तत्परिहाराय हलीत्यपकर्षश्चायुक्त इत्याशङ्क्याह । दीर्घग्रहणादिति । प्रतिपत्तिगौरवमिति । हलीत्यपकर्षापेक्षयेत्यादिः । वस्तुतस्तु यथोद्देशपक्षे षट्त्वस्य स्थानिवद्भावेन सुलभत्वे षट्सञ्ज्ञायामुपदेशवचनं कर्त्तव्यम् । तातायष्टनो नुडर्थं अष्टानामित्यत्रात्वे कृते षट्सञ्ज्ञा न प्राप्नोत्युपदेशग्रहणाद्भवतीति भाष्यवार्तिकयोरसङ्गतिः । तस्मात् षट्त्वस्य नान्तत्वविशिष्टसंख्यावाचकत्वेनाल्घटितत्वान्नातिदेशसाध्यत्वम् । सञ्ज्ञापदस्य तद्विधावुद्देश्यतावच्छेदकरूपेणैव प्रायेण सञ्ज्ञिबोधकत्वात् । अन्ये तु हलीत्यपकर्षे नुटि कृते न आत्वं सन्निपातपरिभाषाविरोधात् । नलोपे तु न सा न तिस्त्रिति धर्मिग्राहकमानेन सपादसप्ताध्याय्यामेव तत्प्रवृत्तेः । अत एव जग्धमित्यादौ घत्वादिः । अत एव दोदद्घोरिति सूत्रे भाष्ये दान्तत्वे धान्तत्वे च नत्वधत्वे धान्तत्वे ऽदोषस्तस्मात्धान्त एवेत्युक्तम् । एवं च हलीत्युभयोः शेष इति प्रतीकमुपादाय नुटि कृते आत्वमिति कैयटग्रन्थश्चासङ्गत एवेत्याहुः ।

तज्ज्ञाप्यत्वमपि नेति । इदमयुक्तम् । प्रियाष्टानौ प्रियाष्टान इति न सिद्ध्यति प्रियाष्टानौ प्रियाष्टान इति प्राप्नोतीति ष्णान्तेति सूत्रस्थभाष्यविरोधात् । तत्र ह्यात्वं कृत्वौश्च कृतो हलीत्यस्यापकर्षपक्षे प्रियाष्टाभ्यामित्यादाविव प्रियाष्टानामित्यादावप्यात्वप्रवृत्तेः सुलभत्वाच्च । अत एव । अनभिधानादेव। विशेषणार्थ इति । अन्यथा ऽनुनासिकस्य क्विझलोरित्यादाविव क्विपोपि गृहणापत्तिरिति भावः । वस्तुतस्तदनुबन्धकगृहणेति परिभाषायाः क्विपोऽग्रहणे सिद्धे न कोपि व्यर्थ एवेति भाष्यकैयटयोः स्पष्टम् । णिजादीनामिति । णिचः कृत्वे देवदत्तेन पाचयतीत्यादौ कर्तृकर्मणोरिति षष्ठ्यापत्तिः णिचः प्रकृतेः पचेरर्थे देवदत्तस्य कर्तृत्वात् । जनजनने इत्यस्माण्णिचि जनिवध्योरिति वृद्धिनिषेधापतिः । किञ्च चेचीयत इत्यादावकृत्सार्वेति दीर्घानापत्तिः । यङन्तत्वात् । रुदिवेति । नन्विदमयुक्तमिति चेन्न । नेड्वशीत्यत्र तिङो व्यावर्त्यत्वासंभवेन कृद्ग्रहणसामर्थ्येन कृत्त्वावछेदेन क्रादिनियमं बाधित्वाऽस्य प्रवृत्तिविज्ञानादित्याशयात् । नेड्वशीत्यस्यापि क्रादिनियमेन बाधात् रुदिवमित्युचितम् । तत्र हि रुदादिभ्यःसार्वेतीडिष्यते कृते तु नेड्वशीति निषेधः स्यात् । ज्ञापकेनेति । अकृत्सार्वधातुकेति सूत्रे सार्वधातुकग्रहणेन तिङां कृत्सञ्ज्ञाभावकल्पनयेति भावः । ननु जागृयादित्यत्र रीङोऽप्रवृत्तये क्रियादित्यत्र तत्प्रवृत्तये रिङ्विधावसार्वधातुकग्रहणमात्रस्यानुवृत्त्यर्थं तदिति चेन्न । एकदेशानुवृत्तौ मानाभावेन तत्रापि समुदायानुवृत्तौ लिङ्ग्रहणवैयर्थ्यापातेन पर्युदासस्यैवाऽप्रवृत्तेरित्याशयात् । क्विनोघइति । यद्यप्यल्पप्राणप्रयत्नसाम्यादिति वक्तुमुचितम् । तथापि वकारस्य महाप्राणता क्विनो घ इति वदेदिति कैयटोत्प्रेक्षिन्यासानुमेयेति विवरणे स्पष्टम् । इति मते इति । यदात्वन्येभ्योपि दृश्यत इति दृशिग्रहणात् क्विब्वचीत्यादि सिद्धमित्युच्यते तदानेन षत्वमात्रं पदान्ते विधीयते क्विप् दीर्घौ त्वन्येभ्योपि दृश्यत इति बोध्यः । भाष्येध्वनितमिति । तत्र हि नुगचीति न्यासे तदोःससावित्यत्रानेष इत्यादौ सत्ववारणाय तदोरिति न वक्तव्यं तोरित्येव सिद्धेरित्युक्तम् । अत एवेति । शेषग्रहणस्य विभक्तिविशेषणादेव । एवंचेति । मपर्यन्ताच्छेषबोधकत्वाभावे इत्यर्थः । हलन्ता एव आदेशा इति । तत्र हि भाष्ये द्विपर्यन्तानामिति वचनप्रत्याख्यानाय शेषे लोप इत्यस्य ज्ञापकत्वमुक्त्वा टिलोपष्टाबभावार्थ इत्यादिना शेषग्रहणस्य टिलोपार्थत्वमुक्त्वा तत्खण्डितम् । एवमपि त्वाद्यादेशानामदन्तत्वे वार्णादाङ्गस्य बलीयस्त्वा-

त्वरूपं बाधित्वा शेषे लोपे टापः प्रसङ्गतादवस्थ्यं मनसि कृत्य तवममादिषु चादे-शेष्वकार उच्चारणार्थो हलन्ता एव त्वादेशा इति न क्वचित् टाप्प्रसङ्ग इत्युक्तम् । ननु हलन्ता आदेशा इति पक्षे णिजन्तात्क्विपि मान्तयोर्हलन्तेषु त्वाहादेशेषु कृतेषु शेषेलोपे वकारहकारयोर्निवृत्त्यापत्तिरित्याशङ्क्याह । णिजन्तात्त्विवति । णिचमाश्रित्य तु न प्रत्ययोत्तरपदयोरित्यादेशः । बहुत्वार्थकाभ्यामेव ताभ्यां णिज्विवक्षणात् । इदमुपलक्षणमिति । न तु विशेषणमित्यर्थः । अत्रैवोक्तत्वेनेति । त्यदादीनामित्यत्रै-वोक्तत्वेनेत्यर्थः । युष्मभ्यमिति । संयोगान्तलोपस्तु न झल्ग्रहणसंबन्धादिति भावः । अतएवेति । अर्थद्वयस्य व्यवस्थितत्वादेव । शेषलोप इत्यस्यार्थद्वये तात्पर्यमित्यंशं भ्यामादेशोपि युक्त इत्यंशं च दूषयितुमाह । वस्तुतइति । अभ्यम् । सूत्रे इति । पूर्वोक्तस्य वस्तुतस्त्वित्यस्यात्रापि संबन्धः । अन्तरङ्गत्वादिति । अज्ञाताद्यर्थानपे-क्षत्वेनेति शेषः । वस्तुतस्तु परत्वाद्युवादिषु पश्चादकचीति युक्तम् । अत एव हु-झल्भ्येति सूत्रे भाष्ये भिन्धकीत्यत्र परत्वाद्द्विभावे ऽकजदित्युक्तम् । युवकाभ्या-मिति । ओकारसकारभकारादाविति न निमित्तकोटिप्रविष्टं किन्त्वौकारसकारभ-कारभिन्नविभक्तौ युष्मदस्मदोः सुबन्तयोष्टेः प्रागकजित्येव वचनशरीरम् । इतरवि-भक्तौ त्वर्थात्सुबुत्पत्तेः प्रागेव प्रातिपदिकस्य टेः प्रागकजित्याश्रित्येदम् । अन्यथा भिन्धकीत्यादाविव परत्वाद्युवयोः पश्चादकचि दोषाभावादसङ्गतमेतत्स्यात् । उक्त-व्याख्याने तु विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात्किमादाविव युष्मदस्मदोरप्यादेशात्पू-र्वमकचि निर्दिश्यमानपरिभाषया युवावौ न स्यातामिति दोषः स्पष्टः । अग्रेकस्य-चित्सत्वेएवेति । अङ्गुष्ठमारभ्य मस्तकान्तं कुष्ठ इत्येव प्रयोगः । न तु मस्तक-पर्यन्तमपीति भावः । पदकार्यविषयइति । सर्वनामप्रकरणे सञ्ज्ञाव्यावृत्तेरभि-व्यक्तपदार्थेति न्यायेन स्वयमभिधानात् । तद्विरुद्धमेतत् । अत एवेति । आदे-शप्रवृत्तेरनिष्टत्वादेवेत्यर्थः । प्रयोगदर्शनमिति त्वादेशघटितप्रयोगदर्शनमित्यर्थः । ननु यूयमित्यत्र शीभावस्य प्रत्ययकार्यत्वेनाङ्गकार्यत्वाभावेनोक्तपरिभाषया तद्वार-णसंभव इत्याशङ्क्याह । अङ्गाधिकारस्थइत्यर्थइति । ननु विशेषणसमासे मका-रस्य पूर्वनिपातापत्तिः । असमासे संयोगान्तलोपाप्रवृत्तौ म इत्यस्य श्रवणापत्तिरि-त्याशङ्क्याह । संहितयापाठेइति । तथा च मकारद्वयोच्चारणेपि न व्यञ्जनपरस्ये-ति न्यायेनैकमकारोच्चारणादविशेषः । असंहितया पाठे तु व्यञ्जनपरत्वाभावे वि-

शेषः स्यादेवेति भावः । केचित्तु संहितया पाठे जातिपक्षाश्रयणेन द्वयोरपि मकारयोरेक एवादेश इति भाव इत्याहुः । सुटस्त्विति । ननु यदागमन्यायस्यातिदेशरूपत्वपर्यवसानात्तन्न्यायकृतसन्निपातविघाताभावेपि वास्तवसंनिपातविघातस्त्वस्त्येवेति परिभाषाप्रवृत्तिर्दुर्वारा । अत एव क्नमेजन्त इति सूत्रे आत्वं पुग्विधेरनिमित्तं स्यात्क्रापयतीत्युक्तमिति चेन्न । यदागमन्यायस्यातिदेशत्वं नेत्याशयात् । आत्वं पुग्विधेरनिमित्तमित्यपि पूर्वपक्षिभाष्यम् । अत एव प्रतिविधेयं दोषेष्विति सिद्धान्तभाष्यव्याख्यावसरे क्रापयतीत्याकारान्तभक्तः पुक् न व्यवधायक इति कैयटेनोक्तम् । अन्ये तु कृतितुग्ग्रहणं सन्निपातपरिभाषाया अनित्यत्वे गमकम् । क्रापयतीत्यादौ पुक् सिध्यति ससुट्कानिर्देशोप्यनेनैव गमकान्तरम् । तेन यदागमन्यायस्यातिदेशत्वेप्यवयवावयवस्य समुदायावयवत्वेपि ग्रामणिकुलं, वृत्रहभिः, क्रापयतीत्यादौ सन्निपातपरिभाषोपन्यासपरभाष्याविरोधेनेत्याहुः । नतदन्तस्येति । यदा चावयवावयवः समुदायावयवो नेत्यपि पूरणीयम् । त्वद्रीत्येति । ननु त्वद्रीत्यापि युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु न लुकः प्राप्तिरतोमित्यमा बाधात् । प्राप्तिमात्राभिप्रायकत्वे ममापि तुल्यमिति चेत्सत्यम् । परिभाषाविषयत्वंसूचितमिति । तुभ्यं,मह्यं,त्वत्,मत्,तव, ममेत्यादौ स्मै,स्मात्स्या,इत्यनयैव परिभाषया नेति बोध्यम् । युष्मदस्मदोर्विभक्त्यादेशे कृते ङिद्विभक्तिस्थानिकादेशे कृते पुनरादेशान्तरं नेत्याशि शित्वेन ज्ञाप्यत इति केचित् । अन्त्य मान्त एवावशिष्यत इति व्याख्याने तु तुभ्यामित्यादेः सिद्धावपि त्वदित्यादेरसिद्धिः । अतः सन्निपातपरिभाषया वारणप्रकार एव युक्तः । अङ्गसंबन्धीति । इदं न युक्तम् । धर्मिग्राहकमानविरोधात् । अत एव ज्यादादीयस इति सूत्रे भाष्यं किमर्थं जातपरस्येयस आत्वमुत्वमुच्यते लोपः प्रकृते नुवर्त्यतामकृयकारेति दीर्घो भविष्यति । एवं तर्हि सिद्धे सति यदात्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'ऽङ्गवृत्त पुनर्वृत्तावविधिरिति' । लोपश्च प्रत्ययसंबन्धकार्यं नेति दिक् । तत्फलन्त्विति । विभक्तावित्यस्य फलमित्यर्थः । तान्निवृत्तिश्चेति । अस्य वस्तुत इति शेषः । पूर्वग्रन्थेनैकग्रन्थत्वे सांप्रतिकयाभावेन भाविन्या ग्रहणमिति पूर्वग्रन्थस्य स्थानिवत्वेन साम्त्वमेव नत्वाम्त्वमित्युत्तरग्रन्थस्य विरोधापत्तिः । स्थानिवत्वेनाम्त्वाभावेन भाविन्या अपि सकारप्रसक्तेरसंभवात् । साम्त्वमेवेति । यद्यपि स्थानिवत्सूत्रेण स्थानितावच्छेदकधर्मातिदेश

एवातीदिश्यत इति न नियमः । आर्द्धधातुकत्वाद्यतिदेशापत्तौ न ल्यपीत्यादेर्वैयर्थ्यापत्तेः । तथापि संभावितमामं विहाय सांप्रतिकस्य सामः स्थानिकत्वेनोपादानसामर्थ्येन साम्त्वमेवातिदिश्यते न त्वाम्त्वमिति कल्पनान्न दोषः प्रत्ययत्वसुप्त्वादीनां तु न व्यावृत्तिः । आमिति निर्देशेन प्रसक्तस्थानितावच्छेदकभावस्याम्त्वस्यैव प्रवृत्तेः । ननु युष्माकमित्यत्र सामो भावित्वं संभवति न त्वतित्वाकमित्यत्र । तथाह्याकमः स्थानिवत्त्वेनाम्त्वात्सुटः प्रवृत्त्या सकारस्य श्रूयमाणत्वात् । अतित्वाकमित्यत्र सुटो ऽप्रवृत्त्या न साम्त्वभावीत्यत आह । साम्त्वस्याशास्त्रीयत्वेनेति । यद्यपि निजरसावित्यादौ जराशब्दवत् आकम्यात्वं अशास्त्रीयत्वे ऽप्यतिदेष्टुं शक्यं साम्त्वं तु सुटमादायार्थसमाजग्रस्तं नातिदेशतो लभ्यम् । तथाप्याकमः सुडुत्तरं आम्त्वप्रयुक्तशास्त्रीयकार्याभावेन स्थानिवद्भावेनाम्त्वं दुर्लभं साम्त्वस्याशास्त्रीयत्वेन शास्त्रीयकार्यप्रवृत्त्यप्रयोजकत्वेनातिदेशालभ्यत्वात् । अतिदेशत्वाप्रयोज्यत्वादिति शेखरार्थः । किं च यत्र साम् भावि तत्राकमित्यर्थे आकमुत्तरं सुटः प्रवृत्तौ तस्य श्रवणापत्तिस्तदेतदभिप्रेत्याह । इतिदिगिति । विप्रतिषेधेपूर्वमिति । अन्ये तु पूर्वशास्त्रप्रवृत्तिप्रयोजकीभूतो विप्रतिषेधस्तुल्यबलविरोधस्तेनेत्यर्थस्तस्य क्रियाविशेषणत्वाभिप्रायेण 'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेने'ति वार्तिकप्रयोगः करणत्वविवक्षया च तद्व्याख्यानभाष्ये च विप्रतिषेधेनेति निर्देशः । एवं गुणवृद्ध्योत्वेत्यत्र नव्योक्तरीत्या समासे तु पूर्वविप्रतिषेधत इत्यस्य त्वमावपि प्रबाधन्त इत्यनेनान्वयापत्तिः । उक्तभाष्यवार्तिकयोरनन्वय इत्याहुः । अत एव । पदस्येत्यस्य प्रायेणावयवषष्ठीत्वादेव । ननु नलोपसूत्रे ऽन्तग्रहणं मुख्यप्रातिपदिकान्तस्य ग्रहणार्थं तेन त्रः संख्याया इत्यादौ व्यपदेशिवद्भावेन प्रातिपदिकान्तस्य नलोपो नेत्याशङ्क्याह । त्रःसंख्यायाइति । त्वामयोरिति । अजादित्वाट्टाबिति भावः । अन्ये तु त्वकालपम्, अश्शानज्ञो,जृव्रश्च्योः त्कि इत्यादिनिर्देशेनातो धातोरित्यत्र धातुपदमनाप्तरं तेन त्वामोरित्युचितम् । अजादित्वेन टाप्कल्पने न प्रमाणामित्याहुः । नवाक्षरत्वेनेति । तथा च नवाक्षरस्य पादत्वाभावेन पादादिस्थत्वाभावात्प्रत्युदाहरणासंगतिरिति भावः । वस्तुतो नवा एकाक्षरेण छन्दांसि वियन्तीति ऐतरेयब्राह्मणवचनात् नवाक्षरत्वेपि पादत्वमस्त्येवेति वाच्यम् । स्मानित्यस्येति । इदमयुक्तम् । एवं सति गणेश इत्यादौ ढ्लुडा-

पत्तेः। तस्मादेवं विषये नैकदेशविकृतन्याय इति पूर्वं निरूपितम्। ननु संध्युत्तरमपादादाविति निषेधप्रवृत्तावपि सन्धेः पूर्वं नवाक्षरत्वेन तदप्रवृत्तौ आदेशो दुर्वार इत्याशङ्क्याह। संधिश्चेति। इदमयुक्तम्। यद्बितुपरमिति सूत्रस्थभाष्यकैयटाभ्यां पदद्वयनिमित्तकार्यात्प्रागन्तरङ्गोऽप्येकादेशो नेति कल्पनात्। सन्धेः पूर्वमादेशप्रवृत्तिशङ्कायाः परिहारं मतान्तरेणाह। नःकृष्णेति। उपजीव्यविरोधादिति। नात्र संनिपातपरिभाषाभिप्रेता। किन्तु यतो नाव इत्यत्र द्व्यच्कतामुपजीव्य प्रवृत्तस्वरस्य द्व्यच्कताभिघातकत्र्यच्कतासंपादकता नेत्याकरोक्तदिशा न्यायान्तरमेतदिति बोध्यम्। इतिपरेइति। इदमप्ययुक्तम्। इण्धातौ वक्ष्यमाणरीत्योभयत आश्रयण इत्यस्याभावेप्यन्तादिवद्भावेन व्यपवर्गस्यालाभादेवैकादशे कृते पदात्परास्मच्छब्दाभावादेकवचनेन विग्रहे प्रत्ययोत्तरपदयोरित्यादेशमाशङ्क्याह। युवयोरिति। न तु द्वित्वादेर्नाप्येकत्वस्य भानं किं तु संबोध्यत्वेनैवानेकव्यक्त्यवगतिरिति त्वमौ न कृताविति योजना। तथा च संख्यानवगतिरिति भाष्यस्य विशेषरूपेण संख्यानवगम इत्यर्थ इति न कश्चिद्दोषः। पचतीत्येतन्मात्रस्येति। एतस्य वाक्यत्वे ऽनन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतः स्यादित्याशयः। निरर्थकशब्दसमुदायेति। दशदाडिमानीत्यादिशब्दसमुदायेत्यर्थः। देवदत्तेन शयितव्यमिति। अस्तिर्भवतिपरो ऽप्रयुज्यमानोप्यस्तीति भाष्यं तु साध्यत्वेन भासमानक्रियाप्रधानसुबन्तातिरिक्तविषयमित्याशयः। तृतीयः चैत्रं पश्यतीत्यादीति। एतदुत्तरं स एतत्समानार्थकमेव तिङ्ङतिङ इति वदत्सूत्रकाराभिप्रेतं वाक्यलक्षणं 'आख्यातं सविशेषणं वाक्य'मिति समर्थसूत्रे भाष्ये उक्तमित्यादिः। एकतिङित्यस्यैकानुपूर्वीतिङन्तवदित्यर्थ इति न ब्रूहि ब्रूहीत्यत्र दोष इत्यलमित्यतो ग्रन्थः क्वचित्पुस्तके दृश्यते। केचित्तु सुप्तिङन्तचय इत्यस्य सुप्तिङन्तयोश्चय इत्येवार्थः। देवदत्तेन शयितव्यमित्यत्रास्तीत्यध्याहारान्नातिव्याप्तिः। 'जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायती'त्यदौ परस्परसबन्धात् निरर्थकसुप्तिङन्तसमुदाये वाक्यत्वमिष्टमेव। अत एवालङ्कारिकैरपि अस्य वाक्यत्वमभ्युपगम्य दुष्टत्वमात्रं व्यवस्थापितं किं त्वेवं पचति भवतीत्यादिकेवलतिङन्तसमुदाये ऽव्याप्तेर्लक्षणान्तरं क्रियावाकारकान्वितेति। जरद्गवादिवाक्यस्य तु न वाक्यत्वं पदार्थनां परस्परमनन्वयात्। लोके. त्वर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते। अर्थवन्ति देवदत्तगामानय,

अनर्थकानि दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डमिति वृद्धिसूत्रस्थ-भाष्ये दशदाडिमानीत्यादेर्वाक्यत्वव्यवहारस्तु भाक्त इत्याहुः । स्वार्थइति । स्वं च-शब्दस्तदर्थः समुच्चयस्तदाश्रयो हरिः तदन्वयी स्वामी तदन्वयित्वं मे इत्यस्य । प्रकृतसूत्रस्यैवेति । पश्यार्थैरिति सूत्रस्यैवेत्यर्थः । तत्र समानवाक्ये इत्येतत्संबन्धात् प्राक् एवं वाचो युक्तिः । अतएवेति । युक्तग्रहणाभावेपि साक्षाद्योगस्य ग्रहणादेव । नपञ्चमीति । पृथग्विना नानाभिस्तृतीयान्यतरस्यामित्यनेन । एवं च युक्तग्रहणाभावेन पश्यार्थैरित्येतत्परम्परासंबन्धेपि प्रवर्त्तत इति मूलोक्तमयुक्तमिति भावः । संबन्धित्वेन विवक्षायामिति । मत्वर्थे बहुव्रीहिरिति वार्तिकानुरोधेनेदम् । तेन सहेति तु न समासस्तुल्ययोग इत्युक्तेः । काव्यप्रकाशादाविति । काव्यप्रदीप आदि-पदग्राह्यः । कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् । अतः सिद्धं समेताभ्यामुभाभ्यामन्वियेष स, इत्यादौ तथा दृष्टत्वादिति भावः । ननु सञ्ज्ञाविधौ तदन्त-विधिर्दुर्लभ इत्याशङ्क्याह । आमन्त्रणमिति । ननु प्रथमाया आमन्त्रितसञ्ज्ञायामप्यामन्त्रितस्य प्रत्ययमात्रवृत्तित्वेन प्रत्ययग्रहणपरिभाषया प्रदेशेषु तदन्तविधिसंभवेनामन्त्रितसञ्ज्ञायां तदन्तविध्यभावेपि न कश्चिद्दोष इति महासञ्ज्ञाकरणं व्यर्थ-मित्याशङ्क्याह । अतएवेति । तदन्तविधिस्वीकारादेव । अत्रसञ्ज्ञानस्यादिति । नन्वेवं सुप्सञ्ज्ञाया अप्यप्रवृत्तौ सुप्तिङन्तमिति पदत्वं हेहे इत्यादीनां न स्यात् । तस्मादन्तरङ्गानपीति न्यायो धर्मिग्राहकमानबलेन सञ्ज्ञाविधिभिन्नविषय इति न कश्चिद्दोष इति चेत्सत्यम् । अव्ययादाबित्यादावुपजीव्यत्वेन सुबादिसञ्ज्ञायाः लुकः पूर्वं प्रवृत्तावप्यामन्त्रितसञ्ज्ञायास्ततः पूर्वं प्रवृत्तौ मानाभाव इति आशयः । अतदर्थमेवेति । विभाषादिक्समास इत्यादाविव लक्षणप्रतिपदोक्तपरिभाषया संबोधनपदमुच्चार्यविहितप्रथमाया ग्रहणवारणार्थं सेति पदं तत्सामर्थ्याच्च प्रथमामात्रं सेति परामृश्यत इति भावः । ननु संबोधनपदात्प्रातिपदिकार्थेति प्रथमायामप्यामन्त्रितसञ्ज्ञापत्तिः । संबोधनमात्रबोधकत्वं तु अग्ने इत्यादावपि न एकत्वादेरपि ततो बोधादिति चेन्न । संबोधनमभिमुखीकरणं तच्च प्रत्यासत्त्या प्रकृतक्रियाविषयं तथा च संबोधनमस्तीत्यादौ प्रकृतक्रियायामभिमुखीकरणाभावान् नात्र संबोधने प्रथमा कर्मशब्दे द्वितीयाभाववत् । प्रकृतक्रियायां तद्विवक्षणे तु संबोधने चेत्यनेनैव प्रथमा न प्रातिपदिकार्थसूत्रेण । संबोधनस्याधिक्यात् । कर्म गच्छतीत्यादौ

प्रथमाभाववदत्रापि हेहे इत्यत्रापि । संबोधनपदादस्या वारणमुक्तदिशा बोध्यम् । स्वाश्रयस्यापीति । कतिपयस्येति शेषः । वत्करणेन सर्वथा ऽविद्यमानं किं तु तत्सदृशमिति-बोधनात् । पूर्वकिमिति । इदमत्र पूर्वमित्यादिपूर्वग्रन्थेन गतार्थम् । एवमेवेति । विद्याबलं दैवबलं तदेवेति, पूर्वपदस्थित एवशब्दात्परत्वादादेश इति भावः । वस्तुतस्तु नैतद्युक्तं एवशब्दस्य स्मरामीति तिङन्तघटितवाक्यस्य त्वभावेन समानवाक्यस्थत्वाभावात् । पश्यार्थैरिति निषेधाच्च ।व्रजानि देवदत्तेति वत् वक्ष्यमाणरीत्या कथं चित्संभवेपि तस्मात्ते इति विभक्तिप्रतिरूपकमव्ययमित्येव युक्तम् । इत्यादाविवेति । नन्वेतदप्येतत्समशीलमिति कथमस्य दृष्टान्तत्वमिति चेन्न । हे लवकुशौ गेये गाने प्रबन्धे वां-युवां केन पुरुषेण विनीतौ शिक्षितावित्यर्थस्य विवक्षितत्वेन द्वितीयार्थकर्मत्वादेरनन्वयेन विभक्तिप्रतिरूपकाव्ययस्यात्रावश्यकत्वात् । नन्वेवं नार्थतो विभक्तिप्रतिरूपकत्वमिति वाच्यम् । परिष्करिष्यमाणस्य तस्य सत्त्वात् । प्रकृतेपीति । सर्वदा रक्ष देव न इत्यत्र । अन्यार्थमिति । स्वरार्थमित्यर्थः । बहुवचनमसङ्गतमिति । इस्यादिभ्य इत्यनेन गृहीतानामेव सर्वेषामित्यनेन ग्रहणमित्यभिमानेनेदम् । गङ्ग इत्यादीनां ग्रहणे तु यथाश्रुतमेव साधु । निवृत्तिरिति । वस्तुतोस्य छन्दोविशेषयत्वाभावेन न पादादिस्थत्वम् । नन्वग्ने तेजस्विन्नित्यनयोः परस्परं विशेषणविशेष्यभावोस्ति वा न वा । नाद्यः । न ङिसम्बुद्ध्योरिति सूत्रस्थभाष्यविरोधात् । तत्र हि ङिसम्बुद्ध्योरनुत्तरपदे, राजवृन्दारकः । संबुद्ध्यर्थेन नार्थः । संबुद्ध्यन्तानां समासः । किं वक्तव्यमेतत् । समाससमानार्थेन वाक्येन भवितव्यम् । नचेहार्थो वाक्येन गम्यते नासौ जातु चित्समासेनावयवसंबोधनं वाक्येन गम्यते । समुदायसंबोधनं समासेनेति भाष्यम् । कैयटश्च संबुद्ध्यन्तानामिति पृथगवयवार्थयोरभिमुखीकरणे परस्परैकार्थीभावलक्षणे सामर्थ्यायोगादिति । नान्त्यः । सामान्यवचनत्वविशेषवचनत्वयोर्विशेषणविशेष्यभावाधीनत्वेन तदभावे प्रकृतसूत्रस्यासंभवदुक्तिकत्वापत्तेरिति चेद्यथेच्छसि तथास्तु । शब्दतः प्रथमं संबुध्यन्तार्थयोः परस्परं विशेषणविशेष्यभावानवगाहिशाब्दबोधोपरमेप्यरुणाधिकरणन्यायेन पार्ष्णिकपरस्परावच्छेदमाश्रित्य सूत्रस्योक्तिसंभवोपपत्तेः । सर्वथा विशेषणविशेष्यभावाभावेपि वा ऽग्नित्वतेजस्वित्वयोः समान्यविशेषभावमात्रेण सूत्रस्योक्तिसंभवाच्च । तदुक्तं कैयटेनाम्ने देवि सरस्वति इडे काव्ये विहव्ये एतेषां

पर्यायत्वेन सामान्यवचनत्वाभावः । सामान्यस्य विशेषापेक्षत्वादिति । देवकरोषीति । अत्र देवपदार्थस्य कारकप्रकरणे वक्ष्यमाणरीत्या भेदसंबन्धेन क्रियायामन्वयेपि तिङन्तप्रकरणे क्रियाक्रियावतोरभेद इति वक्ष्यमाणरीत्या क्रियया सममभेदस्य वास्तवस्य सत्वेपि तिङर्थेन वा तस्य सत्वेन सामानाधिकरण्योपपत्तिः । अत्र सामानाधिकरण्ये इति चिन्त्यप्रयोजनम् । ननु सकर्मकत्वादञ्चेः सुप्युपपदे क्विपा भाव्यम् । न च निपातनसामर्थ्यात्कर्मणीत्यधिकारबाधः । -सुपीत्यधिकारस्यापि बाधापत्तेरित्यत आह । निपातनैरिति । संस्कारविशेषज्ञापकेन अञ्चेरित्यनुबन्धनिर्देशेन सुपीति प्रकरणबाधस्य न्याय्यत्वादिति भाव इति केचित् । अलाक्षणिकस्यापि कार्यस्य पूर्वोत्तरनिपातनेषु दर्शनेन तत्साहचर्यादत्राप्यञ्चतेः सुप्युपदे एव क्विन् न तु युजेरिव निरुपपादित्यर्थ इत्यन्ये । अनिदिताम् । हलः किम् । नुतः । उपधायाः किम् । नष्टम् । अन्त्यसदेशपरिभाषा तु अन्त्यसदेशानन्त्यसदेशयोरेकस्मिन्लक्ष्ये युगपत्प्राप्त्यभावेन न प्रवर्त्तते । प्रत्यक्चेति । अन्ये तु सुपात्पदः, विश्ववाहवदोह इत्यादौ पूर्वस्य पद्भावसंप्रसारणे प्राप्नुतः । नह्ययमन्त्यसदेशस्येति परिभाषाया विषयः । तथा च प्रत्यासत्त्या पदान्तस्याङ्गस्य यत्कार्यं तस्यैव तत्कार्यमित्येष पन्थाः शरणम् । तेनैव च न्यायेन प्रत्यक्चेत्यादिसिद्धावन्त्यबाधपरिभाषा व्यर्थैव । तदेतदभिप्रेत्यैषा परिभाषा भाष्ये प्रत्याख्यातेत्याहुः । प्रत्यञ्चाविति । प्रथमं नकारस्य लोपे पुनर्नुमि प्रत्यञ्चाविति रूपम् । तथा च तन्मध्यपतितन्यायेन नुम्विशिष्टस्याप्यच इत्यनेन ग्रहणं स्यादिति भावः । नकाररहितप्रत्यग्भ्यामित्यापि बोध्यम् । नन्वण्ग्रहणाननुवृत्तौ कर्तॄचेत्यादौ दीर्घानापत्तिरतस्तदनुवृत्तिर्न कर्त्तव्येत्यत आह । कर्तॄचेति । विवक्षितत्वादिति । तथा च वकारे रूपे प्रत्यये इत्यर्थे क्विवादिरित्येवार्थः पर्यवस्यतीति भावः । अन्त्यस्येति । यस्येत्यर्थः । न्यायसिद्धेर्थे गमकमप्याह । अतएवेति । अनेकक्लिष्टकल्पनेति । आकडारीयेषु कार्यकालपक्षाश्रयणं तदेकवाक्यतां अङ्गांशे उत्थिताकाङ्क्षत्वेन यजादिप्रत्ययेनानो विशेषणमित्यादिक्लिष्टकल्पनेत्यर्थः । न लोपस्यासिद्धत्वादिति । नलोपः सुप्स्वरेति सुप्विधौ नलोपस्यासिद्धत्वादल्लोपो न इत्यस्य च सुब्विधित्वात् । बाधायोगादिति । संज्ञाशास्त्रेण कार्यकालपक्षे स्वदेशत्यागेनाकडारीयत्वाभावादसिद्धत्वाच्च । उपसंहृतं भाष्येइति । वस्तुतस्तु ' यथोद्देशपक्षेप्यल्लन्तस्य भस्याङ्गस्यातो लोप इत्यर्थेपि

नानस्तक्ष्णेत्यादौ दोषः । निर्दिश्यमानान्त्यनकार एव लोपप्रवृत्तेः । अस्य स इदं स इत्यादौ स चासावेष च तदेष इत्यादौ तद इदमश्च तकारस्य दकारस्य च तदोः ससाविति सत्ववारणायोक्तकल्पनाया आवश्यकत्वात् । न ह्यत्रानन्त्यविकार इति परिभाषाप्रवृत्तिः संभवति । त्यदाद्यत्वं बाधित्वा पूर्वमेव प्रवृत्त्यान्त्यवर्णतद्वर्ण-योरितराव्यवधानाभावात् । एतच्छब्दस्य कृताकच्कादःशब्देन समासे एतदसुक इत्यादौ तत्परिभाषाप्रवृत्तिशङ्काया अप्यभावाच्च । न चोपसर्जनत्वात्पूर्वस्य न तत्वं एवमप्यस्यायं ददमयं यूयं पुत्रा यस्य स युष्मत्पुत्रस्तस्य त्वं युष्मत्पुत्रत्वं इत्यादावयच्त्वमाद्यादेशापत्तेश्च तस्मादेतत्परिभाषाप्रत्याख्यानमेव भाष्यकृतो ऽभि-प्रेतं यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्त्तव्येति भाष्यं तु प्रौढ्या । प्रयोजनविशेषमप्रदर्श्य सामान्येन तथोक्तेः । भसंज्ञायां कार्यकालपक्षो-प्याश्रयितुं शक्यः । तत्पक्षे परिभाषाणामिव संज्ञानामपि स्वदेशप्रच्युतौ मानाभा-वात् । अयादिभ्यः परैव प्रगृह्यसंज्ञेति भाष्यस्य प्रगृह्यसंज्ञाप्रयुक्तप्रकृतिभाव इत्यर्थ इति न दोष इति दिक् । इतराव्यवधानएवेति । ननु हंसशिरांसीत्यत्रैत-त्परिभाषाप्रवृत्तिर्न स्यात् । कार्यिणोन्त्यवर्णस्य च सकारेण व्यवधानादिति चेन्न । इतरपदेन निमित्ततया विशिष्य सूत्रानुपात्तस्यैव ग्रहणेनादोषात् । केचित्त्वत्र तच्छब्देनान्त्यवर्णसदेशकार्यिवर्ण इत्यर्थः । अन्त्यत्वावच्छेदकवर्णवृत्त्युपाध्यवच्छिन्नत-त्तत्सदेशकार्यिणो व्यवधानाभाव इति तावत्पर्यन्तिकोर्थः तेन हंसाशिरांसीत्यादाव-न्त्यसंयोगतत्सदेशकार्यिणोरितराव्यवधानादेतत्परिभाषोपस्थितिरित्याहुः । अत्र प्रमा-णमिति । तन्त्रेणार्थद्वये इत्यर्थः । सूचितमित्याहुरिति । अन्ये त्वत्र सूत्रकार्तिक-भाष्यकृतामसेरित्यस्य प्रतिषेध एव तात्पर्यम् । वार्तिककृता अदसोद्रेरिति वचनपाठे-नैतत्सूत्रभाष्ये भाष्यकृता पदाधिकारादपदान्तस्य मुत्वं न प्राप्नोतीत्याशङ्क्य यद-यमसेरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्य अपदान्तस्यापि भवतीत्युक्तेश्च । अमु-मुयङिति न सिद्ध्यतीत्युक्तयेदमेव रूपं साधुत्वेन भाष्यकृतोभिप्रेतम् । अदद्रय-ङिति प्राप्नोतीत्युक्त्या तत्रासंमतेः सूचनात् । अदमुयङिति भवितव्यम् । अन्त्यवि-कारोन्त्यसदेशस्य कार्यं भवतीति भाष्यं त्वेकदेशिनः । स्वखण्डितपरिभाषाश्रयणेन रूपापादनरूपत्वात्तस्येत्याहुः । ननु विष्वद्गेवयोरित्यस्याभावेपि चकारेण सर्वनाम्नाम-नुकर्षणादश्वाचीत्यादौ नास्य प्राप्तिरित्याशङ्क्याह । चस्यापीति । ज्ञानकृतगौरवा-

पत्तेरिति । इदमुपलक्षणम् । साकच्के च विशेषात् । अन्याकुलङ्गच्छतीत्यर्थकइति । एतेनाञ्चुगतिपूजनयोरित्यस्य स्थाने ऽचुगता,वचिपूजाया,मित्येव सिद्धे नाञ्चेः पूजाया-मिति व्यर्थमित्यपास्तम् । योपधत्वबोधनद्वारेति । नकारजावनुस्वारपञ्चमौ झलि धातु-ष्वित्यतिप्रायिकम् । अपिनेति । नलोपाभावोपीत्यपिनेत्यर्थः । सलोपेकृतेषत्वमिति । एतेन षत्वं स्कोरिति सलोप इति मूले पाठक्रमादर्थक्रमस्य बलवत्वेन वैपरीत्येन व्याख्यानं सूचयति । पृषदादिव्यावृत्तयेइति । अतिप्रत्ययान्तस्य चेदेतयोरेवेति नियम इति भावः । ननु लाघवाय शत्रन्ता एवैते निपात्यन्ते । बृहन्महतोरुपसंख्यानस्पेष्ट-नियमपरत्वात्सिद्धेः । महच्छब्दे यगाद्यभावनिपातनस्वीकारापत्तेश्च । मन्मते तु श-तृप्रत्ययान्तस्य यत्कार्यं तदतिदिश्यते न तु शतृप्रत्यये परतो यत्कार्यं तदपीति दिक् । अत्वसन्तस्य चाधातोः । तुशब्दादिति । त्वर्थचशब्दादित्यर्थः । अतएवेति । अधातोरित्यस्यासन्तांश एव संबन्धादेवेत्यर्थः । अनुवादकमिति । केचित्त्वन्तग्रहण-मौपदेशिकान्तत्वप्रतिपत्त्यर्थम् । न चोपदेशे गोमानित्यतुबन्तं नात्वन्तमिति वाच्यम् । उपदेशेजिति वाक्यार्थबोधस्य हलन्त्यमित्येतद्वाक्यार्थबोधाधीनत्वात्तदुत्तरप्रकृतिकत्वा-त्पकारस्येत्सञ्ज्ञायां लोपे च कृते ऽत्वन्तत्वसंभव इत्याहुः । नन्वन्यत्र लब्धावकाशस्य परेण बाधो वक्तव्यः । न चान्यत्र दीर्घो लब्धावकाश इति अत एव आह । व-चनसामर्थ्यादिति । तथा च नुमि कृते दीर्घस्यावकाशसंभव इति भावः । इदं च निरवकाशत्वे सत्येवापदत्वमिति वार्तिकमताभिप्रायेणोक्तम् । सत्यपि संभवे बाधनं भवतीति भाष्यमतानुसारेणाह । अयमभ्युच्चयइति । वस्तुतस्तु विद्यमानमपि परत्वम-न्यत्र चारितार्थ्याभावेन विप्रतिषेधशास्त्रप्रवृत्त्यनुपयोगीत्युच्यते । परं नित्यं च नुमं बाधित्वा वचनसामर्थ्याद्दीर्घमूलग्रन्थेन । अत्रोत्सर्गे नुमि कृते अपवादस्य चारिता-र्थ्याभावेन नात्र तक्रकौण्डिन्यन्यायविषय इति दीर्घे कृते ऽपि नुम् प्रवर्त्तत एव । नन्वाश्रीयमाणे एव भूतपूर्वगतिस्वीकारेप्युपदेशे पकारस्य सत्वेनोपदेशे ऽत्वन्तस्या-ङ्गस्य दीर्घ इति वाक्यार्थसंभव इत्याशङ्कां मनसि कृत्य तन्निरासाय भूतपूर्वगत्या-श्रयणेन लब्धमर्थमाह । तस्मादिति । नलोपिनइति । इदं विशेषणं प्राङ्ब्राह्मणी-त्यत्र ङीबभावार्थम् । उगितश्चेति सूत्रे भाष्ये त्वञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरित्येव नियमशरीरमुक्तं कैयटेन । न च नाञ्चेः पूजायामिति यदा न नलो-पस्तदा प्रतिषिध्यते तदापि ङीप् भवतीत्युक्तम् । असतिप्रयोजनइति । प्रयोजना-

भावे सत्यशब्दार्थप्रयोजनार्थत्वोक्तेरुपहासपरत्वादिति भावः । विभावयन्त्विति । केचित्तु यथको गुणवृद्धीति सूत्रे गुणवृद्धिग्रहणानुवृत्तौ पुनर्गुणवृद्धिग्रहणादाश्रितशब्दस्वरूपव्यापारयोर्गुणवृद्ध्योर्बोधः । एवं द्वे इत्यस्याऽनुवृत्त्यैव सिद्धे पुनरुभेग्रहणाद् द्वित्वपर्याप्त्याश्रयसमुदायबोधो गर्गदण्डनन्यायेन । उक्तार्थलाभस्तु पाक्षिकः । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्ते प्रयोजकव्यापारस्य समुदायविषयत्वेपि प्रयोज्यव्यापारान्नफलतृप्तेः प्रत्येकवृत्तित्वेन भाष्यकैयटाभ्यां प्रदर्शितत्वात्तस्मादुभे ग्रहणं साहायार्थमिति कैयटोक्तमपि युक्तमेवेत्याहुः । ऐत्सन्नित्यादौ जुसभावार्थं तूभेग्रहणं स्यादिति आक्षिप्येदं प्रयोजनं कार्यकालपक्षे आहोस्विद्यथोद्देशपक्षे वा नाद्य इत्याह । कार्यकालपक्षइति । ननु उक्तसमाधानप्रयासो व्यर्थः । अन्तरङ्गत्वादन्तादेशे श्रौतस्थान्यादेशभावमादायातीत्यत्र न झित्वम् । तथाचान्तिभावे कृते न जुसापत्तिरित्याशङ्क्याह । अन्यथेति । द्व्यादिशब्दानामेकापाये प्रवृत्त्यभावस्यानङ्गीकारे । एकादेशइति । श्नश्नकारयोरेकादेशे नान्त्य इत्याह । यथोद्देशेइति श्लाविति द्वित्वे इति । अन्तरङ्गत्वात् श्नाभ्यस्तयोरित्यालोपं बाधित्वेति शेषः । श्नाभ्यस्तयोरातइति । न चालोपे कर्तव्ये शपः श्लोः स्थानिवद्भावः शङ्क्यः । तस्यापरनिमित्तकत्वादभ्यस्तग्रहणस्याचारितार्थ्याच्च । आदन्तस्य यङ्लुक्यभिधाने दृढप्रमाणाभावात् । इहज्ञानमात्रमिति । न तु पश्यार्थैरित्यत्रेवाचाक्षुषामित्यर्थः । इदं चिन्त्यमिति । केचित्तु क्विन्प्रत्ययस्य कुरिति सूत्रे भाष्ये प्रत्ययग्रहणं अतद्गुणसंविज्ञानबहुव्रीहिविज्ञानार्थम् । तेन संप्रति क्विनो ऽभावेपि कुत्वम् । मानो अस्राक् मानो अद्रागित्युक्तम् । तदेतत्कुत्वस्य षत्वापवादत्वाभावे न सङ्गच्छते । रज्जुसृड्भ्यामित्यादाविव कुत्वमपवादत्वाद्बाधित्वा षत्वारतेः । न चोपपद्यटकाम्यति रज्जुसृड्भ्यामिति भाष्यप्रयोगौ कथं सङ्गच्छेतामिति वाच्यम् । क्विन्प्रत्ययो यस्मादिति बहुव्रीह्यवधित्वस्य सृजौ निरुपपदलक्षणस्य यजौ अनुपसर्गोपलक्षणस्यैवाश्रयणेनादोषादित्याहुः । षडगकाःप्राग्वदिति । ईदृशे विषये । जश्त्वापवादत्वं चर्त्वस्य नेति नेत्यनेन सूचयति । उदकस्पर्श इति । केचित्तूदकस्पृडिति प्रत्युदाहरणमुचितम् । क्विन्प्रत्ययो यस्मादिति बहुव्रीह्यर्थावधित्वस्योदकाभिन्नोपपदलक्षणस्यैवाश्रयणेन कुत्वस्याप्रवृत्तेः । न चैवं त्यदादिषूपपदेषु दृशेः क्विनो विधानेन केवले दृगित्यादौ कुत्वं न स्यादिति वाच्यम् । त्यदाद्युप-

पदस्य दृशेः क्विन्नन्ययप्रागवर्तित्वेन दृष्टत्वेन केवले तत्त्वस्यार्थात्सिद्धेः । उदक-स्पर्श इति तु न युक्तम् । वासरूपन्यायेन कर्मण्यणः पक्षे इष्टत्वादित्याहुः । नि-त्यत्वादिति । न च स्वरे प्रत्ययलक्षणाभावात्कथमेतदिति वाच्यम् । एकपदस्वरे लुमता लुप्ते प्रत्ययलक्षणाभावेपि तदन्यत्र तत्सत्त्वात् । पूर्वत्रासिद्धेतन्निषेधादिति । न च वेतस्वानित्यत्र पदेन्त इत्यर्थेन स्थानिवत्त्वनिषेधपरभाष्यप्रामाण्यात्पूर्वत्रासिद्धे न स्थानिवदित्यत्र पदचरमावयवातिरिक्तस्य पूर्वत्रासिद्धस्य ग्रहणाद्वेतस्वानित्यत्र पूर्वत्रासिद्धे न स्थानिवदिति निषेधो न प्रवर्तत इति न पदान्तसूत्रस्थग्रन्थवि-रोध इति वाच्यम् । भसंज्ञाप्रयोजकप्रत्ययपरकस्वादिनिमित्तकपदत्वचरमावयवा-तिरिक्तस्येत्यर्थेनादोषात् । नानेनषत्वमिति । सति त्वस्याविकारत्वे उत्तरसूत्रैक-वाक्यतया ऽऽदेशप्रत्यययोरेवानेन षत्वविधानान्न कश्चिद्दोषः । प्रकृतसूत्रस्थमिति । नुम्विसर्जनीयशर्व्यवाये निंसेः प्रतिषेधः । निंस्से, निंस्स्वेति प्रकृतसूत्रस्थं भाष्यं प्रत्येकं व्यवधाने इत्यत्र मानम् । अवश्यं नुमो ग्रहणं कर्तव्यं अनुस्वा-रविशेषणं नुम् ग्रहणं नुमो योनुस्वारस्तत्र यथा स्यात् इह मा भूत्पुंक्ष्विति । हय-वरट्सूत्रस्थं भाष्यं तु नुम्स्थानिकेत्यर्थे मानमिति बोध्यम् । सपादसप्ताध्यायी-स्थेकार्येइति । अत्र सपादसप्ताध्यायीशब्देन षत्वशास्त्रात्पूर्वः सूत्रसमुदायो लक्ष्यते । तेन संयोगान्तलोपसंग्रहः । प्रतिपदविधित्वेनेति । ननु नियमशास्त्राणां विधिमुखेन प्रवृत्तेः स्वसिद्धान्तत्वेन वस्वेकाजाद् वसामिति इटोपि प्रतिपदविधि-त्वमिति चेन्न । आर्द्धधातुकस्येति सूत्रविहितेटोनुवादरूपत्वेन प्रतिपदविधित्वाभाव इत्याशयात् । पूर्वोपस्थितिनिमित्तकमन्तरङ्गमित्यत्र निमित्तशब्देन सप्तम्यन्तोपा-त्तस्यैव ग्रहणमिति तदाशयः । स्वरप्रवृत्तौ दोषात् । केचित्त्वेवं सति विषयस-प्तम्याश्रयणं किमर्थं स्यादिति समाससंज्ञापेक्षान्तोदात्तात्प्रागेव भवतीति भग-वतो दाक्षीपुत्रस्याशय इत्याहुः । नित्यत्वात्सवर्णबाधित्वेति । इदं पूर्वान्वयि । टिलोपे कृते दस्यान्त्यत्वाभावात्सत्वाप्राप्तेः । दस्थानिकसत्वस्य तु साकच्केचा-रितार्थ्यम् । ननु म् च उभाने इतरेतरद्वन्द्वे द्विवचनापत्तिरित्याशङ्क्याह । मुइति समाहारद्वन्द्वइति ॥ इति हलन्ताः पुंल्लिङ्गाः ॥

नहोधः । दत्वे विधातव्ये धत्वविधानं तु नद्धमित्यत्र झषस्तथोरिति धत्वार्थम् । मूले दलोपपक्षे इति पाठः सुगमः । उदःस्थास्तम्भोरिति निर्देशेनोदित्यस्य दान्त-

त्वात् । इतिपक्षेइति । पदस्यादिरिति पक्षे तु निषेधो न प्राप्नोति । गतिकारकोपपदानामिति प्राक् सुबुत्पत्तेः समासे उत्तरभागस्य पदत्वाभावादिति भावः । व्याख्यानादिति । उपात्तस्य रूपस्य लौकिके प्रयोगे ऽनुपालम्भाच्छास्त्रीयस्य सानुबन्धकरूपस्याश्रयणम् । अस्तीह निरनुबन्धकरूपस्य प्रातिपदिकस्य लौकिके प्रयोगे उपलम्भ इति प्रत्ययलक्षणं नैव प्राप्नोतीति व्याख्यानपर्यन्तानुधावनं व्यर्थमिति केचित् । दिश् अतिसर्जने क्विनिति पाठः । क्विबिति त्वपपाठः । जस्त्वचर्त्वेइति । इदमेतन्मते सप्तमीबहुवचनविषयम् ॥ इति हलन्ताः स्त्रीलिङ्गाः ॥

सोपपदाद्विचइति ॥ तथा सति गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक् समासे उत्तरपदस्य पदत्वं षत्वेपि दुर्लभं स्यादिति भावः । सात्पदाद्योरित्येवेति । स्वरितो वा ऽनुदात्ते पदादाविति तु पदादावनुदात्ते एकादेशस्तस्य स्वरितविधिर्न तु पदादेः साक्षाद्विधिरिति सापि पदादिविधिशब्देन न गृह्यते इति भावः । ननु सात्पदाद्योरित्येवेत्यसङ्गतम् । उत्तरपदादिः, कर्णोवर्णलक्षणादित्यादिविध्यन्तरस्यापि सद्भावादित्याशङ्क्याह । उत्तरपदादिरिति । अन्यथा कर्णोवर्णलक्षणादिति स्वरो न पदादिविधिः अकारस्यानादित्वात् । स्वरविधौ व्यञ्जनमविद्यमानवद्भवत्वादित्यपदेशसूत्रं चासमासार्थं स्यात् । कर्णशब्दादर्श आद्यचि कृते तु शुक्लःकर्ण इत्याद्युदात्तत्वं यथास्यादित्यत आह । उत्तरपदादिति । पूर्ववार्तिकमपीति भाष्ये उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वचनं पठित्वा ततः स्वादिषु पूर्वं पदं भवतीत्याद्यनेकविधयोगविभागेन प्रत्याख्याय दधिसेचावित्यादौ षत्वार्थं पदादादिरिति पञ्चमीसमासाश्रयणे बहुसेचौ बहुसेच इत्यादौ दोषमुद्भाव्य तदुत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं भवतीति वक्ष्यामि तन्नियमार्थं भविष्यति पदादिविधावेव न पदान्तविधाविति कथं बहुसेचौ बहुच्पूर्वस्य पदादिविधावेव न पदान्तविधावित्युक्तम् । नन्वघटितैतद्वचनपाठेनेति । अन्ये तु प्रत्याख्यानप्रकार एव युक्तः । उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणप्रतिषेधः । बहुच्पूर्वस्य चापदादिविधाविति वचनद्वयापेक्षया प्रत्याख्यानस्य लघुत्वात् । तथा हि स्वादिषु पूर्वं पदं भवति ततो ऽसर्वनामस्थाने पूर्वं तद्घटकं च पदं न । ततो भम् । यजादावसर्वनामस्थाने पूर्वं तद्घटकं च भं भवतीत्यर्थ इति सर्वेष्टसिद्धिः स्पष्टा । न च दधिसेचावित्यादौ षत्वापत्तिः । पदादादिरिति पञ्चमीसमासाश्रयणात् ।

न च बहुसेवारित्यत्र षत्वापत्तिः । पद्यते गम्यते ऽर्थोऽनेनेति व्युत्पत्त्या पद-पदस्यार्थवत्परत्वात् । पदं च प्रकृतिभिन्नमेव सातिग्रहणात् । तेन प्रतीषिषतीत्यत्र न दोषः । अर्थवदिति तु षिशब्दमादायोत्तरस्य षत्ववारणाय । एवं च सति षष्ठी-तत्पुरुषेपि न दोषः । न चैवं कुमारीष्वित्यत्र षत्वनिषेधापत्तिः । सातिग्रहणे पद-सञ्ज्ञाशून्ये प्रत्यये पदादित्वप्रयुक्तप्रतिषेधाप्रवृत्तिज्ञापनात् । प्रत्याख्यानोत्तरं नञ्-घटितैतद्वचनपाठस्त्वेकदेशिनः । कथं तर्हि पदात्पदादिः पदादिरिति भाष्यग्रन्थोपि तथैव । किं च वचनारम्भपक्षे कश्यपेन प्रोक्तमधीयते काश्यपिन इत्यादौ नलो-पापत्तिः । छन्दोब्राह्मणानीत्यनेन प्रोक्तप्रत्ययान्तस्याध्येतृप्रत्ययं विना ऽप्रयुक्तत्वबो-धनेपि सुबुत्पत्तेः प्राक् तत्प्रवृत्तिबोधकत्वे मानाभावात् । किं च जम्ब्वाःफले ज-म्ब्वावित्यत्रेको सवर्ण इति प्रकृतिभावापत्तिः । न ह्यत्र फलप्रत्ययस्य सुबुत्पत्तेः पूर्वत्वं प्रत्याशापि । किं च बहुचर्मिकेत्यत्र वचनारम्भे नलोपानापत्तिः । प्रत्ययलक्षणप्रति-षेधेन पदत्वाभावात् । कप्रत्ययनिमित्तं पदत्वं तु समुदायस्य ततश्च यत्प्रातिपदिक-सञ्ज्ञकं चर्मनिति न तत्पदम् । यच्च पदं बहुचर्मन्निति न तत्प्रातिपदिकमिति नलोपो दुर्लभः । अपि च वचनारम्भे पूर्वदण्डिप्रिय इत्याद्यर्थं मध्यमत्वानाक्रान्तेति विशेष-णेतिगौरवमिति यत्किञ्चिदेतदित्याहुः । अत एवेति । एनदस्त्यदाद्यत्वापवादत्वादेवेत्यर्थः । अनयोरपीति । एनादेशस्य एनदश्चेत्यर्थः । एनदमादायेत्याद्येकदेश्युक्तिरित्यन्तो ग्रन्थो ऽपवादत्वमजानत एकदेशिनो यद्येनदित्याद्युक्तिरिति पूर्वग्रन्थेन पुनरुक्तोपि तद्विव-रणपरतया कथञ्चिन्नेयः । अन्ये तु यद्येनत्क्रियते एनो न वक्तव्य इत्यादिभाष्य-स्वारस्येन द्वितीयाटौस्वेन इत्यत्रैव एनद्वक्तव्य इति लभते । न च येन नाप्राप्ति-न्यायेनैनदस्त्यदाद्यत्वापवादत्वेन तत्र कृते त्यदाद्यत्वाप्राप्तेः । यद्येनदित्याद्येकदेश्यु-क्तिरिति वाच्यम् । न लुमतेति निषेधानित्यत्वेन कुण्डमानय प्रक्षालयैनदित्यत्रा-प्येनदः प्रवृत्त्या तत्र च त्यदाद्यत्वाप्रवृत्त्या येन नाप्राप्तिन्यायाऽप्रवृत्तेः । सत्वस्य त्यदाद्यत्वानपवादत्वस्यैव तक्रकौण्डिन्यन्यायानित्यत्वेनैनदोपि तदनपवादत्वस्यो-पपत्तेश्च । यद्येवमेनश्रितको न सिद्ध्यति एतच्छ्रितक इति प्राप्नोति इत्यग्रिमभा-ष्यं त्वेकदेश्युक्तिः । उपसर्जनत्वेनैनदादेशस्य तत्राप्रवृत्तेः । न लुमतेति निषेधा-च्च । न लुमतेत्यस्यानित्यत्वं तु धर्मिग्राहकमानेनैकपदाश्रितलुक्येव । तथा चैनेन कृतमेतत्कृतमित्यादौ नैनदादेशप्रवृत्तिरित्याहुः । इत्यलमिति । अन्ये तु सावकाशः

कः कोवकाशो ऽनन्त्य इत्यादि नलोपः प्रातिपदिकेति सूत्रस्थभाष्यप्रामाण्येन त्रिपाद्यां न तक्रकौण्डिन्यन्यायः स्कोः संयोगाद्योरित्यादि तु निरवकाशत्वेन संयोगान्तलोपादिबाधकम् । अत एव रथीतरसिद्धिः । अन्यथा नलोपं बाधित्वा नलोपे तस्यासिद्धत्वात्सवर्णदीर्घानापत्तिः । अत एव धुक् सुवृडित्यादौ भष्भावघत्वादिषु कृतेषु जश्त्वादिसिद्धिः । अन्यथा ऽपवादत्वात्तैर्जश्त्वापवादत्वापत्तिः । रहाभ्यामिति निमित्तत्वेन कार्यित्वबाधस्तु हयवरडिति सूत्रस्थभाष्यबलादेव । अस्तु वा त्रिपाद्यामितरविधिषु यथा तथा । नलोपविषये तु इत् रथीनः रथीतरः । भूरिदाव्नस्तुड्भूरिदावतर इति भाष्यप्रयोगबलेन नोत्सर्गापवादभावः । अत एव नलोपःप्रातिपदिकसूत्रे भाष्ये ऽप्यनवकाशो रुर्नलोपं बाधिष्यत इत्युक्तं न त्वपवादो रुरित्याहुः । इदमेवन्याय्यमिति । अन्ये तु क्विन्प्रत्ययस्य कुरिति सूत्रे इदं तर्हि प्रयोजनं येभ्यः क्विन् विधीयते तेषामन्यप्रत्ययान्तानामपि कुत्वं यथास्यान्मानोअस्राक्, मानोअद्रागिति भाष्यात्कुत्वस्यासिद्धत्वात्षत्वे क्विन्प्रत्ययस्येति कुत्वं भवत्येव । षत्वस्य कुत्वापवादत्वं तु न त्रिपाद्यां तक्रकौण्डिन्यन्यायाप्रवृत्तेः । पदान्ते विशिष्य षत्वविधिकल्पकाभावाच्च । विश्वसृडादौ तु न कुत्वम् । क्विन्प्रत्ययस्येत्यतद्गुणसंविज्ञानबहुव्रीहिर्विज्ञानेपि स्पृशोनुदके इति सूत्रे ऽनुदकग्रहणेन क्विन्प्रत्ययविधायकशास्त्रानुपात्तोपपदके क्विप्प्रत्ययान्ते क्विन्प्रत्ययस्येत्यस्याप्रवृत्तेः । अनुदकग्रहणं तूदके उपपदे क्विपः प्रवृत्तये तत्रापि कुत्वप्रवृत्तौ तद्वैयर्थ्यं स्पष्टमेव । तेनोदकशब्दे उपपदे उदकस्पृडित्येव । अत्रक्शब्दस्त्वस्यतेरौणादिके ऋज्प्रत्यये बोध्य इत्याहुः । ननु गवाक्शब्दस्य रूपाणीति मूलग्रन्थो ऽसङ्गतः । क्लीबेचागतिभेदत इत्युत्तरग्रन्थानुरोधेन पूजार्थस्याप्यनुकरणावश्यकत्वेन तत्र गवागिति रूपाभावादित्याशङ्क्याह । शब्दपरत्वेनेति । तथा च गवाच्शब्दस्यानुकरणं प्रकृतिवदनुकरणमिति नलोप इति क्लीबेचागतिभेदत इति वाक्यशेषो नासङ्गत इति भावः । सोर्लुकालुप्तत्वादिति । सर्वनामस्थानत्वाभावाच्चेत्यपि बोध्यम् । स्वांपीत्येवेति । अत एव सुस्वांपि तटानीति प्रयोगः सङ्गच्छते । इति हलन्ता नपुंसकलिङ्गाः ॥

स्वरादिनिपातमव्ययम् । सर्वेषामिति । तत्तच्छक्तिप्रत्ययानानां सर्वेषामित्यर्थः । भाष्यप्रामाण्यादिति । एवं हि तत्र भाष्यम् । अथ सायञ्चिरयोः किं निपात्यते प्रत्ययसन्नियोगेन मान्तत्वं निपात्यते । नैतदस्ति मकारान्तः सायंशब्द इति कै-

यदश्चानेन सायंशब्दः प्रत्याख्यायते । अव्ययादेव ट्युट्युलोः सिद्धत्वात् चिरमित्यस्य तु मान्तत्वं निपात्यत इति चिरमित्यव्ययसत्वे तु सायंशब्दवाच्चिरंशब्दस्यापि प्रत्याख्यानं भाष्यकृत्कैयटौ वदेतामिति भावः । ननु वत्यन्तस्याव्ययसञ्ज्ञायां यद्वृद्धतो निवत इत्यादौ विभक्तिश्रवणानापत्तिरित्याशङ्क्याह । उपसर्गाच्छन्दसीति । भाष्यत्वरसाप्येवमेवेति । एवं हि तत्र भाष्यम् । अथ वा पुनरस्तु कृदन्तमकारान्तमिति कथं प्रतामौ प्रताम इति । आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन सञ्ज्ञा भवतीति । यदयं प्रशाम्शब्दं स्वरादिषु पठतीति । यदि च स्वरादिषु प्रशाम्शब्दपाठस्तदा शानतेजन इत्यस्मात्क्विपि तत्राव्ययसञ्ज्ञार्थं पाठस्य चारितार्थ्येन ज्ञापकत्वासङ्गतिः । तस्मात्क्विपोनभिधानकल्पनं तु क्लिष्टमिति भावः । नञःस्वरादिष्विति । निपातत्वादेव सिद्धेरिति भावः । अव्ययेति । इदं तत्पुरुषे तुल्यार्थे इति सूत्रस्थं वचनम् । अव्ययग्रहणे एतेषां ग्रहणमिति तदर्थः । अकर्णिरिति । आक्रोशे नञ्यनिरिति कृत्रोऽनिरिति भावः । माङोपीति । निपातत्वादेव सिद्धेरिति भावः । नन्वर्थतः सारूप्यग्रहणे गेये केन विनीतौ वामित्यत्राव्ययसञ्ज्ञा न स्यात् । वामित्यस्य कर्मत्वाबोधकत्वादित्याशङ्क्याह । गेयेकेनेति । विभक्त्यन्तसमानार्थत्वस्येवेति । युष्मच्छब्दप्रकृतिकविभक्त्यन्तसमानार्थत्वं युवामिति प्रथमाद्विवचनमादाय शब्दतः सारूप्यं वामिति द्वितीयाद्विवचनान्तत्वमादाय । नन्वेवं सति युगपदित्यादीनामपि एककाले इति विभक्त्यन्तमादायार्थतः सारूप्यम् । युगं पततीत्यर्थकयुगपच्छब्दमादाय शब्दतः सारूप्यं तथा विभक्तिप्रतिरूपकत्वादेव युगपदित्यादीनामव्ययत्वे सिद्धे युगपदित्यस्य पाठो व्यर्थ इति चेन्न । यच्छब्दप्रकृतिकविभक्त्यन्तमादायार्थतः सारूप्यं तच्छब्दप्रकृतिकविभक्त्यन्तमादायैव शब्दतः सारूप्यविवक्षितत्वेनादोषात् । नन्वेवं स्वरप्रतिरूपकत्वमपि शब्दतोऽर्थतश्च विवक्षणीयं स्यादित्याशङ्क्याह । स्वरांशेतुनेति । अन्ये तु स्वराद्येकरूप्याय शब्दत एव सारूप्यं नार्थतस्तेन तस्मादित्यर्थकतदित्यस्य प्रथमान्तार्थकवामित्यस्य चाव्ययत्वसिद्धिः । अत एव धनवाचिनोस्तिशब्दस्य विभक्तिप्रतिरूपकत्वेनाव्ययत्वसिद्धिरिति मतुप्सूत्र भाष्यकैयटोक्तं सङ्गच्छते । विभक्त्यन्तं च पदद्वयाघटितमेवेति न युगपदित्यादीनां पाठवैयर्थ्यमित्याहुः । लुप्तषष्ठीकमिति । इदमयुक्तम् । प्रथमान्तानामेव द्वन्द्वविधानेन तच्चिनोरिति द्वन्द्वे षष्ठ्यन्तस्य प्रवेशानर्हत्वात् । तत्तदर्थविभा-

गइति । प्रकृतिप्रत्ययविभागस्तदर्थश्चेति वाक्यस्थतच्छब्दयोः प्रकृतिप्रत्ययपरयोर्द्वन्द्व इति भावः । शब्दरत्ने तु वीप्सायां कृतद्विर्वचनस्य तच्छब्दस्यार्थशब्देन तत्पुरुष इत्युचितम् । चादिस्वरादिपठितानामिति । इदं विशेषणं व्यर्थम् । गौरित्यादावव्ययत्वापादकं इण असिरिति निष्पन्ने । ऽणइत्यादावव्ययत्वानापत्तिस्तु नास्माकं स्वरादिपाठसामर्थ्येन तत्सिद्धेः । विहितानांनियमपक्षइति । इदमुपलक्षणम् । प्राप्यमाणानां नियमपक्षेपीत्यस्यार्थस्य । अस्योपपत्तिरिति । असर्वविभक्तित्वस्योपपत्तिः । अत्र पक्षे इत्यस्य जातस्य निवृत्तिरित्यनेनान्वयः । सर्वेष्वर्थेष्वित्यस्य सर्वविभक्त्युत्पत्तावित्यनेनान्वयः । सर्वेषु कर्मादिष्वर्थेषु द्वितीयाद्येकैकविभक्त्युत्पत्तौ जातायामित्यर्थः । कर्माद्यर्थयोग्यात्प्रातिपदिकाच्चेत्कर्मणि विभक्तिरिति प्रातिपदिकाच्चेत्कर्मणि विभक्तिस्तदा द्वितीयैवेत्येव सिद्धौ कर्माद्यर्थेत्यादिविशेषणं व्यर्थम् । तद्योग्यप्रातिपदिकात्प्रथमैवेति । इदं विशेषणं अव्ययेभ्योपि द्वितीयाद्यर्थम् । अर्थनियमइति । यत एव कारस्ततोन्यत्र नियम इति सिद्धान्तात् । अत्र पक्षइति । अर्थनियमपक्षे इत्यर्थः । प्रकृतार्थापेक्षप्रत्ययनियमपक्षमाह । कर्माद्यर्थेति । सामान्यापेक्षप्रत्ययनियमपक्षमाह । अर्थनियमपक्षे इत्यर्थः । प्रकृतार्थापेक्षप्रत्ययनियपक्षमाह । अथेति । ननु सर्वेष्वेतेपु पक्षेषु अव्ययानां प्रातिपदिकार्थसूत्रोदाहरणत्वमनुपपन्नम् । तथा च प्रातिपदिकार्थग्रहणं किमर्थं उच्चैर्नीचैरित्यत्रापि यथा स्यादिति प्रातिपदिकार्थसूत्रस्थं भाष्यं विरुध्यते । प्रातिपदिकार्थसूत्रस्य पर्युदासन्यायेन कर्मादियोग्यप्रातिपदिकार्थ एव प्रथमाबोधकत्वादिति चेत्प्रातिपदिकार्थसूत्रस्योक्तनिष्कृष्टार्थमनाश्रित्याव्ययानां तदुदाहरणत्वेनोपन्यास इत्याशयात् । वस्तुतस्तु प्रातिपदिकार्थसूत्रे कर्मादियोग्यप्रातिपदिकादित्यर्थे मानाभावादव्ययानां तदुदाहरणत्वमुपपन्नम् । तत्रार्थनियमे कर्मादिराहितप्रातिपदिकार्थे प्रथमैवेति नियमेन प्रथमैवाव्ययेभ्यः प्राप्नोति न द्वितीयादिः । अर्थनियमेसिद्धमिति । बहुष्विति सूत्रस्थभाष्यस्य प्रथमाया वचनत्रयं सिद्धमित्येवार्थः । प्रकृतार्थापेक्षप्रत्ययनियमे कर्माद्यर्थप्रतिपादनयोग्यप्रातिपदिकाच्चेद् द्वितीया तदा कर्मणि सत्येव न तु तदसत्वे इत्यादिरेव सूत्रार्थः । तेन गां दोग्धीत्यादावपादानत्वादावपि द्वितीयादिः । बहुष्विति सूत्रस्थस्यैकस्मिन्नेवैकवचनं न द्वयोर्न बहुष्विति भाष्यस्यापि संख्यावत्वयोग्येषु चेदेकवचनं तर्हि एकत्वे सत्येव न तु तदसत्व इत्यर्थः । न द्वयोर्न बहुष्विति तु फलितार्थकथन-

मिति दिक् । नन्वेकवचनमिति सूत्रं व्यर्थम् । द्वित्वबहुत्वयोर्द्विवचनबहुवचनोक्त्वा-
वर्थादेकवचनस्य तदविषये प्रवृत्तिसिद्धेरित्यत आह । द्वित्वबहुत्वयोरिति । अप्रा-
प्तप्रापणार्थमिति । सामान्यापेक्षप्रत्ययनियमपक्ष एव सिद्धान्त्यभिप्रेत इति भावः ।
अन्ये तु सामान्यापेक्षः प्रत्ययनियमः तत्र हुंफडादिभ्यो निरर्थकेभ्यो विभक्तेरप्राप्तौ
एकवचनमित्यौत्सर्गिकमेकवचनम् । सार्थकाव्ययेभ्यस्तु प्रातिपदिकार्थ इति प्रथमै-
कवचनं दोषामन्यमहः, अत्युच्चैरित्यादिवृत्तिविषये कर्मत्वान्वयाद् द्वितीयैकव-
चनम् । तेनात्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः एवं स्वः शब्दात् द्वितीयापञ्च-
मीसप्तम्येकवचनानि स्वः पश्य, स्व आगतः, स्वः स्थित इत्यादिप्रयोगदर्शनात् ।
एवमपदिशेत्याद्यव्ययीभावात्तदर्थकर्मत्वादिसत्वे न द्वितीया तृतीयासप्तम्येकवचना-
नीत्यादि यथायथं बोध्यमित्याहुः । नानेन सर्वैकवचनमिति । किं तु प्रथमाद्वि-
तीयातृतीयैकवचनान्येवेत्यर्थः । ज्ञापनाच्चेति । इदमुपलक्षणमव्ययादाप्सुप इति
प्रत्याहारग्रहणाच्चेत्यपि बोध्यम् । नन्वेकत्वे एकवचनस्याविधानेन घट इत्युक्ते
एकत्वनिश्चयो न स्यादित्याशङ्क्याह । घटइत्युक्तइति । ननु बहुष्वित्यादिसूत्रे-
ष्वेकवचनमिति योगविभागमनाश्रित्योक्तनियमपक्षानाश्रित्याव्ययेभ्यः सर्वविभक्ती-
नां सर्वाणि वचनानीत्युक्तं तत्कुतो नोक्तमित्यत आह । बहुष्वित्यादिसूत्रेष्विति ।
भाष्ये ननु विशिष्यासन्निधानात्तद्धितान्त इति तदन्तविधिः कथमत आह । बहु-
व्रीहिलभ्यंविशेष्यइत्याहेति । इत्यभिप्रेत्याहेत्यर्थः । सञ्ज्ञाकार्यस्येति । लुक इत्य-
र्थः । तत्त्वेन । बहिरङ्गत्वेन । अव्ययीभावादाविति । वस्तुतस्त्वव्ययीभावस्य शक्ति-
लिङ्गविशेषयोगेपि वचनादव्ययत्वम् । आधये इत्यादेरन्वर्थसञ्ज्ञाबलेनाव्ययत्ववार-
णसंभवेपि सन्निपातपरिभाषाप्रयोजनकथनार्थं भाष्यकृतैतदुपेक्षितम् । उपादास्ते-
ति । समूर्धन्यपाठः । सन्निपातपरिभाषया क्ङितिति निषेधस्य निवृत्तिरित्याशयेन
सगुणपाठः । वस्तुतस्त्वत्वप्रवृत्तिपूर्वकालिकमेत्वमात्वस्योपजीव्यं तच्च न क्ङिति-
चेति निषेधविनाश्यम् । यच्च निषेधेन विनाश्यमित्वोत्तरकालिकं न तदात्वस्योप-
जीव्यं तस्मादेज्विषये त्वात्वविधानादकित्वसन्निपातनिमित्तमात्वं स्थाघ्वोरिति कि-
त्वस्यानिमित्तं कि त्वसन्नियुक्तं चेत्स्वमिति कित्वाभावे न भवतीति कैयटोक्तरी-
त्यैव सन्निपातपरिभाषाविरोध उपपादनीयः । तत्र चात्वोपजीव्यकित्वस्य साक्षादेव
कित्वेन विनाशः । भावाभावयोर्विरोधादिति । नैषा प्रतिबन्दी युक्ता । तस्माद

व्याख्यानाद्भाष्यप्रामाण्याच्च सन्निपातविघातकत्वं परम्परयाप्याश्रीयत इत्येवेत्युक्तम् । तादृशमहासञ्ज्ञाकरणात्समुदायस्य नाव्ययत्वमित्येव वक्तुं युक्तम् । तादृशार्थानामित्यारभ्य मानाभावेनेत्यन्तो ग्रन्थः प्रकृतानुपयुक्तः । न ह्यन्तर्गणकार्यं किञ्चित्प्राप्नोति यो नोपयुज्येत । साहचर्येणेत्युत्तरमर्थस्येति शेषः । प्रसिद्धश्चासावन्तरङ्गश्चासौ पदान्तरानपेक्षश्चासावनुपसर्जनीभूतश्चेति विग्रहः । अत्र प्रसिद्धान्तरङ्गपदान्तरानपेक्षेति विशेषणं व्यर्थम् । अनुपसर्जनीभूतलिङ्गाद्यनन्वयिन इत्येतावता पूर्त्तेः । अत एवेति । अत्युच्चैसावित्यत्राप्यस्याप्यव्ययसञ्ज्ञाभावादेवेत्यर्थः । व्यर्थ एवेति । अव्ययसञ्ज्ञायां कार्यकालपक्षाश्रयणात् । अत्युच्चकैरित्यादावकजर्थं प्रवृत्ताव्ययसञ्ज्ञामादाय न लुक् । उच्चैराविति । उच्चैः शब्दात्परो द्विवचनान्तो ऽशब्दो बोध्यः । तस्य च परादिवत्वेन विभक्तित्वाद्विहितविशेषणाभावे लुगापत्तिरित्याशङ्कावारणायेदम् । उच्चैराभ्यामिति । विहितविशेषणाभावे ऽत्र टापो लुगापत्तिरिति भावः । णिश्‌समाधौ भ्वादिः । यन्नव्येति तदव्ययमिति वाक्यशेषं व्याचष्टे । तदिति । तदिति पदं तस्मादित्यर्थकमित्यभिप्रेत्य व्याचष्टे । अभावादिसादृश्यादेवेति । यद्वेतीति व्याचष्टे । यद्विविधं रूपमिति । नैतीति व्याचष्टे । न प्राप्नोतीति ॥ इत्यव्ययानि समाप्तानि ॥ इति सुब्विभक्तिकार्याणि ॥

श्रीः । स्त्रियाम् । सत्वादीनांगुणानामिति । ननु ब्रह्मशब्दस्य नपुंसकत्वमात्मशब्दस्य पुंस्त्वं चितिशब्दस्य स्त्रीत्वं कथम् । सत्वादीनां गुणानां तत्राभावादिति चेन्न । परास्य शक्तिर्विविधैव । आत्मनि चैवं विचित्राश्च हीति श्रुतिसूत्राभ्यामात्मनि पुंशक्त्यादिसत्त्वेन सर्वलिङ्गोपपत्तेः सतामपि सर्वलिङ्गानां तत्तच्छब्दप्रतिपाद्यत्वावच्छेदेनैवाभिव्यक्तिरिति नातिप्रसङ्गः । शशविषाणादौ त्वसदेव लिङ्गं विषाणत्वादिवदवभासते । यद्वा ऽन्यथाख्यातिस्वीकारादन्यत्र सच्छशीयत्वं सति विषणे ऽवभासते इति लिङ्गव्यवस्थासिद्धिः । केचित्तु शशविषाणादावन्तःपदार्थसद्भावात्तद्द्वारको लिङ्गयोग इत्याहुः । अजशब्दस्य स्त्रियामजा शब्दस्य पुंसि कदाप्यप्रयोगाच्छास्त्रीयमेव टाबाद्यभिधेयमिति वक्तुमशक्यमित्यभिप्रेत्याह । तत्रेति । तत्संभवेत्विति । अन्ये तु लौकिकलिङ्गस्य प्रतिपाद्यत्वसंभवे तदेव नोभयं गौरवादित्याहुः । उपचयाऽपचययोः सतोरिति शेषः । तन्मात्रविवक्षायामिति । विवक्षा न लोकव्यवहारानुवादिनी ग्राह्या न तु प्रायाद्भी । तदुक्तं हरिणा । स-

न्निधाने निमित्तानां किंचिदेव प्रवर्त्तकम्। यथा तक्षादिशब्दानां लिङ्गेषु नियमस्त-था। भावतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिता, इति। लिङ्गं चार्थगतमेव न शब्दगतमिति प्रकृतसूत्रस्थभाष्यात्स्वमोर्नपुंसकादिति सूत्रस्थभाष्याच्च स्पष्टमेव ग-म्यते। स्त्रीपुन्नपुंसकादिशब्दानां प्रवृत्तिनिमित्तमेव लिङ्गं न ततोऽन्यत्। तदपि प्रायेण शास्त्रीयमेव सति संभवे लौकिकमपि। तद्वाच्यार्थगतमिति। इदं विशेषणं व्यर्थम्। व्यावर्त्याभावात्। एवंव्याख्यानेइति। षष्ठ्यन्तत्वमाश्रित्याजादीनां वाच्यं यत् स्त्रीत्वमिति व्याख्याने इत्यर्थः। अतएव। स्त्रीत्वस्य द्योत्यत्वादेव। समुच्चयस्य। द्योतकसमुच्चयस्य। वाचकसमुच्चयस्तु, प्रायेण न दृश्यत इति भावः। अजातिरूपमेवेति। नन्वेवं चटकिकाऽजिकेत्यादौ जातिलक्षणो ङीष् दुर्वारः। आज्ञातार्थयोगेपि जातिलक्षणानपायात्। कान्तस्यानजादित्वेन टापोऽप्रवृत्तेरिति चेन्न। अज्ञातत्वाद्यधिकप्रवृत्तिनिमित्तत्वे जातिमात्रप्रवृत्तिनिमित्तकत्वाभावान्ङीषोऽप्रवृत्तेरिति दिक्। तदन्तस्यापीति। तदन्तस्यैवेत्युचितम्। व्याख्यानादेवेति। अनुपसर्जनाधिकारमूलात्। सामर्थ्येनेति। अजाद्यत इत्यस्य षष्ठ्यन्तत्वाश्रयणसा-मर्थ्येनेत्यर्थः। जातिश्चेद्वाच्येति। भाष्यकैयटयोस्तु जातिरित्यस्य न शूद्रेत्यंशे सं-बन्धः किं तु अमहत्पूर्वेत्यंशे शूद्रस्य स्त्री शूद्रेत्यत्र गौणमुख्यन्यायेन टाप् नेत्युक्तम्। प्रातिपदिककार्येपि स्त्रीप्रत्यये गौणमुख्यन्यायः प्रवर्तत इति तद्भावः। एवं त्वजस्य अजीत्येव गौणमुख्यन्यायेन टापोऽप्रवृत्तेः। यद्वा मुख्यार्थकेष्वजादिषु जातिलक्ष-णङीषं बाधित्वा चरितार्थस्य टापः पुंयोगे परत्वान्ङीषा बाधः। अयजे इन्द्राग्नीत्यादौ भगेगदीर्घस्य गुणेनेव। जातिवाचकत्वाभावादिति। प्राधान्येन जातिविशिष्टावा-चकत्वादित्यर्थः। नचात्रगौणत्वमिति। ननु शूद्रस्य स्त्री शूद्रेव तथा च कथं शूद्रशब्दस्तत्र गौणः न च शूद्रशब्दः शूद्रसंबन्धित्वेन स्त्रीबोधक इति तत्र गौणः। शक्यतावच्छेदकारोप एव गौणी वृत्तिरिति नव्यसिद्धान्तात्। अत एवाग्नायी देवताऽस्याग्नेय इत्यत्र भस्याढ इति पुंवद्भावः। अन्यथा तुल्ये प्रवृत्तिनिमित्ते भाषितपुंस्कात्वाभावात्स दुर्लभ इति चेन्न। अशूद्रा यदा शूद्रस्य स्त्री विवक्षिता तदा गौणत्वमित्याशयात्। जातिमात्रविवक्षयेति। कैयटे त्वसति जातिग्रहणे ऽमह-त्पूर्वेति प्रतिषेधसामर्थ्यादन्तरङ्गापि टाप् बाध्येतेत्युक्तम्। न चाभीर्या प्रतिषेधचा-रितार्थ्यं तत्रापि समासस्वीकारेण सुबुत्पत्तेः पूर्वं टापो दुर्वारत्वात्। ननु महाशूद्र-

शब्दस्य महत्त्वविशिष्टशूद्रत्वप्रवृत्तिनिमित्तकत्वेन जातिमात्रप्रवृत्तिनिमित्तकत्वाभावेन कथं ङीषिष्यत आह । प्रधानेनेति । उग्रायामिति । उग्रयामित्युचितम् । अजादित्वं वा कल्प्यम् । क्वचिदुग्रकन्यायामिति पाठः । अनुलोमसंकराणामिति । उत्तमवर्णादधमवर्णायामुत्पन्नानामित्यर्थः । मातृजातिवृत्तित्वादिति । मातृजातिमत्त्वेन स्मृतिबोधकत्वादित्यर्थः । अतएव । महाशूद्रीत्यत्र शूद्रशब्दस्याऽर्थवत्वादेव । ब्राह्मणादीनां क्षत्रियादिभिः क्रमेणान्वयः । अत्र क्षत्रियाद्या अनूढा एव ग्राह्याः । ननु ब्राह्मणादुग्रायामुत्पन्नस्य शंखस्मृतिबलेन शूद्रत्वावगमात्तत्र तां जातिमारोप्येति पूर्वग्रन्थासङ्गतिः । अत एव श्रीमत्कृष्णद्वैपायनादिभिः क्षत्रियासूत्पादितानां पाण्डवादीनां क्षत्रियत्वमिति चेन्न । औशनसस्मृतावनुलोमसङ्कराणां केषां चिज्जात्यन्तरकथनेन त्यदादीनीति सूत्रे भाष्ये आभीरत्वस्य शूद्रत्वव्याप्यत्वाभावोक्त्या च तत्र संपूर्णशूद्रत्वानङ्गीकारात् । अत एव तत्र महाशूद्रशब्दस्य प्रयोगो न केवलशूद्रशब्दस्याशूद्रादुत्तमत्वात्तस्य । शूद्रधर्माश्च सर्वे न तत्र प्रवर्त्तन्ते । शङ्खस्मृत्या शूद्रत्वारोपाच्च केचिच्छूद्रधर्मास्तत्र प्रवर्त्तन्ते । अयमारोपो न गौणमुख्यन्यायप्रवर्त्तकः शास्त्रबोधितत्वात्कतिपयधर्मप्रापकत्वाच्च । इमां कुसृष्टिमनाश्रित्य तु कैयटेनोक्तम् । अमहत्पूर्वेति निषेधो न वक्तव्यः । न हि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वमिति टापः प्रसङ्गाभाव इति । एतेन पुंयोगे टाब्वारणाय जातिश्चेद्वाच्येत्यस्य मुख्यजातिमती चेद्वाच्येत्यर्थस्यावश्यकतया ऽऽभीर्यां शूद्रत्वारोपेण टापो ऽप्रवृत्तेरमहत्पूर्वेति निषेधो व्यर्थ इत्यपास्तम् । अस्यारोपस्य शास्त्रबोधितत्वेन तद्धर्मप्रापकत्वेन च मुख्यसमशीलत्वात् । ननु महाशूद्रीत्यत्र योगार्थस्यापि सत्त्वेन जातिमात्रप्रवृत्तिनिमित्तकत्वाभावेन ङीष् न स्यादिति चेन्न । अवयवार्थस्य संभवमात्रेणाश्रयणेपि रूढ्यर्थप्रवृत्तिनिमित्तस्य व्यभिचारवारणायानाश्रयणेन जातिमात्रेति मात्रपदेन तादृशस्यैव व्यावर्त्यत्वेनादोषात् । अत एव योगेन मन्वपत्यबोधकत्वेपि अगोत्रप्रत्ययान्तमानुषीत्यत्र जातिलक्षणङीष्सिद्धिः । केचिदिति । छागीति भूयः प्रयोगदर्शनमत्रारुचिः । इत्युक्तेरिति । वस्तुतस्तूगिद्वर्णग्रहणवर्ज्यमिति व्यर्थम् । उगितश्चेत्यत्र वनो रचेत्यादाविवामहत्पूर्वग्रहणेन स्त्रियामित्याधिकारे तदन्तविधिज्ञापनेनादोषात् । उगित्त्वाऽत्त्वयोः प्रातिपदिकाप्रातिपदिकसाधारण्येनोक्तनिषेधस्योगितश्चात इञित्यनयोरप्रवृत्तेश्च । स्पष्टं चेदमुगितश्चेति सूत्रे भाष्ये । अतएवेति ।

टापोऽनपवादत्वेन ऋचि ङीपः प्रवृत्तेरेवेत्यर्थः । एतत्प्रत्याख्यातमिति । प्रत्याख्यानमित्युचितः पाठः । एतस्य संगच्छत इत्येनेनान्वयः । सूत्ररीत्येष्टस्येति । इदं चिन्त्यम् । ङीबन्तप्रयोगस्य सूत्ररीत्येष्टत्वे मानाभावादिति तर्कचन्द्रिकाकाराः । केचित्तु पञ्चेत्यादौ टाम्ङीपोरुभयोर्निषेधाय न षडिति सूत्रे ङीपोनुवृत्तेरावश्यकतया मण्डूकप्लुतौ मानाभावेन टाबृचीत्यनेन ङीपो विधानं सूत्रकृत्संमतमित्याहुः । असंभवेनेति । अमहत्पूर्वग्रहणाच्च । कार्यकालपक्ष इति । यथोद्देशपक्षे तु नान्तत्वसमानाधिकरणषट्त्वस्यानल्धर्मत्वेन स्थानिवत्त्वेनापि सौलभ्यमिति भावः । तदन्तेपीति । अमहत्पूर्वग्रहणेन स्त्रियामित्यधिकारस्थविधिनिषेधसाधारण्येन तदन्तविधिज्ञापनादिति भावः । स्त्रियांयत्प्राप्नोतीति । नन्वेवं सति प्रियपञ्चेत्यादौ डाबुभाभ्यामित्यपि न स्यादिति चेदिष्टापत्तेः । केचित्तु टाम्ङीपोरुभयोरनुवृत्त्या तयोर्निषेधेपि डाम्निषेधे मानाभावः । ङीबंशे बाध्यसामान्यचिन्तया ऽन उपधेति ङीबपि नेत्याहुः । आश्रयणबलादिति । बाध्यसामान्याचिन्ताश्रयणस्यान उपधेति ङीबभावस्य फलत्वेनानुपदमेव कीर्तनाच्चिन्त्यमेतत् । बहुयज्वभ्यामिति । इदमपि चिन्त्यम् । अन्नन्तत्वाभावेनानो बहुव्रीहेरित्यस्याप्राप्तेः । यथाचान्नन्तत्वाभावस्तथोपपादितं श्वयुवेति सूत्रे शेखरे स्त्रियां यत्प्राप्नोति तन्नेत्यर्थाश्रयणबलाद् भूतपूर्वगतिरित्याशयो वा कल्प्यः । वस्तुतस्त्वन्नन्तत्वमपि स्थानिवद्भावेनानेतुं शक्यम् । श्वयुवेति सूत्रस्थः शेखरस्तु चिन्त्य एव । ननु श्वयुवेति सूत्रस्थं भाष्यं कथं संगच्छतामिति चेन्न । अनोऽवयवस्याकारस्यैवाल्लोपो न इति लोपविधानादन्त्यस्य श्वयुवेतिसूत्रस्थशेखररीत्या ऽऽनेतुमशक्यत्वात् । एतेन धीवरीत्यादावल्लोपापादनमपास्तम् । अनउपधालोपिनः । गृह्यमाणस्यचान्नन्तस्येति । धीवन्नित्यादेरित्यर्थः । ध्वनितंचेदमिति । अनुपसर्जनादित्येतन्न संबध्यत इत्येतदित्यर्थः । इत्यनन्तरमिति । अनुपसर्जनाधिकारात्प्राग्वर्तिनि अनो बहुव्रीहेरिति सूत्रे उपधालोपिनो वेति न्यासकरणेन तत्रानुपसर्जनाधिकारासंबन्धो ध्वनित इति भावः । अन्यतरस्यांग्रहणन्त्विति । उपधालोपिनो वेति वाग्रहणन्त्वित्यर्थः । अन्यथेति । सुपर्वेत्यादौ डाप्प्रतिषेधयोः सावकाशत्वाप्रतिसंधाने इत्यर्थः । अन्ये तु गृह्यमाणस्यान्नन्तबहुव्रीहेर्बहुधीवेत्यादेरनुपसर्जनस्य संभवेन बहुदामानि पुराण्य,तिक्रांता नगर्य,तिबहुदामेत्यादावन्नन्तबहुव्रीहेरुपसर्जनस्य च सत्त्वेनानुपसर्जनादित्यन उपधेति सूत्रे संबध्यत एव ।

अनो बहुव्रीहिप्रतिषेधे उपधालोपिनो वेति वक्तव्यमिति वनो रचेति सूत्रस्थं भाष्यन्तु शाबुभाभ्यामनुपसर्जनादित्युत्तरं तद्वक्तव्यमित्येवं परमित्याहुः। अनेनेति। वर्णात्कार इतिविहितकारप्रत्ययान्तनिर्देशेनेत्यर्थः। नप्राप्नोतीति। सामर्थ्यान्निर्दिष्टपरिभाषाभावे तु रथकल्यादावतिप्रसङ्ग इति भावः। उच्चारणार्थतयेति। धकित् हिरुगित्याद्यनुरोधेनेत्यर्थः। प्रत्ययस्थत्वांशेति। निर्मुक्तानुबन्ध एव प्रत्ययसञ्ज्ञाप्रवृत्त्याकचिके इति समुदायस्य प्रत्ययत्वाभावादिति भावः। केवलेति। न च कान्तात्प्रत्ययादित्यर्थवारणाय स्थग्रहणमिति वाच्यम्। क्षिपकादीनां चेति निषेधेन ककारस्य प्रत्ययविशेषणत्वज्ञापनेनादोषात्। अणीति। टिड्ढेति ङीप् तु न। केवलमामकेति नियमात्। वार्तिकमतेपीति। भाष्यकारमते तु प्रत्ययलक्षणसूत्रस्य नियमार्थत्वेन न लुमतेत्यनेन स्थानिवत्त्वस्य निषेधे प्रत्ययलक्षणमप्यर्थान्निषिद्धम्। प्रत्ययलक्षणसूत्रस्य स्थानिवत्वानुवादकत्वात्। कन्यकेत्युत्तरं ध्रुवकेत्यपपाठः। गणे ऽपठितत्वात्। निर्दिष्टपरिभाषाप्रवृत्तेरिति। उत्तरांशविकलतस्मादितिपरिभाषाप्रवृत्तेरित्यर्थः। अनञ्पूर्वाणामपीतिस्पष्टार्थमिति। सूत्रेऽपिशब्दो नञ्पूर्वकभिन्नार्थकः सोऽपि स्पष्टार्थ इत्यर्थः। अकचित्वापुनर्विशिष्टात्सुपीति। ननु नञर्थान्वितैतदर्थेऽज्ञाताद्यर्थविवक्षायां समुदायात्सुबुत्तरमेवाकज्युक्त इति चेत्सत्यम्। पाठक्रमवैपरीत्येन योजनेनादोषात्। एवमत्यन्तस्वार्थिकक्कान्तेपीति। एतेन हंसं तनोः सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकाया,मिति प्रयोगो व्याख्यातः। अकचि स्याद्यापत्तेः। स्वास्यानिष्क्रान्तेति। स्वस्मान्निष्क्रान्तेति विग्रहे तु नेत्वविकल्पः। ज्ञात्वेति निर्देशेन स्त्रीत्वबोधकस्वशब्द एवेत्वप्रवृत्तेरिति भावः। अनुपसर्जनात्। अनभिधानमेवेति। ननु टिड्ढाणञित्यादावत इत्यधिकारेणादन्तात् क्विपि तुको लोपस्य वा प्रसङ्गेन ङीपोप्रसङ्गादनभिधानं निर्मूलं व्यर्थं चेति चेन्न। दीर्घादप्यूङो विधानेनानभिधानस्य तदभिप्रायकत्वोपपत्तेः। अत्रोपसर्जनत्वं न शास्त्रीयं किन्तु लौकिकं पूर्वसूत्रे ऽप्रधानस्योपसर्जनसञ्ज्ञा क्रियते यावद्ब्रूयात्प्रधानादुत्पत्तव्यमप्रधानान्नेति तावदित्यनुपसर्जनादिति प्रकृतसूत्रस्थभाष्यात्। ननु पञ्चगवधन इत्यत्र द्विगोरिति टिड्ढेति वा ङीप् स्यात्। वक्ष्यमाणदिशा टित्त्वस्याप्रत्ययवृत्तित्वेन प्रत्ययग्रहणपरिभाषाया अप्रवृत्तावपि अवयवे टित्त्वस्याचारितार्थ्येन समुदायोपकारकत्वावश्यंभावात्। स्पष्टा चेयं रीतिरनुपसर्जनादित्यत्र कैयटे इत्यत आह। पञ्चेति। आपिशलिनेति। इञश्चेत्यण् ततोऽध्येत्र्यां तदधीत

इत्यण् तस्य प्रोक्ताल्लुगिति लुक् । अध्येत्रणुल्लुप्तइति । अतस्तन्निमित्तको न ङीबिति वाक्यशेषः । ननु तस्य लुप्तत्वे प्रत्ययलक्षणेन तमाश्रित्य ङीब् दुर्वार इत्याशङ्क्याह । अण्योऽकार इति । तदण्निमित्तकस्येति । प्रोक्ताण्निमित्तकस्येत्यर्थः । तदणः । प्रोक्ताणः । एनत्स्त्रीत्वे । अध्येतृस्त्रीत्वे । अतएवेति । वर्णाश्रये प्रत्ययलक्षणाभावादेवेत्यर्थः । नङीबिति । अध्येत्रणमाश्रित्येति शेषः । तदन्तविधिं विनेति । ननु ग्रहणवतेति निषेधः स्वरूपेणोच्चारिते प्रातिपदिक एव नान्यत्र टितस्त्वतथात्वादुक्तनिषेधाप्रवृत्तौ तदन्तविधिः सुलभ एवेति चेन्न । ग्रहणमुपादानमात्रं न तु स्वरूपेणेत्युगितश्चेति सूत्रे कैयटेनोक्तेः । अत एव ऋष्यन्धकवृष्णिकुरुभ्यश्च वृद्धाच्छ इत्यादौ न तदन्तविधिः । सदुर्लभइति । अणन्तस्य गृह्यमाणत्वन्तूक्तदिशा बोध्यम् । अनन्वयापत्तेरिति । ननु एरपत्यं स्त्री ई इत्यत्राण्रूपं प्रातिपदिकं संभवत्येवेति चेत्सत्यम् । द्वयसजाद्यंशे तन्मात्रस्य प्रातिपदिकत्वासंभवेन तदन्तविधौ तत्साहचर्येण तदंशेपि स इत्याशयात् । निष्कृष्यैकार्थीभाव इति । ययोर्वृत्तिस्तन्मात्रवृत्त्येकार्थीभाव इत्यर्थः । अप्रातिपदिकत्वाच्चेति । नन्वेवं कदाचित्ततोपि ढकीति पूर्वग्रन्थासङ्गतिरिति चेन्न । कर्मण्यणि यस्य टिड्ढाणञित्यत्रोपस्थितिसामर्थ्येनाप्रातिपदिकत्वेपि ततो ङीबिति पूर्वग्रन्थाशयात् । तदन्तविधौ तु संप्रति कुम्भकारीतिसमुदायं प्रातिपदिकमादाय तदुपस्थितिचारितार्थ्ये सामर्थ्यविरहः । कर्मण्यणित्येव सिद्धे शीलिकामीति णविधानेनाप्रातिपदिकत्वेपि ङीपः प्रवृत्तिरित्याशयः । उद्योतेविस्तरइति । अन्ये तु अतिधीवरी प्रियपञ्चेत्यादावुगितश्च वनोरच न षडित्यत्यादिविधिप्रतिषेधप्रवृत्तये ऽमहत्पूर्वग्रहणेन स्त्रियामित्यधिकारे तदन्तविधेर्ज्ञापितत्वान्न तदर्थमनुपसर्जनाधिकारः । किञ्चानुपसर्जनाधिकारेण तदन्तविधिज्ञापनात्प्रागप्यणन्तात्प्रातिपदिकादित्यर्थस्त्वयाङ्गीकृतस्तथाचापिशला ब्राह्मणीत्यत्र प्रोक्ताणमादाय ङीब्वारणायानुपसर्जनाधिकार आवश्यक इति न तस्य तदन्तविधिज्ञापकता । अतिमहतीत्याद्यर्थं स्त्रियामित्यस्य प्रकृतिविशेषणनिर्णयेन प्रोक्ताणः स्त्रियामवृत्तावपि तदन्तस्य स्त्रियां वृत्तेः । ननु स्त्रियामित्यस्य प्रकृतिविशेषणत्वमप्यनुपसर्जनाधिकारज्ञाप्यमेवेति चेन्न । तदन्तविधिज्ञापकत्वमिच्छतोप्येतज्ज्ञापनं विना वैयर्थ्यानुद्धारेणावश्यकत्वात्स्त्रियामित्यस्य प्रकृतिविशेषणत्वे ज्ञापिते उक्तस्थले ङीब्वारणाय चारितार्थ्येन तदन्तविधिज्ञापकत्वासंभवः । अनुपसर्जनाधिकारस्थेषु

तदन्तविधेरुपयोगाभावश्च । ननु तत्प्रयोजनं कुम्भकारेय इत्यस्य पाक्षिकस्य वारणमिति चेन्न । अनुपसर्जने स्त्रीप्रत्यय इत्यनेन तदादिविधिप्रतिषेधेन तत्रापि पाक्षिकानिष्टप्रसङ्गस्य दुर्वारत्वात् । अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनेति दूषणं तत्रापि समम् । कर्मण्यणित्यस्यात्रोपस्थितौ मानाभावः । तदादिनियमाभावेनाधिकस्य कार्यम्बोध्यते न न्यूनस्येत्यपि निर्मूलं किञ्च शीलिकामीति ज्ञापकाश्रयणेन कथञ्चिदुक्तप्रतिबन्दीवारणसंभवेपि काष्ठाश्रिताया अपत्यं काष्ठश्रैतेय इति प्रयोगवारणाय निष्कृष्यैकार्थीभाव एव प्रायेण वृत्तिनिमित्तम् । भाष्यादिप्रामाण्यात्तु क्वचित्तदभावेपि तद्धितादिः । किञ्च स्त्रीभ्यो ढगित्यत्र स्त्रीवाचकानां ग्रहणमिति त्वदुक्तदिशा सर्वमिदं गजस्नानसमम् । तस्मादापिशलेत्यादौ ङीब् वारणमेवानुपसर्जनाधिकारप्रयोजनम् । तदुक्तमत्र सूत्रे भाष्ये आपिशलमधीते आपिशला ब्राह्मणीत्यत्र ङीब् माभूदित्ययमधिकार इति । इदं तर्हि प्रयोजनं प्रधानेन तदन्तविधिर्यथा स्यात् कुम्भकारी अत्र हि प्रत्ययग्रहणे इति परिभाषया ऽवयवादुत्पत्तिः प्राप्नोतीत्येतत्सूत्रस्थं भाष्यमनुपसर्जनादित्येषयोगः प्रत्याख्यायत इति सर्वादिसूत्रस्थ भाष्यञ्चैकदेश्युक्तिरुक्तबाधकबलादिति सुधियो विभावयन्त्वित्याहुः । प्रयोजनाभावादित्यादिनेति । ननु भविषीष्टेत्यत्र भाष्यमते गुणापत्तिरिति चेदत्र केचित् । भूसुवोरिति सूत्रे तिङः सार्वधात्विति विशेषणादार्धधातुके लिङि गुणनिषेधो नेत्याहुः । अन्ये तु गाङो ङित्त्वेन न ङिदादेशानां ङित्वमिति ज्ञाप्यते तेन भविषीष्टेत्यत्र न दोषः । उक्तज्ञापकेनैवाचिनवमित्यादि सिद्धौ पिच्च ङिन्नेति तु भवन्तीत्यादौ शपः सार्वधातुकमिति प्राप्तङित्वनिषेधार्थमित्याहुस्तन्न । गाङो ङित्त्वस्य गाङ्कुटेति सूत्रे विशेषणार्थत्वात् । तत्फलमिणो गादेशे कर्मणि लुङि अगासातां ग्रामो देवदत्तेनेत्यत्राङित्त्वान्नेत्त्वम् । न ल्यपीति धर्मिग्राहकमानाच्छादेशभिन्नमेवानुबन्धकार्यं स्थानिवद्भावेन । तेन भविषीष्ट वक्ष्यमाणेत्यादौ न दोष इत्यन्ये । ननु निरनुबन्धकपरिभाषया ढग्रहणे ढकोग्रहणं न स्यादित्याशङ्क्याह । निरनुबन्धकस्येति । शिलाया ढश्छन्दसीत्यादेः । स्पष्टंचेदंभाष्येइति । निरनुबन्धकस्येत्याद्युक्तमित्यर्थः । ननु स्वरे विशेषः ङीपोप्युदात्तनिवृत्तिस्वरेणोदात्तत्वादित्याशङ्क्याह । एतौहीति । उपरञ्जकतयेति । इष्ठनि इत्सञ्ज्ञावारणायात्राप्यादिरित्यावश्यकमित्यन्ये । द्विवर्षभूतेति । तेनेति शेषः । अपरिमाणेत्यत्र परिच्छेदकमात्रस्याग्रहणेन पारिभाषिकपरिमाणस्यैव ग्रहणेन चेति तस्यार्थः । वर्ष-

शब्दः संवत्सरवाच्यदन्तो नपुंसकः तस्माठ्ठञो वर्षाल्लुक् च चित्तवति नित्य मिति विहितस्य लुक्। ननु विस्तशब्दस्येयत्ताविशिष्टसुवर्णपरत्वात्तस्य च विकल्स्यसंभवात्पचतीत्यनुपपन्नमित्याशङ्क्याह । पचेरिति । अत्रोन्मानत्वादिति । नन्वार्हादगोपुच्छेति सूत्रे परिमाणशब्देन पारिभाषिकपरिमाणग्रहणेपि उन्मानस्यापि ग्रहणमिति स्वेन वक्ष्यमाणत्वादसंगतमेतदिति चेन्न । नव्यविवरणे आर्हादिति सूत्रे परिमाणशब्देनोन्मानस्य न ग्रहणमिति पक्षान्तरस्याप्युक्तत्वेन तद्रीत्यैतद्ग्रन्थसत्त्वात् । पुरुषस्येति । प्रञ्चारत्निः पुरुष इति वचनादिति भावः । उन्मानशब्देन तुलायामारोप्य यन्मीयते तदूर्ध्वाधरदिगवस्थितवस्तु परिच्छेदकं चेत्युभयमपि गृह्यत इति भावः । लोकव्यवहारादिति । द्विपुरुषी परिखेति लोकव्यवहारादित्यर्थः । उत्तरसूत्रानुरोधादिति । संख्यायाः संज्ञेत्युत्तरसूत्रानुरोधादित्यर्थः । संख्या हि न पारिभाषिकपरिमाणम् । बहुव्रीहेरूधसः । नन्वनङ्ङीषोः समानविषयकत्वेन पर्यायेण तयोः प्रवृत्त्या ङीष् पक्षे नानङिति कथं डाम्ङीप् निषेधेषु प्रातेष्विति ग्रन्थः संगच्छतामित्यत आह । समासान्तानामिति । तथा च पूर्वमनङ् पश्चान्ङीषिति नानयोः पर्याय इति डाप् ङीबिति मूलं युक्तमिति भावः । बहुव्रीहेःकिमिति । ऊधश्शब्दस्य नपुंसकत्वात्केवलात्तदन्तादुत्तरपदार्थप्रधानात्तत्पुरुषाच्च न ङीष् । अत्यूधःशब्दस्य स्त्रियां वृत्तावपि ततः संख्याव्ययादेरिति ङीपा भवितव्यं तथा च बहुव्रीहेरित्यनुक्तावपि त एत एव पर्यवस्यन्तीति भावः । प्राप्तोधा इति । अत्यूधा इतीति तूत्तरस्यबहुव्रीहिग्रहणप्रत्युदाहरणमित्युपेक्षितम् । यद्यपि भ्रोङीषिति सुवचं तथाप्युत्तरार्थं बहुव्रीहिग्रहणम् । लक्षणान्तरसिद्धमिति । दामहायनान्ताच्चेति सूत्रसिद्धमित्यर्थः । घृतादित्वादिति । अयं विचारः प्रासङ्गिकः । ननु सुमङ्गलीरित्यत्र हल्ङ्यादिसूत्रेण लोपेन भवितव्यमित्याशङ्क्याह । ईप्रत्ययइति । छन्दसीवनिपावित्यनेन । विभाषासपू । यद्यप्यमहत्पूर्वग्रहणेन स्त्रियामित्यधिकारे तदन्तविधिज्ञापनेन सपूर्वस्येत्यनुक्तावपि तस्य नत्वं सिद्ध्यति तथापि असति तस्मिन्ननुपसर्जनादिति पत्युर्विशेषणं स्यात् तस्य गृह्यमाणविशेषणत्वनियमात्तथाच दृढपत्नीति बहुव्रीहौ न स्यादतः सपूर्वग्रहणम् । सपूर्वस्येत्युक्तौ तु तस्यैव विशेषणं गृह्यमाणत्वात् । फलान्तरमपि मूले स्पष्टीभविष्यति । किं पूर्वावयवोऽर्थवानेव उतानर्थकोपि नाद्य इत्याह । विद्यमानपूर्वावयवत्वेति । नान्त्यइत्याह । अव्यभिचाराच्चेति । अमहत्पूर्वग्रहणेन ग्रहणवतेति निषेधस्यात्र प्रकरणे प्रवृत्त्यभावज्ञापनात्प्रत्ययविधाना-

भावाच्चेत्यपि बोध्यम् । इत्यन्येइति । वस्तुतस्तु बहुवृषलपतिरिति बहुव्रीहेरपि पत्यन्तत्वात्तस्य चानुपसर्जनत्वादत्रापि नकारो भवत्येव । ननु मूले व्यस्ते कथमित्युक्त्या समस्ते वृषलपत्नीत्यादौ नत्वानुपपत्तिशङ्कानेति लभ्यते तच्चासंगतम् । विभाषेति सूत्रे यज्ञसंयोग इत्यनुवृत्त्या वृषलस्य यज्ञानधिकारेण तत्राप्यनुपपत्तिशङ्कातादवस्थ्यादित्याशङ्क्याह । नसंबध्यतइति । अत्र प्रमाणमाह । भाष्येइति । वृषलस्य पतिरिति । वृषलकर्तृकसुकृतस्वामिनीत्यर्थः । ननु सपूर्वस्य किं गवां पतिरिति मूलमसंगतम् । सपूर्वस्येत्युक्तावप्येतद्दोषतादवस्थ्यात् । गवामित्यस्य पूर्वोच्चारितस्य सत्त्वादित्याशङ्क्याह । अवयववाचीति । तेन । निपातेन । तत्रेत्यर्थ इति । तत्र सूत्रे इत्यर्थः । तेनेति । तत्र सर्वत्रेत्यङ्गीकारेणेत्यर्थः । आद्ये नक्षत्रेण युक्त इत्यण् । द्वितीये संधिवेलेत्यण् । तस्य विकार इत्यणि तु नेदम् । प्रतिपदोक्तपरिभाषया नक्षत्रपदघटित शास्त्रेण विहिताण एव ग्रहणात् । इत्यपरइति । इदमेव युक्तम् । विधित्वानुरोधादिति । मुख्यार्थकैतत्प्रवृत्तौ तत्र जातेरस्त्रीत्यनेन सिद्धौ नागग्रहणस्य नियमार्थत्वं वाच्यं स्यादिति भावः । गौरित्यर्थे इति । वृत्तिमते त्वत्र नीलीत्येव । प्रतिपदोक्तपरिभाषायास्तेन प्रवृत्त्यनङ्गीकारादिति बोध्यम् । नखरूपादीनामिति । उवर्णान्तत्वाभावेन ङीषोऽप्रवृत्तावपि गुणवचनेति ष्पङ्वारणायैषां गुणवचनत्वं नेष्यत इति बोध्यम् । ऐक्यामित्यत्र ब्राह्मणादित्वात्ष्यञ् । शुक्लातित्विति । इदमप्ययुक्तम् । खरुसंयोगोपेति निषेधात् । पीतेत्युचितम् । पुंयोगादा । पुंस्येवयःप्रसिद्धइति । ननु शूद्रादिशब्देभ्यो वस्तुतः शूद्रत्वविशिष्टायां शूद्रस्य स्त्रीत्येवं रूपेण विवक्षितायां ङीप् न प्राप्नोतीति चेन्नेष्यत एवात्र ङीष् । चतुर्भिः प्रकारैरतास्मिन्त्स इत्येतद्भवति । तात्स्थ्यात् ताद्धर्म्यात्तत्सामीप्यात्तत्साहचर्यादेति प्रकृतभूत्रस्थभाष्यादिति केचित् । अन्ये त्वथवा पुनरस्तु तस्यामेव प्रवृत्तशब्दइति तदुत्तरभाष्यादुक्तविषयेपि ङीषिष्यते । वस्तुतस्तु जातिमत्त्वेपि शूद्रस्य स्त्रीत्येवं रूपेण विवक्षिता न तु शूद्रत्वजातिमत्त्वेनेति न ततष्टाप् । सर्वत्र शक्यतावच्छेदकारोप एव लक्षणेति न नियमः । सतिसंभवे शक्यतावच्छेदकारोपो लक्षणेति नाग्नेयः स्थालीपाक इत्यत्र पुंवद्भावानापत्तिरित्याहुः । गौरादिषु बोध्यमिति । देवकदुहितेत्यर्थे तेन ङीषोऽविधानादसंगतमेतत् । तन्निषेधस्य । तृजकाभ्यां कर्तरीति निषेधस्य । नियमार्थमिति । पदस्यादिरिति विग्रहे सुबुत्पत्तेः प्राक् समासान्स्थशब्दस्यापदत्वात्षत्वनिषेधस्य सात्पदाद्योरित्यनेन सिद्धत्वात् ।

इति श्रीमद्राघवेन्द्राचार्यार्यकृते विषम्याख्ये लघुशब्देन्दुशेखरव्याख्याने स्त्रीप्रत्ययप्रकरणम् ॥

क्रियायोगएवेति ॥ प्रायेणेति शेषः । तेन पचतिरूपादिभ्योऽग्रेनणादिभ्यश्च प्रथमा सिद्धिः । नन्वेवं 'त्रयः काला' इत्यादौ प्रथमा न स्यात् सन्तीत्यध्याहारस्यासंभवादिति चेन्न । ज्ञायन्ते इत्यध्याहारसंभवात् । ननु मञ्चाः क्रोशन्तीत्यादौ प्रथमा न स्याल्लक्ष्यार्थस्यानियतोपस्थितिकत्वादित्याशङ्क्याह । पदएवेति ॥ अत्र समाधानान्तरमाह । शक्यतावच्छेदकेति ॥ तथा च प्रातिपदिकस्य लक्षणायामपि लक्ष्यार्थस्य नियतोपस्थितिकत्वं सुलभमिति भावः । अत एवाग्नायी देवतास्य स्थालीपाकस्याग्नेय इत्यत्र भस्याढे इति पुंवत्त्वसिद्धिः । लक्ष्या संग्रहः ॥ लक्षणास्थलासंग्रहः । ननु 'वीरः पुरुष' इत्यत्र प्रथमा न स्याद्विशेषणविशेष्यभावस्याधिकस्य सत्त्वेन लिङ्गस्यैवाधिक्याभावादित्याशङ्क्याह । यद्यपीति ॥ प्रथमाप्रवृत्तिरिति ॥ इदं पदसंस्कारपक्षे । इतरसंबन्धेति ॥ न विद्यते भेदो भेदसंसर्गोऽवच्छेदकतया यत्र विशेषणविशेष्यभावे इति अभेदेनेत्यत्र बहुव्रीहिरिति भावः । नसंसर्गइति ॥ संसर्गत्वे नीलो घट इत्यादौ षष्ठ्यापत्तिः । विशेषणविशेष्यभावे तु न षष्ठी, तस्य बोधसामान्यसामग्रीलभ्यत्वेनान्यलभ्यत्वात् । वचनग्रहणाभावे प्रातिपदिकप्रतिपादितसंख्याबोधकवचनस्याप्राप्तिमाह । उक्तार्थानामिति ॥ प्रातिपदिकप्रातिपादितसंख्यान्यसंख्याप्रतिपादकवचनस्याप्यप्राप्तिरित्याह । प्रातिपदिकेति ॥ तदप्राप्तिः ॥ प्रथमाया अप्राप्तिः । न च "न केवला" इति न्यायविरोध इति वाच्यम् । इदानीं तदननुसंधानात् । ननु वचनग्रहणे कृतेपि द्व्यादिभ्य एकवचनाद्यापत्तिर्वचनशब्दस्य संख्यामात्रबोधकत्वादित्याशङ्क्याह । अनन्वितार्थकेति ॥ द्व्यादिभ्यइति ॥ एकशब्दस्तु नोपात्तः । औत्सर्गिकैकवचनेनैव सिद्धेरिति भावः । सर्वविभक्तीति ॥ वचनत्रयात्मकविभक्तीत्यर्थः । तद्धितश्चासर्वविभक्तिरितिवत् । अतएवलिङ्गेति ॥ प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्ततदाश्रयमात्रग्रहणादेवेत्यर्थः । नमानमिति ॥ प्रत्युत हर्यादिशब्देभ्यो नानार्थेभ्यः प्रथमा न स्यादिति बोध्यम् । तस्य ॥ परिच्छेद्यस्य ॥ अनेकत्वेन ॥ अनेकविधत्वेन ॥ तद्वदिति ॥ शक्यार्थमादाय प्रथमां कृत्वा पश्चाल्लक्षणेत्युक्तदिशेत्यर्थः । संख्यावाक्येति ॥ द्व्येकयोर्द्विवचनैकवचन

इति वाक्येऽस्यर्थः । एतेन "एको द्वावित्यादौ वचनग्रहणाभावेऽप्युक्तार्थानामिति न्यायेन प्रथमा न स्यादिति न युक्तमेकमित्यादौ तन्न्यायेन द्वितीयाद्यनापत्तेः। संख्या विभक्त्यर्थ इति पक्षे ऽनभिहित इत्यस्यारम्भ इत्याकरे उक्तत्वेन तत्पक्षे सूत्रजबोधे संख्यायाः प्राधान्येनोक्तार्थानामिति न्यायस्य निर्बाधत्वात् । न च संख्यामात्रस्य प्रातिपदिकेनोक्तत्वेपि कर्मत्वादिबोधनाय द्वितीयेति वाच्यम् । एको द्वावित्यादावपि आश्रयपुंस्त्वादिबोधनाय प्रथमेति सुवचत्वात् । तस्य प्रातिपदिकेनोक्तत्वं तु न प्रथमाप्रवृत्तिप्रतिबन्धक" इति हरिदीक्षितोक्तमपास्तम् । अत्र केचित्– प्रातिपदिकेत्यादि सूत्राणि अर्थविधायकानि स्वादिसूत्रेणैकवाक्यतया प्रातिपदिकार्थादिषु प्रथमाविधायकानीत्येकः पक्षः, स्वादिसूत्रेण विहितानां नियामकानीत्यपरः पक्षः । तत्रापि द्वौ पन्थानौ । अर्थनियमः प्रत्ययनियमश्चेति । तत्र प्रातिपदिकार्थ एव प्रथमा, कर्मण्येव द्वितीयेति प्रत्ययनियमः । अन्यत्र प्रथमा न इति प्रत्ययस्यैवार्थान्तरे व्यावृत्तिपर्यवसानात् । तदाहुः– यत एवकारस्ततोऽन्यत्र नियम—इत्यभियुक्ताः । प्रातिपदिकार्थे प्रथमैवेत्यादिरर्थनियमः । उक्तयुक्तेः। तत्र प्रातिपदिकार्थ एव प्रथमेति प्रत्ययनियमपक्षे मात्रग्रहणं व्यर्थं नियमशरीरेणैव मात्रशब्दार्थलाभात् । अर्थनियमपक्षेपि मात्रग्रहणंव्यर्थं कर्मणि द्वितीयैवेत्यादिनियमेन कर्मत्वाद्याधिक्येन प्रथमाया व्यावृत्तिसिद्धेरित्याहुः । तत्र पक्षान्तरे मात्रग्रहणस्यानावश्यकत्वेपि प्रत्ययनियमपक्षे तस्यावश्यकत्वमाह । मात्रग्रहणाभावइति ॥ अपादानत्वादिबोधेपीति ॥ दुहेर्य्यापारद्वयार्थकत्वेऽपादानत्व-कर्मत्वोभयप्राप्तौ परत्वात्कर्मत्वम् । तदुक्तं भाष्ये "अपादानमुत्तराणि कारकाणि बाधन्त" इति । नियमाकार इति ॥ यथेति शेषः। ननु मात्रग्रहणे कृतेपि प्रातिपदिकार्थमात्रे सत्येव प्रथमेति नियमाकारपर्यवसानेनोक्तदोषतादवस्थ्यमित्याशङ्क्याह । तत्सत्वेत्विति ॥ मात्रग्रहणसत्त्वे त्वित्यर्थः । कर्मादियोग्येति ॥ यथा अवन्त्यैवेत्यत्र व्यवच्छेद्यसंबन्धयोग्यस्यैव व्यावृत्तिस्तथा मात्रग्रहणव्यवच्छेद्यकर्मादियोग्यार्थकस्यैव व्यावृत्तिर्मात्रग्रहणसत्त्वे इति भावः । संबोधने च ॥ प्रवृत्तिनिवृत्तीति ॥ निवृत्तेरुदाहरणं– हे चैत्र अग्रे व्याघ्रोऽस्तीति निवर्तस्वेत्यध्याहारः । तस्यासंभवादिति ॥ तेन रूपेण संबोधनासंभवादित्यर्थः । उद्देश्यतयेति ॥ स्वोद्देश्यकप्रवर्तनाविषयतयेत्यर्थः । व्यवस्थयेति ॥ राजत्वस्या-

सिद्धावाद्यः, सिद्धौ च द्वितीयः प्रयोग इत्यर्थः । अभिमुखीमवदिति ॥ अयं भावः । अभिमुखीकरणमभिमुखीभवनानुकूलो व्यापारस्तत्र विशेष्यभूतव्यापारस्याविवक्षयाभिमुखीभवनमेव विभक्तिद्योत्यं, विशेषणविशेष्यभावव्यत्यासेनाभिमुखीकरणप्रयोज्यमभिमुखीभवनं विभक्तिद्योत्यं ष। तच्च प्रकृत्यर्थविशेषणं प्रकृत्यर्थश्च स्वोद्देश्यकप्रवर्तनाविषयत्वसंबन्धेन रक्षगे विशेषणमिति । ननु व्रजानि देवदत्तेत्यत्र व्रजने देवदत्तस्य प्रवृत्तिनिवृत्त्योरभावात्तत्फलं प्रवृत्ति-निवृत्ति इत्यसङ्गतमत आह । जानीहीत्यादिः ॥ शेषइति ॥ शेषशब्दार्थो नाध्याहारः किं तु वाक्यैकदेशन्यायेन श्रूयमाणस्य तदर्थान्तर्भावेण वृत्तिः । तेन 'श्रूयमाणैकतिङित्यर्थ' इति वक्ष्यमाणग्रन्थेन न विरोधः । उद्देश्यविधेयभावइति ॥ स्वोद्देश्यकप्रवर्तना (प्रेरणा) विषयत्वमित्यर्थः । प्राचीनमते तु देवदत्तनिष्ठं यदभिमुखीभवनं तदनुकूलव्यापारविषयीभूतं व्रजनमिति बोधः । संबोधनं च विभक्तिवाच्यम् । जानीहीत्यस्य न शेषः । तत्फलं प्रवृत्तिनिवृत्ति इत्यपि तन्मते नास्ति । न चैवं सति देवदत्तयज्ञदत्तविष्णुमित्रास्त्वं पचेति प्रयोगापत्तिः, संबोध्यैकदेशस्य युष्मच्छब्देन परामर्शानङ्गीकारात्तथैव व्युत्पत्तेरिति बोध्यम् । व्रजानीत्यत्र विध्यादेरसंभवात्कथं लोडित्याशङ्क्याह । प्राप्तकाल इति ॥ अतएवेति ॥ विधेयभूतक्रियायामेवान्वयादेवेत्यर्थः ॥ इति प्रथमा ॥

क्रियायाइति ॥ साध्यत्वेन भानात्साधनाकाङ्क्षेति भावः । ननु क्रियाशब्दस्य प्रधानक्रियायां मुख्यत्वेन कर्मादिकारकाणां तदनिवर्तकत्वेन कथं कारकत्वमित्यत आह । सर्वेषां चेति । ननु जनिष्यमाणपुत्राय गां दास्यामीत्यादौ कथं संप्रदानत्वं तस्येदानीमसन्निहितत्वेन कारकत्वासंभवादित्यत आह । असंनिहितेति ॥ स्वज्ञानपूर्वकालत्वेनेति । स्वज्ञानस्य पूर्वकालवृत्तित्वेनेत्यर्थः । ननु पुत्रेणेव स्वज्ञानेन तस्यान्यथासिद्धत्वमिति चेन्न । ज्ञानस्य संप्रदानत्वासंभवेन ततोऽस्य विशेषात् । फलस्यापीति ॥ वस्तुतस्तोकेन पचति,ज्योतिष्टोमेन यजेतेत्यादौ भावनाभाव्यतृप्तिस्वर्गादिनिवर्तकत्वेन करणत्वस्येव स्तोकं पचतीत्यादौ फलस्यभावनाजनकत्वमुपपादनीयम् । इयांस्तु विशेषः । करणत्वेन विवक्षायां तृतीया, उत्पाद्यत्वेन विवक्षायां द्वितीयेति । अत एव पचतीत्यस्य पाकेन करोति, पाकं करोतीति द्वेधा विवरणं दृश्यते । बौद्धघटादेरिति ॥ तदस्यास्त्यस्मिन्निति सूत्रे भा-

व्यकैघटयोर्बौद्धपदार्थानङ्गीकृत्य तत्र शब्दानां शक्तिमभ्युपेत्य तत्साद्दश्याद्बाह्यप-दार्थेषु घटादिशब्दप्रयोग इति सविस्तरं निरूपितम् । बौद्धइति ॥ स्मृतिं प्रति ज्ञानद्वारा जनकत्वायोगादेवमुक्तम् । पूर्वकालत्वेन ॥ अव्यवहितपूर्वकालस्थत्वेन । सत्कार्यवादे तु न कश्चिद्दोष इति बोध्यम् । कर्तुरीप्सिततमं कर्म ॥ नाभिप्रेतपरइ-ति ॥ कोशे अभीष्टेऽभीप्सितमिति अभिपूर्वस्यैव तत्र रूढत्वात् । कर्तरिषष्ठीति ॥ ननु प्रकृत्यर्थकर्तुः प्रत्ययार्थकर्तरि कथमभेदान्वयो घटो घट इतिवदिति चेन्न । हरिं भजतीत्यादिप्रयोगे समवायिधात्वर्थकर्तुः प्रकृत्यर्थत्वेनाप्नोतिकर्तुः षष्ठ्यर्थत्वे-न तयोर्भेदात् । सन्नन्तादिति ॥ ग्राममाप्नोतीत्यादावाप्नोतेः संबन्धानुकूलव्यापारे शक्तत्वेन तमादायेच्छायाः समानकर्तृत्वं बोध्यम् । ईप्सितमित्यत्र तु विपक्षित-स्तण्डुल इत्यादाविव व्यापारजन्यफलसंबन्ध आप्नोत्यर्थः । अत्रसंबन्धइति ॥ फ-लसंबन्ध इत्यर्थः । योग्यत्वाद्व्याख्यानाच्च । व्यपदेशिवद्भावेनेति ॥ वस्तुत उत्प-त्तिरूपफलाश्रयत्वात्कर्मत्वं पाकं करोतीति विवरणदर्शनात् । कर्मत्वसिद्धिरिति ॥ ननु प्रथमयापि रूपसिद्धिरिति चेन्न । तथा सति 'सपूर्वायाः प्रथमाया' इति वि-कल्पापत्तेः । सकृल्त्वावित्यत्र यणनापत्तेश्च । ग्रामेवासइति ॥ संज्ञाद्वयसमावेश-फलमिदम् । व्यापारलाभइति ॥ इदं निष्प्रयोजनम् । अन्यत्रबध्नातीति । न चान्य-त्र बन्धनस्य माषनिष्ठाश्वगलविलाधःसंयोगो न फलमिति वाच्यम् । अरण्यस्थद-ण्डस्येवान्यत्र बन्धनस्यापि स्वरूपयोग्यतारूपफलजनकत्वमित्याशयात् । कर्तृपदा-भावे प्रकृतधात्वर्थव्यापारजन्येत्यर्थालाभेनाश्वनिष्ठभक्षणजन्यो गलविलाधःसंयो-ग इत्यर्थप्रतीतेर्वा । फलाश्रयत्वेनाविवक्षणादिति ॥ तथा च फलाश्रयत्वेन विवक्षा-यां पयो भुङ्क्ते इति, करणत्वेन विवक्षायां पयसा भुङ्क्ते इति व्यवस्थया प्रयो-गद्वयसिद्धेः । अवयवद्वारेति ॥ 'तमब्ग्रहणंकिमिति' यथाश्रुतमूलमसंगतमिति ध्व-नितम् । वारयतीति ॥ इदं स्वार्थणिजन्तम् । फलाश्रयत्वमित्यर्थस्यैवेति ॥ तथा च कर्तुरिति न कर्मणि षष्ठी किं तु संबन्धे । संबन्धश्च स्वनिष्ठव्यापारवाचकधातू-पात्तत्वं तच्च फलान्वयि । 'कर्तरि षष्ठी' इति पूर्वोक्तं तु प्राचामनुरोधेनेति भा-वः । वस्तुतः 'कर्तरि षष्ठी' इति प्राचीनोक्तपरित्यागे न किंचित्फलमग्नेर्माणव-कमित्यत्र दोषदानातिरिक्तमिति तमब्ग्रहणं व्यर्थमेवेति केचित् । ईप्सिततमत्वं चेति ॥ अयं भावः । तमप्प्रत्ययः क्वचित्प्रकृत्यर्थतावच्छेदकगतातिशयबोधको यथा

विद्वत्तम इत्यादौ,' प्रकृते तु प्रकृत्यर्थतावच्छेदकतावच्छेदकीभूतफलसंबन्धनिष्ठप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यत्वरूपातिशयबोधकमिति प्रत्यासत्तिलभ्यमिति। तथा च कर्तुरिति च कर्तव्यम् । प्रयोज्यत्वनिवेशादिति ॥ जन्यत्वनिवेशे तु पयोनिष्ठविभागस्य प्रधानीभूतव्यापारप्रयोज्यत्वेऽपि तदजन्यत्वात्कर्मत्वं न स्यात् । प्रयोज्यत्वं च साक्षात्परम्परासाधारणमिति न काप्यनुपपत्तिरिति भावः । इदं विचार्यते । 'कर्तुराप्यतमं कर्म'इत्येव कुतो न सूत्रितं तथा सति कर्तुरीप्सिततमं, तथायुक्तमिति च सूत्रद्वयं न कर्तव्यं भवति । कर्तृनिष्ठव्यापारप्रयोज्यफलसंबन्धाश्रयत्वं सूत्रार्थः । अग्नेर्माणवकं वारयतीत्यत्र त्वग्नेर्न कर्मत्वं, तन्निष्ठफलसंबन्धस्य कर्तृव्यापाराप्रयोज्यत्वात् । अत्र वदन्ति । काशीं गच्छन् पथि मृत इत्यत्र काश्याः कर्मत्वार्थमीप्सिततममिति । तथा चानीप्सितसंग्रहार्थं तथायुक्तमिति । न हि काश्याः संयोगरूपफलाश्रयत्वमस्ति । एवं तण्डुलं पिपक्षन्मृत इत्यादौ तण्डुलस्य फलसंबन्धानाश्रयत्वेन कर्मत्वानापत्तिः । ईप्सिततममित्युक्तौ तु फलसंबन्धप्रकारेच्छाविषयत्वात्कर्मत्वसिद्धिः । नन्वेवं काशीं न गच्छतीत्यत्र काश्याः कथं कर्मत्वं संयोगप्रकारेच्छाविषयत्वाभावादिति चेन्न । नञ्समभिव्याहारे संयोगाभावानुकूलव्यापारस्यैव गम्यर्थत्वेन संयोगाभावरूपफलाश्रयत्वेन कर्मत्वसिद्धेः । न चैवमग्नेर्माणवकं न वारयतीत्यत्रोक्तदिशा उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारस्य नञ्समभिव्याहारे वारयत्यर्थतयाग्नेः कर्मत्वापत्तिः । दुहियोगे पयस इवाग्नेरपि प्रधानीभूतव्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वादिति वाच्यम् । कर्मत्वलक्षणे प्रधानीभूतव्यापारजन्यत्वस्यैव निवेशेनादोषात् । पयोनिष्ठविभागस्य गोनिष्ठव्यापारजन्यत्वेऽपि गोपनिष्ठव्यापारजन्यत्वस्यापि सत्त्वेन पयसः कर्मत्वसिद्धेः । न चैवं सति घटं जानाति इच्छतीत्यादौ कर्मत्वं न स्यात् स्वविषयीभवनानुकूलव्यापारस्य ज्ञानादिरूपस्य धात्वर्थतया स्वविषयीभवनस्य ज्ञानादिसमकालोत्पत्तिकस्य ज्ञानाद्यजन्यत्वात् । एवमग्नेर्माणवकं वारयतीत्यत्र माणवकस्य कर्मत्वानापत्तिः । उत्तरदेशसंयोगानुकूलव्यापाराभावस्य माणवकनिष्ठस्य प्रागभावरूपस्यानादित्वेन प्रधानीभूतव्यापारजन्यत्वादिति वाच्यम् । अस्तुतर्हि प्रयोज्यत्वनिवेशः । स्वविषयीभवनादेरपि स्वप्रयोज्यत्वस्यानुभवबलेनाङ्गीकारेणाद्ये दोषाभावात् । द्वितीये च कण्टकापसरणाद् दुःखाभाव इत्याद्यनुरोधेन प्रागभावस्यापि प्रयोज्यत्वस्वीकारेणा-

दोषात् । अग्निर्माणवकं न वारयतीत्यत्र तु नञ्समभिव्याहारे उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारः (गच्छन्तं माणवकं दृष्ट्वा तूष्णीं स्थितिरूपः) स च नाग्निसंयोगप्रयोजको माणवकव्यापारेणान्यथासिद्धेः । कारणत्वस्येव प्रयोजकत्वस्याप्यन्यथासिद्धेरङ्गीकारात् । पयोनिष्ठविभागं प्रति तु गोपनिष्ठव्यापारमद्वारीकृत्यैव प्रयोजक इति पयसः कर्मत्वसिद्धिः । कर्तुरीप्सिततममिति सूत्रे कर्तृग्रहणं त्वग्नेर्माणवकं वारयतीत्यत्राग्नेः कर्मत्वाभावाय । अग्निर्माणवकस्येप्सितो न चैत्रस्य । ननु कर्तृग्रहणं व्यापाराश्रयमात्रपरमन्यथा सार्थाद्धीयते इत्यत्र कर्मणिलकारस्य, शत्रूनगमयत्स्वर्गमित्यत्र च स्वर्गे कर्मत्वस्यानापत्तेः । आद्ये सार्थस्यापादानत्वात् । द्वितीये प्रधानानुरोधिकार्यस्य बलवत्त्वेन कर्तॄणां शत्रूणां कर्मत्वात् । तथा च माणवकनिष्ठव्यापारस्य प्रयोज्यसंयोगाश्रयस्याग्नेः कर्मत्वं दुर्वारम् । अथ तद्धातुजन्यबोधे मुख्यविशेष्यव्यापाराश्रयपरं कर्तृपदं तथा सति प्रधानीभूतव्यापारप्रयोज्यत्वार्थकतमब्ग्रहणवैयर्थ्यापत्तेः । प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता इत्यादौ अप्रधानीभूतव्यापाराश्रयेपि कर्तृपदप्रयोगदर्शनेन कारकप्रकरणे कर्तृशब्दस्य व्यापाराश्रयमात्रपरस्यौचित्याच्चेति चेत्सत्यम् । व्यर्थमेव कर्तुरिति, प्रत्याङ्भ्यामित्यादौ कर्तृपदस्य पूर्वस्येत्येतत्संनिधानेन व्यापाराश्रयमात्रवाचित्वेऽपि कर्तुरित्यत्र कर्तृपदं मुख्यव्यापाराश्रयमात्रपरं वेति । तमब्ग्रहणं तु इच्छागतोत्कटत्वबोधकं, तेन पुष्पाणि स्पृहयतीत्यत्र संप्रदानत्वं बाधित्वा परत्वात्कर्मत्वासिद्धिः । उत्कटे च 'शेवन्तिकापुष्पे ममेच्छा, मल्लिकापुष्पे च उत्कटेच्छा' इति अनुभवद्वयासिद्धेः पुष्पेभ्यः स्पृहयतीत्यत्र स्पृहधातुरिच्छामात्रवाची, पुष्पाणि स्पृहयतीत्यत्र फलावच्छिन्नेच्छावाची । स्पृहेरीप्सित इत्यत्र धात्वर्थजन्यफलाश्रयत्वमात्रं विवक्षितं, न तु फलस्य धात्वर्थत्वमाग्रहः । कर्मसंज्ञायां तु यथा लाभस्तथोक्तं शेखरे । वक्ष्यमाणंयन्त्रिर्बीजम् । फलसंबन्धानुकूलव्यापारार्थकस्याप्नोतेः कर्मप्रत्ययसमवधाने व्यापारप्रयोज्यफलसंबन्धार्थकत्वेन कर्मलक्षण इवात्रापि प्रत्यासत्त्या फले प्रकृतधात्वर्थत्वस्य दुर्वारत्वात् । 'तमब्ग्रहणं किमग्नेर्माणवकं वारयती'त्याद्याकरग्रन्थस्तु प्रौढिवादेन प्रवृत्तः । ननु तण्डुलं पचतीत्यत्र घटस्यापि कर्मत्वापत्तिः । तण्डुलो विक्लिन्नो भूयाद् घटश्च भूयादिति समूहालम्बनेच्छामादाय घटस्यापि फलसंबन्धप्रकारेच्छाविषयत्वादिति चेन्नैवम् । फलसंबन्धनिष्ठप्रकारतानिरूपितेच्छीयविशेष्यताश्रयत्वस्य विव-

क्षणेनादोषात् । परे तु सन्ग्रहणं फलाश्रयत्वयोग्यत्वस्य निवेशे तात्पर्यग्राहकमन्यथा भूमिपततपर्णे मध्ये चैत्रेण धृतमित्यत्र भूमेः कर्मत्वानापत्तेः । न हि तत्र भूमिमत्संयुक्ता भूयादिति पर्णस्येच्छा तस्याचेतनत्वात् । योग्यतानिवेशे तु पतनस्य भूमिसंयोगं प्रति स्वरूपयोग्यतारूपजनकत्वाद् भूमेः पतनजन्यसंयोगयोग्यत्वात्कर्मत्वसिद्धिः । तथायुक्तमिति तु अस्यैव प्रपञ्चः । पुष्पाणि स्पृहयतीत्यत्र नव्योक्तरीतिरेवानुसरणीयेत्यलं पल्लवितेनेत्याहुः ॥ शक्तिमानर्थइति ॥ द्योत्योऽर्थ इत्यर्थः । तदर्थइति ॥ वाच्योऽर्थ इत्यर्थः । हरिकर्मकमिति ॥ क्रियाकारकभावसंबन्धेन कर्मत्वशक्तिमद्धरिविशिष्टं भजनमिति बोधः । नियमत्वमिति ॥ ननु कथं नियमत्वं क्रियाकारकभावसंबन्धस्य प्रकृत्यर्थत्वाभावेन तत्र स्वादीनामसिद्धेः । न च सोऽपि प्रकृत्यर्थः, विभक्तिस्तु द्योतिकेति वाच्यम् । तथा सति तस्य विशेषणतापत्तेः । किं च क्रियाकारकभावसंबन्धस्य विभक्तिवाच्यत्वं न तु सूत्राक्षरलभ्यमिति चेन्न । संबन्धस्य सूत्राक्षरालभ्यत्वेपि भाष्यप्रामाण्येन द्वितीयावाच्यत्वाङ्गीकारात् । कर्मत्वशक्तेस्तु प्रकृत्यर्थत्वात्तदंशे नियामकत्वमुपपद्यत एव । द्योतकयोरिति ॥ उपसर्गात्मनेपदयोः । तत्र हि हरिः सेव्यत इत्यत्र द्योतकयोस्तिङ्सुपोः समुच्चये दोषः, पक्तस्तण्डुल इत्यादौ द्योतकवाचकयोः कृत्सुपोः समुच्चये सः । तत्त्वम् ॥ सूत्रजबोधे प्राधान्यम् । दधिअजर्घाइति ॥ ननु व्यति से इत्यत्र प्रत्ययादेव सर्वबोधः । एवमस्य स्त्री ई इत्यादौ प्रत्ययादेव सर्वबोधः । यदि "शिष्यमाणं लुप्यमानार्थाभिधायी"ति न्यायेन तत्र निर्वाह इत्युच्यते तदा प्रकृतेरपि समं, किं च विदा गर्गा इत्यादौ प्रकृतेरेवापत्यार्थवाचित्वदर्शनेन प्रत्ययस्य यञादेरपत्यवाचित्वानापत्तिरिति चेत्सत्यम् । बाहुल्येन धातुप्रातिपदिकाभ्यामेव सुप्तिङर्थबोधेन तयोरेव वाचकत्वम् । व्यति से इत्यादौ तु क्वचिदेव शिष्यमाणद्योतकप्रत्ययात्प्रकृत्यर्थबोध इति विशेष इत्याशयात् । व्यतिसे इत्यस्य नव्यमते ऽसाधुत्वाच्च । प्रातिपदिकार्थस्येति ॥ प्रातिपदिकार्थनिष्ठकर्मत्वादेरित्यर्थः । तेन ॥ कृदादिना । एवं च प्रातिपदिकार्थमात्र इति मात्रग्रहणेन अन्यानभिहितकर्मत्वाद्याधिक्यस्यैव व्यवच्छेदः । न त्वन्याभिहितकर्मत्वाद्याधिक्यस्य । अत्र तार्किकाः— अनाभिहित इति सूत्रं कर्मादेर्विशेष्यत्वे द्वितीयादिरित्यर्थतात्पर्यग्राहकम् । हरिं भजतीत्यत्र कर्मत्वादेर्विशेष्यत्वाद् द्वितीयादिः । कृतः कट इत्यादौ न तथेति न द्वितीयादिरिति— वदन्ति । तत्र हरिः

सेव्यते इत्यादौ। वैयाकरणमते तिङर्थे कर्मादौ प्रथमान्तार्थान्वयेन तस्य विशेष्यत्वाद् द्वितीयाद्यापत्तेः।बोधस्त्विवति॥परिनिष्ठिते प्रयोगे इति शेषः।स्वाश्रयद्वारेति॥स्वविशेष्यद्वारेत्यर्थः। वाच्यतावच्छेदकेति ॥ तच्च रूपं नियमेन क्रियाकाङ्क्षोत्थापकतावच्छेदकवैजात्यम्। तद्भिन्नस्यैवेति॥अत्र मूलं मृग्यम्। एतदेवाभिप्रेत्याह। वस्तुतस्त्विवति॥समयः॥ समाधानम्। नचान्येति ॥ अनन्वितार्थकविभक्त्यपेक्षयाऽनुवादकविभक्तेरेव न्याय्यत्वमिति भावः। षष्ठीवारितैवेति॥ संबन्धस्य प्रातिपदिकार्थत्वेनादोषत्वादिति भावः। अनेनेति॥प्रातिपदिकार्थः संपन्न इत्यनेन। संबन्धस्यैवेति ॥ कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेत्यनुशासनादिति भावः। 'इतिबोध्यमि'त्युत्तरमितीति शेषेण वदन्तीति पूर्वेणान्वयः । इतरकारकाणामिति ॥ देवदत्तेन शत्य इत्यप्रयोगादिति भावः। वृत्तिविग्रहयोः प्राप्तिकर्त्रेति ॥ प्राप्त आनन्दो यमिति विग्रहवाक्ये यच्छब्दार्थो विशेष्यो द्वितीयार्थो विशेषणं व्युत्पत्तिवैचित्र्यात् । द्वितीयार्थे च कर्मत्वे आनन्दपदार्थस्य निरूपितत्वसंबन्धेनान्वयो व्युत्पत्तिवैचित्र्यात्। शब्दादिति॥प्राप्तिक्रियायाः शब्दतः साक्षात् कर्मण्यनन्वयादानन्दस्यैव तत्रान्वयादिति भावः। अधिकरणसप्तमीस्थले तु साक्षात् क्रियान्वयाभावेपि कारकत्वं भाष्यप्रामाण्यादिति बोध्यम् । परे तु– शत्य इत्यत्र साध्यत्वेन क्रियादेर्भानाभावेपि कर्मत्वस्य तन्निरूपितत्वे बाधकाभावः। न च कर्तुरीप्सिततमेत्यत्र कारकाधिकारात् क्रियाजनकत्वसमानाधिकरणं कर्मत्वं साध्यत्वेन क्रियाभानमन्तरा न संभवतीति वाच्यम् । विशेषणतया भासमानस्य कर्मत्वादेः साध्यत्वेन भासमानक्रियापेक्षत्वेपि विशेष्यतयाभासमानस्य तस्य तेन रूपेण क्रियाभानमन्तरेणाप्युपपत्तेः। 'समानार्थभङ्ग'इत्यप्ययुक्तम्। तावतामर्थानां संभवेनैतत्त्वोपपत्तेः। अत एव वैयाकरणनये पाचक इत्यस्य पचतीति विवरणं सङ्गच्छते। 'सामानाधिकरण्यस्य हानि'रित्यप्ययुक्तम्। एकार्थीभावकल्पनातः पूर्वं स्थितस्य तस्योपजीव्यत्वात् । एतेन 'किं चे'त्याद्यपास्तम्। 'शब्दात् कर्मादेरि'त्यप्ययुक्तम्। शब्दतः क्रियान्वयित्वस्य कारकत्वप्रयोजकत्वे मानाभावाद् इत्याहुः ॥ 'उद्भूतशक्तित्वेन चे'ति पाठः। अतएवगतीति ॥ विभक्तिवाच्यतावच्छेदकरूपेण कर्मत्वादिशक्तेः सर्वत्र भानाभावादेव। तस्यकर्मत्वस्येति ॥ प्राप्तानन्द इत्यादौ भासमानकर्मत्वस्य, विभक्त्यवाच्यकर्मत्वस्येति वार्थः। नक्रियान्वयनियमः ॥ क्रियायां

विशेषणतयान्वयनियमो नेत्यर्थः। क्रियाविशेषणत्वनियमेनेति। प्रातिपदिकार्थद्वारेति शेषः। विभक्तिप्रयोजकरूपेण। विभक्तिप्रवृत्तिप्रयोजकरूपेण। तत्तच्छक्तित्वेन। तत्तच्छक्त्याविष्टत्वेन। भानमिति। शब्दशक्तिस्वभावादिति भावः। अत्र प्रमाणमाह। ध्वनितं चेदमिति। इष्टशब्दसामानाधिकरण्यादिति। यद्यपीदं विग्रहे एव न वृत्तौ, तथापि विग्रहे कर्मत्वविशिष्टवाचिसुबन्तादित्यर्थोऽत्र विवक्षित इति भावः। तद्वाचकशब्देनेति। विग्रहस्थेष्टशब्देन 'इष्यते' इति शब्देन चेत्यर्थः। कर्मत्वविशिष्टबोधकसुबन्तादिति। प्रथमान्तं च न तादृशं सुबन्तमिति भावः। वस्तुतः कर्मत्वाविशिष्टइति। वास्तवकर्मत्वविशिष्ट इत्यर्थः। वाक्येफलंविशेष्यमिति। सति संभवे वृत्तिविग्रहयोरर्थसाम्यं विशेषणविशेष्यभावसाम्यं चापेक्षितमिति भावः। तद्विषयस्य। छेदनस्य। अबोधीति। बुधेः कर्तरि दीपजनेति चिण्। ज्ञानाकारानुकरणमिति। ज्ञानविषयबोधकः शब्द इत्यर्थः। शब्दाभिलप्यमानाकारइति। शब्दजन्यबोधविषयक इत्यर्थः। प्रथमान्तस्येति। प्रथमान्तघटितस्य नारद इतीति शब्दस्येत्यर्थः तथा नारद इतीत्यस्य नारद इत्येतच्छब्दजन्यबोधविषयोर्थः। एवं च विशिष्टार्थस्य कर्मत्वेपि तद्बोधस्याप्रातिपदिकत्वान्न द्वितीयेत्यर्थः। तद्वचनसामर्थ्येनेति। यादृशविभक्त्यन्तेनाव्ययीभावः प्रत्यासत्त्या तद्विभक्त्यर्थे वर्तमानमव्ययमित्यर्थ इति भावः। अभ्रआंअपइति। छान्दसत्वान्नात्राव्ययीभावो निपातएकाजिति न प्रगृह्यत्वं किं त्वनुनासिकविधानसामर्थ्यात्संहिताया अविवक्षणाच्छान्दसत्वाद्वा न सन्धिः। तिङ्कृत्तद्धितसमासैरिति। परिगणनाभावपक्षे आह। किंचेति। अस्यैवार्थस्येति। अधिकरणत्वशक्तेरित्यर्थः। तथायुक्तं चानीप्सितम्। प्रकर्षहीनस्यापीति। प्रधानधात्वर्थाप्रयोज्यस्यापीत्यर्थः। अनवकाशस्स्यादिति। तथा च अग्नेर्माणवकं वारयतीत्यत्र माणवकस्याप्यपादानत्वापत्तिरिति भावः। इदं चिन्त्यम्। तथायुक्तमित्यस्य वारणार्थानामित्यनेन अपवादत्वाद्बाधेपि कर्तुरित्यनेन परत्वात्कर्मत्वोपपत्तेः। न हि तस्याप्यपवादः। प्रकर्षहीने तदप्राप्तेः। तत्त्वाभावादिति। तथायुक्तत्वाभावादित्यर्थः। ननु विभागस्य धात्वर्थत्वाभावे प्रकृतधात्वर्थविभागाश्रयत्वनिबन्धनमपादानत्वमपि प्रयागस्य कथमिति चेन् न। फलतावच्छेदकसम्बन्धेन फलाश्रयत्वं हि कर्मत्वोपयोगि। प्रयागादित्यत्र देवदत्तनिष्ठसमवायस्यैव फलतावच्छेदकसम्बन्धत्वेन प्रयागे तेन सम्बन्धेन फलाभावात्। अकथितं च। तदपवादत्वेनेति। एतदु-

त्तरं कर्तुरित्येतदेकवाक्यतापन्न'कर्मणिद्वितीये'त्यादेरपि तथापत्येति पूरणीयम् । वैयर्थ्यमिति । दुह्याजिति परिगणनमनाश्रित्येदम् । त्वद्रीत्यां तु कर्मत्वेन बोधार्थं सूत्रद्वयस्यावश्यकतया तद्वैयर्थ्यशंकाया असंगतिः । माणवकादपीति । अपि शब्दादग्नेरपादानत्वाविवक्षायामुभयत्र द्वितीया स्यात् ॥ तद्विवक्षायां तूभयत्र पञ्चमी स्यादिति भावः । परास्तमिति । कर्मत्वेत्यंशस्तत्वेनेत्यंशश्चेत्येतद्द्वयमपास्तमित्यर्थः । अतएव । प्रथमांशस्य अपास्तत्वादेव । तदपास्तत्वं त्वग्रे स्फुटीभविष्यति । केचि नु अत एव सम्बन्धार्थकत्वाभावादेव नाशङ्ककितमित्युत्तरं सम्बन्धार्थकत्वं वक्तुमिति शेष इत्याहुः । कर्मयुक्त्वाभावइति । कर्मणो ऽनुपादानात् । तदुपादाने तु तत्रैव नटस्यान्वयेन कारकत्वाभावः । सतिसम्भवइति। अविनीतं विनयमित्यत्र तु असम्भवादनन्तरमिति बोध्यम् । नानेनकर्मत्वमिति । ननु शास्त्रेण माणवकं धर्मं ब्रूत इत्यत्र शास्त्रस्य अकथितं चेत्यनेन कर्मत्वं दुर्वारं शास्त्रस्य धर्मेण प्रतिपाद्यप्रतिपादकभावसम्बन्धसत्त्वादिति चेन्न । तत्तद्धातुयोगे तत्तसम्बन्धविशेषस्यैव कर्मयुक्शब्देन विवक्षितत्वात् । ब्रूञि योगे माणवकस्य धर्मेण स्वविषयकज्ञानेन आश्रयाश्रयिभावसम्बन्ध एव तेन विवक्षितः । एतेन क्षेत्रे धान्यं याचते इत्यत्र क्षेत्रस्य धान्यसंयोगेपि न कर्मत्वम् । स्वस्वामिभावसम्बन्धस्यैव तत्र ग्रहणात् । एतत्सर्वं व्याख्यानतो निर्णेयम् । सम्प्रदानेति । माणवकं धर्मं ब्रूते इति संप्रदानोदाहरणम् । ब्रजमवरूणद्धीति अधिकरणोदाहरणम् । प्रधानकर्मत्वं च गवादीनामिति । इदमकथितसूत्राभावे बोध्यम् । तत्सत्त्वे तु अकथितसूत्रविहितकर्मत्ववत्त्वमेवाप्रधानकर्मत्वं तत्रैव लादयः । गोनिष्ठेति । स च व्यापारो लोकप्रसिद्धः । वृद्ध्याधिसूत्रारूढभाष्यविरोधमाशङ्क्य परिहरति । गर्गाइति । एवमेवेति । व्यापारद्वयार्थकत्वेनैवेत्यर्थः । अतएवेति ॥ परिगणितातिरिक्तानामपि व्यापारद्वयार्थकानां धातूनां सत्वादेवेत्यर्थः । कर्तुश्चकर्मणइति । तद्बोधकान् लादीनाहुरित्यन्वयः । द्विकर्मणामित्यत्र गणनिर्दिष्टानां ग्रहणान्न पुनरुक्तिः । उक्तप्रधानेति । कर्तृप्रत्ययसमभिव्याहारेत्युक्तेत्यर्थः । अनभिधाने बीजमाह । अतएवेति । कर्मसंज्ञैवेत्यनेन अपादानत्वव्यवच्छेदः । विनयेनचेति । अविनीतस्येति शेषः । यद्याचष्टेतदापायेनेति । स्वगतं ज्ञानं स्वस्मात्तत्र गच्छतीति कल्पनया । प्रकृतं । कर्तुरित्यनेन विहितं ।

एकार्थेकत्वेउक्तंवेति । व्याप्नोतीत्यर्थकत्वे प्राप्नोतीति । द्रव्यद्वारैवेति । इदं चिन्त्यम् । कालिकसम्बन्धस्य परिच्छेद्यपरिच्छेदकभावस्य वा साक्षात्सम्बन्धस्य सम्भवात् । पर्यालोच्येति । इदमपि प्रायिकम् । तण्डुलादितात्पर्येणापि मासं तण्डुलं पचतीति प्रयोगात् । तण्डुलादेरचिरेणैव पाकात् । सबहिरङ्गइति । तेन मासमोदनः पच्यते इत्यत्र मासरूपे कर्मणि न लकार इति भावः । तैः । कालादिभिः । कर्मणिभावेचेति । यथा कर्मणि तथा भावेचेत्यर्थः । परे तु कालभावाध्वेति भाष्योक्तवचनस्य युक्तिसिद्धार्थकत्वेपि भाष्योक्तेष्वेव तथा कल्पना नान्यत्र । तथा च सकर्मकविषयेपीत्ययुक्तम् । अकर्मकाणामित्यस्य पूर्वेणाभिसम्बन्धात् । त्वन्मते कालभावाध्वगन्तव्यादेश्च कर्मसंज्ञा इति वक्तव्ये अकर्मकाणामित्यस्य वैयर्थ्यम् । मासमोदनं पचतीत्यत्र तु कालाध्वनोरिति द्वितीया । अत्यन्तसंयोगाविवक्षायां मासस्य द्विरोदनं पचतीत्येव । कालभावाध्वेत्यत्र कालग्रहणं तु मासं द्विशेतेत्यादौ कर्मत्वार्थम् । आस्यते मास इत्यादौ कर्मणि लकारार्थं च । कालाध्वनोरित्यत्र कालग्रहणं तु सकर्मकधातुयोगे द्वितीयार्थम् । प्राप्तमेवैतत्कर्मेति भाष्यं तु एकदेशयुक्तिः । किं च सकर्मकधातुस्थलेपि मासादेः कर्मत्वे आप्नोत्यर्थकर्मण्येव लादयस्स्युः । तस्य प्राधान्यात् । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति वचनात् । ननु सम्बन्धप्रयोजकमासाद्येव मासमास्त इत्यादौ धात्वर्थः । आसनेन व्याप्नोतीति तु फलितार्थकथनमिति चेन्न । एवमपि कुरून् तण्डुलं पचतीति प्रयोगापत्तिः । इष्यते तु कुरुषु तण्डलं पचतीति । कुरवस्तण्डुलं पच्यन्तेति प्रयोगापत्तिश्च । कठिनपाकयस्येति त्वदुक्तयुक्तेरनवतारात् । न चाधाररूपं कर्म बहिरङ्गं रुधेः व्रजरूपे कर्मणि लकारश्च न भवत्येव अप्रधाने दुहादीनामित्युक्तेरिति वाच्यम् । व्यापारद्वयार्थकत्वेन व्रजस्य कर्तुरिति कर्मत्वे पक्षे तत्र लकारानापत्तेः आधारत्वमात्रेण बहिरङ्गत्वस्य निर्बीजत्वाच्चेत्याहुः । गतिबुद्धिप्र । प्रधानुरोधिकार्यस्यसर्वतोबलवत्वादिति । तत्फलं तु मूलकेनोपदंशं भुङ्क्तेत्यत्र मूलकस्य उपदंशक्रियानिरूपितकर्मत्वेपि प्रधानभुजिक्रियानिरूपितकरणत्वनिबन्धनतृतीयासिद्धिः । परत्वात्तत्र तृतीयाया उपपादने तु अस्य फलं मृग्यमिति केचित् । परे तु उपदंशक्रियायां कर्मत्वेन अन्वितस्यैव भोजने करणत्वादन्तरङ्गत्वाद्द्वितीया प्राप्तानेन वार्यते । उभयत्र मूलकस्य शाब्द

एवान्वयः अन्यथा समासानापत्तेः । अत एव कर्तुं शक्यते घट इत्यत्र प्रधानानुरोधिनी प्रथमा । हरिरपि 'शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते' इतीत्याहुः । ननु सुखं प्राप्त इत्यत्र आक्षिप्तगत्यापि गत्यर्थत्वाद् गत्यर्थेति कर्तरि क्तो न स्यादित्याशङ्क्याह । कर्तरिक्तइति । अतएव । आक्षिप्तगत्या गत्यर्थकत्वमित्यस्याभिमानिकत्वादेव । तस्यगत्यर्थत्वमेवेति । परे तु नेतिसूत्रे भाष्ये अप्राप्त हारयति भारं देवदत्त इत्युक्ते नगतीति सूत्रे न वहिर्गत्यर्थ इति भाष्याच्च गत्युपसर्जनप्रापणार्थकस्य आक्षिप्तगत्या गत्यर्थकस्य च न गत्यर्थपदेन ग्रहणं याप्रापणे इत्यत्र तु प्रापणं गतिश्चे गतिबुद्धीति सूत्रे अणावित्यस्य प्रयोजनं निवृत्तपेषणाद्भूमेः ण्यन्ताण्णौ बोध्यमित्याहुः । सामर्थ्यादिति । शब्दाधिक्यादर्थाधिक्यमिति भावः । सामान्यापेक्षमिति । अयमनुक्तोपालंभः । लः कर्मणीति सूत्रे एतद्विरुद्धमनोरमाग्रन्थदर्शनात् । तत्त्वप्रत्यभिज्ञेति । विशेष्यांशत्यागेपि विशेषणांशे स एवात्रार्थ इति प्रत्याभिज्ञयेत्यर्थः । अर्थभेदेनचेति । वहधातोः स्यंदनप्रापणरुपार्थभेदेन शब्दभेद इत्यर्थः । कर्मत्वेनेति । इदं मातुः स्मर्यत इत्याद्यर्थम् । तत्सामर्थ्यादिति । नियमेन सिद्धे ऽकर्मकग्रहणसामर्थ्यादित्यर्थः । अन्यथा कालादेः कर्मसंज्ञाप्रयोजकव्यापारादिरहितेर्थे एव अकर्मकत्वं स्यान् न तु मासमास्यते देवदत्तेनेत्यादौ इति वदन्ति । परे तु इच्छाक्रियतेत्यत्र भावे लः पीता गावो भुक्ता ब्राह्मणा इत्यादौ भावे क्तान्तादर्श आद्यजिति हरदत्तादिग्रन्थात् गतं तिरश्चीनमित्यादिप्रयोगाच्च लः कर्मणीति सूत्रे तयोरेवेति सूत्रे ऽविवक्षितकर्मणामपि अकर्मकपदेन ग्रहणम् । गतं तिरश्चीनमित्यत्र गत्यर्थ इति भावेक्त इत्यन्ये । इह सूत्रे तु अकर्मकपदेन अविवक्षितकर्मकाणां ग्रहणे न मानम् । लावयति केदारं देवदत्त इत्यत्र तु अर्थान्तेर वृत्त्या ऽकर्मकत्वम् नाविवक्षया प्रेषणांशत्यागात् । विशेषणांशे तत्त्वप्रत्यभिज्ञायामपि विशेष्यांशत्यागेनार्थन्तरत्वसम्भवात् । प्रत्युत न च केचित्कालभावाध्वभिरकर्मकाः तदेवं विज्ञास्यामो यत्कर्म भवति न च भवति तेनाकर्मणा न चैत्कर्म क्वचिदपि न भवतीति भाष्याभ्यां अत्यन्ताविद्यमानकर्मकाणामेव गतिबुद्धीति सूत्रे ग्रहणमिति लभ्यते । अन्यथा कालादिकर्मणो ऽविवक्षाया कालादिकर्मराहित्यसम्भवेन तदसङ्गतिः स्पष्टैव । एवं गत्यर्थाकर्मकेतिसूत्रेपि अविवक्षितकर्माणो न गृह्यन्ते । दत्तवान्पक्कवानित्याद्यर्थे दत्तः पक्क इत्याद्यापत्तेः ।

नचैवंउक्तभाष्याभ्यां सकर्मकधातुयोगेपि कालादीनामकर्मकमिति गतं इति वाच्यम् ॥ न च केचिदप्यकर्मकाः कालभावाध्वभिरकर्मका भवन्तीति पूर्वभाष्यस्य न चैतत्कर्मकालादिरूपं कचिदप्यकर्मकेन भवति किं तु सर्वत्राकर्मके भवतीत्युत्तरभाष्यस्य च अर्थाङ्गीकारात् यत्कर्म भवति न च भवतीति भाष्यस्य तु तण्डुलादिरूपं कर्म कचित्सकर्मके भवति कचित्सकर्मके न भवतीति तेनैव कर्मणाऽकर्मकत्वं ग्राह्यम् । न तु कालादिकर्मणा । तस्याकर्मकमात्रे सत्त्वादित्यर्थः । न च कालादिकर्मणां सकर्मकेष्वभावेन तैरेवाकर्मकाः पच्यादयो ऽकर्मकपदेन गृह्यतामिति वाच्यम् । तथा सति गतिबुद्धीति सूत्रे गत्यादिग्रहणवैयर्थ्यापत्तेः । अत एव ओदनादेः सम्बन्धित्वेन विवक्षायां पाचयत्योदनस्य देवदत्तेनेत्यादय एव प्रयोगाः न तु देवदत्त इति वदन्ति । पूर्वकर्मणो ऽविवक्षया भावे क्तः पश्चात्कर्मणो विवक्षाया इति तु कृतपूर्वी कटं अधीती व्याकरणे इत्यादिप्रमितप्रयोग एव न तु सर्वत्र । तेन तथा विवक्षया तण्डुलान्पच्यतेति तण्डुलान्पक्क इति च भावे लकादयो ऽसाधवः । इन्विषयेतु तण्डुलेषु पक्की पक्कपूर्वीतण्डुलमित्यादयः साधव एव । क्तस्येन्विषयस्येति कृतिपूर्वीकटमिति वार्तिकभाष्यप्रयोगाभ्यां तथावगमात् । भ्रान्तं देशमित्यत्र तु गत्यर्थक्तेसाधुत्वं । ओदनस्य पच्यते देवदत्तेनेत्यादौ भावे लकारस्तु साधुरेव । मातुः स्मर्यतेति भाष्यात् । सर्वथा ओदनादेः कर्मणो ऽविवक्षया पच्यते देवदत्तेनेत्यादौ भावे क्तो भवत्येव । इच्छता कियतेत्यत्र भावे ल इति हरदत्तेनोक्तत्वात् । एवं च कर्मणो ऽविवक्षा त्रेधा । सर्वथा तदप्रयोगः सम्बन्धित्वेनाविवक्षया तत्प्रयोगः पूर्वमप्रयोगः पश्चात् प्रयोगश्चेत्याहुः । द्वंद्वेति । वस्तुतः प्रयोगस्याभिनीति समुदायस्यानुकरणं न तु द्वंद्वः नेः पूर्वनिपातापत्तेः । न्यभिविशते सन्मार्गमित्यत्र कर्मत्वापत्तेश्च । अविकृताया इति । अभिनिविशित्यानुपूर्व्याः प्रयोगे तदर्थाधारः कर्मेति सूत्रार्थः । आरोप्येति । अयत्नोन्तरङ्गत्वेन ततः पूर्वं प्रवृत्तेरिति भावः । अत्रेदं बोध्यम् । ऋते द्वितीयेति चान्द्रसूत्रात् पुरुषाराधनमृतेति प्रयोगाच्च ऋते योगे द्वितीयापि साध्वी । एवंचौश्रमेः आत्मोदरकुक्षिष्विति चान्द्रसूत्रात् कति न सन्ति कुक्षंभरा विश्रामहेतुरित्यादिप्रयोगाच्च विश्रामकुक्षिंभरादयः साधवः । एवं गीष्पतिर्धिषणो गुरुः आप्यमम्मयं इत्यादिप्रयोगाद् गीष्पत्यादयो व्याकरणान्तरे साधवो ज्ञेयाः । ये तु

एतद्व्याकरणविरुद्धाः व्याकरणान्तरे साधुत्वेन अनुक्तास्तदपि चुलुयां कुम्भयोनिश्चकारेत्यादयः प्रयोगाः ते त्वसाधव एवेति । अटावन्तमिति । अतरायां पुरीति भाष्यप्रयोगात् स्त्रियामप्यन्तर शब्द इति भावः । तस्यैवेति । अवधित्वस्यैवेत्यर्थः । तेन हलो ऽनन्तरा इति सूत्रे द्वयोश्चैवान्तरेति भाष्यप्रयोगः सङ्गच्छते । उभयमस्तीति । यत्र द्रोणो व्रीहिरस्तीत्युच्यते तत्र खारीव्रीहिरप्यस्त्येव । खार्याः द्रोणव्याप्यत्वादिति भावः । निरूपकमिति । एवं च भक्तो विष्णुं प्रतीत्यत्र निरूपकत्वं द्वितीयार्थः । स्वामीति । तथा च लक्ष्मीर्हरिं प्रतीमत्र स्वामित्वं द्वितीयार्थ इति भावः । भागशब्देन च स्वत्वविशिष्टमुच्यते । यद्यपि स्वत्वं द्वितीयार्थ इत्युक्तावपि न किञ्चिद्बाधकं तथापि लक्षणत्वस्य द्वितीयाप्रकृत्यर्थनिष्ठत्वेन तदनुरोधादेवमुक्तम् । भागवाचकाद् द्वितीयापत्तिभ्रमवारणार्थं च । अन्वयइति । कर्मत्वेति शेषः । परिच्छेदकत्वम् । निर्णायकत्वम् । तथा च विषयभूतेष्वित्यस्य प्रत्यादिद्योत्येषु तन्निर्णयेषु चेत्यर्थ इति भावः । सामर्थ्याभावादिति । वृक्षस्य सेचने एवान्वयादिति भावः । ननु प्रतिपरिच्छेद्यसम्बन्धस्य वृक्षान्वयात्सामर्थ्यं सूपपादमित्यरुचेराह । किं च प्रत्यादेरिति । क्रियाविशेषकत्वइति । इदं चिन्त्यम् । क्रियाविशेषद्योतकत्वस्य प्राचीनैरप्यनङ्गीकारात् । व्याप्यव्यापकभावसम्बन्धस्यैव तन्निर्णयत्वोक्तेः । वस्तुतस्तु प्रत्यर्थमित्यत्र प्रतिशब्दार्थः सम्बन्धो वीप्सा च । अर्थमर्थं प्रतीति विग्रहवाक्ये तु प्रतिशब्दः सम्बन्धमात्रे वर्तते न तु वीप्सायाम् । वीप्सा तु द्विर्वचनद्योत्या इति नाव्ययीभावः । तदुक्तं हरदत्तेन । अर्थमर्थं प्रतीत्यत्र प्रतिशब्दो न वीप्सायां वर्तते । किं तर्हि कर्मवचनीयत्वात् सम्बन्धमवाच्छिनत्ति । वीप्सा तु द्विर्वचनद्योत्या । अतोऽर्थमर्थंप्रतीत्यत्र नाव्ययीभावः । प्रत्यर्थमिति वृत्तौ तु वीप्सायां प्रतिरस्तीति समासो भवति प्रतिनोक्तत्वाद्वीप्साया द्विर्वचनाभावः । तथा च लक्षणेत्थंभूतेति सूत्रे वीप्सापदं तद्विषयसम्बन्धपरम् । तेनार्थमर्थं प्रतीति वाक्ये प्रत्यर्थमिति वृत्तौ च प्रतेः कर्मवचनीयत्वादुभयत्र द्वितीयासिद्धिरिति । तदेतत्सर्वमभिप्रेत्याह । वृत्तिविषयेइति । ननु क्रियायोगाभावादिति कथमुक्तं प्रतिद्योत्यसम्बन्ध क्रियागतत्वादिति चेन्न । उपसर्गाः क्रियायोगेत्यत्र क्रियायोगस्त्रेधा । स्वार्थात् प्रच्याव्य धातोरर्थान्तरे स्थापनं यथा 'अनुभवतीति' । क्वचित्क्रियागत-

विशेषोक्तिः यथा 'प्रपचतीति' । पाकगतप्रकर्षो हि प्रशब्दार्थः । क्वचितद्धात्व-र्थानुवादकत्वम् । यथा कुतो ऽध्यागच्छतीति । कर्मवचनीययोस्सम्बन्धस्तु उभयगत्वात् न क्रियामात्रगत इति भाष्याशयात् । कर्मप्रवचनीयसंज्ञायाः उप-सर्गसंज्ञापवादव्यवहारस्तु तदप्राप्तिमात्रेण । एतेन तद्द्वयोस्सम्बन्धस्य क्रियान्व-यात् तयोः प्राप्तिरिति शेखरोक्तमपास्तम् । युक्तत्वस्याभावादिति । कर्मप्रव-चनीययुक्ते द्वितीयेत्यत्र युक्तशब्दः सम्बन्धप्रतियोगिपर इति भावः । धात्वर्थ-मात्रइति । उपसर्गाः क्रियायोगेत्यत्र धात्वर्थानुवादकत्वमपि योगशब्दार्थ इति भावः । अतएवेति । उषरस्थलं त्वया सुषिक्तं किं तवात्र फलं भवति इत्यत्र सेकस्य पूजात्वेपि तत्कर्तुर्मूर्खत्वेन निन्दा प्रतीयते न पूजेति भावः । प्रथमैवेति । विन्दुपदादिति शेषः । इति द्वितीया । कर्तृप्रत्ययसमभिव्याहारेति । कर्मप्रत्यया-समभिव्याहारेत्यर्थः । भावप्रत्ययसमभिव्याहारेति वा । तेन नान्योन्याश्रयः । असाधुत्वेति । क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् । विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतमिति । अत्रविवक्ष्यतेत्युक्त्या अतथाभूतेपि वि-वक्षया करणत्वसूचनात् । कृयोगलक्षाषष्ठीति । इदमयुक्तम् । कर्तृसाहचर्येण-साक्षाद्धात्वर्थश्रये कर्मण्येव षष्ठीप्रवृत्तेः । अत एव स्तोकं पाक इत्यादौ न षष्ठी । करणं तु न धात्वर्थाश्रयः । धात्वर्थे भेदेनान्वयि कर्म गृह्यते इति तु न युक्तम् ॥ मासं शयिता कुरुनधिशयिता इत्यादौ षष्ठ्यापत्तेः । मासं शयिते-त्यत्र आप्नोत्यर्थस्य कल्प्यमानत्वेन शेते इति स्वाभाविकार्थस्य मासो नाश्रयः । तेन मनसा देवीत्यादौ करणे तृतीया साध्व्येव । साहित्यमिति । विद्यमानत्व-मपि सहशब्दार्थः । तेन सहैव दशभिः पुत्रैर्दशभिः भारं वहति गर्दभीत्यत्र तृतीया सिद्धा । पुत्राणां विद्यमानत्वेपीति तदर्थः । समानकालिकेति । ता-त्कालिकेतिवत्सामानकालिकेति युक्तम् । क्रियादिमत्वमिति । पुत्रेण सहागत इत्यादौ पुत्रकर्तृक आगमनक्रियासमानकालिक आगमनकर्ता पिता आगत इति बोधः । केचित्तु समभिव्याहृतक्रियासामानकालिकत्वमेव सहार्थः । तच्च आगमनक्रिया-न्वयि । अत एव सह कृत्वा सहयुध्वेति सिद्धमित्याहुस्तन्न । सपुत्रं पितरं हन्तीति प्रयोगानापत्तेस्तस्मात् सहार्थस्य पितर्येवान्वयः । अप्रधाने इति तु पुत्रेण-सह पितुस्स्थौल्यमित्यत्र पितृपदात्तृतीयावारणाय । पुत्रनिष्ठस्थौल्यसामानकालि-

कस्थौल्यवत् पितुः स्थौल्यमिति बोधः । कर्तृत्वादेवेति । सहार्थघटकमप्यागमनं धात्वर्थवत्साध्यत्वेन भासत इति भावः । मुख्यमुदाहरणमिति । ननु तिलैः सह माषान् वपति पुत्रेण सह पितरं हन्तीत्यत्र कर्मत्वेन द्वितीया प्राप्नोतीति तदपिमुख्यमुदाहरणमिति चेत् । अस्तु । नतृतीयेति । कमण्डलुपाणिपदार्थस्य लक्ष्यलक्षणभावेन छात्रेन्वयाविवक्षायामिदम् । सविशेषणे विधिनिषेधाविति न्यायेन विशेषणे कमण्डलौ लक्षणत्वपर्यवसानसम्भवात् । लुकोदुर्वारत्वमिति । उरणसूत्रस्थमभक्तत्वे वन्तेत्यत्र हलादिःशेषो न सिध्यतीति भाष्यं तत्रत्यविवरणग्रन्थश्च प्रौढ्येति नतद्विरोधः । लक्षण इत्येव सिद्धे इत्थंभूतेति व्यर्थमिति केचित् । देवादिकस्येति ॥ तस्यापि अल्लोपे संज्ञेति रूपसम्भवात् । व्यापारवदेवेति । तज्जन्यत्वेसति तज्जन्यजनको व्यापारोत्र विवक्षितः न धात्वर्थमात्रम् । निर्व्यापारत्वादिति । पुण्यजन्यस्य दर्शने हेतोरन्यस्याभावात् । स्वज्ञानद्वारेति । ज्ञाननिष्ठं हेतुत्वं विषये आरोप्यत इति भावः । इति तृतीया । क्रियामात्रस्येति । तेन दाशगोघ्नौ संप्रदाने प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने इत्युपपन्नं भवति । तत्र कर्मसंप्रदानयोर्भक्ष्यभक्षयितृभावः सम्बन्धः । एवमन्यत्रापि यथा प्रयोगं सम्बन्ध ऊहनीयः । संप्रदानमिति महासज्ञाकरणं सर्वनामस्थानमिति वत् । सएवोद्देश्य इति । अत एव उद्देश्यत्वं चतुर्थ्यर्थ इत्यभियुक्ताः । अन्तरङ्गत्वादिति । विप्रापेक्षयेति शेषः । कर्म । फलेनाभिसम्बन्धुमिष्टम् । विप्रस्तु फलाश्रयेणाभिसम्बन्धुमिष्ट इति स बहिरङ्गः । सावकाशेति । न च क्रियया यमभिप्रैति तत्रापि यंसग्रहणाभावेन अकर्मकविषयेपि वार्तिकेन संप्रदानसंज्ञा दुर्वारेति वाच्यम् । घटो भवतीत्यत्र कर्तृसंज्ञायाश्चारितार्थ्यात् । न हि तत्र वार्तिकं प्रवर्तते अचेतनत्वेन इच्छाया असंभवात् । एवं रथो गच्छतीत्यादिसकर्मकविषयेपि कर्मसंज्ञा चरितार्थेति बोध्यम् । बाधिकेति । क्रिययेति सहयोगे तृतीया । पत्ये शेत इत्यत्र च पतिशयनयोरुद्देश्योद्देश्यिभावः संबन्ध इति भावः । केचित्तु करणे तृतीया । शयनादिक्रियया सुखादिनायं सम्बन्धुमिच्छति स सम्प्रदानमिति वार्तिकार्थ इत्याहुः । किमनयेति । कर्मणेति सूत्रं क्रिययेति वार्तिकं च व्यर्थमिति भावः । दाशगोघ्नौ तादर्थ्येइत्येव सिद्धमत आह । तत्संप्रदानकमिति । अतएव ॥ संप्रदानान्वितदानबोधार्थत्वादेव ॥ तदर्थत्वाभावेनेति ॥ मुक्तये हरिं

भजतीत्यत्र ज्ञानद्वारा हरिद्वारा भजनस्यैव गवादिद्वारा दानस्य तादर्थ्यसंभवात् । प्रौढ्येदम् । पतिमनुकूलयितुं शेत इति संप्रत्ययात् । क्रियार्थोपपदस्येति सिद्धम् । देवदत्तामिति ॥ अधिकरणसंज्ञावत् कर्मसंज्ञाप्यस्या बाधिका स्यादिति भावः ॥ ज्ञीप्समानपदेनेति । सन्नन्तस्यापि बुद्धिभक्षार्थयोरित्यनेन ग्रहणमिति भावः । ज्ञाप्यमान इत्येव सुवचम् । एवं स्पृहेराप्यमिति सुवचम् । क्रुधद्रुह । क्रोधादयो ज्ञानादिवत्सविषयाः । यं प्रतिकोप इत्यस्य यद्विषयकः कोप इत्यर्थः । दानरूपमिति । स्वत्वोत्पत्तिरित्यर्थः । नतद्वोधावृत्तिरिति । प्रातिपदिकार्थसूत्रस्थशेखरेणास्य विरोधपरिहारश्चिन्त्यः । साक्षात्प्रभृतीनि चेत्यत्र च्व्यर्थ इत्युक्तेराह । ऊर्यादिष्विति । एकस्या एवेति । एकजातीयाया इत्यर्थः । यथा इको यणचीत्यादौ । अधिकरणसप्तम्याः सतिसप्तम्याश्च प्राप्तौ आद्या बलवतीति । नित्यमिति । अत्र षष्ठ्येव । नमःस्वस्तीत्यत्र साहचर्येणाव्ययस्यैव ग्रहणात् । अव्ययत्वन्तु नात्र । लिङ्गसंख्यायोगात् । इत्यादौनेति । चतुर्थीनेत्यर्थः । स्त्रिया अपि गन्तृप्राप्यत्वेनाध्वत्वादिति भावः । तेन गन्तृप्राप्ते ग्रामे ग्रामं गच्छतीत्येव । गन्त्रनधिष्ठिते ग्रामे तु ग्रामं ग्रामायेत्युभयं साधु । नीवह्योर्गत्यर्थत्वाभावात्तद्योगे न चतुर्थी । चतुर्थी चेति वक्तव्ये द्वितीयाग्रहणं परामपि कृद्योगलक्षणां षष्ठीं बाधितुमिति वृत्तिः । इति चतुर्थी । इत्याहुरिति । परे तु सतो ध्रौव्यस्याविवक्षितत्वमिति भाष्यस्यायमर्थः । अध्रौव्यस्य सतोपि अविवक्षितत्वं ध्रुवपदव्यावर्त्यत्वेनाविवक्षितत्वम् । प्रकृतधात्वर्थव्यापाराश्रयत्वरूपाध्रौव्यस्यैव ध्रुवपदव्यावर्त्यत्वात् । यद्यपि ध्रुवपदस्य सामान्यतो व्यापारानाश्रये शक्तिः । तथापि अपायपदसंनिधानात् प्रकृतधात्वर्थव्यापारानाश्रयपरं ध्रुवपदम् । तदावेशाविवक्षणादित्यप्ययुक्तम् । तथा सति त्रस्तादिपदप्रयोगानापत्तेः । अर्थविवक्षया हि शब्दप्रयोगः । विभागोपयोगित्वेन अविवक्षणादित्यर्थे तु लोकसिद्धातिरिक्तेर्थे इत्युत्तरग्रन्थासंगतिः । पर्णद्वारेत्यप्ययुक्तम् । एवमेव ब्राह्मणस्य पितरं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्यापि कारकत्वापत्तेस्तात्पर्यग्राहकं विनापि सर्वत्र कारकमित्यस्य क्रियाजनकत्वेन विवक्षितमित्यर्थकत्वात् । तात्पर्यग्राहकमित्यप्ययुक्तम् । अपायेत्यस्याभावे नटस्य शृणोति फलानां तृप्तः माषाणामश्नीयादित्यादौ अपादानत्ववारणाय अपायेत्यस्यावश्यकत्वात् । अपायेत्युक्तौ अपाये धात्वर्थे

सत्येव अपादानसंज्ञेति न कश्चिद्दोषः । किं च स्पन्दियोगे अपादानत्वाभावाय तत् । तत्र हि विभागो न धात्वर्थ इति वक्ष्यते । व्यापाराभावबोधनायेत्यप्ययुक्तम् । धावतोऽश्वात् पतित इत्यादौ व्यापारे सत्यपि ध्रुवत्वस्य भवताङ्गीकारेण तदभावबोधनासंभव इत्याहुः । क्रियाश्रयत्वादिति । तत्त्वेन विवक्षणादित्यर्थः । शब्दरूपेति । परस्परमेषशब्दरूपवाचकशब्दोपाधिकृतो वाच्यमेषभेदः । अपायस्य । अपसरणस्य । उपादानात् । बोधनात् । एतदुत्तरं परस्परशब्दार्थस्यापायाश्रयत्वादपादानत्वं दुर्लभमिति शेषः । उभयोरित्यतः पूर्वं क्रियाभेदेपीति शेषः । क्रियायाएकत्वादिति । भेदेनाप्रतिभासमानत्वादित्यर्थः । एकत्वारोपादिति वा । परे तु पञ्चकृत्वः पचति पुनः पुनः पचति इत्याद्यनुरोधेन धातूपात्तक्रियायां एकत्वारोपाङ्गीकारेपि परस्परस्मान्मेषावपसरत इत्याद्यनुरोधेनारोपितैकत्वाविरुद्धोपि वास्तवभेदो ध्रुवत्वसम्पादक इत्यङ्गीक्रियते । अन्यथा ध्रुवत्वोपपादनासम्भवात् । तदुक्तं हरिणा । मेषान्तरक्रियापेक्षं अवधित्वं पृथक्पृथक् । मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथगिति । भाष्यानुसारिमतं तु न क्षोदसहमित्युक्तम् । प्रधानक्रियान्वयित्वेन विवक्षितं कर्तृसंज्ञमिति न परस्परशब्दार्थस्य कर्तृत्वम् अधिकमग्रे स्पष्टीभविष्यतीत्याहुः । ग्रामादायातीत्यत्र विभागस्य द्विष्ठत्वेपि देवदत्तनिष्ठसमवायस्यैव फलतावच्छेदकसम्बन्धत्वेन विवक्षणात्तेन सम्बन्धेन ग्रामस्य विभागानाश्रयत्वान्न कर्मत्वम् । देवदत्तनिष्ठविभागं प्रति प्रतियोगित्वरूपमवधित्वमस्त्येवेति पञ्चमी भवति । संयोगानुकूलइति । तेन ग्रामादायाति नगरमित्यत्र नगरस्य कर्मत्वम् । व्यधिकरणेति । वृक्षनिष्ठसमवायस्यैवात्र फलतावच्छेदकसम्बन्धत्वात्तेन सम्बन्धेन विभागव्यधिकरणो व्यापार इति भावः । बाधइति । एवमेव ग्रामं गच्छति चैत्र इत्यत्र संयोगस्य द्विष्ठत्वेन चैत्रे प्राप्तस्य कर्तृत्वेन बाधः । चैत्रनिष्ठसमवायो न फलतावच्छेदसम्बन्धित्वेन विवक्षितः किं तु ग्रामनिष्ठः स तथेत्यपि केचित् । एतेन चैत्रस्य कर्मत्ववारणाय कर्मलक्षणे परसमवेतत्वं विशेषणं देयमिति तार्किकोक्तमपास्तम् । उक्तरीत्या निर्वाहे तस्य व्यर्थत्वात् । एतेन ग्रामादायतीत्यादौ ग्रामस्य कर्मत्ववारणाय व्यापारव्यधिकरणफलाश्रयत्वं कर्मत्वं आयातेस्तु व्यापारसमानाधिकरणविभागर्थ न तु ग्रामनिष्ठो विभाग इति ग्रामस्य न कर्मत्वमिति प्रयासोप्यपास्तः । विभागद्वयानङ्गीकारेपि उपपत्तेरुक्तत्वात् ।

अपादानत्वस्यबाधइति । अपादानत्वलक्षणे फलतावच्छेदकसम्बन्धेन विभागाश्रयत्वं न निविष्टम् । किं तु विभागप्रतियोगित्वरूपमवधित्वमेवेत्यपादानस्यप्राप्तिः देवदत्तयज्ञदत्तौ परस्परं त्यजत इत्यादौ देवदत्तनिष्ठव्यापारमादाय यज्ञदत्तस्य कर्मत्वं यज्ञदत्तनिष्ठव्यापारमादाय च देवदत्तस्य कर्मत्वम् । व्यापारव्यधिकरणफलाश्रयत्वस्य कर्मलक्षणे निवेशे ऽयं प्रयासः समाश्रयणीयो भवति । फलतावच्छेदकसम्बन्धेन फलाश्रयत्वं कर्मत्वमित्याश्रयणे तु उक्तक्लेशो नादरणीयः । परे तु इमौ अन्योन्यं स्पृशतः अन्योन्यं त्यजतः । सृजस्यात्मानमात्मना इत्यादौ कर्मणः परत्वात् कर्तृसंज्ञा प्राप्नोति । न च शब्दोपाधिकृतमर्थभेदमादायात्र व्यवस्था । तथा च देवदत्तादिशब्दार्थादन्योन्यादिशब्दार्थो भिन्न एव । तथा च तत्र फलतावच्छेदकसम्बन्धेन फलाश्रयत्वं व्यापारव्यधिकरणफलाश्रयत्वं वास्तीति कर्मत्वम् । कर्तृत्वं च न तदर्थे विवक्षितं किं तु देवदत्तादिशब्दार्थे इति वाच्यम् । तथापि मेषान्तरक्रियापेक्षमिति हर्युक्तपक्षे कर्तृत्वस्य दुर्वारत्वात् । न हि हरिणा शब्दोपाधिकृतार्थभेदः समाश्रितः । तथा सति क्रियाभेदकल्पनवैयर्थ्यापत्तेः । किं च सकर्मकाणां प्रतिषेधो वक्तव्यः अन्योन्यं स्पृशत इति भाष्यविरोधः शब्दोपाधिकृतभेदाश्रयणे कर्तृकर्मणोर्भेदेन कर्मस्थाक्रियया तुल्यक्रियकर्तुरभावात् । कल्पितभेदेन निर्वाहे वास्तवाभेदमादाय दोषापादनायोगात् । तस्मात् प्रधानव्यापारप्रयोज्यफलान्वायि कर्म । प्रयोज्यातं अग्निर्माणवकं वारयतीत्यत्राग्नेः कर्मत्ववारणाय । कर्तुरिति तथायुक्तमिति च अत्रैव तात्पर्यग्राहकम् । एवं च ग्रामं गच्छति देवदत्त इत्यत्र देवदत्तस्य न कर्मत्वं फलानन्वयात् । प्रधानव्यापारान्वयी कर्ता । तेन परस्परस्मान्मेषावपसरतः अन्योन्यं स्पृशतः त्यजत इत्यादौ परस्परादिशब्दार्थस्य न कर्तृत्वम् । प्रधानाक्रियानन्वयात् । ध्रुवमपाय इत्यस्यायमर्थः । अपायो विभागानुकूलो व्यापारः तस्मिन् साध्ये ध्रुवं विभागानुकूलव्यापारानाश्रयत्वे सति विभागाश्रयः । इदमवधित्वम् । तत्र प्रत्यासत्त्या यद्विभागाश्रयत्वेनापादानत्वं तद्विभागानुकूलव्यापारानाश्रयत्वम् । तेन पर्वतात्पततोऽश्वात्पततीत्यादौ पुरुषनिष्ठविभागमादायापादानत्वं तदनुकूलव्यापारानाश्रयत्वमश्वस्यास्त्येवेत्यपादानत्वम् । एवं त्रस्तादश्वादित्यादौ बोध्यम् । यद्यपि पतनत्रासादेरपि पुरुषाश्वविभागानुकूलत्वं वास्तवमस्ति । त-

थापि यद्धात्वर्थप्रत्यपादानत्वं विभागानुकूलतद्धात्वर्थानाश्रयत्वं तस्य सुस्थमेव । ननु परस्परस्मान् मेषावित्यादौ धात्वर्थैक्याद्दोषो दुर्वार इति चेत्सत्यम् । यत्कर्तृनिष्ठव्यापारजन्यविभागमादायापादानत्वं तत्कर्तृव्यापारानाश्रयत्वं ध्रुवत्वम् । तच्च मेषान्तरक्रियापेक्षं सुलभम् । धातुना निवृत्तभेदक्रियाप्रतिपादनेपि वस्तुतस्तत्तत्कर्तृनिष्ठक्रियाभेदोस्त्येवेति तमादाय व्यवस्थासंभवत्येव । तथा च यत्कर्तृनिष्ठविभागानुकूलव्यापारमादायापादानत्वं तद्व्यापारानाश्रयत्वं तद्व्यापारे ध्रुवत्वं फलितम् । अतो ऽध्रुवत्वस्येति भाष्यस्योक्त एवार्थः । ध्रुवमिति तु एकपर्णतात्पर्येण पर्णात्पर्णं पततीति प्रयोगवारणाय । पर्णनिष्ठविभागानुकूलव्यापारस्य पर्णे सत्वात् । एवं चैत्रश्चैत्रं गच्छतीति प्रयोगवारणाय कर्मलक्षणे प्रधानव्यापारानाश्रयत्वं विशेषणं देयम् । ग्रामादायातीत्यत्रोक्त एवार्थः ग्रामं त्यजतीत्यत्र संयोगनाशानुकूलो व्यापारस्त्यजेरर्थः । न तु विभागानुकूलः । विभागस्तु संयोगनाशाद्भिन्न एव । तेनापाय इत्युक्तेर्नात्रापादानत्वम् । अपाय इत्युक्तौ ग्रामं त्यजति ग्रामादायातीत्यनयोरविशेषप्रसङ्गः । ननु वृक्षात्पतति ग्रामादायातीत्यादौ विभागरूपफलाश्रयत्वेन कर्मत्वे प्राप्ते अपादानत्वारम्भादपादानत्वं तदपवादः स्यात् । तथा च अपादानमुत्तराणि कारकाणि बाधन्त इति भाष्यासंगतिः । किं च गोः पयो दोग्धीत्यत्र गोपयसोर्विभागाश्रयत्वविशेषात्कर्मत्वं अपादानत्वं वा स्यादिति चेन्न । पतत्यायात्योर्व्यापारसमानाधिकरणो विभागोर्थः । सामानाधिकरण्यविशिष्टविभागत्वं फलतावच्छेदकम् । विभागस्यैकत्वेपि तदवच्छिन्नाधिकरणत्वं न वृक्षग्रामयोरिति न कर्मत्वप्राप्तिः । वृक्षग्रामनिष्ठविभागीयसमवायस्य फलताच्छेदकसंबन्धत्वानङ्गीकाराद्वा । तथा च ग्रामं त्यजतीत्यत्र विभागस्य फलत्वाङ्गीकारेपि न दोषः । ग्रामनिष्ठविभागीयसमवायस्यैव फलतावच्छेदकसंबन्धत्वेन तेन संबन्धेन फलाश्रयत्वाद् ग्रामस्य कर्मत्वम् व्यापारसमानाधिकरणविभागानुकूलव्यापार एवापायशब्दार्थ इति त्यजति योगे नापादानत्वम् ॥ अपादानत्वस्य कर्मत्वेन बाधो वा । त्यजत्यर्थशरीरे व्यापारव्यधिकरणत्वनिवेशो व्यर्थ एव । ग्रामनिष्ठसमवायस्यैव फलतावच्छेदकसंबन्धत्वे वास्य तात्पर्यम् । एकव्यापारार्थकत्वे पयोनिष्ठसमवायस्य फलतावच्छेदकत्वेन तस्य कर्मत्वम् । गोस्तेन संबन्धेन विभागानाश्रयत्वान्न कर्मत्वम् । व्यापारद्वया

र्थकत्वे तु प्रधानव्यापारानाश्रयत्वाद् ध्रुवत्वं गोरित्यपादानत्वं प्राप्तं कर्मत्वेन बाध्यत इत्याशयेनापादानमुत्तराणीत्युक्तं भाष्ये । विभागानुकूलव्यापारस्यापाय शब्दार्थत्वे तु व्यापारद्वयार्थकदुहेरतथात्वान्न गोरपादानत्वप्रसक्तिः । तथापि नयतेरिव विशेषणतया ऽपायार्थत्वमाश्रित्य बाध्यबाधकभाव उक्तो भाष्ये । अपायमित्यस्य प्रयोजनमुक्तमेवेत्याहुः । अविवक्षणादिति । स्वरूपत एवेत्यर्थः । अवधित्वेनोपयोगित्वेनेत्यन्ये । भयम्भीरिति । क्विबन्तावेताविति भावः । धातुनिर्देशे तु व्यधिकरणबहुव्रीहिराश्रयणीयः स्यादिति भावः । सर्वसंज्ञापवादइति । इदमयुक्तम् । संज्ञान्तराप्राप्तिविषये चोराद्बिभेतीत्यादौ चारितार्थ्यात् । तस्मात् कस्य बिभ्यति देवाश्चेत्यादौ हेतुत्वस्याविवक्षायां संबन्धित्वेन विवक्षायामपादानत्वाभावाय । हेतुग्रहणे तु हेतुत्वेन विवक्षायामेव तत् । भयग्रहणं किम् । दुर्भिक्षेणेन त्रायतेत्यत्र मा भूत् । हेतौ तृतीयैव यथा स्यात् । भयहेतुरित्युक्तौ तु भयत्राणार्थकत्राधातुयोग एवैषा । तेनान्नस्य हेतोस्त्रायत इत्यपि सिद्धम् । अन्यथा कारकविभक्तेर्बलवत्त्वात् पञ्चम्येव स्यात् । तिरस्कारेति । नन्वत्र कर्मसंज्ञा बाधिकेति चेन्न । अध्ययनात्पराजयतेत्यत्रापि अध्ययनविषयकग्लानिबोधेन तत्रापि घटं जानाति भार्यामीर्ष्यतीति वत् कर्मत्वप्राप्तेः । संयोगादीति । कूपादन्धं वारयतीत्यत्र संयोगः । पापान्माणवकं वारयतीत्यादिसंग्रहायादिपदम् । अत्र कूपो मत्संयुक्तो भूयादिति नान्धस्येच्छा तथापि उत्तरदेशो मत्संयुक्तो भूयादितीच्छामादाय कूपस्य अन्धेप्सितत्वम् । व्यापारमात्रस्याक्षेप इति पाठः । प्रयोजककाङ्क्षायामिति शेषः दर्शनाभावानुकूलइति । दर्शनाभावेच्छयेति वक्तुमुचितम् । प्रत्यासत्तिलब्धमिति । तथा च तस्या अप्रयोगान् नोभयप्राप्तावित्यस्यायं विषय इति भावः । विशिष्टस्याक्षेपलभ्यत्वेपीति । वस्तुतस्तु कर्मसंज्ञात्र बाधिका भविष्यति । तस्मान् मात्रा स्वस्यादर्शनमिच्छतीत्यत्र मातुर्मा भूत् । न च कर्तृसंज्ञा बाधिका । अन्तर्धावित्यस्याभावे अपादानत्वस्य कर्तृत्वापवादत्वापत्तेः । अन्तर्धावित्युक्तौ तु दर्शनाभावेच्छापूर्वकव्यवहितदेशस्थितिपर्यन्तार्थकधातुयोग एव अपादानत्वमिति न कश्चिद्दोषः । माया शबलम् । मायावच्छिन्नम् । जगदुपादानेति । विवर्त्तोपादानमिति शङ्करमतम्, । परिणाम्युपादानमिति भट्टभास्करमतम्, । यथोर्णनाभिः सृजते गृह्णते चेति दृष्टान्तानुरोधात् । ब्रह्मशरीरं मायोपादानं न तु ब्रह्म न ह्यूर्णनाभिश्चेतनः तन्तूपा-

दानं किं तु तच्छरीरं तथात्रापि औपचारिकमिति परे, । तत्रप्रकाशतइति । प्रथममित्यस्याध्याहारोपि धातोर्न प्राथम्यमर्थ इति । बोध्यम् । शेषत्वविवक्षया । तेन आजघ्ने इति आत्मनेपदसिद्धिः । तत्राकर्मकाधिकारादविवक्षितकर्मणोप्यकर्मकत्वात् । इतिशेषइति । तेन न ल्यब्लोप इति भावः । न पञ्चमीति । ननु निपातानां द्योतकत्वेन नात्र दोषः । अन्यथा पटपदोत्तरं षष्ठी स्यात् । एवं घटाद्भेद इत्यत्रापि न दोषः । अन्यपदेन विशेषणतया वा अन्यत्वार्थकग्रहणात् । इत्यरुचेराह । घटादेकइति । अर्थग्रहणे ऽत्र पञ्चमी स्यादिति भावः । एवं त्वशब्दयोगेपि । असाधुत्वे गमकमाह । इतरग्रहणमिति । वचनावश्यकत्वेनेति । यतश्चाध्वकालनिर्माणमिति वचनावश्यकत्वेनेत्यर्थः । पञ्चम्यन्तार्थस्येति । स्वार्थे पञ्चमीति भावः । अतएवेति । विभक्तेत्यध्याहारादेवेत्यर्थः । विभागद्वारकं च कार्तिक्यवधिकत्वं आग्रहायण्या इति भावः । कार्तिकीमादाय गते । इदं प्रभृतीत्यस्य विवरणम् । तथा च कार्तिक्या इत्यस्य विभक्ते इत्यनेन शाब्दो ऽन्वयः प्रभृतीत्यनेनार्थोन्वयः । भवकालमादायेति । अत्र गते इति न शेषः । तथा अवीचीमारभ्येत्यत्र विभक्त इत्यस्य न शेषः । अवीचीर्भूभागविशेषः । एवमन्यत्रापीति । पाटलिपुत्रात्प्रभृति मथुरापर्यन्तं वृष्टो देव इत्यत्र । पञ्चम्याअपीति । पञ्चम्या एव ज्ञापने पुनः पञ्चम्येति सूत्रं व्यर्थं स्यादिति भावः । अस्मादेवनिपातनादिति । अनेन सूत्रेणात्र पञ्चमीत्यन्ये । तत्प्रयोजको हेतुश्चेति विहितकर्तृसंज्ञावर्जितमित्यर्थः । तेन शतेन देवदत्तेन यज्ञदत्तो बन्धित इत्यत्र न । अत्र शतं तत्प्रयोजक इति हेतुसंज्ञं कर्तृसंज्ञं च । अर्थासंगतेरिति । अत्र भावाभावान्यतरस्याङ्गीकार इत्यर्थ इति केचित् । अन्याय्यविपरीतेति । अन्याय्यविपरीतपूर्वनिपातस्य द्वन्द्वे । एतेन प्रत्युदाहरणस्य दक्षिणेन ग्राममित्यस्य पूर्वं निर्देशो निर्बीजः स्यादिति भावः । सूत्रद्वये पञ्चमीपदानुवृत्तये वार्तिकम् । द्रव्यभिन्नेति । स्तोकशब्दे द्रव्यवाचित्वस्यापि सत्त्वेन द्रव्यवचनभिन्नेत्यर्थो न संभवतीति भावः। अर्थभेदाच्छब्दभेदे तु तथोक्तावपि न दोषः। द्रव्याभिन्नवचनत्वं विशेष्यतया विवक्षितम्। ननु धर्मवचना अपीति वक्ष्यमाणत्वात्सर्वनामपरामर्शयोग्यत्वं स्तोकत्वस्यास्तीत्यरुचेराह । लिङ्गेति । नपुंसकभिन्नलिङ्गेत्यर्थः । परंपरयेति । द्रव्यद्वारेत्यर्थः । स्तोकंपचतीति । ज्योतिष्टोमेन यजेतेतिवत् करणतया फलस्यान्वये तु तृतीयापञ्चम्यौ

भवत एवेति बोध्यम् । द्रव्यविशेषणभिन्नवचनत्वं अद्रव्यवचनत्वमित्यन्ये । इति पञ्चमी । तत्तद्रूपेणेति । चैत्रसंयुक्ते धने देवदत्तस्येदं न चैत्रस्येत्यादौ । संबन्धत्वेनेति । देवदत्तस्य पुत्रपाणिकम्बलनीत्यादौ । तन्मूलकेसंबन्धइति । यथा छात्रस्य हसितं अहेः सृप्तं इत्यादौ कर्तृक्रियाभावमूलकजन्यजनकभावसंबन्धविवक्षा । समूहइति । निरूप्यनिरूपकभावापन्न इति शेषः । प्रत्येकं तु न संबन्धत्वम् । अद्विष्ठत्वात् । संसर्गविधयेति । लाघवात् प्रकारतयाभाने तत्प्रतियोगिकसंबन्धान्तरस्य भानमङ्गीकर्तव्यमिति गौरवम् । प्रत्यर्थः प्रधानं इति व्युत्पत्तिशरीरे प्रधानपदं प्रकारतान्यविषयतावत्परम् । संबन्धस्यैवेति । तथा च सतां गतमित्यादौ सर्वत्र जन्यजनकभावसंबन्धस्यैव विवक्षेत्यर्थः । संयोगसंबन्धावच्छिन्नेति । संयोगसंबन्धेपि न षष्ठी । चैत्रसंयुते अन्यस्वामिके धने चैत्रस्येदं धनमिति प्रयोगापत्तेः । अत एव मतुप्सूत्रे भाष्ये पर्वते वृक्षाः सन्ति न तु ते तस्य किं चित् इति । तस्याएवेति । अन्यतरस्यां ग्रहणं समुच्चयार्थमिति भावः । मातुर्गुणस्मरणमिति । गुणैर्मातुः स्मरणमित्यर्थः । गुणानां करणानां शेषत्वविवक्षया षष्ठी । भवत्येवेति । अनेन षष्ठ्यां तु समासो न स्यादिति शेषः । तत्र हेतुः समासनिषेधादिति वक्ष्यमाणः । अतएवेति । शेष इत्यस्यानुवृत्तेरेवेत्यर्थः । अविवक्षितइति । अन्ये तु धातूनामनेकार्थत्वाद्वचिः करोत्यर्थे । ल्युट् च कर्तरि । तथा च वचनशब्दः कर्तृशब्दसमशील इत्याहुः । कर्मत्वेनविवक्षायामिति । इदमुपलक्षणम् । हिंसायां चोरस्य क्राथनमित्यस्यानापत्तिः । हेतुमण्णिचि प्रेरणाबोधापत्तेः । क्रथक्रथमित्यादेरिति । ननु निपातनात्परत्वाच्चिण्णमुलोरिति दीर्घविकल्पे क्रथं क्रथमित्यस्य सिद्धिः । क्रथयतीत्यादि तु नेष्यत एवेति चेन्न । निपातस्य शेषषष्ठीसंनियोगशिष्टत्वाभावे णिच्संनियोगविशिष्टत्वे चान्तरङ्गत्वाद्दीर्घे पश्चात्प्रवर्तमानदीर्घविकल्पेन जातस्यानिवृत्तेः । एवं सति मित्ववैय्यर्थ्यमापततीति चेन्न । तद्वलेन चौरादिकत्वमपीति कुतो न कल्प्यते । घटादिस्थत्वचौरादिकत्वयोः कल्पने सूत्रे क्राथेति निर्देशोप्युपपन्नः । क्रथयतीत्यपि सिध्यति त्वन्मते निपातनाद्वृद्धिः कल्प्या । मित्वसामर्थ्येन क्रथं क्रथमित्यादौ जातनिवृत्तिश्च कल्प्या । मन्मते तु चुरादिन्त्वमेकं कल्प्यम् । तदप्याकृतिगणत्वात्सिद्धमिति कल्पनालाघवम् । एवं सति घटादेः क्रथं क्रथं क्रथयति अक्राथि इति च सिध्यति ।

तव तु तन्न सिध्येदित्यभिप्रायेण कथयतीत्यादेश्चानापत्तिरित्युक्तम् । अकथीत्यादेश्चेति पाठस्तु सुगमः । द्वयारम्भाच्चेति । ग्रामस्येति कर्मणि द्वितीयया सिद्धम् । न च शेषत्वविवक्षायां द्वितीयार्थम् । वैदिकोदाहरणे शेषत्वविवक्षयैव प्रयोग इत्यत्र मानाभावात् । विभाषोपसर्गे इति च व्यर्थमेव । समासविकल्पस्य शेषषष्ठ्यैव सिद्धौ दिवस्तदर्थस्य नोपसर्गेति न्यासेनैव सिद्धेः । द्वितीयार्थमिति । शेष इत्यस्य संबन्धे कर्मत्वाविवक्षायां कर्मणि द्वितीयेत्यनेनैव द्वितीयासिद्धौ एतन्नाष्यासंगतिरिति भावः । वेदे शेषत्वविवक्षयैव द्वितीयान्तप्रयुक्तामित्यत्र उपक्रमोपसंहारादिकं तात्पर्यलिङ्गं न किंचिदास्ति । भावेऽण्ठस्येति । इदं चिन्त्यम् । शेषषष्ठ्या उक्तप्रयोगासिद्धेः । एतत्सूत्रद्वयेति । विभाषोपसर्गे द्वितीयाब्राह्मणेति सूत्रद्वयेत्यर्थः । भाष्यन्त्विति । नित्यषष्ठीप्राप्तौ द्वितीयार्थमिति भाष्यमित्यर्थः । सुधियोविभावयन्त्विति । केचितु वृत्त्यादिप्रामाण्यात् कर्मादीनामविवक्षा शेष इति भाष्ये बहुवचननिर्देशाच्च कृत्वोर्थेत्यत्र शेष इति संबध्यते । न च षष्ठीशेषेति सूत्रोक्तं भाष्यकृतास्मृतमिति वाच्यम् । अत्र मानाभावात् । दिवस्तदर्थस्येति सूत्रे शेषपदं न संबध्यते । उत्तरसूत्रद्वयारम्भात् । शतस्य दीव्यतेति भावे लकारस्तु शतस्येत्यत्र शेषे षष्ठीमाश्रित्य सुलभः । न चैवं सूत्रोपात्तसकर्मकाणामकर्मकवचनमिति वार्तिकवैयर्थ्यमिति वाच्यम् । कर्मणि षष्ठ्यामेव मातुः स्मर्यतेत्यादौ भावे लकार इत्यभिसंधाय वार्तिकप्रवृत्तेः । शेष इति वर्तते इति प्रत्याख्यानभाष्यं तु स्मराम्यहं मातरमिति प्रयोगसिद्ध्यर्थं मुख्यतः प्रवृत्तम् ॥ आनुषङ्गिकं तु मातुः स्मर्यतेत्यत्र भावे लकारसाधनम् । अधीगर्थादयः प्रेष्यब्रुवपर्यन्ता इति कैय्यटग्रन्थे तु दिवस्तदर्थस्येत्येतदाभिन्ना इति पूरणीयम् । नपदान्तसूत्रे वरेयलोपस्वरवर्ज्यद्विर्वचनादीनीति भाष्यग्रन्थे पर्युदासकोटौ दीर्घपदस्य भवता पूरणात् एवं च सति द्वितीया ब्राह्मणेति सूत्रस्य भाष्यमप्युपपन्नम् । ज्ञो विदर्थस्येत्यत्रापि शेष इति संबध्यते अन्यथा मण्डूकानुवृत्तिस्वीकारापत्तेः । शतं दीव्यतीत्यादितु अर्थान्तरे साधु ॥ एवं च अक्षैर्दीव्यतीत्यत्रापि दिवस्तदर्थस्येति षष्ठीभवत्येव । क्रीडाव्यवहाराभ्यामन्यत्राक्षैर्दीव्यतीति प्रयोगः । अनयोरर्थयोस्तुतृतीयां बाधित्वा परत्वात्षष्ठ्येव ॥ मनसा देवी इति तु स्तुत्याद्यर्थान्तरे साधु । एतेन प्रतिपदविधानाषष्ठी न समस्यत इति वचनं षष्ठीविधानसामर्थ्यलभ्यमिति केन चिदु-

क्रमपास्तमित्याहुः ॥ कर्तृकर्मणोःकृति ॥ भेदेनान्वयेति । वस्तुतः साक्षाद्धात्वर्थाश्रय इत्युचितम् । तेन वैकुण्ठमधिशयितेत्यादौ न षष्ठी। प्रसङ्गादाह ।किंचेति । परे तु मतरीत्यानेति विशेष्य एव द्वितीयान्तस्यान्वयः ॥ विशेष्ये बाधात्तु विशेषणे स पर्यवस्यतीति रीत्येत्यर्थः। इदं चिन्त्यम् । द्वितीयायाःकारकविभक्तित्वेन शब्दतः क्रियान्वय एव प्रवृत्तेः । मलोपवचनंव्यर्थमेवस्यादिति । इदमुपलक्षणं मलोपवचनमसंगतमेव स्याद् मकारस्यैवाभावाद् इत्यर्थस्य। न च षष्ठीबहुवचने आमि तत्संगतिः। क्रियाविशेषणे बहुत्वाभावेन बहुवचनाप्रवृत्तेः। वाक्येमलोपश्चेति । इदमयुक्तं गौरवेण तथा नोक्तमिति समाधानसंभवात् । वैयधिकरण्यादिति । विशेष्येण सामानाधिकरण्याभावादित्यर्थः ॥ समासाभावात् । विशेषणं विशेष्येणेति समासाभावात् । नसार्वत्रिकइति । परे तु भूतपूर्व इति निर्देशेन विस्पष्टादीनीति वचनेन च सुप्सुपेति समासोऽवयवद्वारकसामर्थ्येपि प्रवर्ततेऽत एव नात्यायतकृष्टचाप इति रघुकाव्यप्रयोगः संगच्छते । तत्र हि नात्यायतेति क्रियाविशेषणम् । एवं पुरुषः सततोत्थितः नित्यप्रवासी शीघ्रभोजी भृशगामीत्यादयः प्रयोगाः संगच्छन्ते। मलोपवचनं तु व्यस्तप्रयोगे तथासाधुत्वार्थं वाक्ये मलोप इति गौरवान्नोक्तमित्याहुः । कर्तृत्वाभावे इत्येव पाठः ।कर्तुः कर्तृत्वाभावे इति पाठे तु कर्तृपदमाधिशब्दार्थो ऽध्यारोहणाश्रयपरम्।न लोकेत्युत्तरार्थं कृद्ग्रहणमित्याशङ्क्याह । नलोकेतिसूत्रेइति । ननु पुत्रेण सहेत्यत्र कर्तृत्वादेव तृतीया सिद्धेति भाष्यात् क्वचिदव्ययार्थस्यापि साध्यत्वेन भानमिति सहयोगे षष्ठीवारणाय कृद्ग्रहणफलं संभवतीति चेन्न।नलोकेति निषेधेनादोषात्। कृदव्ययस्यैव ग्रहणमिति शेखरस्तु प्रायोभिप्रायः। भेदिका देवदत्तस्येति । स्त्रीप्रत्यययोरिति नियमस्य प्रतिषेधः । कर्तरिकर्मणिचेति । अत्र कर्तरीत्यस्योदाहरणं चिन्त्यम् । तादृशक्रियाकर्तुरनभिहितस्य कुत्राप्यदर्शनादिति केचित् ।परे तु पाचितपूर्वीतण्डुलं देवदत्तेन यज्ञदत्त इत्युदाहरणं कर्तुः संभवत्येव। अत्र ण्यर्थकर्तरीनिः। न प्रकृत्यर्थकर्तरि । प्रधानाप्रधानयोरिति न्यायात्। प्रकृत्यर्थस्य णिजर्थविशेषणत्वेन इनिप्रत्ययार्थविशेषणत्वासंभवाच्चेत्याहुः । पृथक्प्रयोगेणेति । तेन देवदत्तेन पक्त्रिममित्यादौ षष्ठी नेति सूचितम । एवमवाणनुणःणचस्त्रियामञ् इत्येतद्विषयेपि कर्तृकर्मणोरिति न तत्र तद्धितं विना कृदन्तस्याप्रयोगेण कृदन्तशक्तिग्रहप्रयोज्यक्रियाकर्तृकर्मणोरभावात् । केचित्तु तद्धिताभिव्यक्ते मा-

भूदित्येतदर्थं कृद्ग्रहणं तण्डुलानां पाचकतर इत्यादौ तु अन्तरङ्गः कारकयोगः पश्चादतिशययोग इति न दोष इत्याहुः ॥ वृत्तिर्नस्यादिति । वृत्तस्य विशेषणयोगो नेति तु न शङ्क्यम् । शरैः शातितपत्र इत्यादाविव वृत्तक्रियायामपि कारकान्वयस्वीकारात् । एवं तण्डुलानां पाचकपुत्र इति समासः । तण्डुलानां पाचाकिरिति इञ् प्रत्ययश्च भवत्येव । ननुक्तपू ॥ १ ॥

इति श्रीमद्राघवेन्द्राचार्यविरचितायां लघुशब्देन्दुशेखरव्याख्यायां विषमपदवाक्यविवृतौ कारकप्रकरणम् ॥ ॥ अविघ्नमस्तु ॥

१ एतावान्कारकस्य भाग उपलब्धः । तदुपरितनपर्यन्तं प्रति प्रकरणं किंचित् त्रुटितमेव वर्तते इति नास्यामावृत्तौ मुद्रितोऽग्रिमो भागः ।

—— * ——